श्रीगोपालशास्त्रिदर्शनकेसरिविरचितः

पाणिनीयप्रबोधः

कुलपतेः डॉ० मण्डनमिश्रस्य 'शिवसङ्कल्प'-पुरोवाचा पुरस्कृतः

सम्पादकः
डॉ० गिरिजेशकुमारदीक्षितः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

सरस्वतीभवन-ग्रन्थमाला

[१०१]

श्रीगोपालशास्त्रिदर्शनकेसरिविरचितः

पाणिनीयप्रबोधः

कुलपतेः डॉ० मण्डनमिश्रस्य 'शिवसङ्कल्प'-पुरोवाचा पुरस्कृतः

सम्पादकः

डॉ० गिरिजेशकुमारदीक्षितः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

SARASVATĪBHAVANA - GRANTHAMĀLĀ

[Vol. 101]

PĀṆINĪYAPRABODHAḤ

OF

ŚRĪ GOPĀLAŚĀSTRĪ DARŚANAKESARĪ

FOREWORD BY

DR. MANDAN MISHRA

VICE - CHANCELLOR

EDITED BY

DR. GIRIJEŚA KUMĀRA DĪKṢITA

Lecturer, Dept. of Vyākaraṇa

Sampurnanand Sanskrit University

Varanasi

VARANASI

1996

Research Publication Supervisor —

Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

❑

Published by —

Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

Available at —

Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

❑

Second Edition, 1000 Copies
Price : Rs. 100.00

❑

Printed by —

Anand Printing Press
C 27/170-A, Jagatganj
Varanasi-221 002.

सरस्वतीभवन - ग्रन्थमाला
[१०१]

श्रीगोपालशास्त्रिदर्शनकेसरिविरचितः

पाणिनीयप्रबोधः

कुलपतेः डॉ० मण्डनमिश्रस्य 'शिवसङ्कल्प'-पुरोवाचा पुरस्कृतः

सम्पादकः
डॉ० गिरिजेशकुमारदीक्षितः
प्राध्यापकः, व्याकरणविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

वाराणस्याम्

२०५३ तमे वैक्रमाब्दे १९१८ तमे शकाब्दे १९९६ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः —
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

❑

प्रकाशकः —
डॉ. हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२

❑

प्राप्तिस्थानम् —
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२

❑

द्वितीयं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम् — १००.०० रूप्यकाणि

❑

मुद्रकः —
आनन्द प्रिंटिंग प्रेस
सी २७/१७०-ए, जगतगंज
वाराणसी - २२१ ००२

शिवसङ्कल्पः

"**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा**" इत्याप्तोक्तवचन-प्रामाण्येनेदं निश्चीयते यद् भारतवर्षस्य प्राचीनतमा भाषा **संस्कृतमेव**। अस्यामेव भारतस्य सर्वस्वं सञ्चितमस्ति। भारतस्य सम्यक् **परिचयार्थं** संस्कृतभाषायाः परिज्ञानं सर्वतः पूर्वमत्यावश्यकम्। संस्कृतस्य च **परिज्ञानार्थं** व्याकरणज्ञानमनिवार्यमिति सर्वविदितम्। तत्रापि सत्स्वनेकेषु **व्याकरणेषु** विशेषेण पाणिनीयव्याकरणस्यावबोधोऽत्यावश्यकः। एवमस्या **आवश्यकतायाः** सम्पूर्तिर्यथा स्यादथ च संस्कृतभाषायाः परिज्ञानमपि सारल्येन यथा **स्यादिति** धिया पण्डितराजेन दर्शनकेसरिणा श्रीगोपालशास्त्रिणा "**पाणिनीयप्रबोध**"-नामा प्रणीतोऽयं ग्रन्थ इतः पूर्वमनेनैव विश्वविद्यालयेन प्रकाशित **आसीत्**। सम्प्रत्ययं ग्रन्थो दुर्लभो जातः।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरणविभागीयप्राध्यापकेन **डॉ० गिरिजेशकुमारदीक्षितेन** पण्डितराजश्रीगोपालशास्त्रिदर्शनकेसरिणा **प्रणीतः** "पाणिनीयप्रबोध"—नामा ग्रन्थो महता परिश्रमेण सम्पादितः, **विस्तृतया** प्रस्तावनया विभूषितश्चेति महते परितोषाय। पाणिनीयशिक्षा, **गणपाठः**, परिभाषापाठः, धातुपाठः, लिङ्गानुशासनसूत्रपाठः, अकारादिक्रमेण **सूत्रानु**-क्रमणिकेति षड्भिः परिशिष्टैः संवर्धितोऽयं ग्रन्थो विद्वद्भिर्बहोःकालात् प्रतीक्ष्यमाण इदानीं पुनः प्राकाश्यतामानीयते।

अद्यावधि पाणिनीयव्याकरणेऽतिसारल्येन छात्राणां प्रवेशाय यावन्तोऽपि प्रारम्भिका व्याकरणग्रन्था लिखिताः प्रकाशिताश्च सन्ति, तान् सर्वानप्ययं ग्रन्थो निःशंसयमनेकाभिर्दृष्टिभिरतिशेते। **अष्टाध्यायीपद्धत्या** प्रणीतोऽयं ग्रन्थोऽतीव महनीयः परमोपयुक्तः सुखप्रवेशश्च।

द्वितीयसंस्करणस्य प्रकाशनप्रसङ्गेऽस्मिन्नहं **पण्डितश्रीगोपालशास्त्रि-दर्शनकेसरिमहाशयेभ्यः** प्रणामाञ्जलिम्, सम्पादकाय **डॉ० गिरिजेशकुमारदीक्षित-महोदयाय** च धन्यवादान् तथा च प्रकाशनाधिकारिणे **डॉ० हरिश्चन्द्रमणि-त्रिपाठिने,** ग्रन्थस्यास्य मुद्रकाय 'आनन्द-प्रिंटिंग-प्रेस'-मुद्रणालयसञ्चालकाय **श्रीदिवाकरत्रिपाठिने** च साधुवादान् समर्पयन् ग्रन्थमिमं व्याकरणशास्त्र-जिज्ञासुभ्यः समुपहरामि ।

वाराणसी
रामनवमी,
वि० सं० २०५३
(२८-३-१९९६ ख्रैस्ताब्दः)

मण्डनमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

आत्मनिवेदनम्

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥१॥
येन धौता गिरः पुसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः॥२॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥३॥
वाक्यकारं[1] वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारं च प्रणमामि मुनित्रयम्॥४॥
योगेन चित्तस्य पदेन वाचां
मूलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥५॥

सर्वविदितमेतद् यदिह जगति विद्यमानेषु सर्वेषु जीवेषु मनुष्य एव हि श्रेष्ठ इति। अत्रार्थे श्रीमद्भागवतोक्तिरनायासेन स्मृतिपथमायाति –

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः[2]॥इति॥

---

१. वृत्तिकारम्।

२. श्रीमद्भाग० ११।९।२८।

मनुष्य एकाकी स्वजीवनं कृतार्थयितुं न शक्नोति, तस्य भौतिके आध्यात्मिके च पथि येन केनापि रूपेण वर्तत एव स्वेतरमनुष्यापेक्षा। तत्र परस्परं व्यवहारो नितराम-पेक्षितो मानवजीवननिर्वाहार्थम्। परस्परं व्यवहारश्च स्वाभिप्रायसङ्क्रमणरूपसाधनं विनाऽसम्भवः। अयञ्च स्वाभिप्रायसङ्क्रमो यद्यपि सङ्केतेनाऽपि कर्तुं शक्यते[1] तथापि यादृशः सङ्क्रमः शब्देन सम्भवति न तादृशः केनाप्यन्येनोपायेन। अत एवोक्तं निरुक्तकृता यास्केन –

"अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके"[2] इति॥

दण्डिनाप्युक्तम् –

वाचामेव प्रसादेन लोकयात्रा प्रवर्तते[3]।

एवं स्वाभिप्रायसङ्क्रमणार्थं शब्दज्ञानमावश्यकमिति निश्चप्रचम्। शब्दज्ञानञ्च व्याकरणाधीनमेव। भर्तृहरिणाप्युक्तम् –

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते[4] ॥ इति॥

अभिप्रायसङ्क्रमार्थो हि यः शब्दः स व्यक्तशब्द एव नाव्यक्तशब्द इति नाविदितं प्रेक्षावताम्। तत्र व्यक्तशब्दोऽपि साधुरसाधुभेदाभ्यां द्विविधः। एवं द्विविधे शब्दभेदे साधुशब्दप्रयोग एव शास्त्रीयलौकिकोभयदृष्ट्या प्रशस्तः। अत्रार्थे भाष्यसम्मतिः –

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योग्विद् दुष्यति चापशब्दैः[5] ॥ इति॥

लोकव्यवहारेऽस्माभिर्ये शब्दाः प्रयुज्यन्ते तेऽपरिमिताः सन्ति। एतस्मिंश्चातिमहति प्रयोगविषयके शब्दवाङ्मये के शब्दाः साधवः ? के चासाधवः ?, कथञ्च तेषु साधुत्वा-साधुत्वपरिज्ञानम् ? इति सर्वं व्याकरणशास्त्रज्ञानमन्तरेण निर्णेतुं न शक्यते। वाक्यपदीये श्रीमता भर्तृहरिणा चोक्तम् –

---

१. अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था विज्ञायन्तेऽक्षिनिकोचये पाणिं विहाय च।

२. निरुक्तम् – १।२।५।

३. काव्यादर्शः – ३।

४. वाक्यपदीयम् – १।१३।

५. महाभाष्यं पस्पशा०।

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः[1] ॥ इति ॥

शब्दानां साधुता च शिष्टप्रयोगे निहिता। देशकालादिभेदेन शिष्टा अपरिमिता अपरिमिताश्च शिष्टप्रयुक्तशब्दाः, इत्युभावप्यपरिमिताविति स्पष्टम्। मानवप्रज्ञा च परिमितेति सर्वैरनुभूयते। अतो हेतोः परिमितया मानवप्रज्ञयाऽपरिमितशिष्टप्रयोगविषयकसाधुत्व-परिज्ञानं प्रतिशब्दं कथमपि कर्तुं न शक्यते। महाभाष्ये भगवता भाष्यकारेण पतञ्जलिनाऽप्युक्तम् –

"अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते – बृहस्पति-रिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चास्यागम-कालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्मादनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः"[2] इति।

पुनश्चाग्रे –

"कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत् ? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः। कथंजातीयकः पुनरुत्सर्गः कर्तव्यः ? कथं जातीयकोऽपवादः ? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा – 'कर्मण्यण्' । तस्य विशेषेणा-पवादः। तद्यथा – "आतोऽनुपसर्गे कः"[3] इति।

एतेनेदमायातं यदुत्सर्गापवादरूपाभ्यां सामान्यविशेषनियमाभ्यां शिष्टप्रयुक्तशब्दानां सरलतया पूर्वं ज्ञानमनन्तरं तेषां प्रयोगो जायते। एवं 'यदि तर्हि शिष्टाः शब्देषु प्रमाणम्, किमष्टाध्याय्या क्रियते ? इत्याशङ्क्य 'शिष्टपरिज्ञानार्थाऽष्टाध्यायी'[4] इति पतञ्जलिना प्रतिपादितम्। भर्तृहरिणाप्येवमेव प्रतिपादितम्। तद्यथा –

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धम्[5] ॥ इति ॥

---

१. वाक्यपदीयम् – १।१४१।
२. महाभाष्यम् – पस्पशा०।
३. महाभाष्यम् – पस्पशा०।
४. महाभाष्यम् – ६।३।१०९।
५. वाक्यपदीयम् – १।१४१।

अयं भावः – साधुशब्दप्रयोगरूपस्य शिष्टानां समाचारस्याविच्छेदेन वर्तमानत्वात्तस्मिन् तस्मिन् काले तैस्तैर्व्याकरणप्रणेतृभिः शिष्टसमाचारविषयान् साधुशब्दान् स्मृत्वा तत्तद्व्याकरणं प्रणीतम्। व्याकरणेऽप्येते शब्दाः साधवोऽमी नेति केवलमुच्यते, न चायमुपदेशोऽर्थावबोधप्रयुक्त इति विधिः, असाधुष्वपि तुल्यत्वात्। न चानर्थक्यम्, स्मृतित्वादस्येति साधुशब्दानां धर्मसाधनत्वबोधनद्वाराऽभ्युदयाङ्गतैव तेषां व्याकरणस्मृत्या बोध्यत इत्येवं साधवः प्रयुज्यमाना धर्मसाधनं नान्य इति शब्दोपनिबन्धनं विनाऽपि साधुशब्दप्रयोगमात्रं विदधती व्याकरणस्मृतिरेव साधुशब्दानां धर्मसाधनत्वे प्रमाणमिति। अतः सा एषा साम्प्रतमुपलभ्यमाना पाणिनीयाऽष्टाध्यायी साधुत्वज्ञानविषया साधुत्वज्ञानं कार्यत्वेन विषयो यस्यास्तथाभूता व्याकरणस्मृतिः। इदं व्याकरणं शिष्टानां साधुशब्दानां प्रयोगरूपस्य समाचारस्याविच्छेदेन स्मृतिनिबन्धनम्, स्मृतिः साधुशब्दानां स्मरणम्, निबन्धनं स्मरणे निमित्तं यस्य तथाभूतमिति निर्गलितोऽर्थः।

इमां पाणिनीयामष्टाध्यायीमेव संक्षिप्य तत्सारभूतः 'पाणिनीयप्रबोधः' इति ग्रन्थः म. म. पं. गोपालशास्त्रिदर्शनकेशरिभिः प्रणीतो यथाकालं प्रकाशितश्च।

पाणिनीयप्रबोधस्य प्रणेता –

स्व० महामहोपाध्यायानां गोपालशास्त्रिणां दर्शनकेशरिणां व्याकरणशास्त्रसाधनाविषये व्याकरणाध्यापनविषयेऽथ च प्रस्तुते पाणिनीयप्रबोधाख्यग्रन्थविषये किञ्चिद् विनिवेदनं मन्येऽस्माकं सौभाग्यसूचकं कर्तव्यरूपात्मकं वा स्यादिति मत्वाऽतिसंक्षेपेण शब्दद्वयात्मकं शब्दत्रयात्मकं वा किञ्चिदुक्त्वाऽऽत्मानं कृतार्थयितुमिच्छामि। कोमलबुद्धिबालकानां कृते पाणिनिव्याकरणाध्ययनसौकर्यसम्पादनधिया शास्त्रिवर्यैर्दर्शनकेशरिभिरनेके ग्रन्थाः प्रणीता यथाकालं प्राकाश्यञ्चानीताः। तेषु (१) पाणिनीयप्रबोधः (२) संस्कृत-शिक्षकः (३) ऋजुपाणिनीयम् (४) बृहदृजुपाणिनीयमित्यादयोऽनेके ग्रन्था इदानीमस्माकं पुरतो विराजन्ते। एतदतिरिक्तं पाणिनिप्रणीताया अष्टाध्याय्या बृहद्भूमिकासमन्वितमतिविशिष्टं सम्पादनमपि शास्त्रिवर्यैः कृतम्।

पुरा पाणिनीयव्याकरणाध्ययनाध्यापनपद्धतिरष्टाध्यायीक्रमानुसारिण्यासीत्। अष्टाध्यायीमधिकृत्य कृतं पातञ्जलं महाभाष्यमष्टाध्यायीक्रमानुरूपमेव वर्तते। वार्तिककारैः सूत्राणामुपरि कृता वार्तिकरचनाऽप्येवंविधैवावलोक्यते। सैव पद्धतिः काशिकाकारेणाथ च काशिकाव्याख्याकारैश्च स्वीकृता। परन्तु कालक्रमेण पद्धतेरस्या ह्रासो जातः, समुद्भूता चाष्टाध्यायीसूत्रक्रमरहिता नवीना पद्धतिः रूपावतार-प्रक्रियाकौमुदी-वैयाकरणसिद्धान्तकौमुदी-लघुसिद्धान्तकौमुदीप्रभृतिग्रन्थेषु येदानीमप्यवलोक्यते। सा एषा नवीना पद्धतिरेव सर्वत्राध्ययनाध्यापनेषु शनैः शनैः प्रतिष्ठिता सत्यष्टाध्यायीक्रमानुसारं पठनपाठनमतिक्रम्य

विराजमाना लोकप्रिया चेदानीं सञ्जाता। फलतो याऽष्टाध्यायीक्रमानुसारिणी प्राचीना पठनपाठनपद्धतिः सा विलुप्तप्राया। परन्तु परिव्राजकाचार्येण स्वामिविरजानन्द-सरस्वतीमहाभागेन विंशशताब्द्या आरम्भे विलुप्तप्रायाऽष्टाध्यायीसूत्रक्रमानुसारिणी या प्राचीनाऽध्ययनाध्यापनपद्धतिः सा पुनः प्रचालिता, स्वामिदयानन्दैः प्रचारिता च। काशीस्थाः स्वर्गीया वैयाकरणा ब्रह्मदत्तजिज्ञासुमहाभागा अपि पद्धतेरस्याः समर्थका आसन्। तैरष्टाध्याय्या विस्तृता सरला शोभना चैका हिन्दीव्याख्या कृता। तदनु स्वर्गस्थैर्दर्शनकेशरिभिः स्वकीयैः कठिनसाधनातपस्यानुभवप्रयोगादिभिः सुबोधपद्धतेरस्याः सार्थकता पदे पदेऽनुभूता। ततः काश्यामागमने सति तत्पद्धतिप्रचारप्रसारयोरेव ते यावज्जीवनं सम्पृक्ताश्चासन्। एतैरेव साधनानुभवतपःप्रयोगैः समुद्भूतस्यास्य पाणिनीय-प्रबोधाख्यस्य प्रस्तुतस्य ग्रन्थस्य सम्पादनकार्यं कुर्वन्नहमात्मानं महत्सौभाग्यशालिनं कृतकृत्यञ्चानुभवामि।

पाणिनीयप्रबोधस्यास्य ग्रन्थस्याध्ययनाध्यापननिमित्तकं यद् आवश्यकं ज्ञानं तद् यथा ग्रन्थप्रणेतृभिर्दर्शनकेशरिभिरनुभूतं न तथाऽन्यैरनुभवितुं शक्यते। अतस्तैस्तैरनुभवैः सम्प्राप्तं विषयोपयोगि समग्रं ज्ञानतत्त्वं ग्रन्थस्यास्य प्रथमसंस्करणे शास्त्रिवर्यैर्यत्प्राक्कथनं व्यलेखि तत्रैव सप्रपञ्चं समुपस्थापितम्। अतो ग्रन्थपरिचायकं प्राक्कथनमिदमत्यन्तं महत्त्वपूर्णमिति मत्वाऽस्माभिर्ग्रन्थस्यास्य द्वितीये संस्करणेऽपि सम्पादकीयवक्तव्यानन्तरं पुनः प्रकाशनार्थमुपन्यस्यते। मन्येऽनेन जिज्ञासूनां छात्राणामन्वेषाञ्च महान् लाभो भविष्यतीति। प्राक्कथने तस्मिन् किञ्चिदावश्यकं परिवर्तनं परिवर्धनञ्चास्माभिर्यत्र तत्र विहितमेतदर्थं क्षमां याचे।

ग्रन्थस्यान्ते छात्राणां सौविध्याय सर्वतः पूर्वं पाणिनीयशिक्षा पञ्जिकाख्यभाष्यसहिता प्रथमे परिशिष्टे समुपन्यस्ता। द्वितीये परिशिष्टे सम्पूर्णो गणपाठः, तृतीये परिशिष्टे नागेश-सम्मतपरिभाषापाठः, चतुर्थे परिशिष्टे पाणिनीयप्रबोधे समागता ये धातवस्तेषां क्रमेण सङ्ग्रहः, पञ्चमे परिशिष्टे लिङ्गानुशासनसूत्रपाठः, अन्तिमे **षष्ठे च** परिशिष्टे पाणिनीयप्रबोधे समागतानां सूत्राणामकारादिक्रमेण सूची वर्तते।

पाणीनीयप्रबोधस्यास्मिन् **सम्पादनकार्ये मध्ये मध्ये बहवोऽन्तरायाः** समागतास्तेन महता बिलम्बेनास्य सम्पादनरूपकार्यस्य समाप्तिर्जाता। सम्पादनकार्यप्रारम्भसमय एव प्रातःस्मरणीयानां परमपूज्यानामस्मत्पितृचरणानामसामयिकपरलोकयात्राजन्यक्लेशेनात्यन्तं दुःखितः, पितृवात्सल्यस्नेहाद् वञ्चितः, पितुर्ज्येष्ठपुत्रत्वात्पारिवारिकसदस्यानां दायित्वेना-क्रान्तश्चित्तवैकल्यात्किंकर्त्तव्यविमूढश्चाहं बहुकालपर्यन्तं कार्यादस्माद् विरक्तः। एवमेव शनैः शनैः षण्मासा व्यतीताः। कस्मिंश्चिदपि कार्ये प्रवृत्तिरेव न जाता। अनन्तरं गच्छता कालेनैकदा रात्रावेवमनुभूतं यत्पितृचरणा यथा पूर्वं ग्रामतो मत्पार्श्वं समागच्छन्ति

स्म तथैवाद्यापि ते मत्पार्श्वं समागत्यैवं कथयन्ति यद् ''बहूनि कार्याणि करणीयानि सन्ति। त्वमत्र वाराणस्यामेव निवससि, ग्रामं नागच्छसि, कथमेवं कार्याणि सेत्स्यन्ति। तत्र ग्रामे खलु नूतनं गृहनिर्माणम्, बालकबालिकानां विवाहादिकं सर्वं करणीयं वर्तते। अहमेकाकी कथं करिष्यामीति''। एवमेवान्यान्यपि बहूनि कार्याणि नामोल्लेखपुरस्सरं मत्समक्षं सम्पादनार्थं तैरुपस्थापितानि।

निद्रासमाप्तौ प्रातःकाले जाते जागरणे कुत्रापि पितृचरणा दृष्टिपथं न समागताः। मया विचारितं यद् 'बहुकालं पूर्वमेव ते परलोकं गताः। रात्रौ न जाने कथं पुनस्ते मत्समक्षं साक्षात्समागत्यैवं मामुद्बोधयन्ति' इति विचारयतो मम मनसि महान् विस्मयो जातः। प्रायो मासं यावत् पित्रोपदिष्टानि कार्याण्येव चित्तमभिव्याप्यैवं संस्थितानि येन तदतिरिक्तं किमप्यन्यच्चिन्तनं मनसि तदानीं कदाचिदपि न प्रादुर्भूतम्। मासानन्तरमस्माभिरेवमनुभूतं यत् पारिवारिकाणां सदस्यानामन्येषाञ्च कार्याणां सम्पादनार्थं यन्महद्दायित्वं तदिदानीं दैवदुर्विपाकाद् वस्तुतो मय्येव समापतितमतोऽस्माभिस्तत्तत्कार्यपरिपूर्त्यर्थमवश्यमेव प्रयतनीयम्। मन्ये एतदर्थमेवाहमित्थं साक्षात् पितृचरणैरुपदिष्ट इति। एवं दृढ़े निश्चये जाते सति शनैः शनैरस्माकं कार्यान्तरेष्वपि प्रवृत्तिर्जाता। तत्क्रमे एव मध्ये परित्यक्तं ग्रन्थस्यास्य सम्पादनकार्यं पुनरस्माभिः प्रारब्धम्, किन्तु सम्पादनकार्यं कुर्वता मयैवमनुभूतं यदस्मत्पितृचरणेषु भुवि विराजमानेषु सत्सु कार्यसम्पादनसामर्थ्यमुत्साहो वा यथा मय्यासीदिदानीं तथा नास्ति। अत एव कार्येऽस्मिन्नस्माभिर्वर्षद्वयात्मकः कालो यापितः। पितृवियोगजन्यदुःखेनास्थिरचित्तत्वादथ च पारिपारिकसदस्यकार्यसम्पादनरूपदायित्वेनाक्रान्तत्वाच्च सम्पादनेऽस्मिन् मया तथा कार्यं न कृतं यथादौ विचार्यदं प्रारब्धम्। 'प्रारभ्य चोत्तमजना न परित्यजन्ति' इत्यभियुक्तोतिं स्मारं स्मारं येन केन प्रकारेणेदानीं सम्पन्नमिदं सम्पादनकार्यं भवतां समक्षं समुपस्थाप्य मानवसुलभप्रमादवशादथ च परिस्थतिजन्यचित्तवैकल्याद् यास्त्रुटयोऽत्र स्युस्ताः करुणावरुणालयैर्विद्वद्भिरेयैरवश्यं क्षन्तव्या इति प्रार्थयमानो विरमामि।

कृतज्ञताज्ञापनम्

अचिरादुपकर्तुराचरेदथवात्मौपयिकीमुपक्रियाम् ।
पृथुरित्थमथाणुरस्तु सा न विशेषे विदुषामिह ग्रहः॥[1]

इति श्रीहर्षोक्तिं स्मारं स्मारं 'कृतज्ञो ननु दुर्लभः' इति च विद्वदुपज्ञं वचनं ध्यायं ध्यायं कृतज्ञताज्ञापनमावश्यकं कर्मेति तत्र ममापि प्रवृत्तिः। तत्र सर्वतः पूर्वं येषां ज्ञानेन

---

१. नैषधमहाकाव्यम्।

प्रवचनेन विषयोपस्थापनकौशलेन ग्रन्थग्रन्थिभेदनपुरस्सरं मध्यमापर्यन्तं व्याकरणाध्यापनेन चाहं भृशमुपकृतस्तेऽस्मत्पितृचरणाः प्रातःस्मरणीयाः परमश्रद्धेयाः साम्प्रतं देवलोका-लङ्कारभूताः **पं० श्रीकेदारनाथदीक्षित**महाभागा एवास्माकं प्रथमे गुरवोऽतः 'वन्दे गुरु-परम्पराम्' इति कृत्वाऽऽदौ पितृचरणयोः सश्रद्धमिदं सम्पादनरूपकार्यं समर्प्य भूयो भूयो नतिततिं निवेदयामि येषामाशीर्वचसा दुरूहेऽस्मिन् कार्येऽस्माभिः साफल्यमधिगतम्।

तदनु विविधविद्यावगाहनविशुद्धान्तःकरणानां वाक्चातुर्यसम्पन्नानां पाण्डित्यप्रतापपरितापितवावदूकानां व्याकरणमूर्धन्यानां शिष्यवात्सल्यकरुणार्द्रहृदयानां परोपकारनिरतानां तपोराशिविगलितकलिकल्मषाणां देवार्यमण्डले पिण्डीग्राममलङ्कृतवतां वेदत्रयाध्ययनेनाध्यापनेन चान्वितार्थत्रिपाठिशब्दानां विद्वद्वृन्दवृन्दारकाणामस्मद्गुरुचरणानां देवलोकालङ्कारभूतानां प्रातःस्मरणीयानां **श्रीमतां भूपेन्द्रपतित्रिपाठि**महाभागानामथ चास्मिन्नेव क्रमे व्याकरणपारावारपारङ्गतानामध्यापनलेखनप्रवचनपटूनां काव्यकलाकुशलानां सम्पादितविरचितानेकग्रन्थानां 'भास्करभावभानवः' इति स्तुतिकाव्यस्य 'राधाचरितमहाकाव्यम्' इति महाकाव्यस्य च निर्माणान्महाकविषु लब्धप्रतिष्ठानां देवार्यमण्डले 'मठिया-शुक्ल' इति ग्रामं स्वजन्मनाऽलङ्कृतवतां परमपूज्यानां स्वर्गस्थानामस्मद्गुरुवराणां **पं० श्रीकालिकाप्रसादशुक्ल**महोदयानाञ्च चरणकमलेषु सविनयं साष्टाङ्गं प्रणततिसमर्पणपूर्वकं भूयो भूयः कृतज्ञतां ज्ञापयामि येषामनुग्रहेण लब्धविद्यावित्तुरहमेतादृशे कार्ये सफलतामवाप।

अतः परं प्राच्यप्रतीच्योभयविधविद्यावधूविशेषकाणां विदितसकलशास्त्रार्थानां विश्वविश्रुतयशसां भाषाविद्गोष्ठीगरिष्ठानां विद्वद्वृन्दवन्द्यपादारविन्दानां देशदेशान्तरागताऽन्तेवासिविद्याकल्पतरूणां विश्ववन्द्यसिद्धान्तानां करुणावरुणालयानां रचितानेकप्रबन्धानां प्रशासनकुशलानां राजनीतिनिपुणानां कारयित्रीभावयित्रीत्युभयविधप्रतिभाप्रतिभासितान्तःकरणानाम्—

कश्चिद्वाचं रचयितुमलं श्रोतुमेवापरस्तां
कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति॥

इति कालिदासीयोक्तेर्निदर्शनभूतानां सारावारीणब्राह्मणवंशोद्भवमौक्तिकानां **गोरक्षपुरमण्डलाऽलङ्कारभूतानां पङ्क्तिपावनानां** सर्वविद्यानां निवासभूततयाऽन्वितार्थाभिधानां देशे विदेशे च सर्वत्र समादृतानां मान्यगुरूणां श्रीमतां **डॉ० विद्यानिवासमिश्र**महोदयानां चरणारविन्दमधुलुब्धमधुकरोऽहं तेषामाधमर्ण्यं वहामि येषामुद्बोधननिर्देशाभ्यां कार्यमिदं समाप्तिमगात्।

तदनु पदवाक्यप्रमाणतत्त्वविदां साहितीसुधासुहितमानसानां साहित्यशास्त्राध्यापनेऽधिकाशि लब्धप्रतिष्ठानां ग्रन्थग्रन्थिविमोचननिपुणानां काव्यकलाकुशलानां शिष्यप्रशिष्यपरिगीतकीर्त्तीनां प्रथितयशसां गूढतत्त्वालोचकानां गोरक्षपुरमण्डलान्तर्गतमल्लग्रामाभिजनानां व्याकरणसाहित्याद्यनेकशास्त्राचार्याणां श्रीमतां **डॉ० वायुनन्दनपाण्डेय**महाशयानां कृते कृतज्ञतां प्रकाशयामि येषामाशीर्वचसा सत्परामर्शेन च कार्यमिदं पूर्णतामगमत् ।

अतः परं व्याकरणागमतत्त्वविदां शिष्यवृन्दसरोजविकासिभास्कराणां विविधविद्यावगाहनविशुद्धान्तःकरणानां शास्त्रपरिशीलनचतुराणां व्याख्याने पटूनां विद्वन्मण्डले समादृतानां सम्पादितरचितानेकग्रन्थानां व्याकरणसाहित्यन्यायवेदान्तदर्शनाद्यनेकशास्त्रमर्मज्ञानां काशीहिन्दूविश्वविद्यालये कलासङ्काये आचार्यपदमलङ्कुर्वतां मैथिलवंशमौक्तिकानां श्रीमतां **डॉ० श्रीनारायणमिश्र**महोदयानां महान्तमुपकारं नतेन मूर्ध्ना स्वीकरोमि यैः सम्पादनकार्येऽस्मिन् महत्साहाय्यमनुष्ठितम् ।

तदनु प्राचीनाधुनिकोभयविधज्ञानविज्ञाननिपुणानां परिशीलितसकलशास्त्रसिद्धान्तानां व्याख्यानकुशलानां नयविनयादिगुणोपेतानां प्रशासनपटूनां राजनीतिनिपुणानां परमोदारस्वभावानां सौजन्यसागराणां संस्कृतसंस्कृतिप्रचारप्रसारतत्पराणां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिपदं विभूषयतां श्रीमतां **डॉ० मण्डनमिश्र**महाभागानामुपकारं विस्मर्तुमक्षमोऽहं कृतज्ञतां ज्ञापयामि येषां कुलपतित्वे कार्यमिदं समाप्तिमगमत् ।

तदनु व्याकरणसाहित्याद्यनेकशास्त्रमर्मज्ञानामध्यापनप्रवचनलेखननिपुणानामध्यापितानेकशिष्याणां सौजन्यमहोदधीनां मृदुस्वभावानां लोकव्यवहारनिष्णातानामुदार**चरिता**नां निरन्तरप्रसन्नचित्तानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालये आचार्यपदमलङ्कुर्वतां व्याकरणविभागाध्यक्षाणां वेदवेदाङ्गसङ्कायाध्यक्षचराणां श्रीमतां **डॉ० आद्याप्रसादमिश्र**महोदयानां कृते कृतज्ञतां ज्ञापयामि येषां सौजन्येनोत्साहितोऽहं कार्येऽस्मिन् सफलतामन्वभवम् ।

भ्रातृवर्यैः काशीविद्यापीठे उपाचार्यपदमलङ्कुर्वद्भिः **डॉ० हरेरामत्रिपाठिभिः,** गोरक्षपुरविश्वविद्यालये उपाचार्यपदमलङ्कुर्वद्भिः **डॉ० बनारसीत्रिपाठि**भिश्च समये समये **सत्परा**मर्शप्रदानेनाहं मृशमुपकृतोऽतस्तान् प्रति हृदयेन कृतज्ञतां ख्यापयामि ।

अतः परं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनाधिकारिभिरस्माकं भ्रातृवर्यैः **डॉ० हरिश्चन्द्रमणित्रिपाठि**भिर्मध्ये मध्ये उद्बोधनं विधाय महत्साहाय्यमाचरितमतस्तान् प्रति हृदयेन कृतज्ञतां प्रकाशयामि ।

तदनु कार्येऽस्मिन् प्रत्यक्षाप्रत्यक्षरूपेण ग्रन्थसाहाय्येन ज्ञानगौरवेण वाऽस्मद्धित-चिन्तकैर्यैर्यैः सुहृद्वरैर्यथाकथञ्चिदपि मम साहाय्यं विहितं तान् सर्वान् प्रत्यपि कृतज्ञतां ज्ञापयामि ।

मुद्रणकार्यनिपुणं प्रकाशनविभागीयं सच्छिष्यं **डॉ० हरिवंशकुमारपाण्डेय**मप्याशीर्वचोभिः संयुनज्मि, येन ग्रन्थस्यास्य प्रकाशने सर्वतोभावेनानुकूल्यमाचरितम् ।

कार्यान्तरं विहायास्य ग्रन्थस्य सुष्ठु मुद्रणकार्यं यथाशीघ्रं कृतमत आनन्दप्रिण्टिङ्गप्रेस-मुद्रणालयस्याधिकारिणः कर्मचारिणश्च भूरिशो धन्यवादार्हाः ।

यद्यप्यत्र मुद्रणदोषाद् भ्रमाद्वा सन्ति कियत्योऽशुद्धयो वर्णमात्रादिविषयिण्यस्तथापि 'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः' इत्यभियुक्तोक्त्या सर्वाश्चैता अशुद्धीः कृपया स्वयं संशोध्य ग्रन्थोऽयं पठनीयस्तदर्थं क्षन्तव्यश्चायं जन इति श्रीकाशीविश्वनाथचरणयोः प्रणामाञ्जलिं विनिवेद्य विरमामि ।

वाराणस्याम्
वसन्तपञ्चमी,
वै० सं० २०५२
दि० २५/१/१९९६

विदुषां वशंवदः
गिरिजेशकुमारदीक्षितः
प्राध्यापकः
व्याकरणविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

॥ श्रीकृष्णः शरणं मम ॥

प्राक्कथनम्

(प्रथमसंस्करणस्य)

सदाऽध्येया सर्वैर्निगमसदृशी पाणिनिमुने-
रहो ! अष्टाध्यायी झटिति पदबोधप्रणयिनी ।
सुपूर्णा वैज्ञानी ध्रुवमतिशयाह्लादजननी
स्वयं स्वार्थं ब्रूते क्रमनियमपाठेन सुगमा ॥ १ ॥

"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते" ॥ (भाष्य० अ० १, पा० १, आ०२)

महाभाष्यकार पतञ्जलि ने पाणिनीय सूत्रों की प्रशंसा में लिखा है कि यह अक्षरवेद 'अइउण्' इत्यादि चौदह लोकस्थानीय जो १४ सूत्र-समुदाय है, यही **वृद्धिरादैच्** (१।१।१) प्रभृति सूत्र-समुदाय द्वारा पुष्पित होता है एवं सूत्रक्रमानुसार एक के बाद एक सूत्र की अनुवृत्ति और अधिकारविधि से अर्थज्ञान कर लेने पर फलित होता है तथा वार्तिक परिभाषादि के ज्ञान से चन्द्र के समान ताराओं से प्रतिमण्डित होकर वाक्समाम्नाय (वाग्वेद) ब्रह्मराशि हो जाता है इसलिये इसे अवश्य पढ़ना चाहिये। इसके (अष्टाध्यायी सूत्रसंघ के) ज्ञान कर लेने पर सारे वेद के पढ़ने का पुण्य फल मिलता है और उसके (पढ़ने वालों के) माता-पिता स्वर्गलोक में पूजित होने लगते हैं।

ऐसी प्रशंसा के रहते भी परतन्त्र भारत में अष्टाध्यायी का पाठ बन्द हो गया था। आश्चर्य तो इस बात पर हो रहा है कि बड़े से बड़े विद्वानों की भी प्रतिभा परतन्त्रताकाल में कुण्ठित हो जाती है। जिससे ऊपर के भाष्य का अर्थ भी संकुचित कर दिया गया है और यद्यपि सूत्रों की वृत्ति स्वयं बनाने के लिये पाणिनि महामुनि ने कितने ही परिभाषासूत्रों की रचना की है; तो भी अधिकार अनुवृत्ति और उन सूत्रों को लगाकर सूत्रार्थ न कराकर बीच के परतन्त्र भारत के विद्वान्, छात्रों से सूत्रवृत्ति रटवाने लगे, जिससे न केवल पाणिनि महर्षि के मूल संकल्प की ही हत्या हो गयी अपि तु पाणिनि-व्याकरण सरलता छोड़कर दुरूह और वृत्ति रटने के कारण कष्टसाध्य हो गया।

देखिये मैं यहाँ पाणिनि महर्षि की आविर्भावित पद्धति का दिग्दर्शन मात्र करा रहा हूँ। विद्वान् लोग इसका विस्तार कर लें–

सूत्रार्थ करने में सर्वप्रथम सन्धिविच्छेद के साथ पदच्छेद कर चुकने पर ही यह देखा जाता है कि इस सूत्र में किस सूत्र का अधिकार है और किस सूत्र से किस पद की अनुवृत्ति आ रही है।

जिस सूत्र के सभी पदसमूह अर्थात् पूरा सूत्र अपने यहाँ कोई प्रयोजन सिद्ध न करके केवल अन्य सूत्रों में बड़ी दूर तक जाता है वह अधिकार सूत्र कहलाता है। जहाँ सूत्र का कुछ ही पद अपने यहाँ प्रयोजनसिद्ध करता हुआ ही कुछ सूत्र तक जाता है, इस प्रक्रिया को अनुवृत्ति कहते हैं।

पाणिनि जी की अष्टाध्यायी में दो प्रकार के पद प्रायः सभी सूत्रों में पाये जाते हैं। एक तो उन्हीं सूत्रों के और दूसरे ऊपर के सूत्रों से आये हुए अनुवृत्ति के। इसलिये अष्टाध्यायी सूत्रों के अध्याय, पाद, सूत्रसंख्या तथा पर, नित्य, अन्तरङ्ग, अपवाद इत्यादि (जो पाणिनीय सूत्रों की विशेषताएँ हैं) का ज्ञान अनिवार्य है। इनके ज्ञान किये बिना पाणिनीय व्याकरण पढ़ा ही नहीं जा सकता। अष्टाध्यायी पद्धति से पढ़ना ही पाणिनीय व्याकरण में सरलता लाना है। क्योंकि सूत्रों के पूर्वापरीभाव जानने से अपने आप वृत्ति बना ली जाती है। वृत्ति रटने का भारी परिश्रम जो पाणिनि महर्षि की सारी तपस्या की हत्या ही कर देने वाला है, बिलकुल बन्द हो जाता है, इस प्रक्रिया में यही अद्‌भुत लाघव है।

अस्तु, अधिकार या अनुवृत्ति से आये पदों के सूत्र के पदों को साथ सिलसिलेवार (अन्वय करके) बैठाकर क्रियाओं से 'स्यात्' 'स्युः' 'भवेत्' 'भवेयुः' 'भवति' 'भवतु' इत्यादि अन्त में लगाकर वृत्ति बना ली जाती है। अपने आप बनायी हुई इस वृत्ति को चाहे समझकर ही मन में बैठा लें या दो चार बार रट लें। जैसे भी इसका दृढ़ संस्कार मन पर बैठ जाय वैसा छात्रों को कर लेना चाहिये। इससे पाणिनीय व्याकरण पढ़ने में सरलता के साथ छात्र की मेधाशक्ति जो बढ़ती है वह महर्षि पाणिनि की विलक्षण देन है। जिसे स्वतन्त्र भारत में प्रदीप्त करना सभी मनीषियों का कर्तव्य है। उदाहरणार्थ सूत्रार्थ (वृत्ति) को नचि देखें–

अधिकार सूत्रों को लाकर सूत्रार्थ– जैसे–

"वर्तमाने लट्" (३।२।१२३) पदच्छेद– वर्तमाने ७।१ लट् १।१– (इति पदद्वयात्मकं सूत्रम्)। इसमें ऊपर से **"प्रत्ययः"** (३।१।१) **"परश्च"** (३।१।२) (पञ्चमाध्यायतक अधिकार है) ये दोनों अधिकारसूत्र आ जाते हैं। तीसरा **"धातोः"** (३।१।९१) (तृतीयाध्यायतक अधिकार है) यह सूत्र आता है।

इन सूत्रों के सभी पदों को सिलसिलेवार (अन्वय करके) बैठाकर वृत्ति बनती है – **'वर्तमाने धातोः परः लट् प्रत्ययः** (भवति)। इसकी हिन्दी स्वयं छात्र को अपने आप विभक्तियों के अर्थानुसार कर लेनी हेगी – 'वर्तमान (काल) में धातु से परे लट् प्रत्यय होता है।

अनुवृत्ति लाकर सूत्रार्थ – जैसे –

''हलन्त्यम्'' (१।३।३) पदच्छेद – हल् १।१ अन्त्यम् १।१ (इति पदद्वयात्मकं सूत्रम्)। इसमें ऊपर से **''उपदेशेऽजनुनासिक इत्''** (१।३।२) इस सूत्र से **'उपदेशे'** और **'इत्'** इन दो पदों की अनुवृत्ति आती है। इसको सिलसिलेवार (अन्वय करके) बैठाकर वृत्ति बनती है। **'उपदेशे अन्त्यं हल् इत्'** (भवति)। हिन्दी – 'उपदेश में अन्त्य हल् इत् होता है।' यों ही – **''न विभक्तौ तुस्माः''** (१।३।४) पदच्छेद – **'न'** अव्ययपदम् (अ०) **विभक्तौ** ७।१ **तुस्माः** १।३ इसमें **'उपदेशेऽजनुनासिक इत्'** (१।३।२) इस सूत्र से **'इत्'** एक पद की अनुवृत्ति आती है। इसको सिलसिलेवार (अन्वय करके) बैठाकर वृत्ति बनती है। **'विभक्तौ तुस्माः इतः न'** (भवन्ति)। हिन्दी– विभक्ति में तु (तवर्ग) स् म् इत् नहीं होते हैं। यों ही सब सूत्रों का अर्थ छात्र हँसता हँसता स्वयं कर लेता है।

आगे के सूत्रों में पूर्वसूत्रों से अनुवृत्ति ले आना भी बड़ा ही सरल है। नियम यही है कि आगे के सूत्र में जिस विभक्तिवाला पद होगा उस विभक्ति वाला पद पूर्वसूत्र से नहीं जायेगा किन्तु विशेषण या विधेय समान विभक्तिवाला पद भी आ ही जाता है, जैसे –

'हलन्त्यम्' (१।३।३) इस सूत्र में **'हल्'** विशेष्य **और 'अन्त्यम्'** विशेषण ये दो प्रथमान्त उद्देश्य पद हैं। इसलिये **'उपदेशेऽजनुनासिक इत्' (१।३।२)** इस सूत्र से **'अच् अनुनासिक'** ये विशेष्य-विशेषणात्मक-प्रथमान्त **उद्देश्य पद** अनुवृत्ति में नहीं आते हैं। किन्तु **'उपदेशे'** यह सप्तम्यन्त और **'इत्'** विधेय **(प्रथमान्त** होता हुआ भी) दो ही आते हैं। यों ही **'न विभक्तौ तुस्माः'** (१।३।४) **में 'विभक्तौ'** सप्तम्यन्त पद बैठा है। इसलिये **'उपदेशे'** सप्तम्यन्त नहीं आ सकता तथा **'तुस्माः'** उद्देश्य प्रथमान्त बैठा है। इसलिये ऊपर के सूत्र से उद्देश्य प्रथमान्त कोई पद नहीं आ सकता। केवल **'इत्'** विधेय पद ही आता है। क्योंकि उसकी आकांक्षा आगे के सूत्रों में बनी है। आगे के सूत्रों की आकांक्षा ही पूर्वसूत्रों के पदों की अनुवृत्ति लाने में प्रधान कारण होती है। (इससे छात्र स्वयं तो सूत्रार्थ कर ही लेगा साथ ही तीक्ष्ण बुद्धिवाला भी हो जायेगा। यह कितना उपकार पाणिनि जी का है। इधर तो ध्यान दीजिये।)

१ – सूत्र में जिस विभक्ति वाला पद होता है, उस विभक्ति वाला पद ऊपर के सूत्र से नहीं आता जैसे – **"ङिति च"** (१।१।५) यह सप्तम्यन्तपद है, अतः 'यहाँ **"न धातुलोप आर्द्धधातुके"** (१।१।४) इस सूत्र से केवल **'न'** और **"इको गुणवृद्धी"** (१।१।३) यह पूरा सूत्र आ जाता है। तब वृत्ति बन जाती है – **'ङिति च न इको गुणवृद्धी भवतः'।** 'अस्ति' 'भवति' क्रिया तो जहाँ कोई क्रिया न रहे वहाँ लगा दी जाती है। यह तो सर्वसाधारण प्रसिद्धि है ही।

२ – यों ही जहाँ बिना सम्बन्धविशेषकी षष्ठी विभक्ति होती है। वहाँ षष्ठी के आगे **'स्थाने'** यह पद जोड़कर वृत्ति बना ली जाती है। जैसे – **"इको यणचि"** (६।१।७७) इस सूत्र में **'इकः'** षष्ठी किसी सम्बन्धविशेष में नहीं है। अतः उसके आगे **'स्थाने'** जोड़कर **'इकः स्थाने'** ऐसा अर्थ करते हैं और **"संहितायाम्"** (६।१।७२) का अधिकार आ रहा है तो अर्थ होता है – **इकः स्थाने यण् भवति अचि परे संहितायाम्।** यों ही **"एचोऽयवायावः"** (६।१।७८) यह सूत्र **"इको यणचि"** (६।१।७७) के नीचे है तो इसमें षष्ठ्यन्त और प्रथमान्त पद रहने के कारण **'इकः'** और **'यण्'** नहीं आवेंगे किन्तु केवल **'अचि'** सप्तम्यन्त पद ही आवेगा और इसकी **'एचः'** षष्ठी के आगे स्थाने लग जायेगा और **"संहितायाम्"** (६।१।७२) का अधिकार (६।१।१५८) तक चल ही रहा है तो इस सूत्र की वृत्ति बन जायेगी – **'एचः स्थाने अयवायावः भवन्ति अचि संहितायाम्'।** यों ही इस प्रकार के सूत्रों की वृत्ति अपने आप बनती जायेगी। इसके लिये पाणिनि जी ने **"षष्ठी स्थाने योगा"** (१।१।४९) यह परिभाषासूत्र वृत्ति बनाने वाला स्वयं लिख दिया है।

यों ही जहाँ **'गुणः', 'वृद्धिः',** ऐसे शब्द हों चाहे वे सूत्रों में ही हों या ऊपर के सूत्र से आये हों वहाँ **'इकः'** षष्ठ्यन्त पद आकर अन्य नियमों के अनुसार मिलकर अर्थ कराता है, जैसे – **"सार्वधातुकार्द्धधातुकयोः"** (७।३।८४) में **"अङ्गस्य"** (६।४।१) का अधिकार आने के कारण **"मिदेर्गुणः"** (७।३।८२) से **'गुणः'** आता है तब **'गुणः'** के आने पर **'इकः'** यह षष्ठ्यन्तपद आ जाता है। बाद में **'इकः'** इस विशेषण में अन्त लग जाने से **"इगन्तस्य अङ्गस्य गुणः भवति सार्वधातुकार्द्धधातुकयोः परयोः"** वृत्ति बन जाती है। इसका सूत्र है **"इको गुणवृद्धी"** (१।१।३)।

यों ही जहाँ **'ह्रस्व' 'दीर्घ', 'प्लुत'** शब्द पड़ा रहे या ऊपर से आता हो वहाँ **'अचः'** यह षष्ठ्यन्त पद जुट जाता है। जैसे –**"ह्रस्वः"** (७।४।५९) का सूत्र है। इसमें **"अत्र लोपोऽभ्यासस्य"** (७।४।५८) से **'अभ्यासस्य'** आता है। बाद में इसमें **'ह्रस्व'** शब्द के कारण **'अचः'** षष्ठ्यन्तपद आ जाता है। तो वृत्ति बनती है **"अभ्यासस्य अचः ह्रस्वः भवति'।**

यों ही सप्तमी को छोड़कर पञ्चमी षष्ठी प्रभृति विभक्ति वाले विशेषणों में 'अन्त' शब्द लगा कर उसी विभक्ति वाला उसे बना लेते हैं और सप्तमी वाले में आदि लगाकर जैसा का तैसा सप्तमी विभक्ति रहने देते हैं जैसे – **"सुपि च"** (७।३।१०२) में **"अङ्गस्य"** (६।४।१) का अधिकार आता है और **"अतो दीर्घो यञि"** (७।३।१०१) सम्पूर्ण सूत्र आ जाता है तो **'अतोऽङ्गस्य दीर्घो यञि सुपि'** ऐसा पदों का क्रम बैठता है। यहाँ पर **'अतः'** षष्ठी विभक्ति वाला विशेषण है और **'यञि'** सप्तमी वाला तो उधर **'अन्त'** लगा इधर **'आदि'** लगा दोनों जगह अपनी अपनी विभक्ति बनी रही तो वृत्ति इस तरह बन गयी। **'अदन्तस्य अङ्गस्य यञादौ सुपि दीर्घः'** (भवति)। इसके लिये क्रमशः नियम है – **"येन विधिस्तदन्तस्य"** (१।१।७२) **"यस्मिन् विधिस्तदादावल्ग्रहणे" (परि० ३३)।**

"नामि" (६।४।३) सूत्र है। इसमें **"ह्रलोपे पूर्वस्य दीर्घोऽणः"** (६।३।१११) से **'दीर्घः'** आता है। इसलिये यहाँ **'अचः'** यह षष्ठ्यन्त पद उपस्थित हो जाता है बाद में **'अङ्गस्य'** (६।४।१) का अधिकार आने से **'अचः'** विशेषण हो जाता है तो उसमें **'अन्त'** शब्द लग जाने से – **'अजन्तस्य दीर्घः भवति नामि परे'** यह वृत्ति बन जाती है।

इसका सूत्र है **"अचश्च"** (१।२।२८) इसमें **"ऊकालोऽज्झ्रस्वदीर्घप्लुतः"** (१।२।२७) से **"ह्रस्वदीर्घप्लुतः"** आकर अर्थ करा देता है कि जहाँ भी ह्रस्वदीर्घप्लुत पड़ा हो वहां **'अचः'** षष्ठ्यन्त पद उपस्थित हो जाता है।

इसी प्रकार पर, नित्य, अन्तरङ्ग, अपवाद, असिद्ध इत्यादि परिभाषाओं का ज्ञान भी इस व्याकरण में अत्यावश्यक है। अष्टाध्यायी पाठ में जो सूत्र पूर्व से बाद में पढ़ा रहेगा वह पूर्वसूत्र की अपेक्षा (७। सवा सात अध्याय तक) बली होता है।

इसका सूत्र है **"विप्रतिषेधे परं कार्य्यम्"** (१।४।२) यों ही * नित्य, अन्तरङ्ग, अपवादों में परसे नित्य बली, पर-नित्य से अन्तरङ्ग बली, पर-नित्य और अन्तरङ्ग से अपवाद बली होता चलता है। कहा भी है कि **'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः'** (परि० ३८)।

ऐसा ही सूत्र है **"पूर्वत्रासिद्धम्"** (८।२।१) यह ८ वें अध्याय के द्वितीय पाद का पहला सूत्र है। इसका अर्थ है कि पूर्व में अर्थात् ७ सात अध्याय और आठवें

---

* **कृताकृतप्रसङ्गी विधिर्नित्यः। अल्पापेक्षकमन्तरङ्गम्। बह्वपेक्षकं बहिरङ्गम्। निरवकाशो विधिरपवादः। प्राप्तौ सत्यां विधिर्नियमः स्यात्।**

अध्याय के पहले पाद के सूत्रों में आठवें अध्याय के दूसरे तीसरे और चौथे पाद के सूत्र असिद्ध हैं। जब यह सूत्र ८-२-१ आठवें अध्याय दूसरे पाद का पहला सूत्र होकर परिभाषा-सूत्र रहता है, तब तो यह अर्थ होता है। जब यह सूत्र अधिकार हो जाता है तब आगे के सूत्रों में जाकर बैठ जाता है और वहाँ बैठा बैठा अर्थ करता है। कि तुम पूर्वत्र (पूर्व सूत्रों में) असिद्ध हो अर्थात् आठवें अध्याय के तीन पाद के सूत्रों में भी पूर्व पूर्व के सूत्रों में पर के सूत्र असिद्ध हैं।

जैसे – हरे+इह यहाँ **"एचोऽयवायावः"** (६।१।७८) लगकर **'ए'** को **'अय्'** करके हरय् इह बनाया। तब **"लोपः शाकल्यस्य"** (८।३।१९) ने लगकर य् का लोप कर दिया हर+इह बन गया। यहाँ पर **"आद्गुणः"** (६।१।८७) जब लगने लगा तो **"पूर्वत्रासिद्धम्"** (८।२।१) के कहने से **"लोपः शाकल्यस्य** (८।३।१९) **"आद्गुणः"** (६।१।८७) की दृष्टि में असिद्ध हो गया अर्थात् य् का लोप वहाँ है ही नहीं वहाँ **'य्'** ही पड़ा है तो अ+इ नहीं है। अ+यि है, तो **'आद्गुणः'** (६।१।८७) की प्रवृत्ति ही नहीं हो सकती। इस प्रकार लगे सूत्रों को भी यह असिद्ध करके प्रयोग सिद्ध कराता है और कहीं-कहीं लगते हुए एक सूत्र को असिद्ध करके दूसरा सूत्र लगवा देता है।

जैसे – सत्+चित्+यहाँ **"स्तोः श्चुना श्चुः"** (८।४।४०) को **"झलां जशोऽन्ते"** (८।२।३९) ने असिद्ध करके त् को द् कर दिया। तब **"स्तोः श्चुना श्चुः"** (८।४।४०) से द् को ज् हो गया बाद में **"खरि च"** (८।४।५५) से ज् का च् करके सच्चित् बनता है।

इत्यादि बातों की जानकारी पाणिनीय व्याकरण पढ़ने वालों को अवश्य करना ही चाहिये। सबसे आवश्यक पाणिनीय व्याकरण में सूत्रों का क्रम से पढ़ना है। सूत्रों को क्रम से पढ़ने में ही सरलता, मेधावर्द्धकता प्रभृति अनेक अवर्णनीय गुण प्राप्त हो सकते हैं। यही तो इसका विज्ञान है।

इसलिये **'पाणिनीयप्रबोध के'** पढ़ने से पहले **'ऋजुपाणिनीयम्'** (संक्षिप्ताष्टाध्यायी १४२५ सूत्र) बालकों को कण्ठ कर लेना होगा। (कण्ठ रहने से पाणिनीय प्रबोध में सूत्रार्थ करते समय अनुवृत्ति लेने के लिये पूर्वसूत्र दृष्टि के सामने आ जाते हैं। नहीं तो **'ऋजुपाणिनीयम्'** सामने रखकर सूत्रों को टटोलना पड़ता है), वयस्कों की इच्छा पर निर्भर है। कण्ठ करलें तो अच्छा ही है। कण्ठ न करने से पाणिनीय प्रबोध में सूत्रार्थ करते समय अनुवृत्ति लेने के लिये **'ऋजुपाणिनीयम्'** सामने रखना ही चाहिये। **'ऋजुपाणिनीयम्'** के प्रारम्भ में जो हिन्दी-भाषा द्वारा अक्षरविज्ञान, पदज्ञान, विभक्त्यर्थ, समास, सन्धिज्ञान इत्यादि लिखे गये हैं, जिनका ज्ञान किसी भी संस्कृत पुस्तक पढ़ने

से पहले कर लेना नितान्त आवश्यक ही नहीं अनिवार्य है। बिना इतने ज्ञान के कोई भी संस्कृत पुस्तक पढ़ने का अधिकारी नहीं हो सकता। संस्कृतभाषा का इतना ज्ञान वाला ही व्यक्ति **"वृद्धिरादैच्"** (१।१।१) प्रभृति सूत्रों का पदच्छेद (सन्धि तोड़ कर पदों को अलग अलग कर देना) स्वयं समझ सकता है। तथा यह भी समझ सकता है कि विभक्ति के किस वचन का यह पद है और किस सन्धि के कारण एक में सम्पृक्त (सट गया) है। (इतना ज्ञान न कराकर बिना समझे लघुकौमुदी रटाने की प्रथा ने ही संस्कृत को कठिन और घोखू विद्या बना दिया है तथा लोगों को संस्कृत से विमुख कर दिया है।)

अस्तु, इस प्रकार जब सभी सूत्रों का अर्थ **'ऋजुपाणिनीयम्'** द्वारा करले तब **'पाणिनीयप्रबोध'** लेकर अपने आप प्रयोगों को साधता चला जाय। अध्यापक तो केवल उसे सहारा दिया करें। हाँ, छात्रों को एक बात और भी स्वयं करनी है। पाणिनीयप्रबोध में जिस स्थिति में प्रयोग लाकर सूत्रों के पास साधने वास्ते उदाहरण रूप में रखा गया है, उसके पहले के कुल सूत्रों को स्वयं लगाकर उतना सिद्धकर उस स्थिति में ले आवें। जैसे – विसर्गसन्धि में रामरु + हसति इत्यत्र, ऐसा लिखकर **"हशि च"** (६।११४) सूत्र लिखा गया है। इसे रामस्+हसति ऐसा रख कर **"ससजुषो रुः"** (८।२।६६) सूत्र से **'स्'** का **'रु'** करके रामरु+हसति ऐसा बना लेना होगा। तथा प्रयोगों को साधते समय सूत्रों का अर्थ करके ठीक प्रयोगों में घटाना होगा। इस सूत्र से यह कार्य होगा इतना ही कहना पर्याप्त नहीं है। एवं एक उदाहरण के बाद वैसा ही एक दूसरा उदाहरण अपने आप बनाना होगा। और कुल उदाहरणों की हिन्दी भी समझते चलना होगा। यह काम अध्यापक करा दें। पर छात्र इसे भी पहले स्वयं करें। इसी प्रकार सन्धि में जो सिद्ध पद लिखे गये हैं, उनका सन्धिविच्छेद छात्र स्वयं अपनी ऊहा (बुद्धि) से करे, जैसे स्वराज्य+आन्दोलनम् = स्वराज्यान्दोलनम्। जब वह अटकने लगे तो अध्यापक बतावें, 'छात्र की बुद्धि को विकसित करना' मेरा काम है। इसी बात का अध्यापक को सदा ध्यान रखना चाहिये। और **'पाणिनीयप्रबोध'** में दिये गये उदाहरणों को रख रखकर संस्कृत वाक्य भी वहाँ ही बनवाते चलना चाहिये। जैसे – वेदाध्ययनम् भवति। स्वराज्यान्दोलनम् अभवत्। इत्यादि।

इस प्रकार से पढ़ने वाला छात्र केवल छः महीने में व्याकरण का व्यावहारिक ज्ञाता हो जाता है। इसमें अणुमात्र भी सन्देह नहीं। परीक्षार्थी छात्र तो इसी व्याकरण ज्ञान के बल पर अन्यान्य परीक्ष्य ग्रन्थों को, बाकी छः महीने में पूर्ण करके, एक वर्ष में ही काशी की प्रथमा परीक्षा पास कर सकता है। यह छात्रों की प्रतिभा तथा उनके अध्यवसाय पर निर्भर करता है। मेरी तो प्रतिज्ञा है –

मया मालवीयाज्ञया वर्षवृन्दैः
प्रयत्नान्निबद्धोऽधुना ग्रन्थ एषः।
प्रतिज्ञायते मासषट्केन बालाः
पठन्तो भवेयुर्ध्रुवं संस्कृतज्ञाः॥

मैंने स्वर्गीय महामुनि पं० मदनमोहनमालवीयकी प्रेरणा से २० बीस वर्ष के परिश्रम से ग्रन्थ लिखा है। मेरी प्रतिज्ञा है कि बालक भी इस पद्धति से छः महीने में अवश्य संस्कृत के ज्ञाता हो जायेंगे। वयस्कों के लिये काल का कोई नियम नहीं। वे चाहें तो इससे भी कम काल में संस्कृतज्ञ हो सकते हैं।

इसका प्रत्यक्ष प्रमाण, 'आज' (काशी के पत्र) के सम्पादकों में पं० श्रीशङ्करशुक्ल शास्त्री एम. ए. हैं, जो १॥ डेढ महीने में इसी पद्धति से संस्कृत पढ़ कर कालिदास के काव्य नाटकों का अध्ययन कर चुके हैं। अलमतिविस्तरेण।

संस्कृता कठिना भाषा मिथ्येमां जनधारणां
कर्तुमेव मयाऽलेखि ग्रन्थ-द्वयमनुत्तमम्।
षण्मासैरेव सर्वेऽपि वयस्का बालकास्तथा
संस्कृतज्ञा भविष्यन्ति प्रत्यक्षे किम्प्रमाणतः॥

भाष्य द्वारा पतंजलि ने पाणिनि सूत्रों को वेद तुल्य बताया है। जैसे वेदमन्त्रों में आनुपूर्वी होती है। वैसी ही इन सूत्रों में भी आनुपूर्वी है। यदि ये सूत्र क्रम से पढ़े जायेंगे तभी अपना रहस्य दे सकेंगे। इन्हें व्युक्रम से पढ़ने पर तो लाभ की जगह हानि ही होगी।– **"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह"।** जैसे वेदमन्त्रों का मिथ्या प्रयोग होता है तो वह हानिकर हो जाता है, उसी प्रकार पाणिनि सूत्र भी क्रम तोड़ देने पर अपनी सरलता छोड़ देते हैं। व्युक्रम से उपन्यस्त सूत्रों की वृत्ति आप नहीं बना सकते उनकी लिखित वृत्ति रटनी ही पड़ेगी और वह वृत्ति आगे जाकर भूल ही जायेगी। यह प्रक्रिया ही महर्षि पाणिनि के संकल्प के विरुद्ध है। अतः पाणिनि-सूत्रों को महर्षि पाणिनि की पद्धति से पढ़ना-पढ़ाना अब स्वतन्त्र भारत में प्रचलित करना चाहिये। सहृदय मर्मज्ञ विद्वानों को तो इस पर दृढ़ हो जाना चाहिये। पाणिनि सूत्रों का क्रम रहस्यमय है। उसकी महिमा वर्णनातीत है। आप अनुभव कर देखें, यही मेरी करबद्ध प्रार्थना है।

निगमसदृशमेतत् पुण्यदम्पाणिनीयं
प्रियतमजनवृन्दं यत्नतः पाठनीयम्।
फलमिह पदबोधे लाघवं साधनीयं
द्विजकुलमपि मेधावर्द्धनं ज्ञापनीयम्॥

अब मैं अपने वक्तव्य का उपसंहार करना चाहता हूँ।

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणानि, विद्याश्चैताश्चतुर्दश॥
उपवेदैश्चतुर्भिस्तु ता एवाष्टादश स्मृताः॥

४ वेद, ६ अङ्ग, (शिक्षा, कल्पसूत्र, व्याकरण, निरुक्त, ज्योतिष और छन्द) मीमांसा, (पूर्व, मध्य और उत्तर) न्यायविस्तर, (वैशेषिक, न्याय, सांख्य, योग, पाशुपत, वैष्णव, सौगत (बौद्ध), जैन (आर्हत), लोकायत (चार्वाक), सभी तार्किक (दर्शन), १८ धर्मशास्त्र, १८ पुराण, (१८ उपपुराण भी) ये ही १४ विद्याएँ हैं। ४ उपवेद, (आयुर्वेद, धनुर्वेद, गान्धर्ववेद और अर्थशास्त्र) मिलाकर ये ही १८ अठारह हो जाती हैं। इन्हीं चौदह विद्याओं के अध्ययन कर लेने से मनुष्य पूर्ण-प्रज्ञ हो जाता है। अतः इनको संक्षिप्त रूप में पाठकों के सामने रखना ही मनीषियों का कर्तव्य है। मैं यहाँ केवल व्याकरण के विषय में कुछ सार बातें कहूँगा–

"समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ।
तद्भागभागाच्च शतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ॥

माहेश व्याकरण समुद्र के समान विस्तृत है। बृहस्पति का समुद्र से कुम्भद्वारा निकाले जल के समान थोड़ा है। पुरन्दर (इन्द्र) का उसके भी शतांश भाग के बराबर है। पर पाणिनि का व्याकरण तो समुद्र से निकाले कुश के अग्रभाग से टपकते हुए जल बिन्दु के बराबर है।

इससे यह सिद्ध है कि पाणिनि महर्षि ने समुद्र के समान विस्तृत व्याकरण को कुशाग्रबिन्दु जल के समान पवित्र और संक्षिप्त बना दिया है। पाणिनि-व्याकरण की पूर्णता में तो किसी को सन्देह ही नहीं है। इस व्याकरण में लौकिक वैदिक दोनों शब्दों की सिद्धि की गयी है, अतः इस पद्य का तात्पर्य्य पाणिनीय व्याकरण के संक्षिप्त स्वरूप की प्रशंसा करने में ही है। इसीलिये पतञ्जलि ने भी– **"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"** इस वाक्य से व्याकरण के प्रयोजन में लाघव (लघुत्व) भी एक प्रशस्त गुण माना है। वस्तुतः पाणिनि ने अपने व्याकरण के लाघव करने में अद्भुत प्रतिभा दिखायी है। यहाँ करोड़ों-करोड़ों शब्दों के साधुत्व के लिये एक एक सूत्र लिखे गये हैं। देखिये–

"तिष्टद्गुप्रभृतीनि च" (२।१।७७) **"उणादयो बहुलम्"** (३।३।१) **"पारस्करप्रभृतीनि च संज्ञायाम्"** (६।१।१५७) इत्यादि एक एक सूत्रों से अनन्त प्रयोगों की सिद्धि होती हैं। सूत्र भी इतने संक्षिप्त हैं कि–

"अर्धमात्रालाघवे सति पुत्रोत्सवं मन्यन्ते वैयाकरणाः।" (परि०१३३)

यह प्रसिद्धि ही चल पड़ी है। समुद्र के समान विस्तृत व्याकरण को अतिसंक्षिप्त कर ३९९६ सूत्रों में ला देना, यह पाणिनि महर्षि की ही तपस्या तथा प्रतिभा का प्रभाव है। ऐसे अति संक्षिप्त पाणिनीय व्याकरण को भी टीका, प्रटीका, वृद्धप्रटीका; व्याख्या, उपव्याख्या, उपोपव्याख्या करके आज इतना विस्तृत रूप दिया गया है कि– * **'द्वादशभिर्वर्षैर्व्याकरणं श्रूयते"** यह किंवदन्ती चल पड़ी है। जिस महर्षि ने समुद्र के समान विस्तृत व्याकरण को कुशाग्रबिन्दु के रूप में ला दिया था। आज उसी का व्याकरण– **"पुनस्तत्रैवावलम्बितो वेतालः"**। इस नीति के समान पुनः समुद्रवत् विस्तृत हो गया है। यह कितने आश्चर्य का विषय है। अतः आज सभी आधुनिक मनीषियों का यह परम कर्तव्य है कि वे पाणिनि महर्षि के मुख्य उद्देश्य लघुत्व एवं सरलता की ओर पुनः प्रवृत्त होवें।

सरलता पाणिनि महर्षि के सूत्रक्रम में कूट-कूट कर भरी पड़ी है। एक सूत्र के पद आगे के सूत्रों में अनुस्यूत रहते हैं, जिससे सहज ही सूत्रार्थ समझ में आता है। पाणिनि-व्याकरण पढ़नेवालों की मेधाशक्ति भी प्रखर हो जाती है। उनको आगे के सूत्रों में पीछे के सूत्रों का स्मरण रखना पड़ता है।

आज बहुतों में यह भ्रम फैला हुआ है कि संस्कृत तो कठिन भाषा है, पर यदि सूक्ष्म दृष्टि से देखा जाय तो सभी भाषाओं की अपेक्षा संस्कृत बड़ी सरल है। हम लोगों की मातृभाषा के प्रतिशत ७५ पचहत्तर शब्द संस्कृत के ही अपभ्रंश हैं। बहुत से शब्द तत्सम हैं जो आज भी सभी प्रान्तीय भाषाओं में संस्कृत के समान ही प्रयुक्त हो रहे हैं। इससे संस्कृत भाषाद्वारा सभी प्रान्तों को अनायास ही एक सूत्र में हम बाँधे रहेंगे। यह एक राजनीतिक लाभ भी संस्कृतद्वारा स्वयं सिद्ध है। संस्कृतभाषा में आत्मविश्वास को सुदृढ़ बना देने वाली एक विलक्षण शक्ति है, जो अन्यान्य भाषाओं में नहीं पायी जाती। संस्कृतज्ञों को अपने वाक्यों की शुद्धता पर दृढ़विश्वास रहता है कि यह ऐसा ही होगा, ब्रह्मदेव भी इसे अन्यथा नहीं कर सकते।

संस्कृतभाषा में दूसरी विशेषता है कि वह अत्यन्त मधुर है और सङ्गीतमय है। छन्दः शब्द ही सङ्गीत का पर्याय शब्द है। हमारी संस्कृतभाषा छन्दों में ही निबद्ध पायी जाती है।

*** इस उक्ति का यथार्थतः तो अर्थ यह है कि जन्म से १२ बारह वर्ष की अवस्था तक व्याकरणाध्ययन समाप्त हो जाना चाहिये। और वह अध्येता को अधिगतार्थ भी हो जाना चाहिये।**

संस्कृत के अध्येता पाश्चात्य पण्डितों ने भी इस भाषा पर मुग्ध होकर जो उद्‌गार निकाले हैं वे आज के पाश्चात्याभिमुख नवयुवकों को अपने हृदय में अङ्कित कर लेने चाहिये –

"अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।
देवभोग्यमिदं यस्माद्देवभाषेति कथ्यते॥
न जाने विद्यते किं तन्माधुर्यमिह संस्कृते।
सर्वदेव समुन्मत्ता येन वैदेशिका वयम्॥"

अमृत तो मधुर है ही, पर संस्कृत तो उससे भी अधिक मधुर है। यह भाषा तो मनुष्य को देवता बना देती है। इसी कारण इसे देवभाषा कहते हैं। न जाने संस्कृत में कैसी जादू भरी मधुरता है कि हम विदेशी लोग भी सर्वदा ही संस्कृत के पढ़ते समय उन्मत्त हो कर झूमने लगते हैं।

देखा आपने, यह है संस्कृत की विशेषता। अतः आज स्वतन्त्र भारत में भारतीय संस्कृति की जननी मानव धर्म की अवबोधिका संस्कृतभाषा का पठन-पाठन पूर्ववत् पुनः प्रवृत्त हो, इस उद्देश्य से मैं अपने चिरकाल के अनुभव द्वारा इस ग्रन्थ को लिखने में प्रवृत्त हुआ और आज परमेश्वर की अतुल अनुकम्पा से आपके समक्ष इसे उपस्थित करने में समर्थ हो सका हूँ।

पाणिनि महर्षि के पहले तथा पीछे भी बहुत से व्याकरण के ग्रन्थ बने हैं और काल के अविरत प्रवाह में विलीन हो गये हैं, पर इस युग में जनकल्याण की कामना से जो ग्रन्थ लिखे जाँयेगें, उनका प्रचार बहुत तेजी और स्थायी रूप में हो सकता है।

'पाणिनीयप्रबोध' ग्रन्थ भारतीय संस्कृति के संरक्षक, राष्ट्रियसूत्रात्मा के समुद्-बोधक, नवीन शिक्षा के संवर्द्धक, **हिन्दूविश्वविद्यालय के प्रतिष्ठापक महामुनि स्वर्गीय मदनमोहन मालवीय जी महाराज की प्रेरणा** से लिखा गया है। इसके अध्ययन से बालिकाओं एवं बालकों को संस्कृतभाषा का ज्ञान बहुत शीघ्र और थोड़े परिश्रम से हो जाता है।

यहाँ केवल इतना ही कहना है कि, पाणिनि के ३९९६ सूत्रों में लगभग १४२५ सूत्रों का क्रम-बद्ध अतिसंक्षिप्त संग्रह **'ऋजुपाणिनीयम्'** है। उन्हीं सूत्रों को प्रयोगानुसार सजाकर **'पाणिनीयप्रबोध'** लिखा गया है। बालमनोविज्ञानानुकूल अतिसरलता से बालिकाओं एवं बालकों दोनों के लिये अत्युपयोगी संस्कृत व्याकरण का अभूतपूर्व संग्रह ग्रन्थ यह **'पाणिनीयप्रबोध' है।**

लघुकौमुदी से इसकी विशेषता यह है कि यहाँ सूत्रों की वृत्ति रटनी नहीं पड़ती। पूर्व सूत्रों से आये हुए पदों के आधार पर छात्र स्वयं सूत्रार्थ कर लेता है। यह प्रकार सभी सूत्रों के सामने पूर्व सूत्रों से अनुवृत्त पदों को कोष्ट में लिखकर सूत्रों के साथ उन पर अन्वयाङ्क देकर स्पष्ट कर दिया गया है। बाद में सरल संस्कृतभाषा के माध्यम से प्रयोगों को साधकर समझा दिया गया है। जिससे छात्र के हृदय पर अनायास ही प्रयोगों के साधने का संस्कार दृढ़ होता जाता है। प्रयोग उसकी स्मृति से विलुप्त नहीं होते। साथ ही संस्कृत बोलने का अभ्यास भी दृढ़ होता जाता है। इस प्रकार **'पाणिनीयप्रबोध'** के अभ्यास से थोड़े समय में छात्र मेधावी बन जाता है।

छात्र प्रदिदिन २० बीस सूत्रों के अभ्यास क्रम से प्रायः दो महीनों में १४२५ सूत्रों को कण्ठस्थ कर लेता है, और एक महीने में सूत्रार्थ समझ लेता है। इसके बाद लगभग तीन महीने में **'पाणिनीयप्रबोध'** द्वारा प्रयोगों को साधकर वह संस्कृत भाषा का ज्ञाता हो जाता है।

अब मैं बहुत संक्षेप में उस पाणिनि पद्धति का दिङ्निर्देश मात्र यहाँ पर करुँगा, जिसकी आज परम आवश्यकता है। पाणिनि ने पहले धातु पाठ की पुस्तक लिखी है। सबसे पहले इस पद्धति में धातु ज्ञान आवश्यक होता है। उनके स्वरूप में ही बहुत से अनुबन्ध लगे रहते हैं। जैसे धातु के आदि में 'ञि टु डु ओ' इत्यादि। अन्त में 'अ आ इ ई उ ऊ ऋ ॡ ओ' इत्यादि। इन अनुबन्धों से पाणिनि ने बड़े बड़े काम निकाले हैं। उदाहरणार्थ अनुदात्तेत् तथा ङित् धातुओं से आत्मनेपद प्रत्यय लाते हैं। स्वरितेत् तथा ञित् से उभयपदी प्रत्यय लाते हैं। टु इत्संज्ञावालों से अथुच् प्रत्यय लाते हैं। इसी प्रकार प्रत्ययों में भी अनुबन्ध बड़े काम के होते हैं। उदाहरणार्थ शित् कित् ङित् टित् मित् इत्यादि। पहले तो इन्हीं अनुबन्धों का रहस्य समझना चाहिये।

धातु दो प्रकार के होते हैं। अजन्त तथा हलन्त। उनमें भी इगन्त इगुपधक धातुओं में गुण वृद्धि की विशेषताएँ हैं। इगन्त में जहाँ गुण वृद्धि कित् ङित् के कारण नहीं होते वहाँ यथाप्राप्त यण् इयङ् उवङ् आदि का साम्राज्य रहता है।

पाणिनिपद्धति में धातुओं का भारी पसारा है। १० दश गण हैं। १० दश ही लकार भी हैं। इन्हीं लकारों में टित् ङित् भी दो भेद हैं। इसी प्रकार सार्वधातुक आर्धधातुक भी दो भेद हैं। सार्वधातुक लकार ४ चार तथा आर्धधातुक लकार ६ छः हैं। चार लकार लट् लङ् लोट् विधिलिङ् (अन्य ६ लकारों के नहीं) के ही दश गण भेद से १० दश प्रकार के रूप हो जाते हैं। उनके भी ९ आत्मनेपदी प्रत्यय, ९ परस्मैपदी प्रत्यय उभयपद के १८ अठारहों प्रत्यय भी धातुओं में ही लगते हैं।

उनकी धातुसंज्ञा के लिये भी दो ही सूत्र हैं। **"भूवादयो धातवः"** (१।३।१) तथा **"सनाद्यन्ता धातवः"** (३।१।३२)। इनके गुण करने वाले भी दो ही सूत्र हैं। **"सार्वधातुकार्धधातुकयोः** (७।३।८४) तथा **"पुगन्तलघूपधस्य च"** (७।३।८६)। वृद्धि के लिये भी दो ही सूत्र हैं। **"अचो ञ्णिति"** (७।२।११५) तथा **"अत उपधायाः"** (७।२।११६)। तद्धित में आदिवृद्धि करने वाले भी दो ही सूत्र हैं। **"तद्धितेष्वचामादेः** (७।२।११७) तथा **"किति च"** (७।२।११८)। शब्दों को प्रातिपदिक बनाने वाले भी दो ही सूत्र हैं। **"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"** (१।२।४५) तथा **"कृत्तद्धितसमासाश्च"** (१।२।४६)। इत्यादि विशेषतायें हैं।

लकारों का ज्ञान भी अ इ उ ऋ इन्हीं चार स्वतन्त्र स्वरों तथा ए ओ इन सन्धि स्वरों के आधार पर टित् ङित् भेद से कर लेना होता है। जैसे– अ इ उ ऋ ए ओ क्रम से लट् लिट् लुट् लृट् लेट् लोट् छः टित् तथा अ इ उ ऋ क्रम से लङ् लिङ् लुङ् लृङ् चार ङित् लकार कुल १० दश लकार होते हैं। पर इनमें एक लेट् लकार तो केवल वैदिक लकार है। शेष ९ लकारों में लिङ् के विधिलिङ् तथा आशीर्लिङ् नाम से दो भेद हो जाने से लट् लिट् लुट लृट् लोट् ५ पांच टित् तथा लङ् विधिलिङ् आशीर्लिङ् लुङ् लृङ् ये ५ पाँच ङित् लकार हैं। यों पुनः १० दश लकार लौकिक वैदिक दोनों हैं। इस प्रकार धातुओं के लिये १० दश लकार लौकिक हुए और वैदिक ११ एकादश लकार हो जाते हैं। ये सभी लकार धातुओं में ही लगते हैं। इनके सार्वधातुक, आर्द्धधातुक दो भेद हो जाते हैं।

धातु के कार्य के सम्बन्ध में दो ही सूत्र अधिकतर आते हैं। सार्वधातुक संज्ञा के लिये **'तिङ्शित् सार्वधातुकम्'** (३।४।११३) आर्द्धधातुक संज्ञा के लिये **'आर्द्धधातुकं शेषः'** (३।४।११४)। यहां भी दो ही हैं। लकारों को आर्द्धधातुक बताने वास्ते भी **'लिट् च'** (३।४।११५) **'लिङाशिषि'** (३।४।११६) दो ही सूत्र हैं। यद्यपि आर्द्ध-धातुक लकार छः गिने जाते हैं। ये दो लिट् लिङ् (आशीः) तो सूत्र के बल पर आर्द्धधातुक हो जाते हैं। बाकी लुट् लुङ् लृट् लृङ् चार तो स्य तासि तथा च्लि इन ३ प्रत्ययों के बलपर आर्द्धधातुक हो जाते हैं। **'स्यतासी लृलुटोः'** (३।१।३३) से लृट् लृङ् में स्य प्रत्यय आर्द्धधातुक है। लुट् में तासि प्रत्यय आर्द्धधातुक है। यों ही **'च्लि लुङि'** (३।१।४३) से लुङ् में च्लि प्रत्यय आर्द्धधातुक है। भाग्य से यहाँ भी दो ही सूत्र हैं।

यों लुट् लुङ् लृट् लृङ् ये चार लकार प्रत्यय के बल पर तथा लिट् आशीर्लिङ् सूत्र के बल पर यों ६ लकार आर्द्धधातुक हैं। ४ लकार सार्वधातुक हैं। सार्वधातुक लकारों में तो दश गणों के विकरण भेद से क्रियाएँ भिन्न भिन्न हो जाती हैं। आर्द्धधातुक

लकारों में तो सेट् अनिट् के भेद से रूप-भेद होता है। गुण वृद्धि होने के तथा उनके निषेध के सूत्र भी दो ही हैं। **'ङिति च'** (१।१।५) **'दीधीवेवीटाम्'** (१।१।६)। यों धातुओं से तिङ् प्रत्यय लगाकर तिङन्त पद बना लेना तथा उन्हीं धातुओं में कृत् प्रत्यय लगाकर कृदन्त शब्द बना लेना ये दोनों काम धातु से ही होता है। अतः धातु का ज्ञान करना ही इस प्रक्रिया की विशेषता है। जिसकी आज बिलकुल उपेक्षा है। माधवीया धातुवृत्ति, क्षीरतरङ्गिणी प्रभृति प्राचीन ग्रन्थ सब इसी पद्धति के हैं कि, धातु के आगे तिङ् प्रत्यय लगाकर तिङन्त पद तथा कृत् प्रत्यय लगाकर यथा प्राप्त गुण वृद्धि करके तथा कित् ङित् प्रत्ययों में गुणवृद्धि का निषेध करके और यथाप्राप्त धातुओं में सम्प्रसारण करके कृदन्त शब्द बनाये जाते हैं।

उदाहरणार्थ– डुकृञ् = करणे धातु से **'तव्यत्तव्यानीयरः'** (३।१।९६) से तव्य प्रत्यय होगा। डु और ञ् की इत् संज्ञा लोप करके कृ+तव्य बनेगा, अनिट् धातु होने के कारण **'एकाच उपदेशे अनुदात्तात्'** (७।२।१०) से इट्का निषेध करके गुण करके 'कर्तव्य' यह कृदन्त शब्द बनता है। यों ही **'ण्वुल्तृचौ'** (३।१।१३३) से ण्वुल् तृच् तथा **'तुमुन्ण्वुलौ कियायां क्रियार्थायाम्'** (३।३।१०) से तुमन् प्रत्यय करके अनुबन्ध लोप करके वृद्धि करके कारक, तृच् तुमुन् में अनिट् धातु होने से इट् नहीं होगा, किन्तु गुण होकर 'कर्तृ' 'कर्तुम्' शब्द कृदन्त तैयार हो जायेगा। उसी की प्रातिपदिक संज्ञा करके, सुप् विभक्ति लगाकर सुबन्त पद बनता है। कारकः कर्ता कर्तुम् इत्यादि।

कित् प्रत्यय क्तिन् क्तवतु क्त क्त्वा इत्यादि में तो अनुबन्ध लोप करके ति तवत् त त्वा हो जाने पर **'श्नु किति'** (७।२।११) से इट् का निषेध करके तथा **'क्ङिति च'** (१।१।५) से गुण का निषेध कर 'कृति' कृतवत्', 'कृत' कृत्वा' इत्यादि कृदन्त शब्द तैयार हो जाते हैं। इनकी (कृदन्त होने से) प्रातिपदिक संज्ञा करके सुप् लाकर सुबन्त पद बना लेना यही संक्षिप्त पद्धति है।

इसी प्रकार सम्प्रसारणी धातुओं से इन प्रत्ययों में सम्प्रसारण करके शब्द बनाया जाता है। जैसे– यज् धातु से क्ति (ति) क्तवतु (तवत्) क्त (त) क्त्वा (त्वा) में सम्प्रसारण करके 'इष्टि' 'इष्टवत्' 'इष्ट' 'इष्ट्वा' इत्यादि शब्द बनाना होगा इत्यलम्। यहाँ ज् का ष् होना विशेष कार्य है।

इसी प्रकार **'ल्युट् च'** (३।३।११५) से ल्युट् करके अनुबन्ध लोप के बाद 'यु' का **'युवोरनाकौ'** (७।१।१) से अन करके कृ का गुण करके 'करण' इत्यादि रूपवाले शब्द तैयार हो जाते हैं। उवर्णान्त धातुओं में भू से 'भवन' जु से 'जवन' द्रु से 'द्रवण' श्रु से 'श्रवण' इवर्णान्तों में नी से 'नयन' जि से 'जयन' श्रिञ् से अनुबन्ध लोप कर 'श्रयण' इत्यादि शब्द बनेंगे। बस यहाँ तो मुझे केवल दिङ्निर्देश करना

था। सो कर दिया है। इसी दिशा से आज संस्कृत का अध्ययनाध्यापन होना चाहिये।

आज की संस्कृत पठन-पाठन-पद्धति बिलकुल बन्द करके पाणिनि जी की वैज्ञानिक पद्धति से ही संस्कृताध्ययनाध्यापन चलना चाहिये। जिसे अति संक्षिप्तरूप में मैंने ऊपर दिखाया है कि धातु-पाठ को आधार मानकर उससे पाणिनि-सूत्रों द्वारा प्रत्यय लगाकर तिङन्त, सुबन्त पद बनवाये जाँय इत्यादि।

इस पक्ष में एक दोष यही पड़ता है कि सन्धि-समास और शब्दों के रूप जब जानते रहेंगे तभी तो पाणिनि सूत्रों का अर्थ कर सकेंगे। और जब पाणिनि सूत्रों का अर्थ जानेंगे तभी सन्धि-समास और शब्दरूप जान सकेंगे। यही अन्योन्याश्रय दोष आ पड़ता है। पाणिनि-काल में यह दोष नहीं पड़ता था। क्योंकि उस काल में संस्कृत-भाषा लोक-भाषा थी। संस्कृत जानने के कारण छात्र पाणिनि सूत्रों का अर्थ कर लेते थे। बाद में सूत्रों द्वारा उनकी पदसिद्धि करते थे। इसमें दिक्कत नहीं पड़ती थी।

अब तो संस्कृत जानने के लिये ही पाणिनि सूत्रों का प्रयोग करना पड़ता है। इस दोषको दूर करने के लिये मैंने मध्य मार्ग अपनाया है कि, पहले स्थान यत्नों के बल पर सन्धि का ज्ञान करा देता हूँ। समास का ज्ञान भी समास के नामों का विग्रह बताकर करा देता हूँ। तथा पाणिनि मुनि के द्वारा माहेश्वर सूत्रों का (१४ चौदह सूत्रों का) जो संग्रह है वे सूत्र ही तो सारे अष्टाध्यायी सूत्र रूपी भवन के १४ खम्भे हैं। अण् अक् अच् हश् अल् हल् इत्यादि प्रत्याहार, इन्हीं सूत्रों के बल पर बनते हैं। उन्हीं प्रत्याहारों से अष्टाध्यायी के प्रायः सभी सूत्रों का संग्रह हुआ है।

अतः मैं इन्हीं प्रत्याहारों का पद सुप् विभक्तियों के परिष्कृतरूपों द्वारा बनवाकर हलन्त शब्दों का पद बता देता हूँ। और अदन्त इदन्त उदन्त ऋदन्त चार शब्दों के बल पर ही तो सारी अष्टाध्यायी पढ़ी जाती है। इनके पद भी बता देता हूँ। इस प्रकार प्रत्याहार शब्दों के पद तथा अगन्त शब्दों के पद और सन्धि-समास का सामान्यतः ज्ञान कराकर अष्टाध्यायी सूत्रों के क्रम से छात्रों द्वारा अधिकार अनुवृत्ति लाकर अर्थ करा देता हूँ। यह प्रक्रिया मेरे सभी ग्रन्थों में लिखी हुई है। १ – **'संस्कृत-प्रबोध'** पूर्वार्द्ध में तथा २ – **'पाणिनीयप्रबोधनाटक'** में भी है। इस **'पाणिनीय-प्रबोध'** में सूत्रवृत्ति बनाने के प्रकार द्वारा बतायी ही गई है। बस यही पाणिनि पद्धति है। धातुओं से क्रिया-पद बनाने की भी विधि पाणिनीय-प्रबोध नाटक में बतायी ही गयी है। यों पाणिनिपद्धति के ज्ञान से संस्कृत पढ़ने-पढ़ाने में आज स्वतन्त्र भारत

में स्वतन्त्र प्रज्ञ विद्वानों तथा छात्रों द्वारा क्रान्ति होनी चाहिये। मेरा यही डिण्डिम घोष है कि–

युगे पारतन्त्र्य-प्रधाने प्रहातोऽ-
न्धकारावृते तत्तपोऽज्ञैर्नवीनैः।
स्वतन्त्रो मुनिः पाणिनिः पूजनीयः
स्वतन्त्रे युगे भारतीयैः स्वतन्त्रैः।

संक्षेप में क्रान्ति का स्वरूप यही है कि, अंग्रेजी स्कूलों में एक एक शब्दों के अर्थ को (कुञ्जी) पुस्तकों द्वारा बता बताकर जो संस्कृत पढ़ने-पढ़ाने की वाहियात (व्यर्थ) रीति चली आ रही है तथा संस्कृतविद्यालयों में सूत्रवृत्ति रटा-रटाकर व्युक्रम से उपन्यस्त सूत्रों के अर्थ रटाकर आडम्बरबहुल पद्धति से संस्कृत पढ़ने-पढ़ाने की जो रीति पड़ गयी है, इन दोनों को बिलकुल बन्द कराकर पाणिनि क्रम से पहले कुछ धातुओं को अर्थ-सहित रटा दिया जाय तथा 'गीता व्याकरण' एवं 'संस्कृतप्रबोध' 'पाणिनीयप्रबोध' नाटक प्रभृति मेरे साहित्य में दिये गये सन्धि-समास-शब्दरूपों को समझ-समझाकर और पाणिनीय-प्रबोध नाटक के वैज्ञानिक प्रकार से प्रकृति + प्रत्ययों के जोड़ से बनाये गये धातु रूपों के संक्षिप्त को विस्तृत करके छात्र स्वयं सूत्रार्थ करते चलें और अध्यापक गण प्रयोगों की सिद्धि करावें। यही क्रान्ति की सरल सरणि है। विना कष्ट उठाये क्रान्ति हो नहीं सकती तथा विना क्रान्ति के संस्कृत भाषा के अध्ययनाध्यापन का मार्ग प्रशस्त हो नहीं सकता यह ध्रुव सत्य है। देखिये पाणिनि-पद्धति क्या है–

सूत्रवृत्तिं स्वयं कुर्य्युरध्यायिनः
पाठनस्य प्रकारोऽयमासीन्मुनेः।
तद्विहन्त्री पठत्प्राणहर्त्री हृदा
निष्क्रमा पाठरीतिर्द्रुतं हीयताम्॥

इसी क्रम में सूत्रार्थ (वृत्ति) बनाने की महर्षि पाणिनि द्वारा निर्दिष्ट पद्धति का उल्लेख भी आवश्यक प्रतीत होता है।

सूत्रार्थ (वृत्ति) बनाने की महर्षि पाणिनि द्वारा निर्दिष्ट पद्धति–

सम्प्रघुष्य क्रमात्पाणिनीयाष्टकं सन्धिबोधात्पदच्छेदतोऽर्थं चरेत्।
पूर्वसूत्रं परस्मिन् समासज्जयन्निर्विशेषां जहत्तद्विभक्तिं समाम्॥१॥

पूर्वसूत्रं परस्मिन्समासज्जदास्वाधिकारावधिं शृङ्खलावृद्धितः।
तत्समानं पदं स्वं जहद्धीतरत्सर्वमेवोपहारीकरोत्यादरात् ॥ २॥
किन्तु तत्रापि चेद् यद्विशेष्यादिकं तत्समानं पदञ्चापि याति स्वतः।
इत्थमाविष्करोत्यर्थमत्यद्भुतं यो न जन्मावधि क्वापि विस्मर्य्यते ॥ ३॥
तत्परं पाणिनीयप्रबोधं स्वयं सम्पठन्नर्थबोधं हृदा धारयन्।
तद्बलेनानुवादादि कुर्वन् धिया मासषट्केन शब्दार्णवं सन्तरेत् ॥ ४॥
विमृश्य शास्त्रं विनिमथ्य हार्दं ग्रन्थो निबद्धो वरदः 'प्रबोधः'।
वैज्ञानिकः संस्कृतशिक्षणार्थं मृदुः स्वयं छात्रगणैः सुपाठ्यः ॥ ५॥

छात्र पहले क्रम से पूरी **'अष्टाध्यायी'** ३९९६ सूत्र या उसका संक्षिप्त संस्करण, **'ऋजुपाणिनीयम्'** १४२५ सूत्र क्रम से रटकर याद कर ले, रटते समय ही **'ऋजुपाणिनीयम्'** में दिये गये सन्धि, समास तथा पदों को खूब समझ ले। इन तीनों में सूत्र के अतिरिक्त कुछ भी दूसरी वस्तु रटने की नहीं है। सब समझना ही है। बस, सूत्रों की सन्धि तोड़कर पदच्छेद करते हुए सूत्रों का अर्थ करना है, हाँ पदच्छेद कर चुकने पर जितने पद सूत्र में हों यदि उन्हीं पदों से पूरा अर्थ न हो जाता हो तो ऊपर जो उस सूत्र से पूर्वसूत्र हैं उसके असमान विभक्ति वाले पद उस सूत्र में अवश्य ही चले आते हैं। समान विभक्ति वाले पद नहीं आते, इसका ध्यान बराबर रखना चाहिये ॥१॥ क्यों कि पूर्व सूत्र आगे के सूत्रों में अपने अधिकार तक जाता हुआ श्रृङ्खलावृद्धि से आगे के सूत्र के असमान विभक्ति वाले सभी पदों को आगे के सूत्र में बड़े आदर से उपहार (भेंट) कर देता है ॥२॥ समान पद भी यदि विशेषण रहंता है, तब तो वह स्वयं उत्तरसूत्र में चला ही जाता है, वह नहीं रुकता। इस प्रकार पूर्वसूत्र उत्तरसूत्रों का अर्थ जो अद्भुत रूप में प्रगट करता है, वह जन्म भर भूलता नहीं है ॥३॥ इस प्रकार सूत्रार्थ कर चुकने पर **'पाणिनीयप्रबोध'** को अपने आप पढ़ता हुआ छात्र उसके अर्थों को हृदय में बैठाता जाय तथा उदाहरणों का अर्थ भी अध्यापकों से पूछकर समझता जाय तो व्याकरण का पर्याप्त ज्ञान हो जाता है। बाद में उसी व्याकरण के बल पर अनुवाद करता जाय। इस तरह साहित्य के ग्रन्थ हितोपदेश आदि को पढ़कर ६ मास में ही शब्द सागर को पार कर जाता है ॥४॥ इसी दृष्टि से सभी शास्त्रों का विचार कर महर्षि पाणिनि के हृदयस्थित संकल्प द्वारा वृत्ति (सूत्रार्थ) करने का उपाय निकाल कर वैज्ञानिक पद्धति का वरद ग्रन्थ **'पाणिनीयप्रबोध'** लिखा गया है। **जो बहुत ही सरल एवं छात्रों द्वारा स्वयं पढ़ने योग्य है ॥५॥**

अब मैं **'पाणिनीयप्रबोध'** के कुछ ऐसे सूत्रों का उल्लेख कर उनके अर्थ आदि के विषय में आवश्यक सङ्केत कर देना उचित समझता हूँ जिससे उन सूत्रों के अर्थ करने में छात्रों को किसी प्रकार की कठिनाई न हो। इस प्रकार उन सूत्रों के सम्बन्ध में जो विशेष बातें हैं, उनका भी ज्ञान छात्रों को हो जायेगा।

वृद्धिरादैच् (१।१।१)

यहाँ 'वृद्धि' विधेय है। तो 'न चोद्देश्यमनुक्त्वैवं न विधेयमुदीरयेत्' इस नियम के अनुसार पहले उद्देश्य 'आत् ऐच्' कहकर 'वृद्धिः' कहना चाहिये था। तथापि मङ्गलार्थ 'वृद्धिः' शब्द पहले ग्रन्थारम्भ में पढ़ा गया है। जिससे 'अष्टाध्यायी' से व्याकरण पढ़नेवाले की 'वृद्धिः' उन्नति अवश्य होती ही है।

पूर्वत्रासिद्धम् (८।२।१)

यह परिभाषा सूत्र है। पूर्वत्र ८।२।१ से पूर्व सवासात अध्याय में अर्थात् २९ पादों मे आगे तीन पाद के सूत्र असिद्ध हैं। यों ही जब यह अधिकार सूत्र हो जाता है; तो आगे के सूत्रों में जा जा कर कहता है कि, पूर्वत्र = पूर्व सूत्रों में पर सूत्र असिद्ध है। (यह अर्थ अष्टाध्यायी-पढ़नेवालों के सामने स्वयं हो जाता है। लघुकौमुदी वालों के समान रटना नहीं पड़ता है।)

नश्छव्यप्रशान् (८।३।७)

यहाँ अप्रशान् यह षष्ठी विभक्ति के स्थान में प्रथमा है। **'सुपां सुलुक्०'** (७।१।३९) से ङस् का सु आदेश है। उसका **'हल्ङ्याब्०'** (६।१।६८) से लुक् है। **'मो नो धातोः'** (८।२।६४) से म् का न हुआ है। उसके असिद्ध हो जाने से न् लोप नहीं होता।

यचि भम् (१।४।१८)

य् च **अच्** च तयोः समाहारः यच् तस्मिन् **यचि**।

सुख्युरसम्बुद्धौ (७।१।९२)

यहाँ सप्तमी का प्रथमा में परिणाम करके 'सख्युरङ्गात् असम्बुद्धिः सर्वस्थानं णित्' ऐसा अर्थ है।

नृ च (६।४।६)

नृ इति लुप्त पद है। उसी **'सुपां सु०'** (७।१।३९) से ही षष्ठी का लुक् हुआ है।

मघवा बहुलम् (६।४।१२८)

मघवा षष्ठी के स्थान में उसी **'सुपां सु०' (७।१।३९) से प्रथमा विभक्ति हुई है।**

यू स्त्याख्यौ नदी (१।४। ३)

यहाँ ई च ऊ च यू शब्द बनेगा इतरेतर द्वन्द्व समास में द्विवचन 'य्यौ' होना चाहिये। सो औ का उसी **'सुपां सु०'** (७।१।३९) से लुक् हुआ है।

औतोऽम्शसोः (६।१।९३)

यहाँ आ+ओतः अम्शसोः ऐसी सन्धि है।

अहन् (८।२।६८)

यहाँ अह्नः षष्ठी का **'सुपां सुलुक्०'** (७।१।३९) से लुक् हो जाने से अहन् बना है।

ङे प्रथमयोरम् (७।१।२८)

यहाँ भी ङेः की षष्ठी का उसी से लुक् है। 'प्रथमयोः' से प्रथमाद्वितीया दोनों विभक्तियाँ ली गयी हैं।

शसो न (७।१।२९)

यहाँ भी 'न' के सु का उसी से लुक् है। उसमें 'अ' तो उच्चारणार्थ लगा है। आदेश तो शस् के 'अ' का न् हल् ही होता है।

अनाप्यकः (७।२।११२)

अनः आपि अकः। यहाँ अनः की जगह अन है। 'सु' का **'सुपां सुलुक्०'** (७।१।३९) से लुक् है। उनमें न का अ उच्चारणार्थ है। आदेश इद् का अन् ही होता है। टा के आ से लेकर सुप् के प् तक आप् प्रत्याहार है। अक् शब्द का अकः षष्ठी का रूप है। 'न क् अस्ति यस्यासौ अक्' बहुव्रीहि समास है।

अदसोऽसेर्दादु दो मः (८।२।८०)

अविद्यमानः सिः (इकार उच्चारणार्थः) यस्य सः असिः। तस्य असेः (असः) असकारान्तस्येत्यर्थः। इस बहुव्रीहि समास से असेः का अर्थ होता है कि सकार जिसमें नहीं है ऐसे अदस् शब्द का । किसी के मत से अः सेः (सकारस्य स्थाने) यस्य अः सः असिः तस्य असेः। अर्थात् जिसके 'स्' का 'अ' हो गया हो ऐसे अदस् शब्दका। 'उ' यह उश्च ऊश्च तयोः समाहारः उ ऐसा समाहार द्वन्द्व करके उ+ऊ = ऊ पुनः **'ह्रस्वो नपुंसके प्रातिपदिकस्य'** (१।२।४७) से ह्रस्व करके नपुंसकलिङ्ग 'उ' शब्द का प्रथमैकवचन रूप है।

न मु ने (८।२।३)

यहाँ भी म् च उश्च तयोः समाहारः मु नपुंसकलिङ्ग का एकवचन रूप है। ने ना शब्द का सप्तम्यन्त रूप है। जिससे अर्थ होता है कि ना करने में या ना कर चुकने पर भी मु+म् + उ असिद्ध नहीं होता है।

न तिसृ-चतसृ (६।४।४)

समाहारद्वन्द्व करके षष्ठी के एकवचन का लुक् है।

ष्णान्ता षट् (१।१।२४)

षष् शब्द के जस् का रूप है षट्। एक अक्षर से भिन्न जितनी संज्ञाएँ हैं, सभी सार्थक हैं। यहाँ पञ्चन् षष् सप्तन् अष्टन् नवन् दशन् ये छः शब्द ही षट् संज्ञक हैं। यों ही बड़ी सभी संज्ञाओं का अर्थ कर लेना होगा। अपृक्त = अकेला, सर्वनाम = सबों के नाम पर आनेवाला इत्यादि।

नोपधायाः (६।४।७)

न + उपधायाः। यहाँ 'नस्य' के ङस् का **'सुपां सुलुक्०'** (७।१।३९) से लुक् करके सन्धि की गयी है।

तृतीया तत्कृतार्थेन गुणवचनेन (२।१।३०)

इस सूत्र में 'तत्कृतेन' अर्थेन ऐसा पृथक् पद है। विभक्ति का लुक् करके 'तत्कृत' बना हुआ है। सूत्रार्थ करते समय तत्कृतेन तृतीयान्तार्थकृतेन गुणवचनेन सुबन्तेन तथा अर्थेन अर्थशब्देन सुबन्तेन तृतीयान्तं सुबन्तं समस्यते स तत्पुरुषः समासः। ऐसा अर्थ होगा।

उदाहरण – शङ्कुलया खण्डः = शङ्कुलाखण्डः। यहाँ तृतीयान्तार्थ = शङ्कुला सरौता है। उससे किया गया गुणवाची सुबन्त 'खण्डः' है उसी के साथ तृतीयान्त शङ्कुलया सुबन्त का समास हुआ, समास होने पर आगे की कार्यवाही करके शङ्कुलाखण्डः एक समस्त शब्द तैयार हो गया। यों ही – धान्येन अर्थः = धान्यार्थः। धान्येन तृतीयान्त का अर्थशब्द के साथ समास होता है।

चतुर्थी तदर्थार्थ-बलि-हित-सुख-रक्षितैः (२।१।३६)

यहाँ 'तदर्थ' शब्द में तस्मै चतुर्थ्यन्तार्थाय यत् तत् तदर्थम्। ऐसा विग्रह करके **'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्'** इस वार्तिक के बल से 'अर्थ' शब्द के साथ इसी सूत्र से नित्य समास करके विभक्ति लुक् के बाद विशेष्य निघ्न नपुसंकलिङ्ग 'तदर्थम्' ऐसा हो जाता है। बाद में 'तदर्थं च अर्थश्च बलिश्च हितं च सुखं च रक्षितं

चेति' इतरेतर द्वन्द्व करके तदर्थार्थ-बलि-हित-सुख-रक्षितैः। ऐसा पद बनता है। सूत्रार्थ होता है 'चतुर्थ्यन्तं सुबन्तं तदर्थेन चतुर्थ्यन्तार्थाय यत् तेन सह तथा अर्थ-बलि-हित-सुख-रक्षितैः सुबन्तैः सह समस्यते स च तत्पुरुषः समासः'। उदाहरण – यूपाय दारु = यूपदारु यहाँ चतुर्थ्यन्तार्थ यूप है, उसके लिये जो दारु है, उसके साथ चतुर्थ्यन्त यूपाय का समास हुआ विभक्ति लुक् प्रभृति कार्य करके यूपदारु शब्द बन जाता है। (यहाँ चतुर्थ्यन्तार्थ के लिये जो लिया जाता है उसकी प्रकृति का विकार भी होना आवश्यक है। तभी उसके साथ समास होगा। नहीं तो नहीं। जैसे रन्धनाय स्थाली यहाँ समास नहीं होता है।) क्योंकि स्थाली में विकार नहीं होता है।*

युवोरनाकौ (७।१।१)

सूत्र में युश्च वुश्च तयोः समाहारः युवु तस्य युवुनः होना चाहता था सो सूत्र होने के कारण पुंलिङ्ग है। अथवा गालव ऋषि के मत से पुंवद्भाव कर देने से भी पुंलिङ्ग हो सकता है।

आत्मनूविश्वजन० (५।१।९)

यहाँ द्वन्द्व होने पर न् का लोप नहीं किया है। क्योंकि केवल आत्मन् शब्द से प्रत्यय होगा। इस बातकी स्पष्टता के लिये उत्तरपद के साथ इन दो शब्दों का सम्बन्ध नहीं है। केवल भोग शब्द का ही उत्तरपद के साथ सम्बन्ध है। इसलिये पहले भोगः उत्तरपदं यस्मिन् तत् भोगोत्तरपदम् बहुव्रीहि के बाद आत्मा च विश्वजनश्च भोगोत्तर-पदं च तेषां समाहारः ऐसा समाहार द्वन्द्व करके पञ्चम्यन्त पद बना हुआ है।

ति विंशतेर्डिति (६।४।१४२)

सूत्र में ति की षष्ठी का **'सुपां सु०'** (७।१। ३९)' लुक् है। विंशतेः तेः लोपः डिति ऐसा अर्थ होता है।

---

* **टिप्पणी –** यहाँ पूर्वोक्त दोनों सूत्रों में 'तत्कृत' और 'तदर्थ' शब्दों में 'तद्' शब्द से सूत्र में पूर्वोपात्त 'तृतीयान्त' और चतुर्थ्यन्त' ये ही लिये जाते हैं। सो भी लक्षणाद्वारा तृतीयान्तार्थ और चतुर्थ्यन्तार्थ (वस्तु) पदार्थ पूर्व सूत्र में 'शङ्कुला' (सरौता) उत्तर सूत्र में 'यूप (खम्भा) लिया जाता है। दोनों सूत्रों की हिन्दी क्रमशः – १ – तृतीयान्तार्थ से (वस्तु सरौता प्रभृति से) किया गया जो गुणवाची (खण्ड प्रभृति) सुबन्त शब्द उसके साथ तथा अर्थ सुबन्त के साथ तृतीयान्त का समास होता है। २– चतुर्थ्यन्त सुबन्त का चतुर्थ्यन्तार्थ (वस्तु यूपप्रभृति) के लिये जो (दारु प्रभृति शब्द) उसके साथ तथा अर्थ बलि सुख रक्षित सुबन्तों के साथ समास होता है।

मादुपधायाश्च मतोर्वोऽयवादिभ्यः (८।२।९)

यहाँ म च अश्च तयोः समाहारः मम्, तस्मात् मात्। इसका सम्बन्ध मतुप् के साथ होने से म् अन्तवाले तथा अ से अ, आ दोनों लिया जाता है। अतः अ और आ अन्तवाले शब्दों से मतुप् के म का व होता है। तथा दूसरा अर्थ– मात् यह नपुंसक पञ्चम्यन्त पद उपधायाः पञ्चम्यन्त का विशेषण होता है। तब अर्थ होता है कि म् उपधा से तथा अआ उपधा से मतुप् के म का व होता है। किन्तु यवादि गण के शब्दों से नहीं। क्रम से (क्रमशः) उदाहरण– किंवान्, धनवान्, विद्यावान्। लक्ष्मीवान्, सरस्वान्, भास्वान्। यवादिगण में यवमान् (यहाँ व नहीं हुआ)।

कु तिहोः (७।२।१०४)

यहाँ 'ति' में इकार उच्चारणार्थ रखा है। अतः तिश्च ह च तिहौ तयोः तिहोः। यहाँ सप्तम्यन्त होने के कारण आदि लगाकर अर्थ होता है तादि हादि विभक्ति में–

अतो येयः (७।२।८०)

यहाँ या यह लुप्त षष्ठ्यन्त पद है। यास् को या करके इसलिये पढ़ा है कि सार्वधातुक लिङ् में स् का लोप हो जाता है। या ही बच जाता है। (सार्वधातुकलिङ् के ही या का इय् होता है आर्द्धधातुक आशीर्लिङ् का नहीं)।

आदिर्ञिटुडवः (१।३।५)

यहाँ आदिः एकवचन इसलिये लिखा गया है कि, पृथक्-पृथक् ञिटुडु के साथ इसका सम्बन्ध है। आदि का ञि आदि का टु आदि का डु। समुदाय के साथ नहीं। तथा ञिडु के बीच में पड़ा टु भी स्वरूप से ही टु लिया जाता है। न कि टु = टवर्ग जैसे **'चुटू'** (१।३।७) सूत्र में चवर्ग टवर्ग लिया जाता है। 'चुटू' सूत्र को पृथक् करके पाणिनि जी ने उसे अनित्य माना है। इसी से चुञ्चुप् चणप् प्रत्ययों के च की इत्संज्ञा और लोप नहीं होते।

हनो वध लिङि (२।४।४२)

वध लुप्त प्रथमान्त अदन्त है।

रुदश्च पञ्चभ्यः (७।३।९८)

रुदश्च यह छान्दस प्रयोग **'व्यत्ययो बहुलम्'** (३।१।८५) इस सूत्र से बहुवचन के स्थान में एकवचन है।

ई हल्यघोः (६।४।११३) आ च हौ (६।४।११७)

यहाँ क्रमशः ई और आ ये दोनों लुप्त प्रथमान्त हैं।

ज्ञाजनोर्जा (७।३।७९)

यहाँ जा लुप्त प्रथमान्त है।

ई च गणः (७।४।९७)

यहाँ ई लुप्त प्रथमान्त है।

ऋदोरप् (३।३।५७)

यहाँ ऋद् च उश्च तयोः समाहारः ऋदु तस्मात् ऋदोः है। पुंलिङ्ग तो सूत्र होने से है। सुखोच्चारणार्थ द् लगा दिया गया है। यहाँ त् नहीं है। इसलिये तपर का भ्रम नहीं करना चाहिये। उत्सर्ग के प्राबल्य से 'भवः' भी होता है।

न क्त्वा सेट् (१।२।१८)

यहाँ क्त्वा लुप्त प्रथमान्त है।

समासेऽनञ्पूर्वे क्त्वो ल्यप् (७।१।३७)

यहाँ क्त्वः षष्ठ्यन्त रूप है। **'आतो धातोः'** (६।४।१४०) सूत्र में 'आतः' का योगविभाग होने से क्त्वा के भी आ का लोप हो जाता है।

अब मैं देश के सच्चे सेवक शिक्षा सुधार के पक्षपाती संस्कृत भाषा के अभ्युदय के अभिलाषी तथा संस्कृतच्छात्रों का उद्धार चाहने वाले सभी राष्ट्रप्रेमी विद्वानों के समक्ष इस पुस्तक को उपहृत कर अपना कर्त्तव्य समाप्त करता हूँ।

विदुषां वशंवदः –

श्रीगोपालशास्त्री (दर्शनकेशरी)

अनुक्रमणिका

क्र० सं०	विषयः		पृष्ठसंख्या
१.	संज्ञाप्रकरणम्	– –	१-५
२.	अच्सन्धिप्रकरणम्	– –	६-८
३.	हल्सन्धिप्रकरणम्	– –	९-१२
४.	विसर्गसन्धिप्रकरम्	– –	१३-१५
५.	पुँल्लिङ्गप्रकरणम्	– –	१६-३२
६.	स्त्रीलिङ्गप्रकरणम्	– –	३३-४२
७.	नपुंसकलिङ्गप्रकरणम्	– –	४३-४५
८.	सर्वनामप्रकरणम्	– –	४६-५३
९.	संख्याप्रकरणम्	– –	५४-५६
१०.	अव्ययप्रकरणम्	– –	५७-५८
११.	स्त्रीप्रत्ययप्रकरणम्	– –	५९-६२
१२.	कारकप्रकरणम्	– –	६३-६६
१३.	अव्ययीभावप्रकरणम्	– –	६७-६९
१४.	तत्पुरुषप्रकरणम्	– –	७०-७५
१५.	बहुव्रीहिप्रकरणम्	– –	७६-७७
१६.	द्वन्द्वप्रकरणम्	– –	७८-८०
१७.	समासान्तप्रकरणम्	– –	८१
१८.	तद्धितेषु अपत्यार्थप्रकरणम्	– –	८२-८४
१९.	तद्धितेषु रक्ताद्यर्थप्रकरणम्	– –	८५-८६
२०.	तद्धितेषु शैषिकप्रकरणम्	– –	८७-९०
२१.	तद्धितेषु प्राग्वहतीयप्रकरणम्	– –	९१-९२
२२.	तद्धितेषु यदधिकारः	– –	९३-९४
२३.	तद्धितेषु भावकर्मार्थप्रकरणम्	– –	९५-९६
२४.	तद्धितेष्ववयवपूरणार्थप्रकरणम्	– –	९७
२५.	तद्धितेषु मत्वर्थीयप्रकरणम्	– –	९८-९९
२६.	तद्धितेषु प्राग्दिशीयप्रकरणम्	– –	९९-१०५
२७.	तद्धितेषु स्वार्थिकप्रकरणम्	– –	१०६-१०८
२८.	द्विरुक्तप्रकरणम्	– –	१०९

क्र० सं०	विषयः		पृष्ठसंख्या
२९.	पूर्वार्द्धे प्रश्नप्रकारः	– –	११०
३०.	भ्वादिप्रकरणम्	– –	१११-१५२
३१.	अदादिप्रकरणम्	– –	१५३-१६५
३२.	जुहोत्यादिप्रकरणम्	– –	१६६-१६९
३३.	दिवादिप्रकरणम्	– –	१७०-१७४
३४.	स्वादिप्रकरणम्	– –	१७५-१७७
३५.	तुदादिप्रकरणम्	– –	१७८-१८०
३६.	रुधादिप्रकरणम्	– –	१८१-१८३
३७.	तनादिप्रकरणम्	– –	१८४-१८५
३८.	क्र्यादिप्रकरणम्	– –	१८६-१८७
३९.	चुरादिप्रकरणम्	– –	१८८-१९१
४०.	ण्यन्तप्रक्रिया	– –	१९२-१९४
४१.	सन्नन्तप्रक्रिया	– –	१९५-१९६
४२.	यङन्तप्रक्रिया	– –	१९७-१९८
४३.	यङ्लुगन्तप्रक्रिया	– –	१९९-२००
४४.	नामधातुप्रक्रिया	– –	२०१-२०२
४५.	कण्ड्वादिः	– –	२०३
४६.	आत्मनेपदप्रक्रिया	– –	२०४
४७.	भावकर्मप्रक्रिया	– –	२०५-२०८
४८.	लकारार्थप्रक्रिया	– –	२०९
४९.	कृत्यप्रकरणम्	– –	२१०-२१२
५०.	पूर्वकृदन्तप्रकरणम्	– –	२१३-२२०
५१.	उणादिप्रकरणम्	– –	२२१
५२.	उत्तरकृदन्तप्रकरणम्	– –	२२२-२२६
५३.	परिशिष्टम् - १ (पाणिनीयशिक्षा)	– –	२२७-२४०
५४.	परिशिष्टम् - २ (गणपाठः)	– –	२४१-२७०
५५.	परिशिष्टम् - ३ (परिभाषापाठः)	– –	२७१-२७५
५६.	परिशिष्टम् - ४ (धातुपाठः)	– –	२७६-२८४
५७.	परिशिष्टम् - ५ (लिङ्गानुशासनसूत्रपाठः)	– –	२८५-२९१
५८.	परिशिष्टम् - ६ (सूत्रसूची)	– –	२९२-३१२

11475

॥ ॐ श्रीकृष्णः शरणं मम ॥

॥ अथ पाणिनीयप्रबोधः ॥

मङ्गलाचरणम्

महेशं प्रणिपत्यादौ पाणिन्यादिमुनित्रयम् ।
पाणिनीयप्रबोधोऽयं बालबोधाय तन्यते ॥

अथ शब्दानुशासनम् †

१ अइउण् २ ऋऌक् ३ एओङ् ४ ऐऔच् ५ हयवरट् ६ लण् ७ ञमङणनम् ८ झभञ् ९ घढधष् १० जबगडदश् ११ खफछठथचटतव् १२ कपय् १३ शषसर् १४ हल् ।

---

† पंतञ्जलि-वाक्यमिदम्-स्वयंसूत्रार्थ-वेत्तृणामधीतावधिकारिता ।

अथ संज्ञाप्रकरणम्

इति माहेश्वराणि * चतुर्दशसूत्राणि अणादिसंज्ञार्थानि। एषु णादयः अणाद्यर्थाः। हकारादिषु अकार उच्चारणार्थः, 'लण्'-मध्ये तु इत्संज्ञकः, तद्यथा "अइउण्" इत्यत्र –

उपदेशेऽजनुनासिक इत् ॥ १।३।२ ॥

इति सूत्रत उपदेशे इत् पदद्वये अनुवर्तमाने –

† [३] हलन्त्यम्[२] ॥ १।३।३ ॥ ([१]उपदेशे इत्[४])।

इति सूत्रेण णकारस्येत्संज्ञायाम् –

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ १।१।६८॥

इत्यतः स्वस्य च रूपस्य इत्यनुवर्तमाने –

[४]आदिरन्त्येन[१] [३]सहेता[२] ॥ १।१।७१॥ ([५]मध्यस्य स्वस्य[६] च [७]रूपस्य बोधकः[८])

इति सूत्रेण अन्त्येन इता **'ण्'** कारेण सह आदि. अकारः 'अ इ उ' **इति** वर्णत्रयस्य बोधको भवति। इत्येवम् **'अण्'** प्रत्याहारसिद्धिः। एवम् **'ऋलृक्'** (शि०सू० २) इत्यत्र पूर्वं तु ककारस्येत्संज्ञादिकार्ये जाते अक् प्रत्याहारसिद्धौ अ इ उ ऋ लृ इति वर्णपञ्चकस्य ज्ञानं भवति। एवम् अच् हल् हश् खर् अल् इत्यादयः प्रत्याहाराः ज्ञेयाः।

*** नृत्तावसाने नटराज-राजो ननाद ढक्कां नवपञ्चवारम्।**
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥

† स्वरहीनं व्यञ्जनं हल् इति प्राचीनानां प्रवादः। अथवा हल् च ल् च तयोः समाहारः हल् इति विग्रहे द्वन्द्वसमासे 'यणः प्रतिषेधो वाच्यः' इति वार्तिकस्यानित्यत्वात् द्वितीयलकारस्य संयोगान्तलोपे 'हल्' इति रूपसिद्धिः। तेन अन्त्यं ल् इद् भवतीत्येकोऽर्थः, अन्त्यं हल् इत् भवतीति द्वितीयोऽर्थः। ततश्च प्रथमार्थेन अन्तिमस्य 'हल्' सूत्रस्थलकारस्येत्संज्ञायाम् 'आदिरन्त्येन सहेता' (१।१।७१) इति सूत्रबलात् 'हल्' प्रत्याहारः सिध्यति। द्वितीयार्थेन सूत्रान्तिमानां हल्प्रत्याहारस्थवर्णानामित्संज्ञायाम् 'आदिरन्त्येन सहेता' (१।१।७१) इति सूत्रबलात् अण् अक् अच् इत्यादिप्रत्याहारसिद्धिः। इत्येवमन्त्यपदमात्रावृत्त्यैव निर्वाहात् सूत्रावृत्तिर्न कार्या अन्योन्याश्रयादिदोषवारणायेति विद्वद्भिर्विभावनीयम्।

[1]ऊकालो[2]ऽज्झ्रस्वदीर्घप्लुतः[3] ॥ १।२।२७ ॥ (उश्च, ऊश्च ऊ३श्च वः, वां काल इव कालो यस्य स ऊकालः)

इत्येवम् अकारादयः स्वरास्त्रिधा भवन्ति। तत्र लृकारो द्विधा, तस्य दीर्घाभावात्। एचोऽपि तथा, तेषां ह्रस्वाभावात्। सोऽच् प्रत्येकमुदात्तादिभेदेन त्रिधा।

[1]उच्चैरुदात्तः[2] ॥१।२।२९॥ [1]नीचैरनुदात्तः[2] ॥१।२।३०॥ [1]समाहारः [2]स्वरितः ॥१।२।३१॥

इत्येवमकारादयो नवधा भवन्ति। तत्र लृकारः षोढा तस्य दीर्घाभावात्, एचोऽपि ह्रस्वाभावात् तथैव। सोऽच् नवविधोऽपि प्रत्येकम् अनुनासिकनिरनुनासिकभेदेन द्विधा।

[1]मुखनासिकावचनोऽनुनासिकः [3] ॥ १।१।८॥ ([2]वर्णः)

अँ-ङ्-ण्-न्-ञ्-म् इत्याद्युदाहरणम्। तदित्थम्-अकारादयः प्रत्येकमष्टादशभेदा भवन्ति। लृकारो द्वादशधा। एचोऽपि प्रत्येकं द्वादशधा। ततोऽष्टादशानामपि अकाराणाम्–

तुल्यास्यप्रयत्नं[1] [3]सवर्णम् ॥१।१।९॥ (वर्णम्[2])

(प्रयलश्च आभ्यन्तरो गृह्यते।) इत्यनेन कण्ठस्थानेन विवृतप्रयत्नेन च स्थान-प्रयत्नसाम्यात् सवर्णसंज्ञा भवति। (**ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्**) इति वार्तिकबलात्स्थानभेदेऽपि ऋकारलृकारयोः सवर्णसंज्ञया प्रत्येकं त्रिंशद्भेदा भवन्ति। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। उपूपध्मानीयानामोष्ठौ। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ता:। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य। यत्नो द्विधा-आभ्यन्तरो बाह्यश्च। आभ्यन्तरः पञ्चधा–स्पृष्टः, ईषत्स्पृष्टः, विवृतः, ईषद्विवृतः, संवृत इति। कादिमान्तानां (स्पर्शानाम्) स्पृष्टः। अन्तःस्थानां (यणाम्) ईषत्स्पृष्टः। विवृतोऽचां (स्वराणाम्), ईषद्विवृत ऊष्मणां (शलाम्), ह्रस्वस्याकारस्य संवृतः। प्रक्रियादशायां तु विवृत एव।† इति आभ्यन्तरः प्रयत्नः। बाह्ययत्न एकादशधा-विवारः संवारः श्वासः नादः घोषः अघोषः अल्पप्राणः महाप्राणः उदात्तः अनुदात्तः स्वरितश्चेति। बाह्ययत्नाश्चान्तरतम्य-परीक्षायाम् उपयुक्ता भवन्ति। खरो विवाराः श्वासा अघोषाः। हशः संवारा नादा घोषाः। वर्गस्य प्रथम-तृतीय-पञ्चमवर्णाः (चयः जशः ञमः) यणश्चेति मिलित्वोनविंशत्यक्षराणि

---

† **आभ्यन्तरयत्नस्य प्रकृष्टयत्नत्वात् प्रयत्नशब्देनैव व्यवहारः।**

अल्पप्राणाः। वर्गस्य द्वितीयचतुर्थवर्णौ शलश्च (खफछठथ इति तथा झष्-शल्प्रत्याहाराक्षराणि) इति मिलित्वा चतुर्दशाक्षराणि महाप्राणाः। कादयो मावसानाः स्पर्शाः। यण् अन्तस्थः, शल् ऊष्मा। कखयोः पूर्वं विद्यमानोऽर्धविसर्गसदृशो जिह्वामूलीयः। पफयोः पूर्वं विद्यमानोऽर्धविसर्गसदृश उपध्मानीयः। अचः परौ अनुस्वारविसर्गौ। स्वरोपरि एकबिन्दुरनुस्वारः। स्वरदक्षिणपार्श्वे बिन्दुद्वयं विसर्गः। स्वरोपरि चन्द्रबिन्दुरनुनासिकः।

*** अणुदि[२]त्सवर्णस्य[३]चाप्रत्ययः[१] ॥१।१।६९॥ (ग्राहकः[४])**

(कु-चु-टु-तु-पु- इति एते उदितः) तदेवम्-'अ' इत्यष्टादशानां सवर्णानां ग्राहकः। तथेकारोकारौ। ऋकारस्त्रिंशतः। एवम् लृकारोऽपि । एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन यवला द्विधा। अतस्ते प्रत्येकं द्वयोर्द्वयोर्ग्राहकाः।

★ [१]तपरस्तत्कालस्य[२] ॥१।१।७०॥ (ग्राहकः[३])

❖ सुप्तिङन्तम् पदम् ॥१।४।१४॥ (सुबन्तं तिङन्तं पदं ज्ञेयम्)

रामः। भवति।

[३]विभक्तिश्च ॥१।४।१०४॥ ([१]सुपः तिङः[२])

प्रथमैकवचनात् सोः सप्तमीबहुवचनस्य सुपः पूकारावधि 'सुप्' प्रत्याहारो भवति। तद्यथा –

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
सु	औ	जस्	प्रथमा
अम्	औट्	शस्	द्वितीया
टा	भ्याम्	भिस्	तृतीया
ङे	भ्याम्	भ्यस्	चतुर्थी
ङसि	भ्याम्	भ्यस्	पञ्चमी
ङस्	ओस्	आम्	षष्ठी
ङि	ओस्	सुप्	सप्तमी

---

* अत्र प्रणकारेण 'अण्' प्रत्याहारो ज्ञेयः।

★ तः परो यस्मात् स तपर इति बहुव्रीहिः। तात्परः तपर इति तत्पुरुषः। इत्येवं समासद्वयमत्र।

❖ आगमविधेरनित्यत्वान्न ङमुडागमः।

सम्बोधनं प्रथमावज्ज्ञेयम् ।

प्रथमपुरुषैकवचनस्य तिपस्तिकारात् उत्तमपुरुषबहुवचनस्य महिङो ङकारावधि तिङ् प्रत्याहारो भवति । तद्यथा –

परस्मैपदिनः प्रत्ययाः

एकवचनम्	द्विवचनम्	बहुवचनम्	पुरुषाः
तिप्	तस्	झि	प्रथमपुरुषः
सिप्	थस्	थ	मध्यमपुरुषः
मिप्	वस्	मस्	उत्तमपुरुषः

आत्मनेपदिनः प्रत्ययाः

एकवचनम्	द्विवचनम्	बहुवचनम्	पुरुषाः
त	आताम्	झ	प्रथमपुरुषः
थास्	आथाम्	ध्वम्	मध्यमपुरुषः
इट्	वहि	महिङ्	उत्तमपुरुषः

* [1]येन[2]विधिस्तदन्तस्य[3] ॥ १ । १ । ७२ ॥ (सः)

(विशेषणं तदन्तस्य संज्ञेत्यर्थः) इति सूत्रबलादेव विशेषणे **'अन्त'**-शब्दं निवेश्य सूत्राणां वृत्तिर्विधेया । इत्येवं **'यस्मिन् विधिस्तदादावल्ग्रहणे'** (परि० ३३) इति नियमात् सप्तम्यन्ते विशेषणे 'आदि' शब्दो नियोज्यते । यथा **'उपसर्गाद्ऋति धातौ'** (६ । १ । ९१) इत्यादौ ऋकारादौ धातौ इत्यर्थः ।

॥ इति संज्ञाप्रकरणम् ॥

●

*** इह 'येन' इत्यत्र करणे तृतीया, करणं च अप्रधानं भवति। अप्रधानता च विशेष्यविशेषणभावमादाय विशेषणे एव भवति। अतश्च विधीयमाने कार्य्ये विशेषणे अन्तशब्दो नियोज्यः। यथा 'ईदूदेद् द्विवचनम् प्रगृह्य' (१।१।११) इति सूत्रे ईदन्तम् ऊदन्तम् एदन्तं द्विवचनं प्रगृह्यम् भवतीत्यर्थो लभ्यते।**

अथ अच्-सन्धिः (स्वर-सन्धिः)

वेद+अध्ययनम् इति स्थिते –

[1]अकः [2]सवर्णे [6]दीर्घः॥ ६।१।१०१॥ ([3]अचि [5]एकः [4]पूर्वपरयोः संहितायाम्[7])

इति दीर्घैकादेशे=वेदाध्ययनम्। एवं स्वराज्यान्दोलनम्। विद्याध्ययनम्। विद्यालयः। मुनीन्द्रः। कपीशः। गौरीन्दुः। गौरीशः। साधूत्सवः। बाहूर्ध्वम्। चमूल्लासः। चमूर्मिः। पितृणम् इत्यादि। राम+इच्छा इति स्थिते–

[1]अदेङ् गुणः[2] ॥१।१।२॥

इति अदेङोः गुणसंज्ञायाम्–

[1]आद्गुणः[5]॥६।१।८७॥ ([2] अचि [4] एकः पूर्वपरयोः[3] [6]संहितायाम्)

इति गुणैकादेशे कर्तव्ये–

स्थानेऽन्तरतमः ॥१।१।५०॥ (आदेशः)

इति स्थानसाम्यादेकारैकादेशे। रामेच्छा। एवम्–देवेहा। महेन्द्रः। रमेशः। देशोद्धारः। गृहोर्ध्वम्। महोत्सवः। गङ्गोर्ध्वगा। देव+ऋणमिति स्थिते **'आद् गुणः'** (६।१।८७) इति गुणे कर्तव्ये स्थानसाम्याद्–

[1]उरण्[2] [3]रपरः ॥१।१।५१॥ (उः = [1]ऋवर्णस्य [2]अण्)

इति रपरे अर् इत्येकादेशे। देव् अर्णम् इति जाते हलो वकारस्य परेणाक्षरेण योगे रेफस्य चोर्ध्वगतौ देवर्णम्। एवम्– महर्षिः। तवल्कारः। खट्वल्कार इत्यादि। एक+एकम् – इत्यत्र–

[2] वृद्धिरादैच्[1] ॥१।१।१॥

इति आदैचोः वृद्धिसंज्ञायाम् –

[5]वृद्धिरेचि[2] ॥६।१।८८॥ ([1]आत् [4]एका [3]पूर्वपरयोः संहितायाम्[6])

इति वृद्ध्यैकादेशे कर्त्तव्ये स्थानसाम्यादैकारादेशे। एकैकम्। एवम्–एकैला। सूपौदनम्। गङ्गौघः। जनैक्यम्। महैश्वर्यम्। ममौत्सुक्यम्। महौद्धत्यम् इत्यादि। प्र+ऋच्छति इति स्थितौ–गुणमपोद्य–

[२]उपसर्गादृति[३] धातौ[४] ॥ ६।१।९१ ॥ ([१]आत् [६]एका [५]पूर्वपरयोः वृद्धि[७]:)

इति अकार ऋकारयोः उभयोः स्थान **'उरण् रपरः'** (१।१।५१) इति रपरत्वात् आर्वृद्धौ प्र आर्च्छति इति जाते उपसर्गस्य स्वरसंयोगे रेफस्य चोर्ध्वगतौ प्रार्च्छति। (**'आद्गुणस्या'**-पनोदिकेयं वृद्धिः)। 'प्र+एजते' इत्यत्र–गुणापवादिकां वृद्धिमपोद्य–

[३]एङि[७]पररूपम् ॥६। १। ९४ ॥ ([१]आत् [२]उपसर्गात् [४]धातौ [५]पूर्वपरयोः एकं[६])

इति एकारे पररूपे प्रेजते, एवम् उप+ओषति उपौषति। प्र+एति इत्यत्र **'एङि पररूपम'** (६।१।९४) इति पररूपमपोद्य–

[३]एत्येधत्यूठ्सु ॥६।१।८९॥ ([१]आत् [६]वृद्धिः [२]एचि [५]एका [४]पूर्वपरयोः [७]संहितायाम्)

इति वृद्ध्येकादेशे प्रैति, एवम् उप+एधते उपैधते। प्रष्ठ+ऊहः प्रष्ठौहः। दधि+अत्र इति स्थिते –

*** [२]इको [३]यणचि[१] ॥६।१।७७॥ (संहितायाम्[४])**

इति यणि कर्तव्ये स्थानसाम्यात् इकारस्य यकारे दध्यत्र। एवम् दध्यानय। अभ्युदयः। प्रत्यूहः। मुन्यृषभः। प्रत्येकम्। दध्योदनम्। अत्यैश्वर्य्यम्। पत्यौदार्यम्। सुध्यङ्गना। सेनान्यागमनम्। सुध्युपास्यः। नद्यूर्मिः। अश्विन्यृक्षम्। पुङ्ग्येला। कोशातक्योदनम्। लक्ष्म्यैश्वर्यम्। सरस्वत्यौत्सुक्यम्। नन्वथ। स्वागतम्। मध्विदम्। साध्वीहितम्। मध्वृते। मध्वेतत्। पचत्वोदनम्। साध्वैश्वर्यम्। ददात्वौषधम्। सरय्वम्बु। वध्वागमनम्। वध्विच्छा। चम्वीशः। वध्वृणम्। चम्वेनः। चम्वोघः। वध्वैश्वर्यम्। वध्वौदार्यम्। धात्रंशः। पित्रादेशः। मात्रिच्छा। भ्रात्रीहितम्। पित्रुपदेशः। दात्रूहः। स्वस्रेकता। यात्रोघः। धात्रैश्वर्यम्। पित्रौदार्यम्। लकारौ। लाकृतिः। लिति। लीशः। लुपदेशः इत्यादि।

*** षष्ठी स्थानेऽयोगा (१।१।४९) अयोगा अनिश्चितसम्बन्धविशेषा षष्ठी 'स्थाने' इति शब्देन युक्ता कार्या वृत्तिनिर्माणे। यथा–इकः स्थाने यण् स्यादचि परे इति॥**

ने+ अति इति स्थिते–

[२]एचोऽयवायावः[३] ॥६।१।७८॥ (अचि[१] संहितायाम्[४])

इति एकारस्य अयादेशे। नयति। एवं-भवति। नायकः। पावकः। हरे+इह इति स्थिते अयादेशे हरय्+इह इति जाते–

[४]लोपः [६]शाकल्यस्य ॥८।३।१९॥ (अवर्णपूर्वयोः[१] [२]पदान्तयोर्य्वोः[३] अशि[५] [७]मते)

इति यलोपे हर इह इति सिद्धे प्राप्तो गुणः–

[१]पूर्वत्रासिद्धम्[२] ॥८।२।१॥ (अधिकारोऽप्ययम्)

तेन पूर्वत्र= पूर्वसूत्रेषु अष्टमाध्यायप्रथमपादान्तेषु सप्तसु अध्यायेषु अवशिष्टम् पादत्रयम् असिद्धम्। अधिकारपक्षे अग्रेऽपि पूर्वपूर्वसूत्रेषु परं परं सूत्रमसिद्धं भवतीति सूत्रार्थः। इति यलोपासिद्ध्या निवर्तते। पक्षे हरयिह। एवम् विष्ण इह विष्णविह। त आगताः, तयागताः। भान आयाहि, भानवायाहि, तस्मा अर्थः, तस्मायर्थः। रामा इह, रामाविह। हरे+अव इत्यत्र प्राप्तमयादेशमपोह्य –

[२]एडः [१]पदान्तादति[३] ॥६।१।१०९॥ (पूर्वरूपम्[४])

इति पूर्वरूपे हरेऽव। एवम् वटोऽपसर्प। हरी+एतौ इत्यत्र प्राप्तं यणं सन्निरुध्य–

[१]ईदूदेद् द्विवचनं[२] प्रगृह्यम्[३] ॥१।१।११॥

इत्यनेन हरी इत्यस्य प्रगृह्यसंज्ञायाम्–

प्लुतप्रगृह्या[१] अचि[२] नित्यम्[३] ॥६।१।१२५॥ (प्रकृतिभावः[४])

इति प्रकृतिभावे। हरी एतौ। एवम्-भानू उदितौ। माले एते।

॥ इत्यच्सन्धिः * ॥

●

*** एतन्निष्कर्षो यथा :–**

१– अकि समानस्वरयोर्दीर्घो जायते। २– अवर्णादिकि परे यथास्थानं गुणैकादेशो भवति। ३–अवर्णादिचि परे वृद्ध्येकादेशः कल्प्यते। ४– अवर्णान्तोपसर्गात्परस्य ऋकारादेर्धातोः ऋकारेण सह योगे गुणमपोह्य वृद्धिरेव जायते। ५–आदुपसर्गाद् एङादेर्धातोर्योगे गुणापवादिकां वृद्धिमपोह्य पररूपं जायते। ६– अवर्णदिजाद्योरेत्येधत्योः परयोः गुणापवादिकाया वृद्धेरपवादकं पररूपमपोह्य वृद्धिरेव भवति। अवर्णादूहादिपरे गुणो न जायते वृद्धिर्जायते। ७– इकोऽसवर्णेऽचि परे यथास्थानं यण् निष्पद्यते। ८– एचः क्रमाद् अय्–अव्–आय्–आव्–इति सम्पद्यतेऽचि परे। ९– पदान्तादेङः परस्य ह्रस्वाकारस्य पूर्वरूपमेव भवति। १०– द्विवचनानामीदूदेदन्तानां प्रकृतिभावेन दीर्घयणाद्ययादेशपूर्वरूपाणि नैव भवन्ति।

अथ हल्-सन्धिः

रामस्+शेते इत्यत्र–

स्तोः[1] श्चुना[2] श्चुः[3] ॥८।४।४०॥

इति श्चुत्वेन सस्य शत्वे रामश्शेते। एवम् रामश्चलति। सच्चित्। जगच्छत्रम्। मरुज्झम्पः। राजञ्जय। याच्ञा।

रामस्+षष्ठ इति स्थितौ–

[2]ष्टुना ष्टुः[3] ॥८।४।४१॥ ([1]स्तोः)

इति ष्टुत्वेन सस्य षत्वे रामष्षष्ठः। एवम् रामष्टीकते। तट्टीका। उड्डीयते। रणड्ढक्का। लिखण्णकारम्। वाक् + ईश इति स्थिते –

[1]झलां[3]जशोऽन्ते[2] ॥८।२।३९॥

इति जशुत्वेन कस्य गत्वे वागीशः। एवम् अजन्तः। तदिदम्। मधुलिडयम्। त्वग्लावण्यम्। अज्झल्। अड्भवति। तद्वद। ककुब्भिमला। लिड्भ्याम्। ककुबियम्। वाग्+ कृता इत्यत्र –

[2]खरि च ॥८।४।५५॥ ([1]झलां [3]चरः)

इति गस्य कत्वे वाक्कृता। एवम् तत्तनोति। तत्सत्। प्राट्सरति। ककुप्प्रकाशते। वाक्+महिमा इत्यत्र जश्त्वेन गकारे –

यरो[1]ऽनुनासिकेऽ[2]नुनासिको[3] वा ॥८।४।४५॥

इति गकारस्य अनुनासिके ङकारे वाङ्महिमा * एवम् तत्+नित्यम्=तद् नित्यम्= तन्नित्यम्। आट्+नद्याः = आण्नद्याः। आप्+नदी=आम्नदी। तत्+लय इत्यत्र **'झलां जशोऽन्ते'** (८।२।३९) इति दकारे–

[2]तोर्लि[3] ॥८।४।६०॥ (पदान्तस्य[1] पसवर्णः[4])

इति दकास्य परसवर्णतया लत्वे। तल्लयः। एवम् विद्वाँल्लिखति। अत्रानुनासिकस्य नस्यानुनासिक एव लकारः। वाक्+हरिः। इत्यत्र–

---

* **'प्रत्यये भाषायान्नित्यम्' इति वार्तिकबलान्नित्यमेवेदम्।**

[1]झयो हो[2]ऽन्यतरस्याम्[4] ॥८।४।६२॥ (पूर्वस्य सवर्णः[3])

इति पूर्वसवर्णतया संवारनादघोषमहाप्राणयलस्य हकारस्य वा घकारे, कस्य च जश्त्वेन गकारे वाग्घरिः। एवं अज्झीनम्। त्विड्ढसति। तद्धविः। ककुब्भता। पक्षे वाग् हरिः, अज् हीनम्। त्विड् हसति। तद् हविः। ककुब् हता। वाक्+शूरः इत्यत्र–

[2]शश्छो[3]ऽटि[4] ॥८।४।६३॥ (झयः[1] अन्यतरस्याम्[5])

इति शकारस्य छकारे वाक्छूरः। एवम् अच्छल्। षट्छेरते। ककुप्छयनम्। पक्ष वाक् शूरः। अच् शल्। षट् शेरते। ककुप् शयनम्।

(छत्वममीति वाच्यम्।)

तत्+श्लोकेन, तच्श्लोकेन तच्छ्लोकेन। शिव+छाया इत्यत्र–

छे [3]च ॥६।१।७३॥ (तुक्[2] ह्रस्वस्य[1])

इति तुकि कर्तव्ये–

[2]आद्यन्तौ [1]टकितौ ॥१।१।४६॥

इति कित्त्वात् अकारस्यान्ते तुकि कृते ककारस्य **'हलन्त्यम्'** (१।३।३) इत्यनेन, तथा उकारस्य–

[1]उपदेशेऽज[3]नुनासिक[2] इत्[4] ॥१।३।२॥

इत्यनेन इत्संज्ञायाम्–

तस्य[1] लोपः[3] ॥१।३।९॥ (इतः[2])

इत्यनेन उभयोर्लोपे शिवत् छाया इति जाते तकारस्य जश्त्वेन दकारे तस्य श्चुत्वेन जकारे **'खरि च'** (८।४।५५) इति जकारस्य चकारे शिवच्छाया। एवं संस्कृतच्छात्रः। इत्यादि। प्रत्यङ् + आत्मा इत्यवस्थायाम्–

[3]ङमो * [1]ह्रस्वादचि[4] [6]ङमुण्नित्यम्[5] ॥ ८।३।३२॥ (अच[2]:)

---

* **'पूर्वत्र पञ्चमी परत्र सप्तमीं षष्ठीं प्रकल्पयति' इति नियमात् ङ्मः पञ्चमीतः पराम् 'अचि' इति सप्तमीं षष्ठीं प्रकल्प्य अचः ङ्मुडागमो जायते।**

ङकारात्परस्य अचः आत्मेत्याकारस्य ङमुडागमे कर्तव्ये **'आद्यन्तौ टकितौ'** (१।१।४६) इति टित्त्वाद् आकारात्पूर्वम् ङुटि, अनुबन्धलोपे प्रत्यङ्ङात्मा। एवम् सुगण्णिह। तस्मिन्नद्रौ इत्यादि। राजन् तथा इति स्थितौ–

[1]नश्छ[4]व्यप्रशान्[5] ॥८।३।७॥ ([2]रुः अम्परे[3])

इति नस्य रुकारे कृते–

[1]अत्रानुनासिकः[4] [3]पूर्वस्य तु वा[5] ॥८।३।२॥ (रोः[2])

इति रोः पूर्ववर्तिनोऽकारस्यानुनासिकत्वे राजँरु + तथा इति जाते अनुबन्धलोपे–

[3]खरवसानयोर्विसर्जनीयः[2] ॥८।३।१५॥ ([1]रः)

इति रेफस्य विसर्गे। राजँः तथेति जाते–

[1]विसर्जनीयस्य [2]सः ॥८।३।३४॥ ([3]खरि)

इति विसर्गस्य सकारे राजँस्तथा। क्रुध्यँस्थुर्वति। हसँश्चलति। विद्वाँश्छात्रः। राजँष्टीकसे। सँष्ठक्कुरः। हरिम्+हसति इत्यवस्थायाम्–

[1]मोऽनुस्वारः[2] ॥८।३।२३॥ (हलि[3])

इति मस्यानुस्वारे हरिं हसति। एवं ग्रामं सरति। सुखदं शयनम्। यशान्+सि इत्यत्र–

[4]नश्चा[2]पदान्तस्य [1]झलि ॥८।३।२४॥ ([3]मोऽनुस्वारः[5])

इत्यनेन नस्यानुस्वारे यशांसि। एवम् आक्रम्+स्यते इत्यत्र मस्यानुस्वारे आक्रंस्यते। अं+कितः इत्यत्र–

अनुस्वारस्य[1] ययि[2] परसवर्णः[2] ॥८।४।५८॥

इति परसवर्णे ङकारे अङ्कितः। एवम् वाञ्छितः। कुण्ठितः। छन्दितः। गुम्फितः। त्वं+करोषि इत्यत्र–

वा[3] पदान्तस्य[1] ॥८।४।५९॥ ([2]अनुस्वारस्य [4]परसवर्णः ययि[5])

इति वैकल्पिके परसवर्णे ङकारे त्वङ्करोषि । त्वं करोषि । एवम् ग्रामश्चल, ग्रामं चल । शीघ्रण्टीकते, शीघ्रं टीकते । स्तोकन्तनु, स्तोकं तनु । तक्रम्पिब, तक्रं पिब । सँय्यन्ता, संयन्ता । सँव्वत्सरः, संवत्सरः । यँल्लोकम्, यं लोकम् ।

॥ इति हल्सन्धिः * ॥

---

* एतन्निष्कर्षो यथा :–

१– दन्त्याक्षराणि यथाक्रमं तालव्येनाक्षरेण सह तालव्यानि भवन्ति, मूर्द्धन्येन सह मूर्द्धन्यानि भवन्ति। २– अशि पदान्तस्य वर्गप्रथमाक्षरस्य स्ववर्गीयं तृतीयमक्षरं भवति। ३– खरि परे वर्गतृतीयाक्षरस्य स्ववर्गीयं प्रथमाक्षरं भवति। ४– अनुनासिके परे वर्गप्रथमाक्षरस्य स्ववर्गीयं पञ्चमाक्षरं तृतीयाक्षरं वा भवति। ५– तदनानां लकारे परे स्वतुल्यो लकारो ज्ञेयः ६–वर्गप्रथमाक्षरात् परो हकारस्तद्वर्गीयचतुर्थाक्षरत्वं भजते, प्रथमाक्षरञ्च तृतीयाक्षरं भूत्वा तिष्ठति। ७– वर्गप्रथमात् तृतीयाद्वाक्षरात् परः अम्परकः शकारः छकारो भवति तृतीयाक्षरञ्च प्रथमाक्षरं भूत्वा तिष्ठति। ८– पदान्ता ह्रस्वपूर्वा ङणनाः स्वरे परे द्विगुणितास्तिष्ठन्ति। ९– पदान्तो नकारस्तु अम्परकेषु त-थ-च-छ-ट ठेषु षट्सु अक्षरेषु (छवि) तत्स्थानीय– स-श-ष परकोऽनुस्वारो भूत्वा तिष्ठति। १०– झलक्षरेषु परेषु अपदान्तनकारमकारौ अनुस्वारीभूय यियि तद्वर्गीयपञ्चमाक्षरतां व्रजतः। ११– पदान्तमकारस्तु वर्गाक्षरेषु परेषु य-व-लेषु च हलि अनुस्वारो भूत्वा विकल्पेन परसवर्णतां गच्छति। १२– शषसहरेफेषु परेषु अपदान्तौ नकारमकारौ पदान्तश्च मकारोऽनुस्वारतामेव गच्छन्ति। १३– ह्रस्वादचः परः छकारः चकारपूर्वकस्तिष्ठति। इति।

अथ विसर्ग-सन्धिः

रामस्+करोति इत्यत्र– पदसंज्ञायां सत्याम्

[२]ससजुषो रुः[३] ॥८।२।६६॥ ([पदान्ते[१]])

इति सस्य रुत्वे अनुबन्धलोपे रामर् करोति इति जाते **'खरवसानयोर्विसर्जनीयः'** (८।३।१५) इति विसर्गे रामः करोति इति स्थिते– सत्वमपोद्य–

कुप्वोः[२] ≍ क ≍ [३]पौ च ॥८।३।३७॥ ([१]विसर्जनीयस्य [४]चादिसर्गश्च)

इति वैकल्पिके जिह्वामूलीये राम ≍ करोति। पक्षेः रामः करोति। एवं हरि ≍. खनति। हरिः खनति। मेघः पतति इत्यत्र वैकल्पिके उपध्मानीये मेघ ≍ पतति। वृक्षः फलति, वृक्ष ≍ फलति। विष्णुः+त्राता इत्यत्र **'विसर्जनीयस्य सः'** (८।३।३४) इति सकारे विष्णुस्त्राता। एवं रामः+चलतीत्यत्र विसर्गस्य सकारे श्चुत्वेन शकारे रामश्चलति। एवं शः+छोऽटि= शश्छोऽटि। भानुः+टीकते इत्यत्र सत्वे ष्टुत्वेन षकारे भानुष्टीकते। एवम् ऋतः+ठञ्=ऋतष्ठञ्। रामः+सरति इत्यत्र– सत्वप्राप्तौ–

[४]वा [१]शरि ॥८।३।३६॥ ([२]विसर्जनीयस्य [३]विसर्जनीयः)

इति वैकल्पिके विसर्गे रामः सरति। पक्षे सकारे रामस्सरति। एवं रामः शेते पक्षे सत्वे श्चुत्वे रामश्शेते। रामः षष्ठः। इत्यत्र पक्षे सत्वे ष्टुत्वे रामष्षष्ठः। इत्यादि। रामस्+अर्च्य इत्यत्र–**'ससजुषो रुः'** (८।२।६६) इति सस्य रुत्वे–

[२]अतो [३]रोरप्लु[१]तादप्लुते[५] ॥६।१।११३॥ ([४]उः अति[६])

इति रोः उकारे गुणे पूर्वरूपे रामोऽर्च्यः, एवम् गुणोऽनर्घ्यः। शिवोऽपीत्यादि। रामरु+हसति इत्यत्र–

[४]हशि च ॥६।१।११४॥ ([१]अप्लुतादतः रोः[२] उः[३])

इति उत्वे गुणे रामो हसति। एवम्-शिवो याति। घटो भूतले। पटो मठे। मनस्+रथ इत्यत्र सस्य रुत्वे मनर्+रथ इति स्थितौ–

विप्रतिषेधे परं कार्यम् ॥१।४।२॥

इति परत्वात **'रो रि'** (८।३।१४) इति प्राप्तं रलोपं **'पूर्वत्रासिद्धम्'** (८।२।१) इति त्रिपादित्वादसिद्धीकृत्य **'हशि च'** (६।१।११४) इत्युत्वे गुणे च मनोरथः। मनोरमा। देवारु+इह इति स्थितौ–

भो भगो[1] अघो अपूर्वस्य [3]योऽशि[4] ॥८।३।१७॥ (रोः[2])

इति रोर्यत्वे **'लोपः शाकल्यस्य'** (८।३।१९) इति पाक्षिके यलोपे। देवा इह देवायिह। एवम् देवायू+नम्या इत्यत्र–

[4]हलि सर्वेषाम्[5] ॥८।३।२२॥ ([1]भोभगो अघो अपूर्वस्य यः[2] लोपः[3]।)

इति यलोपे देवा नम्याः। एवं नरा यान्ति। बाला हसन्ति, इत्यादि। पुनर्+रमते इत्यत्र–

[1]रो रि[2] ॥८। ३।१४॥ (लोपः[2])

इति रेफस्य लोपे–

ढ्रलोपे[1] पूर्वस्य[2] दीर्घो[4]ऽणः[3] ॥६।३। १११॥

इति पूर्वस्याकारस्य दीर्घे पुना रमते। एवम्-हरी रम्यः। भानू रक्षति। हे पितः रक्ष। हे ना रद। रेफभिन्ने अशि इचः परस्य रोः तथा **रुभिन्नरेफस्य** कस्यापि सूत्रस्याप्रवृत्त्या परेणाक्षरेण योग एव भवति, रेफे परे तु **'रो रि'** (८।३।१४) इति तल्लोपे पूर्वस्वरस्य दीर्घो जायते। * स सु+करोति इत्यत्र–

*** तच्छब्दस्य सु विभक्तौ अर्धसिद्धं "स सु" इति रूपमस्ति। सः+करोति इति सिद्धस्थितावपि सुस्थानिकविसर्गस्य सुरूपतया लोपो भवितुमर्हति। 'पूर्वत्रासिद्धम्' (८।२।१।) इति रुत्वविसर्गयोरसिद्धत्वा।**

[३]एतत्तदोः [४]सुलोपोऽको[२] रनञ्समासे[१] हलि[५]॥६।१।१३२॥

इति सुलोपे स करोति। एवम् स पठति। स चलति। स वदति। स गच्छति। एष सरति। एष वन्द्यः। एष शिवः। एष खनति। इत्यादि।

॥ इति विसर्गसन्धिः ★ ॥

॥ इति सन्धिप्रकरणम् ॥

●

★ विसर्गसन्धिनिष्कर्षो यथा–

१– खरि विसर्ग एव तिष्ठति। तत्रैव तस्य कखयोः पफयोः पूर्वं विकल्पेन जिह्वामूलीयोपध्मानीयरूपौ अर्धविसर्गौ भवतः। २– दन्त्यतालव्यमूर्द्धन्येषु षट्सु खरप्रत्याहाराक्षरेषु, नित्यं, शरि तु वैकल्पिकाः त्रिविधाः सशषा भवन्ति। (अशि उः यलोपः रेफश्चेति त्रिधा सन्धिर्भवति) ३– तत्र ह्रस्वाकारात्परस्य रोः न तु रेफस्य (स्वाभाविकस्य सम्बुद्धेश्च) अति हशि च उः भवति। ततो गुणे कृते अतश्च पूर्वरूपे सति प्रयोगसिद्धिः। ४– ह्रस्वाकारात् परस्य रोः न तु रुभिन्नरेफस्य ह्रस्वाकारभिन्ने अचि तथा आकारात् परस्य तु अशि यकारो जायते। तस्य च लोपे सन्धिकार्य्याभावः। ५–इचः परस्य रोः तथा अकारोपधस्यापि रुभिन्नरेफस्य, ऋदन्तशब्दानां सम्बुद्धिरेफस्य च अशि परे रेफ एव तिष्ठति। अस्यैव त्रिविधस्य रेफस्य रेफे परे लोपो जायते पूर्वस्य च दीर्घः। ६– स, एष इत्युभयोः पदयोः ह्रस्वाकारभिन्ने अलि निर्विसर्गमिव रूपं तिष्ठति। सर्वत्र हलि सुलोपः, अचि यलोप एव भवतीत्यर्थः। केवलमति उत्वादिकार्य्यं जायते। इति।

अथ पुँल्लिङ्गप्रकरणम्

पदं बीजं द्रुमो वाक्यं प्रमाणं फलमाप्यते–
यस्याः प्रसादात्तां नित्यं वाग्देवीं प्रणमाम्यहम् ॥
रामो हरिः करी भानुर्मरुत्कर्ता च चन्द्रमाः
विद्वाँश्च भगवानात्मा दशैते पुंसि नायकाः ॥

आदावदन्तादि-शब्दाः

अकारान्तः पुँल्लिङ्गो रामशब्दः, तस्य, अव्युत्पन्नपक्षे * –

[3]अर्थवदधातु[1] रप्रत्ययः[2] प्रातिपदिकम्[5] ॥१।२।४५॥ ([4]शब्दस्वरूपम्)

इत्यनेन, व्युत्पन्नपक्षे तु–

[1]कृत्तद्धितसमासाश्च ॥१।२।४६॥ ([2]प्रातिपदिकम्)

इत्यनेन प्रातिपदिकसंज्ञायाम्–

[3]स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसो-साम्ङ्योस्सुप् ॥४। १।२॥ ([1]ङ्याप्प्रातिपदिकात् [4]प्रत्ययः [2]परश्च)

इत्यनेन स्वाद्युपस्थितौ एकत्वविवक्षायां–

द्व्येकयोर्द्विवचनैकवचने ॥१।४।२२॥

इति सौ विभक्तौ राम+सु इति स्थिते **"उपदेशेऽजनुनासिक इत्"** (१।३।२) इत्युकारस्येत्संज्ञायाम् **'तस्य लोपः'** (१।३।९) इति लोपे च राम+स् इति जाते **'सुपूतिङन्तं**

---

* शब्दो द्विधा व्युत्पन्नोऽव्युत्पन्नश्च। प्रकृतिप्रत्ययविभागविशिष्टत्वं व्युत्पन्नत्वम्, तद्भिन्नत्वम् अव्युत्पन्नत्वम्।

"रमन्ते योगिनोऽस्मिन्निति रामः" इति व्युत्पत्तौ रम् धातुः प्रकृतिः, घञ् इति प्रत्ययः 'हलश्च' (३।३।१२१) इति सूत्रेण घञ्। 'लशक्वतद्धिते' (१।३।८) 'हलन्त्यम्' (१।३।३) इति सूत्राभ्यां घकार-ञकारयोः इत्संज्ञायां लोपे च रम्+अ इत्यत्र 'अत उपधायाः' (७।२।११६) इति सूत्रेण उपधावृद्धौ "राम" इति शब्दो निष्पन्नः, अयं प्रकृतिप्रत्ययविशिष्टो व्युत्पन्नः। प्रकृतिप्रत्ययविभागशून्योऽपि रामशब्दोऽस्ति सोऽव्युत्पन्नः। ये पाणिनिमुन्युपदिष्टप्रत्ययविशिष्टाः शब्दास्ते अत्र शास्त्रे व्युत्पन्नाः। व्याकरणान्तरीयप्रत्ययविशिष्टा अप्यत्र शास्त्रेऽव्युत्पन्नाः, यथा पितृ-मातृ-नप्तृ-नेष्टृप्रभृतयः।

पदम्' (१।४।१४) इति पदसंज्ञायाम् "**ससजुषो रुः** (८।२।६६) इति रुत्वे **'खरवसानयो-र्विसर्जनीयः'** (८।३।१५) इति विसर्गे 'रामः' इति सिद्धम् । द्वित्वविवक्षायाम् रामश्च रामश्च रामौ, इति विग्रहे रामशब्दद्वयात् औ विभक्तौ समागतायाम्–

[1]सरूपाणाम् [3]एकशेष [2]एकविभक्तौ ॥१।२।६४॥

इति एक 'राम' शब्दशेषे अन्यस्य च 'राम' शब्दस्य लोपे राम+औ इति स्थिते प्राप्तं गुणमपोह्य वृद्धिः प्राप्ता ताञ्चापोह्य–

[1]प्रथमयोः पूर्वसवर्णः[4] ॥६।१।१०२॥ ([2]अचि पूर्वपरयोः[3] एकः[5] दीर्घः[6])

इति प्राप्तस्य दीर्घस्य–

[3]ना[1]दिचि[2] ॥६।१।१०४॥ (दीर्घः[5] पूर्वसवर्णः[4])

इति निषेधे **'वृद्धिरेचि'** (६।१।८८) इति वृद्धौ 'रामौ' । बहुत्वविवक्षायाम् रामश्च रामश्च रामश्च रामाः, इति विग्रहे रामशब्दत्रयात्–

बहुषु बहुवचनम् ॥१।४।२१॥

इति जस् विभक्तौ समागतायाम्, एकशेषकार्ये राम+जस् इति स्थितौ

चुटू[3] ॥१।३।७॥ ([1]प्रत्ययस्य [2]आदी [4]इतौ ।)

इति जस्य इत्संज्ञायां लोपे च राम+अस् इत्यवस्थायाम् पूर्वसवर्णदीर्घे रामास् इत्यत्रान्त्यसकारस्य इत्संज्ञायाम् प्राप्तायाम्–

विभक्तिश्च[4] ॥१।४।१०४॥ (सुपः[1] तिङः[2] त्रीणि[3] त्रीणि[3])

इति जसः विभक्तिसंज्ञायाम् ।

[3]न विभक्तौ[1] तुस्माः[2] ॥१।३।४॥ (इतः[4])

इत्यनेन निषेधे रुत्वे विसर्गे च **'रामाः'** इति सिद्धम् । राम+अम् इति स्थितौ–

[2]अमि [5]पूर्वः ॥६।१।१०७॥ ([1]अकः एकः [4]पूर्वपरयोः[3] [6]रूपम्)

इति पूर्वरूपे 'रामम् ।' 'रामौ ।' राम+शस् इति स्थितौ–

[1]लशक्वतद्धिते[3] ॥१।३।८॥ ([2]इत्)

इति शस्य इत्संज्ञायाम् लोपे च राम+अस् इति जाते पूर्वसवर्णदीर्घे रामास् इति जाते–

[1]तस्माच्छसो[3] नः[4] पुंसि[5] ॥६।१।१०३॥ ([2]पूर्वसवर्णदीर्घात्)

इति सस्य नत्वे 'रामान्'। अत्र–

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥८।४।२॥ (रषाभ्यां नो णः समानपदे)

इति प्राप्तं णत्वं–

[३]पदान्तस्य ॥८।४।३७॥ ([२]रषाभ्यां नो[४]णः[५] समानपदे[६] न[७] अट्कुप्वाङ्नुम्व्यवायेऽपि[१])

इति निषिध्यते। राम+टा इत्यत्र–

[१]यस्मा [२]त्प्रत्ययविधिस्तदादि[३]प्रत्ययेऽङ्गम्[४] ॥१।४।१३॥

इति 'राम' इत्यस्य अङ्गसंज्ञायाम्–

[३]टाङसिङसामिनात्स्याः[४] ॥७।१।१२॥ ([१]अतः अङ्गात्[२])

इति टाविभक्तेः इनादेशे राम+इन इत्यत्र गुणे रामेन इति जाते–

'अट्कुप्वाङ्नुम्व्यवायेऽपि' (८।४।२)

इति नस्य णत्वे 'रामेण।' राम+भ्याम् इत्यत्र–

सुपि[५] च[६] ॥७।३।१०२॥ (अङ्गस्य[२] [१]अतो दीर्घो[३] यञि[४])

इति दीर्घे 'रामाभ्याम्'। राम+भिस् इति स्थितौ–

*** अतो[१] भिस[३] ऐस्[४] ॥७।१।९॥ ([२]अङ्गात्)**

इति भिस ऐसादेशे कर्तव्ये–

[१]अनेकाल् [२]शित्सर्वस्य[३] ॥१।१।५५॥

इति सर्वस्यैव भिस ऐसादेशे वृद्धौ रुत्वे विसर्गे च 'रामैः'। राम+ङे इत्यवस्थायाम्–

[३]ङेर्य्यः[४] ॥७।१।१३॥ ([१]अतोऽङ्गात्[२])

इति ङेविभक्तेर्यादेशे

[३]स्थानिवदादेशो[१]ऽनल्विधौ[२] ॥१।१।५६॥

इति स्थानिवद्भावे **'सुपि च'** (७।३।१०२) इति दीर्घे 'रामाय,'† रामाभ्याम्, राम+भ्यस् इत्यत्र–परत्वात्।

---

* 'सावकाश – निरवकाशयोर्निरवकाशविधिर्बलीयान्' इति परमपि एत्वम् ऐसा बाध्यते।

† कष्टाय क्रमणे (३।१।१४) इति निर्देशात् 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (परि० ८६) इति परिभाषाया अनित्यत्वात् दीर्घः।

[३]बहुवचने[४]झल्येत्[६] ॥७।३।१०३॥ ([१]अतः अङ्गस्य[२] सुपि[५])

इति एत्वे रुत्वे विसर्गे च 'रामेभ्यः'। राम+ङसि इति स्थितौ **'टाङसिङसामि०'** (७।१।१२) इति ङसेरादि दीर्घे रामात् इत्यत्र जश्त्वेन दकारे–

[४]वावसाने[१] ॥८।४।५६॥ ([२]झलां चरः[३])

इति चर्त्वेन वैकल्पिके तकारे 'रामात् रामाद्', 'रामाभ्याम्' 'रामेभ्यः'। राम+ङस् इति स्थितौ **'टाङसिङसामि०'** (७।१।१२) इति ङसः स्यादेशे 'रामस्य'। राम+ओस् इत्यत्र–

[१]ओसि च ॥७।३।१०४॥ ([१]अतः[३]अङ्गस्य[४] [५]एत् सुपि[२])

इति अकारस्य एकारे रामे+ओस् इति जाते अयादेशे रुत्वे विसर्गे च 'रामयोः।' राम+आम् इत्यत्र–

[१]ह्रस्वनद्यापो नुट्[३] ॥७।१।५४॥ ([२]आमः)

इति नुडागमे कर्तव्ये **'आद्यन्तौ टकितौ'** (१।१।४६) इति टित्त्वादाम आदौ नुटि उकारटकारयोरित्संज्ञायां लोपे च राम+नाम् इति जाते–

नामि[४] ॥६।४।३॥ ([१]अचः [२]अङ्गस्य [३]दीर्घः)

इति दीर्घे णत्वे 'रामाणाम्'। राम+ङि इत्यत्र ङकारस्येत्संज्ञायां लोपे च गुणैकादेशे 'रामे' 'रामयोः' राम +सु इति स्थिते एत्वे कृते–

आदेशप्रत्यययोः[३] ॥८।३।५९॥ ([१]इण्कोः [२]अपदान्तयोः सः[४] मूर्धन्यः[५]।

इति सकारस्य मूर्धन्यषकारे 'रामेषु' इति सिद्धम। सम्बोधने हे राम+सु इति स्थिते –

[३]एकवचनं [४]सम्बुद्धिः ॥२।३।४९॥ ([१]सम्बोधने [२]प्रथमायाः)

इति सोः सम्बुद्धिसंज्ञायाम्

[१]एङ्-ह्रस्वात् [३]सम्बुद्धेः ॥६।१।६९॥ ([२]अङ्गात्[४]हलः [५]लोपः)

इत्यनेन सुलोपे 'हे राम' 'हे रामौ' 'हे रामाः' पूर्ववत्। एवम्–घटपटादयः*। आकारान्तशब्दे सन्धिकार्ये रूपसिद्धिः। तथाहि– हाहाः हाहा+औ इत्यत्र **'प्रथमयोः पूर्वसवर्णः** (६।१।१०२) इति प्राप्तं पूर्वसवर्णदीर्घम्–

---

* **आदिना कर, हस्त, चय, जय, लय, पाक, राग, पाद, मास, घास, वास, काल, रोग, भोग, लोक, दीर्घ, सूर्य, चन्द्र, नग, नाग, दन्त, घन, मेघ, केश, वृक्ष, कुम्भ, कीट, गुण, शूर, पुत्र, छात्र, यम, मन्त्र, प्रश्न, यज्ञ, यत्न, देव, मेष, कुक्कुर, सिंह, व्याघ्र, गज, मूषक, छाग, नर, वानर, बक, हंस, शकुन्तादयः सर्वेऽपि घञबूनङ्घाच्प्रभृतिप्रत्ययान्ताः शब्दा ज्ञेया।**

दीर्घाज्जसि च ॥६।१।१०५॥ (इति न पूर्वसवर्णदीर्घः।)

इति निषिध्य **'वृद्धिरेचि'** (६।१।८८) इति वृद्धौ हाहौ। जस्यप्येवं सवर्णदीर्घे हाहाः। **'अमि पूर्वः'** (६।१।१०७) हाहाम्। हाहौ। पूर्वसवर्णदीर्घ :– हाहान्। हाहा, हाहै, हाहाः, हाहौः हाहाम्। हाहे। इत्यादि। अत्रापि आकारान्तधातुशब्दानां भ-संज्ञायाम् रूपविशेषः। यथा गोपाशब्दात् शसि विभक्तौ समागतायाम् अनुबन्धलोपे गोपा + अस् इत्यत्र –

[२]सुड[१]नपुंसकस्य ॥१।१।४३॥ ([३]सर्वनामस्थानम्) ततोऽन्यत्र–

[२]यचि [४]भम् ॥१।४।१८॥ ([३]स्वादिष्वसर्वनामस्थाने[१])

इति भ-संज्ञायाम्।

[३]आतो धातोः[२] ॥६।४।१४०॥ ([१]भसंज्ञस्य लोपः[४])

इति भ-संज्ञकस्य आकारस्य लोपे गोपः, गोपा, गोपे गोपः गोपोः गोपाम् गोपि। इत्यादि। एवं स्त्रीलिङ्गेऽपि। शङ्ख्ध्मा-कीलालपादयोऽप्येवमेव स्त्रीलिङ्गपुंलिङ्गयोरुभयोरपि सरूपा ज्ञेयाः। धातुशब्दाश्च–

क्विबन्ताश्च विडन्ताश्च विजन्ता येऽपि धातवः।
ते धातुत्वं न जहति शब्दत्वं प्राप्नुवन्ति च ॥इति॥

इकारान्तः पुँल्लिङ्गो हरि-शब्दः (वानरः, विष्णुः, सिंहः)

हरिशब्दस्य कृदन्तत्वात् प्रातिपदिकसंज्ञायाम् सौ विसर्गे च हरिः। हरि+औ इत्यत्र पूर्वसवर्णदीर्घे हरी। हरि+अस् इत्यत्र पूर्वसवर्णदीर्घं बाधित्वा–

जसि[४] च ॥७।३।१०९॥ ([१]ह्रस्वस्य [३]गुण [२]इकः)

इत्यनेन गुणे अयादेशे हरयः। हरिम्। हरी। हरीन्। हरि + टा इत्यवस्थायाम्–

*** [२]शेषो[३]घ्यसखि[१] ॥१।४।७॥**

(ह्रस्व इकार उकारश्च शेषः) इति घि-संज्ञायाम्–

---

* ह्रस्वम् इवर्णोवर्णान्तं यन्न स्त्र्याख्यम् स्त्र्याख्यञ्च यन्न नदीसंज्ञम् सोऽत्रशेषः।

[२]आङो ना[३] ऽस्त्रियाम्[४] ॥७।३।१२०॥ ([१]घेः) इति

नादेशे णत्वे हरिणा । हरिभ्याम् । हरिभिः । हरि+ङे इत्यत्र–

[१]घेर्ङिति[३] ॥७।३।१११॥ ([२]गुणः)

इति गुणे अयादेशे हरये । हरिभ्याम् । हरिभ्यः । हरे+अस् इत्यवस्थायाम्–

[२]ङसिङसोश्च ॥६।१।११०॥ ([१]एङः [३]अति पूर्वपरयोः[४] [५]पूर्वरूपमेकादेशः[६])

इति पूर्वरूपे रुत्वे विसर्गे च हरेः । हरिभ्याम् । हरिभ्यः । हरेः । हर्योः । हरीणाम् । हरि + ङि इति स्थितौ –

[५]अच्च[४]घेः ॥७।३।११९॥ ([२]ङेः घेः[१] [३]औत्)

इत्यनेन ङेरौति कृते इकारस्याकारादेशे च हर + औ इति जाते वृद्धौ हरौ, हर्य्योः, हरिषु । हे हरि + सु इत्यवस्थायाम् –

[१]ह्रस्वस्य [४]गुणः ॥७।३।१०८॥ ([२]अङ्गस्य [३]सम्बुद्धौ)

इति गुणे **'एङ् ह्रस्वात्०'** (६।१।६९) इति सुलोपे हे हरे । हे हरी । हे हरयः । एवं मुनिकपिप्रभृतयः† । केवलपतिशब्दे तु टादौ विशेषः । पति+आ इत्यत्र–

पतिः[३] [१]समास [२]एव ॥१।४।८॥ (घि[४])

इत्यनेन घित्वाभावेन नात्वाभावे यणि पत्या । पति + अस् इत्यत्र यणि पत्य् + अस इति जाते–

[१]ख्यत्यात्परस्य[२] ॥६।१।११२॥ ([३]ङसिङसोश्चात[४] उत्[५])

इति विभक्तेरकारस्योकारे पत्युस् इति जाते रुत्वे विसर्गे च पत्युः । पति+इ इति स्थिते–दीर्घमपोह्य–

[३]औत् ॥७।३।११८॥ ([१]इदुद्भ्यां [२]ङेः)

इति विभक्तेरौकारे यणि पत्यौ इत्यादि । शेषं हरिवत् । सखिशब्दस्य तु असम्बुद्धिसर्वनामस्थाने विशेषः । सखि+सु इति स्थिते–

---

† कवि, निधि, विधि, यति, व्याधि, जलधि, रवि, वह्नि, रश्मि, नृपति, भूपति, बृहस्पति, शनि, दाशरथि, द्रौणि, दाक्षि, पाणिनिप्रभृतयः संज्ञाविशेषणशब्दा ह्रस्वेकारान्ताः पुँल्लिङ्गा ज्ञेयाः ।

[२]अनङ्[४]सौ ॥७।१।९३॥ ([१]सख्युः असम्बुद्धौ[३])

इति अनङि कर्तव्ये–

ङिच्च[१] ॥१।१।५३॥ (अन्तस्य[२] आदेशः[३])

इति ङित्त्वादन्त्यस्य इकारस्य अनङादेशे सखन्+सु इति स्थिते **'सुडनपुंसकस्य'** (१।१।४३) इति सुटः सर्वनामस्थानसंज्ञायाम्,

अलोऽन्त्यात्पूर्व उपधा ॥१।१।६५॥

इति नकारात् पूर्ववर्तिनः अकारस्योपधासंज्ञायाम्–

[४]सर्वनामस्थाने चासम्बुद्धौ[३] ॥६।४।८॥ ([१]अङ्गस्य [२]नोपधाया [५]दीर्घः)

इति नोपधादीर्घे सखान्+सु इति स्थिते–अनुबन्धलोपेऽपृक्तसंज्ञायाम्

[२]हल्ङ्याब्भ्यो[१]दीर्घात्[३]सुतिस्यपृक्तं[४]हल् ॥६।१।६८॥ ([५]लुप्यते)

इति सुलोपे–

[३]नलोपः [१]प्रातिपदिकान्तस्य ॥८।२।७॥ (पदस्य[२])

इति नलोपे सखा। सखि+औ इत्यत्र–

[१]सख्युरसम्बुद्धौ[२] ॥७।१।९२॥ ([३]सर्वनामस्थानं [४]णित्)

इति णिद्वद्भावे–

[१]अचो ञ्णिति[४]॥ ७।२।११५॥ ([३]वृद्धिः अङ्गस्य[२])

इति इकास्य वृद्धौ सखै+औ इति जाते आयादेशे सखायौ, सखायः। सखायम् सखायौ, सखीन्, सख्या, सख्ये, सख्योः, सखीनाम्, सख्यौ, हे सखे, हे सखायौ, हे सखायः। इत्यादि, शेषं पतिवत्। एवं ह्रस्वोकारान्ताः पुँल्लिङ्गा :– भानु, विष्णु प्रभृतयः। * परन्तु एषु गुण ओकारस्तस्य अवादेशश्चेति विशेषः। यथा-भानुः भानू भानवः। भानुम् भानू भानून्। भानुना भानुभ्याम् भानुभिः। भानवे भानुभ्याम् भानुभ्यः। भानोः भानुभ्याम् भानुभ्यः। भानोः भान्वोः भानूनाम्। भानौ भान्वोः भानुषु। हे भानो हे भानू हे भानवः। दीर्घकारोकारान्तशब्देषु तु विभक्तियोगे सन्धिकार्ये रूपसिद्धिः। यथा पपीः। **'दीर्घाज्जसि च'** (६।१।१०५) इति सूत्रेण पूर्वसवर्णदीर्घनिषेधे यणि पप्यौ, पप्यः। यणं

---

* **गुरु, साधु, राहु, बाहु, ऋतु, पृथु, केतु, सेतु, हेतु, शिशु, विधु, शत्रु, प्रभु, जन्तु, अध्वर्यु, पशु, शम्भु-प्रभृतयः शब्दा हरिवत् ज्ञेयाः।**

बाधित्वा पूर्वरूपे पपीम्, पप्यौ। पूर्वसवर्णदीर्घे नत्वे पपीन्। पप्या पपीभ्याम् पपीभिः। पप्ये पपीभ्याम् पपीभ्यः। पप्यः पपीभ्याम् पपीभ्यः। पप्यः पप्योः पप्याम्। पपी पप्योः पपीषु। हे पपीः हे पप्यौ हे पप्यः। एवं ययी वातप्रमी† प्रभृतयो धातुभिन्ना ईकारान्ता हूहूप्रभृतय ऊकारान्ताश्च शब्दा ज्ञेयाः। ईदन्तो नीशब्दो धातुजः, तस्य प्रातिपदिकत्वात् सौ नी+सु इत्यत्र अनुबन्धलोपे रुत्वे विसर्गे नीः। नी+औ इत्यत्र–यणं बाधित्वा –

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥६।४।७७॥

इति इयङादेशे कर्तव्ये ङित्त्वादीकारस्य इयङि अनुबन्धलोपे स्वरयोगे नियौ, नियः, **'अमि पूर्वः'** (६।१।१०७) इत्यपेक्षया परत्वादियङि नियम्। नियः। निया, नीभ्याम्। ङौ तु–

ङेराम्नद्याम्नीभ्यः ॥७।३।११६॥

इति ङेरामि नियाम्। नीषु। हे नीः। ऊकारान्तो धातुजो लूशब्दोऽप्येवम्। लूः (छेत्ता) लुवौ, लुवः। लुवम्, लुवः, लुवि, लूषु, हे लूः इत्यादि। एते एवानेकाचः सन्तो यणभाजो भवन्ति। तथाहि–उन्नीः। उन्नी+औ इत्यत्र– **'इको यणचि'** (६।१।७७) इति यणं प्रबाध्य प्राप्तम् इयङं प्रबाध्य –

[४]एरनेे[२]ऽकाचोऽ[१]संयोगपूर्वस्य * ॥६।४।८२॥ (धातोः[३] [५]यण् [६]अजादौ प्रत्यये[७])

इति परत्वाद् यणि उन्यौ, उन्यः। उन्यम्, उन्यः, उन्या। ङौ उन्याम्। उन्नीषु। हे उन्नीः इत्यादि। एवं सुनी-सेनानी-ग्रामणी-प्रभृतयोऽपि ङेराम्भाजो ज्ञेयाः।

धातुजः प्रधीशब्दोऽयं सर्वत्र यण्भाक्-प्रधीः प्रध्यौ प्रध्यः। प्रध्यं प्रध्यौ प्रध्यः। प्रध्या। ङौ प्रध्यि। प्रधीषु। हे प्रधीः इत्यादि। एवं धातुजा वातप्रमी प्रमी सन्धी प्रभृतयो ज्ञेयाः। ऊदन्ताः सुलू-उल्लू-सकृल्लू-खलपू-प्रभृतयोऽपि सर्वत्र यण्भाज एव भवन्ति। तथाहि–सूलूः। सुलू+औ इत्यत्र–

[४]ओः [७]सुपि ॥६।४।८३॥ ([१]अनेकाचः [२]असंयोगपूर्वस्य[३] धातोः [५]यण् [६]अचि)

---

† क्विबन्तवातप्रमीशब्दे 'तु यणादेशः' धातुत्वात् 'अमृशस्डिषु' ज्ञेयम्।

* धात्ववयवः संयोगः पूर्वो यस्य इवर्णस्य नास्ति तदन्तस्यानेकाचोऽङ्गस्येत्यर्थः। उन्नी, उल्लू-प्रभृतिषु तु उदिति उपसर्गजन्यः। न धात्ववयवः संयोगोऽतो यण्।

इति परत्वाद् यणि सुल्वौ, सुल्वः। सुल्वं सुल्वः। सुल्वा, ङौ सुल्वि, सुलूषु। हे सुलूः इत्यादि। सुधीप्रतिभूशब्दयोः सौ सुधीः प्रतिभूः। अजादौ तु–

[२]न[१]भूसुधियोः ॥६।४।८५॥ ([३]यण् [४]अचि [५]सुपि)

इति यणः प्रतिषेधे इयङुवङोः कृतयोः सुधियौ, प्रतिभुवौ। सुधियः, प्रतिभुवः इत्यादि। यवक्रीसुश्रीकटप्रूप्रभृतयोऽनेकाचः सन्तोऽपि धात्ववयवसंयोगपूर्वकारोकारान्तधातुत्वात् न यण्भाजः। यवक्रीः, यवक्रियौ। सुश्रीः, सुश्रियौ। कटप्रूः, कटप्रुवौ इत्यादि।

ऋकारान्तः पुँल्लिङ्गः कर्तृशब्दः (यः करोति स कर्त्ता)

कर्तृशब्दात् सौ विभक्तौ–

[१]ऋदुशनस्पुरुदंसोऽनेहसां च ॥७।१।९४॥ ([२]अङ्गानाम् [३]असम्बुद्धौ [५]अनङ् सौ[४])

इति ङित्त्वादन्त्यस्य ऋकारस्य अनङादेशे कर्तन् सु इति जाते प्रतिपदविधित्वात् **'सर्वनामस्थाने चासम्बुद्धौ'** (६।४।८) इति बाधित्वा–

*** [१]अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ॥६।४।११॥ ([२]उपधादीर्घः सर्वनामस्थाने[४] चासम्बुद्धौ[३])**

इति उपधादीर्घे कर्तान् सु इत्यत्र सुलोपे नलोपे 'कर्ता' इति सिद्ध्यति। कर्तृ=औ इति स्थिते–यणमपोह्य प्राप्तमपि पूर्वसवर्णदीर्घम्प्रबाध्य–

[१]ऋतो ङिसर्वनामस्थानयोः[४] ॥७।३।११०॥ ([३]गुणः[२]अङ्गस्य)

इति ऋकारस्याकारे गुणे **'उरण् रपरः'** (१।१।५१) इति रपरे कर्तर्+औ इत्यत्र **'अप्तृन्०'** (६।४।११) इत्युपधादीर्घे कर्तारौ। कर्तारः। कर्तारम्। कर्तॄन्। यणि कर्त्रा। कर्तृभ्याम्। कर्तृभिः। कर्त्रे। कर्तृभ्याम्। कर्तृभ्यः। कर्तृ+अस् इति स्थिते।

[१]ऋत उत्[५] ॥६।१।१११॥ ([२]ङसिङसोः [३]अति [४]पूर्वपरयोः [६]एकादेशः)

---

* स्वसा=भगिनी। उद्गाता=सामवेदज्ञः। पोता=पौत्रः, नप्ता= दौहित्रश्च, त्वष्टा= तक्षा। होता= ऋत्विक्। प्रशास्ता=शासकः, जामाता= पुत्रीपतिः, देवा= देवरः, सव्येष्ठा= सारथिः।

इति ऋकाराकारयोरुदेकादेशे कर्तव्ये **'उरण् रपरः'** (१।१।५१) इति रपरतया उरि कृते कर्तुर्स् इति जाते–

[1]रात्सस्य[2] ॥८।२।२४॥ ([3]लोपः)

इति सलोपे रेफसय विसर्गे कर्तुः। कर्त्रोः कर्तृ+नाम् इत्यत्र **'नामि'** (६।४।३) इति दीर्घे **(ऋवर्णान्नस्य णत्वं वाच्यम्)** इति वार्तिकेन नस्य णत्वे कृते कर्तृणाम्। **'ऋतो ङि०'** (७।४।११०) इति गुणे कर्तरि। कर्त्रोः। कर्तृषु। हे कर्तः। हे कर्तारौ। हे कर्तारः। एवं धर्तृ, भर्तृ, हर्तृ, गन्तृ, दातृ, धातृ, पातृ, यातृ, नेतृ, क्रेतृ, गोप्तृ, चोरयितृकथयितृप्रभृतय ऋकारान्ताः **तृन् तृच्** प्रत्ययान्ता विशेषणशब्दा ज्ञेयाः* । नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम्, तथाहि उणादिनिष्पन्नानां **तृन् तृच्** प्रत्ययान्तानां संज्ञाशब्दानां चेद्दीर्घो भवति तर्हि नप्त्रादीनामेव तेनेह न भ्राता भ्रातरावित्यादि। भ्रातरं भ्रातरौ भ्रातॄन् इत्यादि। स्त्रीलिङ्गे तु शसि नत्वाभावो विशेषः। ननान्दा, ननान्दरौ, ननान्दरः। ननान्दरं ननान्दरौ ननान्दॄः इत्यादि। नृशब्दस्य तु आमि नुटि नृ+नाम् इत्यत्र–

[2]नृ च ॥६।४।६॥ ([1]नामि[3] दीर्घो वा[4])

इति वैकल्पिके दीर्घे णत्वे नृणाम्-नॄणाम्। हे नः हे नरौ इत्यादि। ऐकारान्ते रैशब्दे विशेषः। रै+सु इति स्थिते–

[1]रायो हलि[3] ॥७।२।८५॥ ([2]आ विभक्तौ[4])

इत्यात्वे रुत्वे विसर्गे च रा:। अजादौ सन्धिकार्ये रायौ, रायः। राभ्याम्, राभिः, रासु इत्यादि†। अथ हलन्ताः –

तकारान्तः पुँल्लिङ्गः मरुत् (वायु) शब्दः

मरुत्+सु इत्यत्र विभक्तेर्लोपे जश्त्वे तस्य वैकल्पिके चर्त्वे मरुत्, मरुद्। अन्यत्र विभक्तियोगे हलादौ जश्त्वे मरुतौ, मरुतः। मरुतम्, मरुतौ, मरुतः। मरुता, मरुद्भ्याम्, मरुद्भिः। मरुते, मरुद्भ्याम्, मरुद्भ्यः। मरुतः, मरुद्भ्याम्, मरुद्भ्यः।

---

* शसि नत्वाभाववानेकः स्त्रीलिङ्गस्वसृशब्दोऽप्येवमेव ज्ञेयः। उणादिसिद्धेषु संज्ञाशब्देषु तृन् तृच् प्रत्ययान्तेषु तु उद्गातृशब्द-विशिष्टाः सूत्रपठिता नप्त्रादयः सप्तैव ज्ञेयाः। सूत्रपठितेभ्योऽन्येषां भ्रातृजामातृ, पितृ, देवृ, नृ, सव्येष्टृ प्रभृति पुंल्लिङ्गसंज्ञाशब्दानाम्, ननान्दृ, दुहितृ, यातृ-मातृ, प्रभृतिस्त्रीलिङ्गसंज्ञाशब्दानां चोणादिनिष्पन्नानां तृन् तृच्-प्रत्ययान्तानां संज्ञाशब्दानां रूपाणि तु दीर्घाभावानि ज्ञेयानि।

† औदन्ताः स्त्रीलिङ्गे दृश्याः।

मरुतः, मरुतोः, मरुताम्। मरुति, मरुतोः, जश्त्वचर्त्वे मरुत्सु। हे मरुत्, हे मरुद्, हे मरुतौ, हे मरुतः। इत्येवं भूभृत्, भूमिभृत्, क्षितिभृत्, धनुर्भृत्, शास्त्रकृत्, राज्यकृत्, बहुश्रुत्, राज्यहृत्, दण्डभृत् - इत्याद्युभयलिङ्गाः सरित्, समित्, क्षुत्, विद्युत्, तडित् इत्यादयः केवलं स्त्रीलिङ्गाः तकारान्ताः शब्दा ज्ञेयाः। 'भगवत्' शब्दे पुँल्लिङ्गे विशेषः। भगवत्+सु इत्यत्र–

अत्वसन्तस्य[२] चाधातोः[१] ॥६।४।१४॥ ([३]उपधादीर्घः [४]असम्बुद्धौ सौ[५])

इति उपधादीर्घे भगवात् +सु इति जाते–

उगिदचां[२] सर्वनामस्था[४] नेऽधातोः[१] ॥७।१।७०॥ (नुम्[३])

इति नुमागमे कर्तव्ये–

मि[१]द[३]चोऽन्त्या[२]त्परः[४] ॥१।१।४७॥

इति दीर्घाकारात् परे नुमि अनुबन्धलोपे भगवान्त्+सु इति स्थिते सुलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे भगवान्, भगवन्तौ, भगवन्तः। भगवन्तम्, भगवन्तौ। सम्बुद्धौ हे भगवन्, हे भगवन्तौ। हे भगवन्तः। अन्यत्सर्वं रूपं मरुच्छब्दवत् ज्ञेयम्। एवं डवतु-प्रत्यायान्तभवत्, मतुप्रत्ययान्त-धीमत्-गोमत् -धनवत् -रश्मिवत्-जनवत्-बलवत्, वतुप्रत्ययान्त-तावत्-यावत्-कियत् इयत् प्रभृतयोऽत्वन्तशब्दा ज्ञेयाः। शत्रन्ते भवत् पठत् इत्यादिशब्दे तु अत्वन्ताभावात् दीर्घाभावे नुमि सुलोपे, संयोगान्तलोपे भवन्, भवन्तौ, भवन्तः। इत्यादि रूयं ज्ञेयम्। तत्राऽपि अभ्यस्तसंज्ञकानां शब्दानां नुमागमाभावे केवलं मरुच्छब्दवदेव रूपम्। तथाहि ददत्+सु इत्यत्र **'उगिदचाम्०'** (६।१।७०) इति नुमि प्राप्ते तस्य–

[१]उभे अभ्यस्तम्[३] ॥६।१।५॥ (विहितद्वित्वे[२])

इति ददत् शब्दस्य अभ्यस्तसंज्ञकत्वात्–

[४]नाभ्यस्ता[१]च्छतुः[२] ॥७।१।७८॥ ([३]नुम्)

इति नुमो निषेधे सुलोपे ददत्, ददतौ ददतः। इत्यादि सर्वं मरुद्वद्रूपम्। एवं दधत् यक्षत्प्रभृतयोऽभ्यस्ताः। तकारान्तेऽपि महच्छब्दे सर्वथा भिन्नं रूपम्। तथाहि-महत्+सु इत्यत्र उगित्वान्नुमि अनुबन्धलोपे महन्त्+सु इति स्थिते–

सान्तमहतः संयोगस्य ॥६।४।१०॥ (नोपधाया दीर्घः असम्बुद्धौ सर्वनामस्थाने)

इति नोपधादीर्घे महान् त्+सु इति जाते सुलोपे संयोगान्तलोपे तदसिद्ध्या नलोपाभावे महान्, महान्तौ, महान्तः, महान्तं, महान्तौ, सम्बुद्धौ हे महन्, हे महान्तौ, हे महान्तः, शेषं मरुद्वत्। *

नकारान्त इन्नन्तपुँल्लिङ्गः करिन् (गज) शब्दः

करिन्+सु इत्यत्र **'सर्वनामस्थाने चासम्बुद्धौ'** (६ । ४ । ८) इति प्राप्तं नोपधादीर्घं बाधित्वा–

[1]इनहन्पूषार्यम्णां शौ[3] ॥६।४।१२॥ (उपधा-दीर्घः[2])

इति नियमसूत्रान्निषेधे प्राप्ते ततश्च–

[3]सौ च ॥६।४।१३॥ ([1]इन्नादीनामुपधादीर्घः[2])

इति उपधादीर्घे सुलोपे नलोपे करी। करिनौ इत्यत्र **'अट्कुप्वाङ्नुम्व्यवायेऽपि'** (८।४।२) इति नस्य णत्वे करिणौ, करिणः। करिणम्, करिणौ, करिणः। करिणा, करिन्+भ्यामित्यत्र–

[2]स्वादिष्वसर्वनामस्थाने[1] ॥१।४।१७॥ ([3]पदं)

इति पदसंज्ञायां **'नलोपः प्रातिपदिकान्तस्य'** इति (८।२।७) नलोपे करिभ्याम्, करिभिः। करिणे, करिणः, करिणोः, करिणाम्। करिणि, करिषु, इत्यादि। सम्बुद्धौ प्राप्तस्य नलोपस्य–

[3]न ङिसम्बुद्ध्योः[1] ॥८।२।८॥ ([2]नलोपः)

इति निषेधे हे करिन्, हे करिणौ, हे करिणः। एवं हस्तिन्-शशिन्-स्वामिन्-ग्राहिन्-मन्त्रिन्-गृहिन्-दण्डिन्-नखिन्-धन्विन्-यशस्विन्-मेधाविन्-स्रग्विन्-मायाविन्-तरस्विन् प्रभृतय इन्नन्ताः शब्दा ज्ञेयाः। इन्नन्तेऽपि पथिन्-शब्दे विशेषः– पथिन्+सु इत्यत्र–

[1]पथिमथ्यृभुक्षामात्[2] ॥७।१।८५॥ ([3]सौ)

इति नकारस्य आकारे पथि आ+सु इति जाते–

---

* **तान्ताः पञ्चविधाः। तत्र प्रथमस्तकारमात्रेणैव विभक्तियोगवान्, द्वितीयः सुटि नुम्भागपि वत्, मत्, यदित्यन्तशब्दस्वरूपवान् सौ दीर्घवान् भवति, तृतीयः सौ शत्रन्तत्वाद्दीर्घाभाऽवेपि सुटि नुम्भाक्, चतुर्थः शत्रन्तोऽपि नुमूरहितः केवलं विभक्तियोगभाक्, यद्यपि प्रथमभेदे मरुत्प्रभृतावन्तर्भवत्ययं तथापि शत्रन्ताशत्रन्तभेदेनानयोः पार्थक्यम्। पञ्चमः– सुटि नुमूदीर्घोभयभाक्।**

[२]इतो[३]ऽत्सर्वनामस्थाने[४] ॥७।१।८६॥ ([१]पथिमथ्यृभुक्षाम्)

इति इकारस्याकारे पथ आ+सु इति जाते–

[१]थोन्थः[२] ॥७।१।८७॥ (सर्वनामस्थाने[३])

इति थस्य न्थादेशे पन्थ+आ सु इति स्थिते सवर्णदीर्घे रुत्वे विसर्गे पन्थाः। पथिन्+औ इत्यत्र इकारस्याकारे थकारस्य न्थादेशे पन्थन्+औ इति जाते नान्तोपधादीर्घे पन्थानौ, पन्थानः, पन्थानम्, पन्थानौ। पथिन्+अस् इत्यत्र–

अचोऽन्त्यादि टि ॥१।१।६४॥ (अचः योऽन्त्योऽच् तदादि)

इति इनः टि संज्ञायां–

[२]भस्य [३]टेर्लोपः[४] ॥७।१।८८॥ ([१]पथिमथ्यृभुक्षाम्)

इति इनः टेर्लोपे पथ्+अस् इति जाते स्वरसंयोगे रुत्वे विसर्गे च। पथः, पथा। नलोपे पथिभ्याम्, पथिभिः, हे पन्थाः। इत्यादि, एवम् मथिन्-ऋभुक्षिन् (इन्द्र) शब्दौ ज्ञेयौ। ऋभुक्षाः, ऋभुक्षाणावित्यादि।

नकारान्तः पुँल्लिङ्गः आत्मन् (आत्मा) शब्दः

आत्मन्+सु इत्यत्र **'सर्वनामस्थाने चासम्बुद्धौ'** (६।४।८) इति दीर्घे सुलोपे आत्मा, आत्मानौ, आत्मानः। आत्मानम्, आत्मानौ, आत्मन् +अस् इत्यत्र–

[३]अल्लोपोऽनः[२] ॥६।४।१३४॥ ([१]भस्य)

इति अल्लोपे प्राप्ते तस्य–

[५]न संयोगा[२]द्वमन्तात्[१] ॥६।४।१३७॥ (अल्लो[४]पोऽनः[३])

इति निषेधे आत्मनः, आत्मना। नलोपे आत्मभ्याम् इत्यादि। अत्र **'पूर्वत्रासिद्धम्'** (८।२।१) इति नलोपस्य असिद्धत्वात् आत्वमेत्वमैस्त्वश्च न भवति। सम्बुद्धौ हे आत्मन् हे आत्मानौ, हे आत्मानः*। राजन् शब्दे विशेषः– राजा, राजानौ, राजानः। राजानम्, राजानौ। राजन्+अस् इति स्थितौ **'अल्लोपोऽनः'** (६।४।१३४) इति अल्लोपे श्चुत्वेन

*** एवम् यज्वन् अध्वन् ब्रह्मन् अनर्वन् सुजन्मन् सुवर्त्मन् सुधर्मन् सुकर्मन् शर्मन् वर्मन् इत्यादयो नकारान्ताः शब्दा ज्ञेयाः। तत्राऽपि राजन् सुनामन् सुदामन् मूर्द्धन् निःसीमन् लघिमन् अणिमन् गरिमन् क्षेपिमंन् क्षोदिमन् पटिमन् हसिमन् द्रढ़िमन् द्रघिमन् भूमन् प्रेमन् अश्वत्थामन् प्रभृतयः पुँल्लिङ्गाः, सीमन् दामन् प्रभृतयः स्त्रीलिङ्गा वमन्तसंयोगशून्या नकारान्ताः शब्दाः शसादौ अल्लोपभाजो भवन्तीति न विस्मरणीयम्।**

नकारस्य ञकारे राज्ञ+अस् इत्यत्र जकारञकारयोर्योगे ज्ञकारोल्लेखे तस्य विभक्तियोगे राज्ञः, राज्ञा, राजभ्याम् इत्यादि। ङौ तु–

[२]विभाषा ङिश्योः[१] ॥६।४।१३६॥ ([४]अल्लोपोऽनः[३])

इति वैकल्पिके अल्लोपे राज्ञि, राजनि, हे राजन् इत्यादि। एवं श्वन्-युवन्-मघवन्-शब्दा अपि ज्ञेयास्तेषां शसादौ संप्रसारणम्। तथाहि श्वन्+अस् इति स्थितौ–

[१]श्वयुवमघोनामतद्धिते[३] ॥६।४।१३३॥ ([२]भस्य सम्प्रसारणम्[४])

इति सम्प्रसारणे कर्तव्ये–

[२]इग्यणः[१] [३]सम्प्रसारणम् ॥१।१।४५॥

इति सम्प्रसारणसंज्ञायां वस्य उकारे सम्प्रसारणे शु अन्+अस् इति जाते–

[१]सम्प्रसारणाच्च ॥६।१।१०८॥ ([२]अचि पूर्वः[५] एकः[४] पूर्वपरयोः[३])

इति अकारस्य पूर्वरूपैकादेशे उकारमात्रे जाते शुनः, शुना, श्वभ्याम् इत्यादि। युवन् शब्दे शसि वस्योकारे सम्प्रसारणे– यु उ अन्+अस् इत्यत्र–

[३]न [१]सम्प्रसारणे [२]सम्प्रसारणम् ॥६।१।३७॥

इति यस्य सम्प्रसारणनिषेधे **'सम्प्रसारणाच्च'** (६।१।१०८) इति पूर्वरूपेण अकारस्य उकारमात्रे जाते यु उन्+अस् इत्यत्र सवर्णदीर्घे विभक्तिकार्ये यूनः, यूना, युवभ्यामित्यादि। मघवन्शब्दे सर्वत्रैव विभक्तौ–

[१]मघवा बहुलम्[३] ॥७।४।१२८॥ ([२]तृ)

इति नकारस्य 'तृ' इत्यन्तादेशे ऋलोपे मघवत्। तकारान्ततया भगवच्छब्दवदेकं रूपम्, त्रादेशस्य बहुलतया द्वितीयस्य नकारान्तस्य मघवा, मघवानौ, इत्यादि। शसि तु सम्प्रसारणे पूर्वरूपे गुणे मघोनः, मघोना, मघवभ्यामित्यादि। वृत्रहन् शब्दे तु वृत्रहा वृत्रहणौ **'एकाजुत्तरपदे णः'** (८।४।१२) इति णत्वम्। वृत्रहन्+अस् इत्यत्र अल्लोपे वृत्रह्न+अस् इति जाते।–

[२]होहन्ते[१]र्ञ्णिन्नेषु[४] ॥७।३।५४॥ (कु[३])

इति कुत्वेन घकारे वृत्रघ्नः। **'हन्तेरत्पूर्वस्य'** (८।४।२२) इति नियमान्न णत्वम्। वृत्रघ्ना, वृत्रहभ्यामित्यादि। पूषन् अर्यमन् शब्दानां तृ सुटि करिवत्, शसादौ अल्लोपे

राजवत्तत्रापि णत्वकार्य्यविशेषः। पूषा, पूषणौ, पूषणः, पूषणम्, पूषणौ, पूष्णः। पूष्णा, पूषभ्यामित्यादि। अर्वन् शब्दस्य सौ अर्वा, हे अर्वन्। अन्यत्र तु–

अर्वणस्त्रसावनञः ॥६।४।१२७॥ (अङ्गस्य)

इति नकारस्य त्रादेशे अर्वत् इति तकारान्तत्वात् भगवच्छब्दवद्रूपम्। †

सकारान्तः पुल्लिङ्गश्चन्द्रमस् शब्दः।

चन्द्रमस् सु इत्यत्र **'अत्वसन्तस्य चाधातोः'** (६।४।१४) इति दीर्घे सुलोपे रुत्त्वे विसर्गे चन्द्रमाः। चन्द्रमसौ। उत्वे गुणे चन्द्रमोभ्याम्, चन्द्रमस्+सु इत्यत्र रुत्वे विसर्गे **'विसर्जनीयस्य सः'** (८।३।३४) इति सत्वे चन्द्रमस्सु। सम्बुद्धौ दीर्घाभावात् हे चन्द्रमः इत्यादि। एवं वेधस्–सुचेतस्–सुतेजस्–सुरेतस्–सुमनस्–सुपयस्–सुयशस्–सुसरस्–महौजस्–दिवौकस्–सुवक्षस्–दुर्वासस्–इत्यादयः पुँल्लिङ्गाः स्त्रीलिङ्गाः सकारान्ताः शब्दा ज्ञेयाः। सकारान्तपुँल्लिङ्गे विद्वस्शब्दे तु विशेषः। विद्वस्+सु इति स्थितौ **'उगिदचाम्०'** (७।१।७०) इति नुमि विद्वन्स्+सु इत्यत्र–

सान्तमहतः संयोगस्य ॥६।४।१०॥

इति नोपधादीर्घे सुलोपे संयोगान्तलोपे संयोगान्तलोपस्यासिद्धत्वात् नलोपाभावे विद्वान्। विद्वान्स+औ इत्यत्र **'नश्चापदान्तस्य झलि'** (८।३।२४) इति अनुस्वारे विद्वांसौ इत्यादि, विद्वस्+अस् इति स्थितौ–

[२]वसोः सम्प्रसारणम्[३] ॥६।४।१३१॥ ([१]भस्य)

इति वस्योकारे सम्प्रसारणे **'सम्प्रसारणाच्च'** (६।१।१०८) इति पूर्वरूपे सस्य मूर्धन्यादेशे विदुषः। विद्वस्+भ्याम् इति स्थितौ–

[१]वसुस्रंसुध्वंस्वनडुहां दः[३] ॥८।२।७२॥ (पदस्य[२])

---

† नान्ताः सप्तविधाः शब्दाः सन्ति। एके सुटि उपधादीर्घशालिनः शसादौ अल्लोपिनो यथा – राजादयः। द्वितीयाः सुटि उपधादीर्घशालिनोऽपि शसादौ नाल्लोपिनो यथा – आत्मादयः। तृतीयाः केवलं सौ दीर्घशालिनः शसादौ अविकृतिनो यथा – करिप्रभृतयः। चतुर्थाः सौ दीर्घशालिनोऽपि शसादौ विकृतिनो यथा – वृत्रहादयः। पञ्चमाः सुटि दीर्घशालिनः शसादौ विकृतिनश्च यथा श्वादयः। यद्यपि प्रथमभेदे पञ्चमभेदोऽप्यन्तर्भवति तथाप्यभावरूपाल्लोपात्सम्प्रसारणे वैलक्षण्यं विद्यत एव। षष्ठाः सर्वत्रैव विकृतिनो यथा पथिन्प्रभृतयः। सप्तमः अर्वन् शब्दः सर्वविलक्षणः।

इति सस्य दकारे विद्वद्भ्याम् । विद्वत्सु । हे विद्वन् इत्यादि । एवम् सेदिवस्-तस्थिवस् इत्यादयः । **'अकृतव्यूहाः पाणनीयाः'** (परि० ५७) इति इडागमाभावे 'सेद्वस्' अस् इति स्थितौ वस्य सम्प्रसारणादिकृत्ये सेदुष इत्यादि । परन्तु श्रेयस्-लघीयस्-द्रढीयस्-गरीयस्-प्रथीयस्-ज्यायस्-भूयस्-अणीयस्-प्रभृतयः इयसुन्प्रत्ययान्ताः शब्दाः सुटि विद्वच्छब्दवत्, तद्भिन्नविभक्तौ चन्द्रमस् शब्दवज्ज्ञेयाः । तथाहि श्रेयान्, श्रेयांसावित्यादि, श्रेयसा, श्रेयोभ्यामित्यादि । * अत्र सकारान्तेऽपि पुंस् शब्दे एभ्यः सर्वथा विशेषः । तथाहि-पुंस्+सु इति स्थिते –

[1]पुंसोऽसुङ्[2] ॥७।१।८९॥ (सर्वनामस्थाने[3])

इति डित्त्वादन्त्यस्य सकारस्य असुङादेशे पुमसुङ् सु इति जाते अनुबन्धलोपे पुमस् सु इत्यत्र उगित्वान्नुमि पुमन्स् सु इति स्थिते **'सान्तमहतः संयोगस्य'** (६।४।१०) इति नोपधादीर्घे पुमान्स् सु इति जाते सुलोपे संयोगान्तलोपे पुमानिति सिद्धम् । **'नश्चापदान्तस्य झलि'** (८।३।२४) इति नुमः नकारस्यानुस्वारे पुमांसौ, पुमांसः, पुमांसम्, पुमांसौ, पुंसः, पुंसा, संयोगान्तलोपे पुम्भ्याम् । इत्यादि । आशिष्–सजुष्–गिर्–धुर्–पुर्प्रभृति-षान्तरेफान्तस्त्रीलिङ्गशब्दानामपि रूपाणि-प्रायः चन्द्रमस् शब्दवदेव ज्ञेयानि । केवलं हलादिविभक्तौ विशेषः । तथाहि-आशिष्+सु इत्यत्र षत्वस्यासिद्धत्वात् **'ससजुषो रुः'** (८।२।६६) इति रुत्वे –

[1]र्वोरुपधाया[3] दीर्घ[4] इकः[2] ॥८।२।७६॥ ([5]झलि पदान्ते[6]च)

इतीको दीर्घे सुलोपे विसर्गे आशीः । आशिषौ । रुत्वे दीर्घे आशीर्भ्याम् । आशिष्+सु इत्यत्र रुत्वे दीर्घे विसर्गे –

[2]वा शरि[1] ॥८।३।३६॥ (विसर्गः[4] विसर्जनीयस्य[3])

इति वैकल्पिके विसर्गे आशीः सु इति जाते –

[2]नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ८।३।५८॥ ([1]इण्कोः सः[3] मूर्धन्यः[4])

इति मूर्धन्ये आशीःषु पक्षे **'विसर्जनीयस्य सः'** (८।३।३४) इति सत्वे **'ष्टुना ष्टुः'** (८।४।४१) इति ष्टुत्वेन षकारे आशीष्षु, हे आशीः इत्यादि । उभयलिङ्गः सुपिस्

*** सकारान्ताः शब्दाश्चतुर्द्धा सन्ति, तत्र प्रथमः सौ दीर्घो, अन्यत्र हलादौ सन्धिना सहान्यथैव भूत्वा विभक्तियुक् । द्वितीयः सर्वत्रैव विकृतिमान् सुटि नुमदीर्घशाली हलादौ दकारी शसादावचि सम्प्रसारणी चेति । तृतीयः सुटि नुमदीर्घभाक् अन्यत्र हलादौ सन्धिभाक् अजादौ च स्वरयुक् । चतुर्थः पुंस् शब्दः सर्वत्रैव विकारी केवलमजादावसर्वनामस्थाने विभक्तियुक् ।**

शब्दोऽप्येवमेव.–सुपीः, सुपिसौ, सुपीर्भ्याम्, सुपीःषु, सुपीष्षु इत्यादि। एवं सुसर्पिष् शब्दोऽपि केवलमजादौ षकारश्रुतिः। एवम् सजूः, सजुषौ, सजूर्भ्याम्, सजूःषु, सजूष्षु। हे सजूः। इत्यादि। गीः, गिरौ, गीर्भ्याम्। गिर्+सु इत्यत्र दीर्घे–

[३]रोः सुपि[१] ॥८।३।१६॥ ([३]एव विसर्गः[४])

इति विसर्गनिषेधे **'नुम्विसर्जनीय०'** (८।३।५८) इति मूर्द्धन्ये गीर्षु। हे गीः। इत्यादि। एवम् धूः, धुरौ, धूर्भ्याम्, धूर्षू। इत्यादि। पूः, पुरौ, पूर्भ्याम्, पूर्षु। इत्यादि। *

॥इति पुँल्लिङ्गप्रकरणम्॥

---

* गीर्षुधूर्षुपूर्षुप्रभृतिषु 'शरोऽचि' (८।४।४९) इति न षकारस्य द्वित्वम्।

अथ स्त्रीलिङ्गप्रकरणम्

रमा रुचिर्नदी धेनुर्वाक्स्त्रीश्रीर्गौर्वधूस्तथा।
क्षुत्प्रावृट् च शरच्चैव द्वादश स्त्रीषु नायकाः॥

आदावजन्ताः

तत्राबन्तः स्त्रीलिङ्गो रमाशब्दः 'रमते' इति रमा इति विग्रहे

रम् धातोः पचाद्यचि रम इत्यस्मात् प्रातिपदिकात् –

[1]अजाद्यतष्टाप्[3] ॥४।१।४॥ ([2]स्त्रियाम्)

इति टापि अनुबन्धस्येत्संज्ञायां लोपे दीर्घे च रमा इत्याबन्तात् **'ङ्याप्प्रातिपदिकात्'** (४।१।१) इति सौ **'हल्ङ्याब्भ्यः०'** (६।१।६८) इति सुलोपे रमा। रमा च रमा च रमे इति विग्रहे रमाशब्दद्वयात् औ विभक्तौ समागतायां **'सरूपाणामेकशेष एक विभक्तौ'** (१।२।६४) इत्येकरमाशब्दशेषे अन्यलोपे रमा + औ इति स्थिते –

[3]औङ आपः[1] ॥७।१।१८॥ ([2]अङ्गात् शी[4])

इति औङ श्यादेशे अनुबन्धस्येत्संज्ञायां लोपे गुणे च रमे[1]। रमा च रमा च रमा च इति विग्रहे रमाशब्दत्रयात् जसि एकशेषकार्ये रमा + जस् इति स्थितौ अनुबन्धलोपे दीर्घे[2] रुत्वे विसर्गे च रमाः। रमाम्, रमे, रमाः[3]। रमा + आ इत्यत्र –

[1]आङि [3]चापः[4] ॥७।३।१०५॥ ([2]ओसि एत्[5])

इत्याप एत्वे रमे आ इति जाते अयादेशे रमया। रमाभ्याम्, रमाभिः। रमा + ए इत्यत्र –

[3]याडापः[1] ॥७।३।११३॥ ([2]ङितः)

इति टित्त्वाद् विभक्तेरादौ याडागमे रमाया + ए इति जाते वृद्धौ रमायै। ङसि याडागमे दीर्घे च रमायाः। ओसि एत्वे अयादेशे च रमयोः। आमि आबन्तान्नुटि अनुबन्धलोपे रमाणाम्। रमा + ङि इत्यत्र –

---

१ – पूर्वसवर्णदीर्घस्तु 'दीर्घाज्जसि च' (६।१।१०५) इति निषिध्यते। २ – पूर्वसवर्णदीर्घस्य 'दीर्घाज्जसि च' (६।१।१०५) इति निषेधात् 'अकः सवर्णे दीर्घः' (६।१।१०१) इत्यनेन दीर्घः। ३ – पूर्वसवर्णदीर्घः।

[२]ङेराम्[३] नद्याम्नीभ्यः[१] ॥७।३।११६॥

इति ङेरामि रमा + आम् इति जाते याडागमे दीर्घे रमायाम् । रमयोः, रमासु । सम्बोधने हे रमा + सु इति स्थितौ –

[३]सम्बुद्धौ च ॥७।३।१०६॥ ([१]आप एत्[२])

इति आप एत्वे **'एङ् ह्रस्वात्सम्बुद्धेः'** (६।१।६९) इति सुलोपे हे रमे । हे रमे, हे रमाः । एवम् अजा, एडका इत्यादयः । * अम्बा, अक्का, अल्लाशब्दानान्तु सम्बुद्धौ विशेषः । तथाहि अम्बा + सु इति स्थितौ –

[१]अम्बार्थनद्योर्ह्रस्वः[२] ॥७।३।१०७॥ ([३]सम्बुद्धौ)

इति ह्रस्वे सुलोपे हे अम्ब, हे अक्क, हे अल्ल । इत्यादि । अवशिष्टं रमावत् । स्त्रीलिङ्गो ह्रस्वेकारान्तो रुचिशब्दः । प्रायेणास्य हरिवद् रूपम् । रुचिः, रुची, रुचयः, रुचिम्, रुची, स्त्रीत्वान्नत्वाभावे रुचीः । रुच्या, रुचिभ्याम्, रुचिभिः । रुचि + ए इत्यत्र –

[१]ङिति [५]ह्रस्वश्च ॥१।४।६॥ ([४]यू [३]स्त्र्याख्यौ [६]नदी [२]इयङुवङ्स्थानावस्त्री[८] वा[७])

इति वैकल्पिक्यां नदीसंज्ञायाम् –

[३]आण्नद्याः[१] ॥७।३।११२॥ ([२]ङिताम्)

इति विभक्तेराडागमे रुचि आ + ए इति जाते –

[१]आटश्च ॥६।१।९०॥ ([२]अचि [५]वृद्धिः [४]एका पूर्वपरयोः[३])

इति वृद्धौ यणि रुच्यै नदीत्वाभावपक्षे **'शेषो घ्यसखि'** (१।४।७) इति घित्वात् **'घेर्ङिति'** (७।३।१११) इति गुणे अयादेशे रुचये । रुच्याः, रुच्योः, रुचीनाम् । रुचि + ङि इत्यत्र विकल्पतो नदीसंज्ञायाम् **'ङेराम्०'** (७।३।११६) इति प्राप्तमामं बाधित्वा परत्वात् **'औत्'** (७।३।११८) इति औत्वे प्राप्ते तद् बाधित्वा –

[१]इदुद्भ्याम् ॥७।३।११७॥ ([३]ङेराम्[४] नदीभ्याम्[३])

*** वत्सा, अश्वा, चटका, मूषिका, मन्दा, मेधा, गङ्गा, यमुना, विद्या, लता, होरा, निशा, दिशा, यात्रा, तारा, धारा, बाला, माला, हाला, शाला प्रभृतय आबन्ता ज्ञेयाः ।**

इति ङेरामि आटि वृद्धौ यणि रुच्याम् पक्षे रुचौ । रुच्योः, रुचिषु । हे रुचे ! इत्यादि ।*

एवम् उकारान्तस्त्रीलिङ्गो धेनुशब्दो रुचिवज्ज्ञेयः, केवलमत्रोकारत्वाद्वकारश्रुतिः । धेनुः, धेनू, धेनवः । धेनुम्, स्त्रीत्वान्नत्वाभावे धेनूः । धेन्वा, धेनुभ्याम्, धेनुभिः । धेन्वै धेनवे, धेन्वाः धेनोः, धेन्वोः, धेनूनाम् । धेन्वाम् धेनौ, धेनुषु । हे धेनो इत्यादि । एवम् रज्जु कु मृदु गुरु प्रभृतयः स्त्रीलिङ्गा ज्ञेयाः । ङीबन्तो नदीशब्दः । सुलोपे नदी, यणि नद्यौ नद्यः । परत्वादमि पूर्वरूपे नदीम्, शसि पूर्वसवर्णदीर्घे स्त्रीत्वान्नत्वाभावे नदीः । नद्या, नदीभ्याम्, नदीभिः । नदी + ए इत्यत्र –

[२]यू[१]स्त्र्याख्यौ नदी[३] ॥१।४।३॥

इति नदीसंज्ञायाम् आडागमे **'आटश्च'** (६।१।९०) इति वृद्धौ यणि नद्यै, नद्याः, नद्योः, नदीत्वान्नुटि नदीनाम् । ङौ नदीत्वादामि आडागमे वृद्धौ यणि नद्याम् । **'अम्बार्थनद्योर्ह्रस्वः'** (७।३।१०७) इति ह्रस्वे ह्रस्वत्वात् सम्बुद्धिलोपे हे नदि । एवम् – देवी, गौरी, सौरी, नारी, प्रभृतयः स्त्रीलिङ्गाः शब्दा ज्ञेयाः । लक्ष्मीः † तरीः, स्तरीः, तन्त्रीः, अवीः, आसु ङीबन्तत्वाभावान्न सुलोपः । सर्वमन्यन्नदीवदेव । ऊकारान्तस्त्रीलिङ्गो वधूशब्दोऽपि नदीवज्ज्ञेयः । केवलं सौ रुत्वविसर्गौ । अन्यत्रोकारत्वाद्वकारश्रुतिः । बधूः, वध्वौ, वध्वः, वधूम्, वध्वौ, वधूः, स्त्रीत्वान्नत्वाभावः । वध्वा, वधूभ्यां, वधूभिः । वध्वै, वध्वाः, वध्वोः, वधूनाम् । बध्वां, वधूषु । सम्बुद्धौ ह्रस्वे हे वधु । एवं चमू-श्वश्रू-कर्कन्धूः-प्रभृतयः दीर्घोकारान्ताः स्त्रीलिङ्गाः शब्दा ज्ञेयाः । ईकारान्तेऽपि स्त्रीशब्दे विशेषः । ङ्यन्तात् स्त्रीशब्दात् सौ सुलोपे स्त्री । स्त्री + औ इत्यत्र –

स्त्रियाः ॥६।४।७९॥ (इयङ् अचि)

इति ङित्त्वाद् अन्तस्य ईकारमात्रस्येयङादेशे स्त्रियौ, स्त्रियः । स्त्री + अम् इत्यत्र –

[४]वामूशसोः[३] ॥६।४।८०॥ ([१]स्त्रियाः इयङ्[२])

इति वैकल्पिके इयङि स्त्रियम् पक्षे पूर्वरूपे स्त्रीम्, शसि स्त्रियः स्त्रीः, स्त्रिया, स्त्रीभ्याम् स्त्रीभिः । स्त्रियै, स्त्रियाः, परत्वान्नुटि स्त्रीणाम् । ङेरामि स्त्रियाम्, स्त्रीषु । नदीत्वाद्ध्रस्वे

*** एवम् – मति, नति, रति, गति, हति, पंक्ति, भक्ति, आसक्ति, व्यक्ति, शक्ति, शान्ति, श्रान्ति, क्षान्ति, क्रान्ति, भ्रान्ति, रात्रि, जाति, नीति, रीति, कीर्ति, उक्ति, बुद्धि, श्रुति, द्रुति, मूर्ति, धूलि, लूनि, धृति, सृति, स्मृति, भृति, मृति, वृत्ति, सम्पृक्ति, हृति, हेति, प्रभृतयः सर्वेऽपि क्तिन्नन्ताः स्त्रीलिङ्गशब्दा ज्ञेयाः ।**

† अवीतन्त्रीतरीलक्ष्मीधीहीश्रीणामुणादिषु ।
सप्तानामपि शब्दानां सुलोपो न कदाचन ॥
अत्र लक्ष्म्यन्ताश्चत्वारो नदीवद्, ध्यादयस्तु श्रीवज्ज्ञेयाः ।

हे स्त्रि, शेषं नदीवत् । ङ्यन्तभिन्न – श्रीशब्दे तु इतोऽपि विशेषः । प्रातिपदिकत्वासौ रुत्वे विसर्गे च श्रीः, श्री + औ इत्यत्र –

'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६।४।७७) इति इयङादेशे श्रियौ, श्रियः । श्रियम्, श्रियः, श्रिया, श्रीभ्यां, श्रीभिः, श्री + ए इत्यत्र **'ङिति ह्रस्वश्च'** (१।४।६) इति वैकल्पिक्यां नदीसंज्ञायाम् आटि वृद्धौ इयङि श्रियै पक्षे श्रिये, श्रियाः, श्रियः । श्रियोः । श्री + आम् इत्यत्र –

[६]वामि[७] ॥१।४।५॥ ([४]यू[३]स्त्र्याख्यौ नदी[५] [२]इयङुवङ्स्थानावस्त्री[१])

इति नदीत्वान्नुटि णत्वे श्रीणाम् पक्षे श्रियाम्, ङौ नदीत्वाद् ङेरामि नुटं बाधित्वा आडागमे इयङादेशे श्रियाम् पक्षे श्रियि, श्रियोः, श्रीषु । सम्बुद्धौ हे श्री + सु इति स्थिते –

[६]ने[२]यङुवङ्स्थानावस्त्री[१] ॥१।४।४॥ ([४]यूस्त्र्याख्यौ[३] नदी[५])

इति नदीत्वनिषेधेन ह्रस्वाभावे हे श्रीः हलादौ नदीवत् । एवम् – धीः, ह्रीः, भीः, इत्यादय ईकारान्ताः, भूः, भ्रूः, सूः, जूः, द्रूः, लूः, इत्यादय ऊकारान्ताश्च स्त्रीलिङ्गशब्दा ज्ञेयाः । (भूः पृथ्वी । भ्रूः चक्षुषोर्मध्यदेशः । सूः स्त्रियां निझरि सुवे । जूः पिशाची । द्रूः हिरण्यरक्षसोः । लूः छेदनम् ।) ऋकारान्तेषु मातृ यातृ नानान्दृ दुहितृ - प्रभृतयः स्त्रीलिङ्गाः पुंल्लिङ्गऋकारान्त - पितृशब्दवज्ज्ञेयाः । स्वसृशब्दः कर्तृवज्ज्ञेयः । केवलं शसि स्त्रीत्वान्नत्वाभावः । इत्युक्तमेव प्रसङ्गात् पुंलिङ्गे । स्वसा, स्वसारौ, स्वसारः, स्वसारम्, स्वसृः, स्वस्रा, स्वसृभ्यः, स्वसृणाम्, स्वसरि, हे स्वसः इत्यादि । ओकारान्तो गोशब्दः स्त्रीलिङ्गः । गो + सु इति स्थितौ –

[१]गोतो णित्[३] ॥७।१।९०॥ ([२]सर्वनामस्थानम्)

इति सोर्णित्वे **'अचो ञ्णिति'** (७।२।११५) इति वृद्धौ रुत्वे विसर्गे च गौः, गावौ, गावः । गो + अम् इत्यत्र –

[१]औतोऽम्शसोः[२] ॥६।१।९३॥ ([३]अचि [५]एकः [४]पूर्वपरयोः [६]आ)

इत्यनेन शब्दस्थस्य ओकारस्य विभक्तेरकारस्य च उभयोर्मिलित्वा आकारैकादेशे गाम् गाः[१] । सन्धिकार्ये गवा, गोभ्याम् । ङसि - ङसोः गोः । गवाम्, गोषु इत्यादि । एवम् – प्रद्यो

१- पुंलिङ्गोऽप्यस्ति गो शब्दो वृषभपर्यायः । तस्यापि शसि 'गाः' इत्येव रूपं भवति । तत्र पूर्वसवर्णदीर्घाभावान्न नत्वम् ।

सुद्यो प्रभृतय ओकारान्ता उभयलिङ्गा द्योप्रभृतयः स्त्रीलिङ्गाः शब्दा ज्ञेयाः। वन्तो दिव् शब्दोऽपि स्त्रीलिङ्गोऽस्ति, यस्य सौ दिव्+सु इति स्थिते –

[1]दिव औत्[2] ॥७।१।८४॥ ([3]सौ)

इति व औत्वे दि औ सु इति जाते यणि सोरनुबन्धलोपे रुत्वे विसर्गे च द्यौः, दिवौ, दिवः, दिवं, दिवौ, दिवः, दिवा, दिव्+भ्याम् इत्यत्र –

[1]दिव उत्[2] ॥६।१।१३१॥ (पदस्य[2])

इति व उत्वे यणि द्युभ्याम्, द्युभ्यः। मूर्धन्यादेशे द्युषु। हे द्यौः, हे दिवौ इत्यादि विभक्तियोगे रूपम्। नौशब्दोऽपि केवलसन्धिकार्य्ये नौः, नावौ, नावः, नावम्, नावा, नौभ्यामित्यादि रूपं भजते। एवम्– ग्लौप्रभृतययोऽपि पुँल्लिङ्गा अन्ये चोभयलिङ्गा औकारान्ताः शब्दा ज्ञेयाः। इतो हलन्ताः। हलन्तेषु चकारान्तः स्त्रीलिङ्गो वाच् शब्दः। वाच्+सु इत्यत्र –

चोः कुः ॥८।२।३०॥ (झलि पदान्ते च)

इति कुत्वेन ककारे **'झलां जशोऽन्ते'** (८।२।३९) इति जश्त्वेन गकारे **'वावसाने'** (८।४।५६) इति वैकल्पिके चर्त्वे वाक् वाग्। अजादौ स्वरसंयोगे वाचौ, वाचः, वाचम्, वाचौ, वाचः, वाचा। हलादौ कुत्वजश्त्वे वाग्भ्याम्, वाग्भिः इत्यादि। सुपि कुत्वे मूर्द्धन्यादेशे वाक्षु इत्यादि रूपाणि। एवम् – त्वच् शुच् रुच् रुज् ऋच् स्रज् प्रभृतयः स्त्रीलिङ्गाः, पयोमुच् जलमुच् प्रभृतयश्चकारान्ताः वणिज् भिषज् हुत्भुज् भूभुज् ऋत्विज् सुयुज् प्रभृतयो जकारान्ताश्चोभयलिङ्गाः शब्दा ज्ञेयाः। केवलम् अजादौ चकारजकारश्रुतिरिति विशेषः। ऋतुपूर्वकाद् यज् धातोः –

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥३।२।५९॥ (क्विन्)

इति क्विन् प्रत्यये ककारेकारनकाराणामनुबन्धानां **'लशक्वतद्धिते'** (१।३।८) **'उपदेशेऽजनुनासिक** इत्' (१।३।२) **'हलन्त्यम्'** (१।३।३।) इति सूत्रत्रयेण यथाक्रमम् इत्संज्ञायां लोपे अपृक्तस्य वकारस्य –

[2]वेरपृक्तस्य[1] ॥६।१।६७॥ ([3]लोपः)

इति लोपे प्रत्ययस्य कित्त्वात् –

[1]वचिस्वपियजादीनां [2]किति ॥६।१।१५॥ ([3]सम्प्रसारणम्)

इति सम्प्रसारणे यणि ऋत्विज् शब्दस्य –

[3]कृदतिङ्[1] ॥३।१।९३॥ ([2]प्रत्ययः धातोरित्यधिकारे)

इति क्विनः कृत्त्वात् **'कृत्तद्धितसमासाश्च'** (१।२।४६) इति प्रातिपदिकत्त्वात् सौ ऋत्विज्+सु इत्यत्र **'हल्ङ्याब्०'** (६।१।६८) इति सुलोपे –

व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः ॥८।२।३६॥

इति षत्वे तस्य जश्त्वेन डत्वे ततः –

क्विन्प्रत्ययस्य कुः ॥८।२।६२॥ (पदान्ते)

इति कुत्वेन गकारे **'वाऽवसाने'** (८।४।५६) इति वैकल्पिके चर्त्वे ऋत्विक् ऋत्विग् ऋत्विजौ इत्यादि। युज्ज-क्रुञ्चोस्तु सुलोपे संयोगान्तलोपे **'निमित्तापाये नैमित्तिकस्याप्यपायः'** (परि०) इति नियमात् ञकारस्य नुमस्थानिकतया नकारोपस्थितौ तस्य **'क्विन् प्रत्ययस्य कुः'** (८।२।६२) इति कुत्वेन ङ्कारे **युङ्, युञ्जौ**, युञ्जः। क्रुङ्, क्रुञ्चौ, क्रुञ्चः इत्यादि। प्राञ्च् अवाञ्च् प्रत्यञ्च् उदञ्च् इत्यादीनां **'किप् च'** (३।२।७६) (**धातोः प्रत्ययः परः**) इति क्विपि तस्य सर्वापहारिलोपे –

[1]अनिदितां हल[3] उपधायाः[4] ङ्क्ङिति[6] ॥६।४।२४॥ ([2]अङ्क्ङानां नलोपः[5])

इत्यनेन सूत्रेण –

'नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारजः शकारश्चर्षाट्टवर्गस्तवर्गजः॥'

इति नियमात् ञकारस्य नकारतया तल्लोपे प्राच् अवाच् प्रत्यच् उदच् इत्यादि पुंल्लिङ्गानां प्रातिपदिकत्वात् स्वादौ प्राच्+सु इति जाते **'उगिदचां सर्वनामस्थाने०'** (७।१।७०) इति नुमि अनुबन्धलोपे प्रान्च्+सु इति स्थितौ सुलोपे संयोगान्तलोपे च प्रान् इत्यस्य **'क्विन् प्रत्ययस्य कुः'** (८।२।६२) इति **कुत्वेन ङ्कारे** प्राङ् इति साधुः। प्राच्+औ इत्यत्र **'उगिदचाम्०'** (७।१।७०) इति नुमि कृते **अनुस्वारे परसवर्णे** सति प्राञ्चौ, प्राञ्चः, शसि प्राच् अस् इत्यत्र –

अचः ॥६।४।१३८॥ (भस्य अल्लोपः)

इति अलोपे प्रच्+अस् इत्यत्र –

चौ ॥६।३।१३८॥ (पूर्वस्य दीर्घः)

इति पूर्वस्वरदीर्घे प्राचः, प्राचा, **'क्विन् प्रत्ययस्य'** कुः (८।२।६२) इति कुत्वेन ककारे जश्त्वेन गकारे प्राग्भ्याम्। प्राक्षु इत्यादि। एवमेव अवाङ्, अवाञ्चौ। शसि अवाचः, अवाग्भ्याम् तथा प्रत्यङ्, प्रत्यञ्चौ। शसि अलोपे **'निमित्तापाये नैमित्तिकस्याप्यपायः'** (परि०) इति परिभाषया यणोऽभावे प्रतिच्+अस् इत्यत्र **'चौ'** (६।३।१३७) इति दीर्घे प्रतीचः, प्रतीचा, प्रत्यग्भ्यामित्यादि एवम् **'अञ्चतावप्रत्यये'** (६।३।९२) इत्यधिकृत्य –

समः समिः ॥६।३।९३॥ तिरसस्तिर्यलोपे ॥६।३।९४॥ सहस्य सध्रिः ॥६।३।९५॥

इत्यादिसूत्रैः सम्याद्यादेशेन सम्पन्नानाम् सम्यच् तिर्यच् सध्र्यच् प्रभृतिशब्दानाम् रूपाणि ज्ञेयानि। सम्यङ्, सम्यञ्चौ, समीचः, समीचा, सम्यग्भ्यामित्यादि। तिर्यङ्, तिर्यञ्चौ, तिरश्चः, तिरश्चा, तिर्यग्भ्यामित्यादि। सध्र्यङ्, सध्र्यञ्चौ, सध्रीचः सध्रीचा, सध्र्यग्भ्यामित्यादि। एवम्-उदङ्, उदञ्चौ, शसि उदच् +अस् इति स्थितौ **'अचः'** (६।४।१३८) इति प्राप्तम् अलोपं बाधित्वा–

[1]उद [3]ईत् ॥६।४।१३९॥ ([2]अचः)

इति ईत्वे **'चौ'** (६।३।१३७) इति दीर्घे उदीचः, उदीचा हलादौ उदग्भ्यामित्यादि। पूजार्थकस्य अञ्चतेस्तु–

[4]नाञ्चेः[1] पूजायाम्[2] ॥६।४।३०॥ ([3]नलोपः)

इति नलोपनिषेधे प्राञ्च् इत्यस्यैव प्रातिपदिकत्वात् स्वादौ प्राञ्च्+सु इत्यत्र सुलोपे संयोगान्तलोपे प्रान् इति जाते **'क्विन् प्रत्ययस्य कुः'** (८।२।६२) इति कुत्वेन नकारस्य ङकारे प्राङ्, प्राञ्चौ, प्राञ्चः। शसादावपि तथैव नकारविशिष्टं रूपम्। प्राञ्चः, प्राञ्चा, प्राञ्च्+भ्यामित्यत्र संयोगान्तलोपे कुत्वेन ङकारे प्राङ्भ्याम्, प्राङ्भिः। प्राङ्क्षु।

ङ्णोः कुक्टुक्शरि ॥८।३।२८॥

इति कुगामगे प्राङ्क्षु इत्यपि रूपम्। एवं पूजार्थे प्रत्यङ्ङादय अलुप्तनकारा ज्ञेयाः। तथाहि– प्रत्यङ्, प्रत्यञ्चौ, शसादौ प्रत्यञ्चः, प्रत्यञ्चा, प्रत्यङ्भ्याम्, प्रत्यङ्क्षु, प्रत्यङ्क्षु इत्यादि। एषां स्त्रीलिङ्गरूपाणि तु **'अञ्चतेश्चोपसंख्यानम्'** (४।१।६) इति वार्तिकबलात् ङीपि प्राची, अवाची प्रतीची समीची सध्रीची तिरश्ची उदीची इत्यादीनि नदीवज्ज्ञेयानि। वाच् शब्दवदेव शकारान्त-षकारान्त-हकारान्तेषु तादृश् स्पृश् दधृष् गोदुह् शब्दा विशेष्यनिघ्नाः, दृश्+दिश् इत्यादि स्त्रीलिङ्गाः शब्दा अपि ज्ञेयाः। केवलमजादौ तेषाम् शकार-षकार हकारश्रुतिः। तथाहि तत्पूर्वकात् दृश् धातोः–

[1]त्यदादिषु [2]दृशोऽनालोचने[3] [5]कञ्च ॥३।२।६०॥ ([4]क्विन्)

इति क्विन् प्रत्यये क्विनः सर्वापहारिलोपे सर्वनाम्नश्च **'अलोऽन्त्यस्य'** (१।१।५२) इति सूत्रबलात् अन्त्यतकारस्य–

[२]आ सर्वनाम्नः[१] ॥६।३।९१॥ ([२]दृग्दृशवतुषु)

इत्यात्वे सवर्णदीर्घे तादृश् शब्दस्य प्रातिपदिकत्वात् सौ तादृश्+सु इत्यत्र सुलोपे–

'व्रश्चभ्रस्जसृजमृजयजराजभ्राजछशां षः' (८।२।३६) इति शकारस्य षकारे **'झलां जशोऽन्ते'** (८।२।३९) इति षकारस्य डकारे **'क्विन् प्रत्ययस्य कुः'** (८।२।६२) इति कुत्वेन गकारे **'वावसाने'** (८।४।५६) इति वैकल्पिकेन चर्त्वेन ककारे तादृक्, तादृग्, तादृशौ इत्यादि। एवं दृक् दृग् इत्यत्र षडगकाः प्राग्वत्। यद्यपि त्यदादिपूर्वकस्यैव दृशः क्विन् भवति तथापि **'क्विन् प्रत्ययस्य कुः'** (८।२।६२) इति सूत्रे क्विन् प्रत्ययो दृष्टो यस्मात् इति बहुव्रीहिसमासा-श्रयणेन केवलस्यापि दृशः कुत्वसिद्धिः, यतो हि तादृश् शब्दे दृशस्तु क्विन् दृष्टोऽस्त्येव। एवं दिक् दिग् इत्यत्र **'ऋत्विग्दधृक्स्रग्दि०'** (३।२।५९) इत्यादिना क्विन् ज्ञेयः। ततः षडगकाः प्राग्वत् इत्यादि। घृतस्पृश् शब्दस्य–

स्पृशोऽनुदके क्विन् ॥३।२।५८॥

इति क्विनि तदन्तत्वेन प्रातिपदिकत्वात्सौ षडगकाः प्राग्वत्। घृतस्पृक्, घृतस्पृग्, इत्यादि। क्विबन्तो गोदुह् शब्दः। गोदुह् + सु इति स्थितौ सुलोपे–

[१]दादेर्धातोः[२]र्घः[४] ॥८।२।३२॥ ([३]हः [५]झलि पदान्ते[६])

इति हस्य घकारे गोदुघ् इति जाते–

[१]एकाचो [३]वशो [४]भष् झषन्तस्य[२] स्ध्वोः[५] ॥८।२।३७॥ (झलि[७] पदान्ते[६])

इति दकारस्य धकारे गोधुघ् इत्यत्र घकारस्य जश्त्वेन गकारे तस्य पाक्षिकचर्त्वेन ककारे गोधुक्, गोधुग्, गोदुहौ, गोदुहः। गोधुग्भ्याम्, गोधुक्षु इत्यादि। क्विन्नन्तोऽत्र उष्णिह् शब्दो यथा– **'क्विन् प्रत्ययस्य कुः'** (८।२।६२) इति कुत्वेन घत्वे जश्त्वेन गत्वे पाक्षिके चर्त्वे उष्णिक्, उष्णिग्, उष्णिहौ, उष्णिहः, उष्णिग्भ्याम्, उष्णिक्षु इत्यादि। दकारान्तस्त्रीलिङ्गः शरद् शब्दः। अस्मादपि प्रातिपदिकत्वात्सौ, तल्लोपे पाक्षिके चर्त्वे शरत्, शरद्, शरदौ इत्यादि। एवम्– दृषद्, आपद्, विपद्, सम्पद्, परिषद्, प्रतिपद् इत्यादयः केवलस्त्रीलिङ्गाः, सुहृद्, मर्मभिद्, सभासद्, तरुच्छिद्, कुमुद्, तमोनुद्, शास्त्रविद्, धर्मविद्, अरुन्तुद्, हृदयन्तुद्, अश्वनुद्, प्रभृतय उभयलिङ्गा दकारान्ताः शब्दा ज्ञेयाः। एवम्– क्षुध्, क्रुध्, युध्, वीरुध्, समिध् इत्यादयः स्त्रीलिङ्गाः, शुध्, बुध्, प्रभृतयः पुँल्लिङ्गाश्च धकारान्ता ज्ञेयाः, केवलमजादौ धकारश्रुतिः। क्षुत्, क्षुद्,

क्षुधौ, क्षुद्भ्याम्, क्षुत्सु इत्यादि । बुध् शब्दे त्रियान् विशेषः– बुध + सु इति स्थितौ सुलोपे जश्त्वचर्त्वे **'एकाचो बशो भष् झषन्तस्य स्ध्वोः'** (८।२।३७) इति बस्य भकारे भुद्, भुत्, बुधौ, बुधः, भुद्भ्याम्, भुत्सु इत्यादि । षकारान्तस्त्रीलिङ्गः प्रावृष् शब्दः, सौ **'हल्ङ्याब्भ्यः०'** (६।१।६८) इति सुलोपे जश्त्वेन डकारे पाक्षिकचर्त्वेन टकारे प्रावृट्, प्रावृड्, प्रावृषौ, प्रावृट्सु अत्र–

६न१पदान्ताट्टो२रनाम्३ ॥८।४।४२॥ (४स्तोः ष्टुः५)

'ष्टुना ष्टुः' (८।४।४१) इति प्राप्तष्टुत्वनिषेधः । एवम्– तृष् - त्विष् - रिष् - रुष् - निश् इत्यादयः केवलस्त्रीलिङ्गाः, रत्नमुष्, द्विष् - विश् - विराज् - सम्राज् - विभ्राज् विश्वसृज्-मृज्, देवेज्, लिह् प्रभृतयः उभयलिङ्गाः षकार - शकार - जकार - हकारान्ताः शब्दा ज्ञेयाः । केवलमजादौ षकार - शकार - जकार - हकार - श्रुतिः । विश् + सु इति स्थितौ–

'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (८।२।३६) इति शस्य षत्त्वे जश्त्वे वैकल्पिके चर्त्वे विट्, विड्, विशौ, विशः, विड्भ्याम्, विट्सु । एवम्– विराट्, विराड्, विराजौ, विराड्भ्याम्, विराट्सु इत्यादि । लिह् + सु इत्यत्र सुलोपे–

हो ढः ॥८।२।३१॥ (झलि पदान्ते)

इति हस्य ढकारे जश्त्वे चर्त्वे च लिट्, लिड्, लिहौ, लिहः, लिहा, लिड्भ्याम्, लिट्सु इत्यादि । दुह्, मुह्, स्नुह्, स्निह् इति चतुर्णाम् उभयलिङ्गानां हान्तानान्तु– घत्वढत्वाभ्याम् पदान्ते रूपविशेषः । तथाहि– मित्रद्रुह् शब्दात् सौ सुलोपे–

३वा द्रुहमुहष्णुहष्णिहाम्१ ॥८।२।३३॥ (हो२ढः४झलि५ पदान्ते६)

इति हस्य घकारे **'एकाचो बशो भष०'** (८।२।३७) इति दकारस्य धकारे जश्त्वे चर्त्वे च मित्रध्रुक्, मित्रध्रुग् पक्षे **'हो ढः'** (८।२।३१) इति ढत्वे जश्त्वे चर्त्वे च मित्रध्रुट्, मित्रध्रुड्, मित्रद्रुहौ, मित्रद्रुहः, मित्रध्रुग्भ्याम्, मित्रध्रुक्षु, मित्रध्रुट्सु इत्यादि । एवमितरेऽपि त्रयो ज्ञेयाः । हकारान्तेऽपि पुंसि अनडुह् शब्दे विशेषः । अनडुह् + सु इति स्थितौ–

चतुरनडुहोरामुदात्तः ॥७।१।९८॥ (सर्वनामस्थाने)

इति आमागमे कर्तव्ये **'मिदचोऽन्त्यात्परः'** (१।१।४७) इति उकारस्यान्ते आमि अनुबन्धलोपे अनडु + आह् + सु इति जाते यणि अनड्वाह् + सु इति जाते–

[3]सावनडुहः[1] ॥७।१।८२॥ ([2]नुम्)

इति मित्त्वादाकारस्यान्ते नुमि अनुबन्धलोपे सुलोपे संयोगान्तलोपे तस्यासिद्धत्वात् नलोपाभावे अनड्वान्, अनड्वाहौ, अनडुहः, **'वसुस्रंसुध्वंस्वनडुहां दः'** (८।२।७२) इति दत्वे अनुडुद्भ्याम्, अनडुत्सु, सम्बुद्धौ सौ अनडुह्+सु इति स्थितौ–

[2]अम् सम्बुद्धौ[3] ॥७।१।९९॥ ([1]चतुरनडुहोः)

इति अमागमे नुमि सुलोपे संयोगान्तलोपे हे अनड्वन् इत्यादि। स्त्रीलिङ्गे उपानह् शब्दे तु झलि पदान्ते विशेषः। उपानह्+सु इति स्थितौ–

[1]नहो धः[2] ॥८।२।३४॥ ([4]झलि पदान्ते[3])

इति हस्य धत्वे जश्त्वे चर्त्वे च कृते उपानत्, उपानद्, उपानहौ, उपानद्भ्याम्, उपानत्सु, 'अप्' शब्दो नित्यं बहुवचनान्तः। अप्+जस् इत्यत्र **'अपृतॄन्०'** (६।४।११) इति दीर्घे आपः। शसि अपः, भादौ तु–

[1]अपो भि[3] ॥७।४।४८॥ (तः[2])

इति पकारस्य तकारे जश्त्वेन दकारे अद्भिः, अद्भ्यः, आमि अपाम्, अप्सु। धर्मगुप् प्रभृतयः पान्ता विशेष्यनिघ्नाः क्विबन्ताः सन्धिनैव पदभाजः–धर्मगुब्, धर्मगुप्, धर्मगुपौ, धर्मगुब्भ्याम्, धर्मगुप्सु इत्यादि।

॥ इति स्त्रीलिङ्गप्रकरणम् ॥

●

अथ नपुंसकलिङ्गप्रकरणम्

ज्ञानं दधि पयो वर्म धनुर्वारि जगत्तथा।
मधु नाम मनोहारि दशैतानि नपुसंके॥

अकारान्तो नपुसंकलिङ्गो ज्ञानशब्दः। कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ ज्ञान + सु इति स्थिते –

[1]अतोऽम्[5] ॥७।१।२४॥ ([4]क्लीबात्[2] [3]अङ्गात् [4]स्वमोः)

इति सोरमादेशे **'अमि पूर्वः'** (६।१।१०७) इति पूर्वरूपे ज्ञानम्, ज्ञान + औ इत्यवस्थायाम् –

नपुंसकाच्च ॥७।१।१९॥ (अङ्गात् औडः शी)

इति औडः श्यादेशे शस्येत्संज्ञायां लोपे च गुणे ज्ञाने *। ज्ञान + जस् इति स्थितौ –

[3]जश्शसोः शिः[4] ॥७।१।२०॥ ([1]नपुंसकात् [2]अङ्गात्)

इति जसः शौ तस्य –

शि सर्वनामस्थानम् ॥१।१।४२॥

इति सर्वनामस्थानसंज्ञायाम् –

[2]नपुंसकस्य झलचः[1] ॥७।१।७२॥ ([3]अङ्गस्य [4]नुम् सर्वनामस्थाने[5])

इति नुमि ज्ञानन् + इ इति स्थिते **"सर्वनामस्थाने चासम्बुद्धौ"** (७।१।७०) इति दीर्घे ज्ञानानि। पुनस्तद्वत्। सम्बुद्धौ **'एङ् ह्रस्वात्०'** (६।१।६९) इति सुलोपे हे ज्ञान, हे ज्ञाने, हे ज्ञानानि। शेषं रामवत्। एवं मूल, फल, जल, स्थल, धन, वन, दान, लवण, शास्त्र, मित्र, पत्र, पात्र, गात्र, यन्त्र, हसित, पठित, गमन, भवन, घटत्व, पटत्वादयः, शब्दा ज्ञेयाः। इकारान्तनपुंसकलिङ्गो वारि शब्दः। वारि + सु इति स्थिते –

[3]स्वमोर्नपुंसकात्[1] ॥७।१।२३॥ ([2]अङ्गात् लुक्[4])

इति सोर्लुकि वारि। वारि + औ इत्यत्र **'नपुंसकाच्च'** (७।१।१९) इत्यौडः श्यादेशे अनुबन्धलोपे वारि + ई इति जाते –

---

* इह 'यस्येति च' (६।४।१४८) इति प्राप्तोऽकारलोपः 'औङःश्यां प्रतिषेधो वाच्यः' (वा०) इति निषिध्यते।

[1]इकोऽचि[4] विभक्तौ[5] ॥७।१।७३॥ ([2]अङ्गस्य नुम्[3])

इति नुमि णत्वे वारिणी, वारीणि। **'आङो ना०'** (७।३।१२०) इति ना, वारिणा, वारिभ्याम्, वारिभिः। **'वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन'** (वा०) इति **'घेर्ङिति'** (७।३।१११) इति प्राप्तं गुणं प्रबाध्य नुमि वारिणे, वारिभ्याम्, वारिभ्यः। वारिणः, वारिभ्याम्, वारिभ्यः। वारिणः। वारिणोः **'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'** (वा०) इति नुटि वारीणाम्। वारिणि, वारिणोः, वारिषु। सम्बुद्धौ – हे वारि + सु इत्यत्र सोर्लुकि **'न लुमताङ्गस्य' (१।१।६३)** इति निषेधस्यानित्यत्वात् **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (१।१।६२) (कार्यम्) इति सूत्रसाहाय्येन **'ह्रस्वस्य गुणः'** (७।३।१०८) इति - पाक्षिके गुणे – हे वारे ! हे वारि ! हे वारिणी – हे वारीणि। एवं इकारान्तनपुंसकलिङ्गाः सर्वेऽपि शब्दा ज्ञेयाः। दधिशब्दे केवलं टाद्यजादौ विशेषः। तथाहि – दधि + आ इत्यत्र –

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥७।१।७५॥ (टादावचि)

इति ङित्त्वादिकारस्यानङि दधन् + आ इत्यत्र – **'अल्लोपोऽनः'** (६।४।१३४) इति अकारलोपे दध्ना, दधिभ्याम्, दधिभिः। दध्ने, दधिभ्याम्, दधिभ्यः। दध्नः, दधिभ्याम्, दधिभ्यः। दध्नः , दध्नोः, दध्नाम्। दधन् + इ इत्यत्र **'विभाषा ङिश्योः'** (६।४।१३६) इति वैकल्पिके अल्लोपे दध्नि, दधनि, दध्नोः, दधिषु। हे दधि ! हे दधे ! हे दधिनी ! हे दधीनि ! एवं अस्थि, सक्थि, अक्षि प्रभृतयः। उकारान्तो नपुंसकलिङ्गो मधुशब्दः। अस्य वारिशब्दवत् सर्वं रूपं ज्ञेयम्। मधु, मधुनी, मधूनि। पुनस्तद्वत्। मधुना। मधुने। मधुनः। मधुनोः। मधूनाम्। मधुनि। हे मधो ! हे मधु ! हे मधुनी। हे मधूनि। एवं सुलु, सुनु प्ररि, प्रभृतयो नपुंसकलिङ्गशब्दा ज्ञेयाः। तत्रादौ सुलू शब्दस्य नपुंसके –

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥१।२।४७॥ (इति ह्रस्वे)

सुलु, सुलुनी इत्यादि। सुनौ प्ररै शब्दयोर्ह्रस्वे कर्तव्ये –

एच[2] इग्घ्र[2]स्वादेशे[1] ॥१।१।४८॥

इति नियमेन औकारस्य उकारे ऐकारस्येकारे **'सुनु'** **'प्ररि'** इत्यादि, टादौ तु –

तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ॥७।१।७४॥ (प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि)

इति वा पुंवद्भावे सुल्वा, सुलुना इत्यादि। प्ररिसुनुशब्दयोस्तु नपुंसक एव रूपम्। टादौ न पाक्षिकः पुंवद्भावः प्रवृत्तिनिमित्तैक्याभावात्। तकारान्तनपुंसकलिङ्गो जगत् शब्दः। जगत् + सु इति स्थिते सोर्लुकि जगत्, जगती, नुमि जगन्ति, पुनस्तद्वत्।

तृतीयादिविभक्तियोगे भूभृद्वद्रूपं ज्ञेयम्। शत्रन्तानां भ्वादिदिवादिभिन्नानां यात् याद् यात्+ई इत्यत्र **'आच्छीनद्योर्नुम्'** (७।१।८०) इति वैकल्पिके नुमि यान्ती, याती, बहुवचने यान्ति। भ्वादिदिवादिस्थानान्तु **'शपूश्यनोर्नित्यम्'** (७।१।८१) (नुम् शीनद्योः) इति नित्यं नुमि पठत्, पठद्, पठन्ती, पठन्ति। अभ्यस्तानान्तु **'वा नपुसंकस्य' (७।१।७९) (नुम् सर्वनामस्थाने)** इति पाक्षिके नुमि ददत् (द्) ददती, ददन्ति, ददति। इत्यादि। नकारान्तो नपुंसकलिङ्गो नामन् शब्दः। नामन्+सु इति स्थिते, सोर्लुकि नलोपे नाम। वैकल्पिके अल्लोपे नाम्नी, नामनी। उपधादीर्घे नामानि। पुनस्तद्वत्। टादावचि अल्लोपे नाम्ना नामन्+भ्यामित्यत्र **'स्वादिष्वसर्वनामस्थाने'** (१।४।१७) इति पदसंज्ञायाम् **'नलोपः प्रातिपदिकान्तस्य'** (८।२।७) इति नलोपे नामभ्यामित्यादि। ङौ नाम्नि, पक्षे नामनि। **'सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः'** (८।२।८) (वा०) इति वार्तिकेन वैकल्पिके नलोपे हे नामन् हे नाम इत्यादि। अहन् शब्दस्य हलादिविभक्तौ विशेषः। अहन्+सु इत्यत्र सोर्लुकि–

[२]रोऽसुपि[३] ॥८।२।६९॥ ([१]अह्नः)

इति नस्य रेफे विसर्गे च अहः, अह्नी, अहनी ,अहानि। अहन्+भ्याम् इत्यत्र–

[१]अहन् ॥८।२।६८॥ ([२]पदस्य रुः[३])

इति नकारस्य रुत्वे उत्वे च अहोभ्याम्, अहःसु, हे अहरित्यादि।

नकारान्तनपुंसकलिङ्गो वर्मन् शब्दः। वर्म, वर्मन्+औ इति स्थिते **'नपुंसकाच्च'** (७।१।१९) इति श्यादेशे, **'न संयोगाद्वमन्तात्'** (६।४।१३७) इति अल्लोपनिषेधे वर्मणी, वर्माणि। पुनस्तद्वत्। टादावात्मवत्। नकारान्तनपुंसकलिङ्गो मनोहारिन् शब्दः। मनोहारि, णत्वे मनोहारिणी, मनोहारीणि। पुनस्तद्वत्। शेषं करिवत्। प्राच्, प्रत्यच्, उदच् प्रभृतयः चकारान्ता अपि तद्वदेव। प्राक् (ग्) प्राची, प्राञ्चि। प्रत्यक् (ग्) प्रतीची, प्रत्यञ्चि। उदक् (ग्) उदीची, उदञ्चि। इत्यादि। स्वप् शब्दस्तु स्वप् (ब्) स्वपी **'अप्तृन्०'** (६।४।११) इति दीर्घे नुमि स्वाप्नि। सकारान्तनपुंसकलिङ्गः पयस् शब्दः। पयस्+सु इति स्थिते सोर्लुकि विसर्गे पयः, पयसी। नुमि **'सान्तमहतस्संयोगस्य'** (६।४।१०) इति दीर्घे नस्यानुस्वारे पयांसि। पुनस्तद्वत्। शेषं चन्द्रमोवत्। षकारान्तो नपुंसकलिङ्गो धनुष् शब्दः। षत्वस्यासिद्धत्वात् रुत्वे धनुः, धनुषी, धनूंषि। षत्वस्यासिद्धत्वात् **'सान्तमहतस्संयोगस्य'** (६।४।१०) इति दीर्घः। पुनस्तद्वत्। धनुषा, धनुर्भ्यामित्यादि। स्वनडुह् शब्दस्य तु स्वनडुत् (द्) स्वनडुही, आमनुभ्याम् स्वनड्वांहि। इत्यादि।

॥ इति नपुंसकलिङ्गप्रकरणम् ॥

अथ सर्वनामप्रकरणम्

सर्वः सर्वा च सर्वञ्च स सा तत्त्वमहन्तथा।
अयञ्चेयमिदञ्चासावसावद इहोदिताः॥

सर्वनामगणस्थतया सर्वनामत्वात् त्रिलिङ्गेषु विशेषरूपवत्सु च शब्देषु अकारान्तः पुंलिङ्गः सर्वशब्दः :– स च सामान्यतो रामशब्दवदेव ज्ञेयः। विशेषस्थले सर्वादिकार्यं प्रदर्शयिष्यते। सर्वः, सर्वौ, सर्व+जस् इति स्थिते **'सर्वादीनि सर्वनामानि'** (१।१।२७) इति सर्वनामसंज्ञायाम्–

४जसः शी५ ॥७।१।१७॥ (अतः[१] अङ्गात्[२] सर्वनाम्नः[३])

इति शित्त्वात्सर्वस्य जसः श्यादेशे अनुबन्धलोपे गुणे सर्वे। सर्वम् सर्वौ सर्वान्। सर्वेण, सर्वाभ्याम्, सर्वैः। सर्व+ङे इत्यत्र–

[३]सर्वनाम्नः स्मै[५] ॥७।१।१४॥ ([१]अतः [२]अङ्गात् ङेः[४])

इति ङे विभक्तेः स्मै इत्यादेशे सर्वस्मै। सर्वाभ्याम्–सर्वेभ्यः। सर्व+ङसि इत्यत्र–

[२]ङसिङ्योः [३]स्मात्स्मिनौ ॥७।१।१५॥ ([१]अतः सर्वनाम्नः)

इति 'ङसः' 'स्मात्' इत्यादेशे कृते वैकल्पिके चर्त्वे जश्त्वे च सर्वस्मात्, सर्वस्माद्, सर्वेभ्यः। सर्वस्य, सर्वयोः, सर्व+आम् इति स्थितौ–

आमि सर्वनाम्नः सुट् ॥७।१।५२॥ (आत् अङ्गात्)

इति टित्त्वादाम आदौ सुटि अनुबन्धस्य इत्संज्ञालोपे, एत्वे, षत्वे च सर्वेषाम्। सर्व+ङि इति स्थितौ ङेः स्मिन् इत्यादेशे कृते सर्वस्मिन्, सर्वयोः, सर्वेषु। हे सर्व! हे सर्वौ! हे सर्वे! एवमेव सर्वेऽपि विश्वादयः सर्वादिगणस्थाः शब्दा ज्ञेयाः। एषां यो हि विशेषसाधनप्रकारः स च यथासौविध्वं प्रदर्शयिष्यते। स्त्रीलिङ्गे तु सामान्यतो रमाशब्दवद्रूपम्, केवलं सर्वादिकार्यं विशेषः। तद्यथा **'अजाद्यतष्टाप्'** (४।१।४) इति टापि दीर्घे, **'ङ्याप्०'** (४।१।९) इति अधिकारात् स्वाद्युत्पत्तौ तल्लोपादिकार्ये सर्वा, सर्वे, सर्वाः, सर्वाम्, सर्वे, सर्वाः। सर्वया, सर्वाभ्याम्, सर्वाभिः, सर्वा+ङे इत्यत्र अनुबन्धस्येत्संज्ञालोपे–

*** सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम 'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्' (१।१।३४) 'स्वमज्ञातिधनाख्यायाम्' (१।१।३५) 'अन्तरं बहिर्योगोपसंव्यानयोः' (१।१।३६) त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम्। इति सर्वादयः पञ्चत्रिंशत् ३५।**

[2]सर्वनाम्नः [4]स्याड्ढ्रस्वश्च[6] ॥७।३।११४॥ ([1]आबन्तात् ङित[3] [5]आपः)

इति टित्त्वाद्विभक्तेरादौ स्याडागमे, आपश्च ह्रस्वे सर्वस्या+ए इति जाते वृद्धौ सर्वस्यै। सर्वाभ्याम्, सर्वाभ्यः। सर्वा+ङसि इत्यत्र स्याटि आपश्च ह्रस्वे दीर्घे सर्वस्याः, सर्वाभ्याम्, सर्वाभ्यः। षष्ठ्येकवचने ङसिवत्। सर्वस्याः। ओसि सर्वयोः, सर्वा+आम् इत्यत्र सुटि सर्वासाम्। सर्वा+ङि इति स्थितौ ङेरामि स्याटि, आपश्च ह्रस्वे दीर्घे सर्वस्याम्। सर्वयोः सर्वासु। हे सर्वे! हे सर्वे! हे सर्वाः! नपुंसकलिङ्गे तु प्रथमाद्वितीययोः ज्ञानवत्। शेषं पुंलिङ्गसर्वशब्दवद्रूपम्। त्यदादिषु तद्-शब्दस्य पुंलिङ्गे तद्+सु इति स्थिते त्यदादित्वात्–

त्यदादीनामः ॥७।२।१०२॥ (विभक्तौ)

इति अकारान्तादेशे कृते–

[2]अतो [3]गुणे ॥६।१।९७॥ ([7]संहितायाम् [5]एकम् [4]पूर्वपरयोः [6]पररूपम् [1]अपदान्तात्)

इति पररूपे त सु इति जाते–

तदोः[3] [4]सस्सा[5]वनन्त्ययोः[2] ॥७।२।१०६॥ ([1]त्यदादीनाम्)

इति तकारस्य सकारे रुत्वे विसर्गे च सः, तौ, ते। शेषं सर्वशब्दवत्। एवं त्यद्, यद् शब्दयोः स्यः, त्यौ, त्ये, यः, यौ, ये इत्यादि। एतच्छब्दे षत्वकार्यं विशेषः। एषः, एतौ, एते, इत्यादि। स्त्रीलिङ्गे अत्वे, टापि, दीर्घे, स्वाद्युत्पत्तौ सत्वे, सुलोपे सा, ते, ताः। शेषं सर्वावद्रूपम्। एवं स्या, त्ये, त्याः। या, ये, याः। एषा, एते, एताः। इत्यादि। नपुंसकलिङ्गे सोर्लुकि वैकल्पिके चर्त्वे, तत्, तद्, तद्+औ इति स्थितौ अत्वे, पररूपत्वे च औङः श्यादेशे, गुणे ते। तानि। पुनस्तद्वत्। टादौ पुंवत्। एवं, त्यद्, एतद् शब्दौ ज्ञेयौ। युष्मद् अस्मद् शब्दौ त्रिषु लिङ्गेषु समानौ† युष्मद्+सु, अस्मद्+सु इति स्थिते–

[2]ङे [3]प्रथमयोरम्[4] ॥७।१।२८॥ ([1]युष्मदस्मद्भ्याम्)

इति सोः अमि–

त्वा[3] हौ सौ[4] ॥७।२।९४॥ (युष्म[1]दस्मदोर्मपर्यन्तस्य[2])

---

† अलिङ्गे युष्मदस्मदी। इत्यभियुक्तोक्तेः।

इति मपर्यन्तस्य त्वाहादेशे। त्व अद्+अम् अह अद्+अम् इति जाते–**'अतो गुणे'** (६।१।९७) इति पररूपे त्वद्+अम्, अहद्+अम् इति स्थिते–

शेषे[1] लोपः[2] ॥७।२।९०॥*

इति टिलोपे स्वरसंयोगे त्वम्, अहम्। औ विभक्तौ – अमादेशे–

[3]युवावौ द्विव[4]चने ॥७।२।९२॥ ([1]युष्मदस्मदोर्मपर्यन्तस्य[2])

(इति यथावसरं सर्वत्र सन्निवेशः) इति युवावादेशे पररूपे–

प्रथमायाश्च[1] द्विवचने[2] भाषायाम्[4] ॥७।२।८८॥ (आत्वम्[3])

इति अन्त्यस्यात्वे दीर्घे **'अमि पूर्वः'** (६।१।१०७) इति पूर्वरूपे युवाम्, आवाम्। जस्विभक्तेरमादेशे–

यूयवयौ[3] जसि[4] ॥७।२।९३॥ ([1]युष्मदस्मदोर्मपर्यन्तस्य[2])

इति मपर्यन्तस्य यूयवयादेशे अतोगुणे, टिलोपे अन्त्यलोपे वा यूयम्, वयम्। अन्त्यलोपे **'अमि पूर्वः'** (६।१।१०७) इत्यपि ज्ञेयम् अमि–

[4]त्वमावेकवचने[2] ॥७।२।९७॥ ([1]युष्मदस्मदोर्मपर्यन्तस्य[3])

इति मपर्यन्तस्य त्वमादेशे–पररूपे–

[2]द्वितीयायां च ॥७।२।८७॥ ([1]युष्मदस्मदोः आत्[3])

इति दस्यात्वे दीर्घे **'अमि पूर्वः'** (६।१।१०७) त्वाम्, माम्। शसि तु=

[3]शसो न[4] ॥७।१।२९॥ (युष्मदस्मद्भ्यां[1] परस्य[2])

इत्यनेन **'आदेः परस्य'** (१।१।५४) इति बलाद् विभक्तेरादेर्नकारे संयोगान्तलोपे आत्वे दीर्घे च युष्मान्, अस्मान्। युष्मद्+टा अस्मद्+टा इति स्थिते, मपर्यन्तस्य त्वमादेशे पररूपे–

[2]योऽचि[3] ॥७।२।८९॥ ([1]युष्मदस्मदोः विभक्तौ[4])

इति दस्य यत्वे त्वया, मया। युवावादेशे–

[2]युष्मदस्मदोरनादेशे [1] ॥७।२।८६॥ (आ[3] हलादौ[5] विभक्तौ[6])

---

* शेषे-इत्यस्य मपर्यन्ताच्छेषः इत्याशये टिलोपपक्षः सिद्ध्यति। आत्वयत्वनिमित्तेतरविभक्तौ शेषे– इत्याशये तु **'अलोऽन्त्यस्य'** (१।१।५२) इति परिभाषयाऽन्त्यलोपपक्षः सिद्धः। अयमेव पक्षो महामुनेः पाणिनेः संमतः। **'साम आकम्'** (७।१।३३) इति ससुट्कनिर्देशाद्।

इत्यात्वे दीर्घे युवाभ्याम्। आवाभ्याम्। युष्माभिः। अस्माभिः। ङेः अमि–

[४]तुभ्यमह्यौ[३] ङयि ॥७।२।९५॥ ([१]युष्मदस्मदोर्मपर्यन्तस्य[२])

इति मपर्यन्तस्य तुभ्यमह्यादेशे पररूपे शेषलोपे तुभ्यम्, मह्यम्। युवाभ्याम्, आवाभ्याम्। भ्यसि–

[२]भ्यसोऽभ्यम्[३] ॥७।१।३०॥ ([१]युष्मदस्मद्भ्याम्)

इति विभक्तिकार्ये शेषलोपे युष्मभ्यम्, अस्मभ्यम्। ङसौ तु, मपर्यन्तस्य त्वमादेशे पररूपे–

[३]एकवचनस्य च ॥७।१।३२॥ ([४]अत् [१]युष्मदस्मद्भ्याम् पञ्चम्याः[२])

इति विभक्तेरदादेशे शेषलोपे च स्वरसंयोगे त्वत्, मत्। युवाभ्याम्, आवाभ्याम्–

पञ्चम्या[२] अत्[४] ॥७।१।३१॥ ([१]युष्मदस्मद्भ्याम् भ्यसः[३])

इति विभक्तेरदादेशे टिलोपे युष्मत्, अस्मत्।

[४]तवममौ ङसि[१] ॥७।२।९६॥ ([२]युष्मदस्मदोर्मपर्यन्तस्य[१])

इति मपर्यन्तस्य तवममादेशे–पररूपे–

[१]युष्मदस्मद्भ्यां [२]ङसोऽश्[३] ॥७।१।२७॥

इति विभक्तिकार्ये अनुबन्धलोपे टिलोपे तव-मम। ओसि युवावादेशे पररूपे **'योऽचि'** (७।२।८९) इति यत्वे युवयोः, आवयोः। आमि **'शेषे लोपः'** (७।२।९०) इति अन्त्यस्य लोपे सुटि अनुबन्धलोपे युष्म+साम् अस्म+साम् इत्यत्र।

*** साम[२] आकम्[३] ॥७।१।३३॥ (युष्मदस्मद्भ्याम्)**

इति सुट्-सहितस्यैवाम आकमादेशे दीर्घे च युष्माकम्, अस्माकम्। ङौ तु मपर्यन्तस्य त्वमादेशे यत्वे च त्वयि, मयि, युवयोः, आवयोः, युष्मासु, अस्मासु।

[७]त्वामौ [४]द्वितीयायाः ॥८।१।२३॥ (पदात्[१] अपादादौ[२] युष्मदस्मदोः[३] [५]एकवचनस्य पदस्य[६])

---

* अन्त्यलोपपक्षे संप्राप्ते भाविनः सुटो निवृत्तये ससुट्को निर्देशः।

[७]तेमयावेकवचनस्य[५] ॥८।१।२२॥ ([२]पदात् [१]अपादादौ षष्ठी[३] चतुर्थीस्थयोः [४]युष्मदस्मदोः पदस्य[६])

[४]युष्मदस्मदोः [३]षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ[६] ॥८।१।२०॥ ([१]पदात् [२]अपादादौ [५]पदस्य)

[५]बहुवचनस्य [७]वस्नसौ ॥८।१।२१॥ (पदात्[१] अपादादौ[२] युष्मदस्मदोः[४] षष्ठीचतुर्थीद्वितीयास्थयोः [३]पदस्य[६])

इत्येतेषां सूत्राणां बलेन पदात् परतः श्लोकेषु च पादादौ न स्थितयोः षष्ठीचतुर्थीद्वितीयास्थयोः युष्मदस्मदोः पदस्य द्वितीयैकवचने त्वा मा, षष्ठीचतुर्थ्येकवचने ते मे, तासां द्विवचने वां नौ, बहुवचने वस्-नसौ इत्यादेशा भवन्ति। तथा हि –

अवेत्त्वा मा गिरां देवी दद्यात्ते मे बलं शिवम्।
ज्ञानं ते मे सदा रक्षेत् पायाद्वां नौ सरस्वती॥
विद्यां वां नौ शुभां यच्छेत् तां वां नौ वर्धयेत्सदा।
साऽव्याद्वो नः सुखं वोनो दत्ताद्वोनो यशोऽवतात्॥

गिरां देवी त्वां माम् अवेत् रक्षेदित्यर्थः। तुभ्यं मह्यं शिवं बलं दद्यात्। तव मम ज्ञानं सदा रक्षेत्। सरस्वती युवाम् आवां पायात्। युवाभ्याम् आवाभ्यां शुभां विद्यां यच्छेत् दद्यात्। युवयोः आवयोः तां विद्यां सदा वर्धयेत्। सा सरस्वती युष्मान् अस्मान् अव्यात्। युष्मभ्यम् अस्मभ्यं सुखं दत्तात्। युष्माकम् अस्माकं यशः कीर्तिम् अवताद् रक्षतात्। **समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। एकतिङ् वाक्यम्।** तेन 'ओदनं पच, तव भविष्यति' इति वाक्यद्वयमध्य आदेशो न। शालीनां ते ओदनं दास्यामि इत्यत्र तु स्यादेव। **(एते वांनावादयोऽनन्वादेशे वा वक्तव्याः।)** अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति। धाता तव भक्तोऽस्ति इति वा। तस्मै ते नमः, इत्यत्र तु नित्यम्।

[४]न [१]चवाहाऽहैवयुक्ते ॥८।१।२४॥ ([२]युष्मदस्मदोः वांनावादयः[३])

इति सूत्रबलाद् देवी त्वां मां च रक्षतु, कथं त्वां मां वा न रक्षेदित्यादौ **'त्वामौ द्वितीयायाः'** (८।१।२३) इति प्राप्तः त्वामादेशो न भवति। प्रतिलिङ्गं भिन्नरूपस्य **'इदम्'** शब्दस्य पुँल्लिङ्गे इदम् सु इति स्थिते –

[1]इदमो मः[3] ॥७।२।१०८॥ ([2]अङ्गस्य सौ[4])

इति त्यदाद्यत्वं बाधित्वा मत्वविधाने –

[2]इदोऽय्[3] पुंसि[5] ॥७।२।१११॥ ([1]इदमः सौ[4])

इतीदः अयादेशे अयम् + सु इति जाते **'हल्ङ्याब्भ्यः०'** (६।१।६८) इति सुलोपे अयमिति सिद्ध्यति। इदम् + औ इत्यत्र त्यदादिकार्ये इद + औ इति जाते –

[2]दश्च ॥७।२।१०९॥ ([1]इदमो मः[3] विभक्तौ[4])

इति दस्य मत्वे वृद्धौ इमौ। इदम् जस् इति स्थिते त्यदादिकार्ये **'जसः शी'** (७।१।१७) इति श्यादेशे अनुबन्धलोपे दस्य मत्वे गुणे इमे। इमम्, इमौ, इमान्। इदम् + टा इति स्थितौ त्यदादिकार्ये इद + टा इति स्थितौ –

[4]अना[5]प्यकः ॥७।२।११२॥ ([2]इदमः इदः[3] विभक्तौ[6])

इति इदः अनादेशे विभक्तेश्च इनादेशे गुणे अनेन। इद + भ्यामित्यत्र –

[5]हलि लोपः[4] ॥७।२।११३॥ ([1]अकः [2]इदमः इदः[3] विभक्तौ[6])

इति इदो लोपे अभ्यामिति जाते –

[2]आद्यन्तवदेकस्मिन्[1] ॥१।१।२१॥

इति आद्यन्तवद्भावे **'सुपि च'** (७।३।१०२) इति दीर्घे। आभ्याम्, इद + भिस् इत्यत्र हलि इदो लोपे – अभिस् इत्यत्र

[5]नेदम[2]दसोरकोः[1] ॥७।१।११॥ ([3]भिस ऐस्[4])

इति भिस ऐस्त्वनिषेधे **'बहुवचने झल्येत्'** (७।३।१०३) इत्येत्वे एभिः। इद + ए इत्यत्र परमपि अनादेशं बाधित्वा नित्यत्वात् स्मायादेशे ततो **'हलि लोपः'** (७।२।११३) इति इदो लोपे अस्मै, आभ्याम्, एभ्यः। अस्मात्, आभ्याम्, एभ्यः। अस्य। इद + ओस् इति स्थितौ **'अनाप्यकः'** (७।२।११२) इति इदोऽनादेशे **'ओसि च'** (७।३।१०४) इत्येत्वे अयादेशे अनयोः, एषाम्। अस्मिन्, अनयोः, एषु। **'किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः'**। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेत्यर्थे –

[5]द्वितीयाटौस्स्वेनः[4] ॥२।४।३४॥ ([2]इदम [3]एतदोऽन्वादेशे[1])

इति द्वितीया टा ओस् विभक्तिषु एनादेशे एनम्, एनौ, एनान्, एनेन एनयोः। इति पञ्च रूपाणि भवन्ति। स्त्रीलिङ्गे – इदम् + सु इति स्थिते – त्यादाद्यत्वमपोह्य **'इदमो मः'** (७।२।१०८) इति मत्वे –

[४]यः सौ[५] ॥७।२।११०॥ ([१]इदमो[२] अङ्गस्य दः[३])

इति दकारस्य यकारे कृते, **हल्ङ्यादिना** सुलोपे इयम्। इदम्+औ इत्यत्र त्यदाद्यत्वे पररूपे टापि दीर्घे दस्य मत्वे इमा+औ इति जाते **'औङ आपः'** (७।१।१८) इति औङः शीभावे अनुबन्धलोपे गुणे इमे, इमाः। इमाम्, इमे, इमाः। अनया, आभ्याम्, आभिः। ङिति स्याडागमे ह्रस्वे इदो लोपे अस्यै, आभ्याम्, आभ्यः। अस्याः, आभ्याम्, आभ्यः। अस्याः, अनयोः, आसाम्। अस्याम्, अनयोः, आसु। अन्वादेशे एनाम्, एने, एनाः, एनया, एनयोः इति। नपुंसके तु सोर्लुकि इदम्। इदम्+औ इत्यत्र त्यदाद्यत्वे **'नपुंसकाच्च'** (७।१।१९) इत्यौङः शीभावे अनुबन्धलोपे **'दश्च'** (७।२।१०९) इति दस्य मत्वे गुणे इमे, इमानि, पुनस्तद्वत्। **नपुंसकेऽन्वादेशे एनद् वक्तव्यम् (वा०२।४।३४)** इत्येकवचने एनदादेशे एनत्-एनद्, एने, एनानि। एनेन, एनयोः शेषं नपुंसकसर्वशब्दवत्। प्रतिलिङ्गं भिन्नरूपस्य सर्वनाम्नः 'अदस्' शब्दस्य पुंलिङ्गे अदस्+सु इति स्थिते –

[१]अदस [२]औ [४]सुलोपश्च ॥७।२।१०७॥ (सौ[३])

इति सकारस्यौकारे सुलोपे वृद्धौ अदौ इति जाते **'तदोः सः सावनन्त्ययोः'** (७।२।१०६) इति दकारस्य सकारे असौ इति। अदस्+औ इति स्थिते त्यदाद्यत्वे पररूपत्वे **'नादिचि'** (६।१।१०४) इति निषेधेन पूर्वसवर्णदीर्घाभावे वृद्धौ अदौ इति जाते –

अदसोऽसेर्दादु दो मः ॥८।२।८०॥

इति मत्वोत्वे अमू, अदस्+जस् इति स्थिते त्यदाद्यत्वादिकार्ये अदे इति जाते –

[४]एत [५]ईद् बहुवचने[६] ॥८।२।८१॥ ([२]अदसोऽ[१]सेर्दा[३]दु[५]दोमः८)

इति मत्वे ईत्वे च अमी, त्यदाद्यत्वादि-सर्वादि-गणकृत्ये मत्वे उत्वे च अमुम्, अमू, अमून्। त्यदाद्यत्वे अद+टा इति स्थिते मत्वे उत्वे च **'आङो नास्त्रियाम्'** (७।३।१२०) इति नाभावे कर्तव्ये **'पूर्वत्रासिद्धम्'** (८।२।१) इति प्राप्ताया मुत्वासिद्धेः –

[३]न मु[२]ने' ॥८।२।३॥ ([४]असिद्धम्)

इति निषेधे अमुना, अमूभ्यां, त्यदाद्यत्वे प्राप्तस्य ऐसः **'नेदमदसोरकोः'** (७।१।११) इति निषेधे एत्वे **'एत ईद्बहुवचने'** ।(८।२।८१) इति मत्वेत्वे अमीभिः। अमुष्मै, अमूभ्याम्, अमीभ्यः। अमुष्मात्, अमूभ्याम्, अमीभ्यः। अमुष्य, अमुयोः, अमीषाम्। अमुष्मिन्, अमुयोः, अमीषु। स्त्रीलिङ्गे तु सौ त्यदाद्यत्वे पररूपत्वे टापि सवर्णदीर्घे **'अदस औ सुलोपश्च'** (७।२।१०७) इत्यौत्वे सुलोपे सत्वे च असौ, औङि त्यदाद्यत्वे टापि सवर्णदीर्घे शीभावे गुणे

11475

ऊत्वे मत्वे च अमू । अग्रे त्यदाद्यत्वे टापि सवर्णदीर्घे सर्वादिगणकृत्ये मत्वे ऊत्वे च अमूः । अमूम्, अमू, अमूः । अमुया, अमूभ्याम्, अमूभिः । अमुष्यै, अमूभ्याम्, अमूभ्यः । अमुष्याः ,अमूभ्याम्, अमूभ्यः । अमुष्याः, अमुयोः, अमूषाम् । अमुष्याम्, अमूषु । नपुंसके तु स्वमोर्लुकि अदः । औङि त्यदाद्यत्वे विभक्तिकार्ये मत्वोत्वे अमू जश्शसोः अमूनि शेषं पुंवत् । एकवचनान्त एकशब्दस्त्रिषु लिङ्गेषु सर्वशब्दवज्ज्ञेयः । एकः, एका, एकम् इत्यादि । एवं द्विवचनान्तो द्विशब्दोऽपि **'त्यदादीनामः'** (७।२।१०२) इत्यत्वे पुँलिङ्गे द्वौ स्त्रीलिङ्गे च टापि द्वे नपुंसकेऽपि द्वे । इत्यादि रूपवान् सर्वशब्दवज्ज्ञेयः । किमोऽपि त्रिलिङ्ग्यां **'किमः कः'** (७।२।१०३) **(विभक्तौ)** इति कादेशे सर्वशब्दवद्रूपाणि – कः, कौ, के । का, के, काः । किम् के, कानि । इत्यादि ।

॥ इति सर्वनामप्रकरणम् ॥

अथ संख्याप्रकरणम्

'कति त्रयश्च तिस्रश्च त्रीणि चत्वार इत्यपि।
चतस्रश्चापि चत्वारि पञ्चाष्टौ षट् च विंशतिः॥'

नित्यं बहुवचनान्तस्त्रिलिङ्ग्वामपि समानरूपः कतिशब्दः। सर्वत्रैव लिङ्गेषु कति + जस्, शस् इति स्थिते –

बहुगणवतुडति संख्या ॥१।१।२३॥

इति संख्यासंज्ञायाम् – कृतायाम्

डति[1] च ॥१।१।२५॥ ([2]संख्या [3]षट्)

इति षट् संज्ञायाम् –

[1]षड्भ्यो लुक् ॥७।१।२२॥ (जश्शसोः[2])

इति विभक्त्योर्लुकि कति, कति शेषं हरिवत्। आमि तु – **'षट्चतुर्भ्यश्च'** (७।१।५५) (आमि नुट्) इति नुड् ज्ञेयः। नित्यमेकवचनान्त एक शब्दस्तथा द्विवचनान्तो द्विशब्दश्च सर्वादावेवोक्ताविति नेह प्रपञ्च्येते। नित्यं बहुवचनान्तस्त्रिशब्दस्त्रिलिङ्गश्च। तत्र पुंसि हरिवद् गुणादिकार्य्ये त्रयः, त्रीन्, त्रिभिः, त्रिभ्यः, त्रिभ्यः, त्रि + आम् इत्यत्र –

[1]त्रेस्त्रयः[2] ॥७।१।५३॥ (आमि[3])

इति त्रयादेशे नुटि दीर्घे त्रयाणाम्, त्रिषु। हे त्रयः। स्त्रीलिङ्गे तु त्रि + जस् त्रि + शस् इति स्थिते –

[1]त्रिचतुरोः[3] स्त्रियां तिसृचतसृ[2] ॥७।२।९९॥ (विभक्तौ[4])

इति तिस्रादेशे **'ऋतो ङि०'** (७।४।११०) इति प्राप्तं गुणं बाधित्वा गुणदीर्घोत्वापवादत्वेन –

[4]अचि[3]र [2]ऋतः ॥७।२।१००॥ ([1]तिसृचतसृ [5]विभक्तौ)।

इति ऋकारस्य रकारे कृते स्वरसंयोगे विसर्गे च तिस्रः। तिसृभिः। तिसृभ्यः। तिसृ + आम् इति स्थिते **'नृमचिर०'** (वा०) इति नुटि तिसृ + नामिति जाते प्राप्तस्य दीर्घस्य –

[3]न तिसृचतसृ[1] ॥६।४।४॥ ([2]आमि [4]दीर्घः)

इति निषेधे (**ऋवर्णान्नस्य णत्वं वाच्यम्**) इति णत्वे तिसृणाम् । तिसृषु । हे तिस्रः । नपुंसके जसि शसि वारिवत् कार्य्ये । त्रीणि । त्रीणि शेषं पुवंत् । चतुरशब्दो नित्यं बहुवचनान्तस्त्रिलिङ्गः । चतुर् + जस् इत्यत्र **'चतुरनडुहोरामुदात्तः'** (७।१।९८) इत्यामि कृते यणि चत्वारः । अन्यत्र चतुरः । चतुर्भिः । चतुर्भ्यः । चतुर् + आमित्यत्र –

षट्चतुर्भ्यश्च ॥७।१।५५॥ (आमि नुट्)

इति नुटि – अनुबन्धलोपे णत्वे चतुर्णाम् – इति जाते –

[1]अचो [2]रहाभ्यां द्वे[5] ॥८।४।४६॥ ([3]यरो [4]वा)

इति द्वित्वे चतुर्ण्णाम् ।

[2]रोः [1]सुपि ॥८।३।१६॥ ([3]एव[4] विसर्गः)

इति नियमाद् विसर्गाभावे चतुर्षु । हे चत्वार इति । स्त्रीलिङ्गे[5] तु पूर्वसूत्रैः स्त्रीलिङ्गत्रिशब्दवदेव साधनप्रकारः । चतस्रः, चतस्रः । चतसृभिः । चतसृभ्यः, चतसृभ्यः । चतसृणाम् । चतसृषु । हे चतस्रः । नपुंसके तु चतुर् + जस् **चतुर्** + शस् इति स्थिते **'जश्शसोः शिः'** (७।१।२०) इति तयोः शौ कृते तस्य सर्वनामस्थानत्वात् आमागमे च चत्वारि, चत्वारि शेषं पुंवद्रूपम् । त्रिलिङ्ग्यां समानरूपो नित्यं बहुवचनान्तो नकारान्तः पञ्चन् शब्दः–

*** [1] ष्णान्ता [3]षट् ॥१।१।२४॥ ([2]संख्या)**

इति षट् संज्ञायाम् **'षड्भ्यो लुक्'** (७।१।२२) इति जश्शसोर्लुकि नलोपे - पञ्च, पञ्च। पञ्चन् + भिस् इत्यत्र **'स्वादिष्वसर्वनामस्थाने'** (१।४।१७) इति पदसंज्ञायां **'नलोपः प्रातिपदिकान्तस्य'** (८।२।७) इति नलोपे पञ्चभिः । पञ्चभ्यः, पञ्चभ्यः । पञ्चन् + आम् इत्यत्र **'षट् चतुर्भ्यश्च'** (७।१।५५) इति नुटि पञ्चन् + नाम् इति जाते –

[1]नोपधायाः ॥६।४।७॥ ([2]दीर्घः [3]नामि)

इति उपधादीर्घे नलोपे पञ्चानाम् । पञ्चसु । हे पञ्च इति । एवं स्त्रीनपुंसकयोरपि । त्रिलिङ्ग्यां समानरूपो नित्यं बहुवचनान्तः षष् शब्दः तस्माद् जश्शसोर्लुकि जश्त्वे वैकल्पिके चर्त्वे च । षट्-षड् जश्त्वे षड्भिः । षड्भ्यः, षड्भ्यः । नुटि सन्धिकार्य्ये षण्णाम् । षट् + सु इति जाते **'ष्टुना ष्टुः'** (८।४।४१) इति प्राप्तस्य षत्वस्य – **'न पदान्ताट्टोरनाम्'** (८।४।४२) इति निषेधे षट्सु । हे षट् इत्यादि । स्त्रीनपुंसकयोरप्येवं रूपाणि । एवं सप्तादयोऽष्टादशान्ताः

*** ष् च नश्च ष्णौ । इति द्वन्द्वः । ततः ष्णौ अन्ते यस्याः सा ष्णान्ता इति बहुव्रीहिः । सन्धिनाऽत्र णकारः ।**

त्रिष्वपि लिङ्गेषु सर्वेऽपि समानरूपाः पञ्चवत् ज्ञेयाः। अष्टन् शब्दे विशेषः – अष्टन् शब्दाज्जसि शसि च –

[1]अष्टन [2]आ [4]विभक्तौ ॥७।२।८४॥ (हलि[3])

इत्यनेन हल्निमित्ताभावादात्वे अप्राप्तेऽपि **'अष्टाभ्य औश्'** (७।१।२१) इत्यत्र अष्टाभ्य इति कृतात्वनिर्देशेन जश्शसोरात्वस्य ज्ञापितत्वात् आत्वे दीर्घे च कृते अष्टा + जस् अष्टा + शस् इति जाते –

*** अष्टाभ्य औश् ॥७।१।२१॥ (जश्शसोः)**

इति औशि कर्तव्ये शित्त्वात् सर्वयोः जश्शसोः औशादेशे अनुबन्धलोपे वृद्धौ अष्टौ अष्टौ। हलादौ आत्वे दीर्घे अष्टाभिः, अष्टाभ्यः, अष्टानाम्, अष्टासु। वैकल्पिकञ्चेदमष्टन आत्वम्। **'अष्टनो दीर्घात्'** (६।१।१७२) इति सूत्रे दीर्घग्रहणाज्ज्ञापकात्। ततश्च आत्वाभावे अष्टन् + जस् अष्टन् + शस् इत्यत्र **'षड्भ्यो लुक्'** (७।१।२२) इति जश्शसोर्लुकि अष्ट, अष्ट, अष्टभिः, अष्टभ्यः। इति रूपाणि भवन्ति।

ऊनविंशत्यादयो नवनवत्यन्ताः सर्वेऽपि शब्दाः स्त्रीलिङ्गा एकवचनान्ताः। विंशतिः ब्राह्मणाः। त्रिंशत्। चत्वारिंशत्। पञ्चाशत्। षष्टिः। सप्ततिः। अशीतिः। नवतिः। तत्र तकारान्ताः शरद्वत्, इकारान्ता मतिवत्। संख्येयार्थे एकवचनान्तः शतहसस्रादिशब्दो नपुंसकलिङ्गो ज्ञानशब्दवज्ज्ञेयः, शतं छात्रा इत्यादि।

संख्यार्थे तु एकवचननियमो नास्ति, यथा ब्रह्माणानां विंशतिः, ब्राह्मणानां द्वे विंशती, ब्राह्मणानां तिस्रो विंशतयः। एवं ब्राह्मणानां द्वे शते, ब्राह्मणानां त्रीणि शतानि। तथा हि –

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः।
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेःस्त्रियः॥

॥ इति संख्याप्रकरणम् ॥

●

---

* कृताकारादष्टनः जश्शसोः औश् इत्यर्थः।

अथाव्ययप्रकरणम्

स्वर्शब्दात्– **'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'** (१।२।४५) इति प्रातिपदिकत्वात् स्वादि- विभक्तौ –

स्वरादिनिपातमव्ययम् ॥१।१।३७॥

इत्यव्यय-संज्ञायाम्–

[1]अव्ययादाप्सुपः[2] ॥२।४।८२॥ ([3]लुक्)

इति सुपो लुकि विसर्गे स्वः। एवं स्वरादीनां निपातानाञ्च सर्वेषामप्यव्ययानां सर्वत्र विभक्तौ समानमेव रूपम्। तथा हि प्राचीनोक्तिः–

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥१॥

कियन्ति तानि निर्दिश्यन्ते – स्वर् अन्तर् प्रातर् पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋते युगपत् आरात् पृथक् श्वस् ह्यस् दिवा नक्तं सायं चिरं मनाक् ईषत् तूष्णीम् बहिस् अधस् समया निकषा स्वयम् ननु अद्धा सामि वत्– (विधुवत् हरिवत् इत्यादि) सना तिरस् अन्तरा अन्तरेण सहसा विना नाना स्वस्ति स्वाहा स्वधा अलम् वषट् श्रौषट् वौषट् अस्ति उपांशु वृथा मृषा मिथ्या मुधा पुरा मिथस् प्रायस् मुहुस् अभीक्ष्णम् साकम् सार्धम् नमस् धिक् हिरुक् अथ आम् माङ् काम्म् साम्प्रतम् साक्षात् सत्यम् मंक्षु संवत् अवश्यम् सपदि आविस् अनिशम् नित्यम् सदा अजस्रम् ओम् भूर् भुवर् झटिति झगिति शीघ्रम् अञ्जसा सु कु स्थाने वरं सुदि वदि आहोस्वित् दिष्ट्या इव अद्यत्वे इति – (स्वरादिराकृतिगणः) अथ निपातानाह –

प्राग्रीश्वरा निपाताः ॥१।४।५६॥ (इत्यधिकारे)
चादयोऽसत्वे ॥१।४।५७॥ (निपाताः)

इति चादीनां निपातसंज्ञायां **'स्वरादिनिपातमव्ययम्'** (१।१।३७) इत्यव्ययत्वाद् **'अव्ययादाप् सुपः'** (२।४।८२) इति सुपो लुकि च वा अह एव एवं नूनम् शश्वत् भूयस् चेत् क्वचित् किञ्चित् यावद् तावत् रे आहो उताहो अहो नो अथो तु नु इति बत सत्यम् नहि जातु कथम् अव अनु हा कम् खम् पशु सह अङ्ग अये अरे खलु किल सुष्ठु स्म आः हे भो है यथा यत् इति (चातिरप्याकृतिगणः) [1]**उपसर्गविभक्तिस्वरप्रतिरूपकाश्च** अवदत्तम्

---

(१) **प्रतिरूपकशब्दस्य प्रत्येकं योगः तथा च उपसर्गप्रतिरूपकमवदत्तमित्यादि। विभक्तिश्च सुप्तिङुभयरूपा तत्र 'सुबन्तप्रतिरूपकम् अहम्, वाम् अहंपुरित्यादि। तिङन्तप्रतिरूपकम्– अस्तिभवतीत्यादि। स्वरप्रतिरूपकम्– अ, आ, इत्यादि।**

अहंयुः अस्तिक्षीरा अ आ इ ई उ ऊ ए ऐ ओ औ अं अः। एवमन्येऽपि। पारिभाषिका अव्ययाः। यथा –

*** तद्धितश्चासर्वविभक्तिः ॥१।१।३८॥ (अव्ययम्)**

तदा सर्वदा (तसिलादयः प्राक् पाशपः शस्प्रभृतयः प्राक् समासान्तेभ्यः)। अम् आम्। कृत्वोऽर्थाः। तसिवती नानाञौ –

[२]कृन्मेजन्तः[१] ॥१।१।३९॥ ([३]अव्ययम्)

स्मारम्, स्मारम्। जीवसे।

क्त्वा – तोसुन्-कसुनः ॥१।१।४०॥ (अव्ययम्)

कृत्वा, उदेतोः, विसृपः।

† अव्ययीभावश्च ॥१।१।४१॥ (अव्ययम्)

अधिहरि –

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा॥ १ ॥

प्रादयः ॥१।४।५८॥ (निपाता असत्वे)

इति सूत्रेण प्रादयोऽपि निपाता भवन्ति। तथा हि –

प्रपरापसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्य्यपयः।
उप आङिति विंशतिरेष सखे ! उपसर्गगणः कथितः कविना।

एते प्रादयः क्रियायोगे उपसर्गसंज्ञां गतिसंज्ञां च लभन्ते।

[३]उपसर्गाः [२]क्रियायोगे ॥१।४।५९॥ ([१]प्रादयः)

[३]गतिश्च ॥१।४।६०॥ ([२]क्रियायोगे [१]प्रादयः) –

॥ इत्यव्ययप्रकरणम् ॥

---

* न विद्यते सर्वा विभक्तिः यस्मात् सः असर्वविभक्तिः तद्धितः। इति बहुव्रीहिः समासः। तत्र सर्वेति वचनत्रयात्मिकेत्यर्थः।

† 'कृते बहुव्रीहौ सर्वेऽप्यव्यया अप्यनव्ययाः' यथा – कृतम् तूष्णीम् येन सः कृततूष्णीम्। तस्य कृततूष्णीमः। इति।

अथ स्त्रीप्रत्ययाः

स्त्रियाम् ॥४।१।३॥ (अधिकारः समर्थनाम् प्रथमाद्वा ॥४।१।८२॥ इति यावत्)

अजशब्दात् स्त्रीत्वविवक्षायाम् –

अजाद्यतष्टाप् ॥४।१।४॥ (स्त्रियाम्)

इति टापि अनुबन्धलोपे दीर्घे **'ङ्याप्प्रातिपदिकात्'** (४।१।१) **इत्यधिकृत्य** स्वाद्युत्पत्तौ अजा। एवम्-एडका कोकिला इत्यादि। अदन्तेषु खट्वेत्यादि। अजादिशब्दानामदन्तत्वेऽपि **'वयसि प्रथमे'** (४।१।२०) **'जातेरस्त्रीविषयादयोपधात्'** (४।१।६३) इत्यादिना वक्ष्यमाणस्य ङीपो ङीषश्च बाधनार्थमजादिषु पाठः। गन्तृप्रभृतिऋकारान्तात् दण्डिन्प्रभृतिनकारान्ताच्च – स्त्रीत्वविवक्षायाम् –

ऋन्नेभ्यो ङीप् ॥४।१।५॥ (स्त्रियाम्)

इति ङीपि अनुबन्धलोपे सन्धिकार्ये ङ्यन्तत्वात् सौ तल्लोपे सति गन्त्री कर्त्री दात्री धात्री इत्यादि दण्डिनी स्वामिनी मन्त्रिणी गुणिनी मालिनी राज्ञीत्यादि सिद्ध्यति। ऋदन्तेषु स्वस्रादिभ्यः नान्तेषु षट्संज्ञकेभ्यश्च ङीपः प्राप्तौ सत्याम् –

[४]न [१]षट्स्वस्रादिभ्यः ॥४।१।१०॥ ([२]स्त्रियाम् ङीप्टापौ[३])

इति निषेधे यथावत् स्थितिः। स्वसा पञ्च सप्त इत्यादि।

''स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।
याता मातेति सप्तैते स्वस्रादय उदाहृताः॥''

उगितश्च ॥४।१।६॥ (ङीप् स्त्रियाम्)

इति शपूश्यन्विकरणवतः शत्रन्तात् ङीपि अनुबन्धलोपे।

[१]शपूश्यनोर्नित्यम्[३] ॥७।१।८१॥ ([५]शीनद्योर्नुम्[४] शतुः[२])

इति नुमि भवन्ती पचन्ती पश्यन्ती दीव्यन्तीत्यादि। **अभ्यस्तात्** दती जक्षती बिभ्रतीत्यादि। तुदत्प्रभृतिभ्यस्तु –

[१]आच्छीनद्योर्नुम्[३] ॥७।१।८०॥ (शतुः[२] वा)

इति वैकल्पिके नुमि तुदन्ती तुदती भान्ती भातीत्यादि। तथान्येऽपि रुन्धती तन्वती सुन्वतीत्यादि शत्रन्ताः। विदुषी श्रीमती श्रेयसीत्यादि। तद्भिन्नोगिदन्ताश्च शब्दाः स्त्रीलिङ्गे ङीबन्ता ज्ञेयाः। पाचकादिभ्यः स्त्रीत्वविवक्षायां टापि –

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥७।३।४४॥

इति कात्पूर्वस्याकारस्य इत्वे पाचिका, कारिका, सर्विकेत्यादिः। टिदादिनदादि-शब्देभ्यः स्त्रीत्वविवक्षायाम् –

अनुपसर्जनात् ॥४।१।१४॥ (अधिकारोऽयम् यूनस्तिरिति यावत्)

[1]टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥४।१।१५॥ ([2]स्त्रियां ङीप्[3])

इति ङीपि नदी वैनतेयी सौपर्णेयी ऐन्द्री, औत्सी, उरुद्वयसी, उरुमात्री, पञ्चतयी, आक्षिकी, लावणिकी, यादृशी, इत्वरी, जित्वरी, नश्वरी, सृत्वरी, गत्वरी इत्यादि। त्रायाणां लोकानां समाहारः त्रिलोकी इति विग्रहे द्विगुसमासे त्रिलोकशब्दात् –

द्विगोः॥४।१।२१॥ (स्त्रियां ङीप्)

इति ङीपि **'यस्येति च'** (६।४।१४८) इत्यकारलोपे त्रिलोकी, एवं त्रिलिङ्गी-इत्यादि। कुमारशब्दात् स्त्रीत्वविवक्षायां टापि प्राप्ते –

वयसि प्रथमे ॥४।१।२०॥ (ङीप्) *

इति ङीपि **'यस्येति च'** (६।४।१४८) इत्यकारलोपे कुमारीति **'अन्यतो ङीष्'** (४।१।४०) इत्यनुवर्तमाने – षिद्भ्यो गौरादिभ्यश्च स्त्रीत्वविवक्षायाम् –

षिद्गौरादिभ्यश्च ॥४।१।४१॥ (स्त्रियां ङीष्)

इति ङीषि अनुबन्धलोपे नर्तकी, गौरीत्यादि। मृदुशब्दात् –

[4]वो[2]तो [1]गुणवचनात् ॥४।१।४४॥ ([3]स्त्रियां [5]ङीष्)

---

* **कन्यायाः कनीन च (४।१।११६) इति निर्देशान्न ङीप् कन्या।**

इति पाक्षिके ङीषि मृद्वी, मृदुः। बहुशब्दात्–

[1]बह्वादिभ्यश्च [2]॥४।१।४५॥ ([3]स्त्रियां [4]ङीष् [5]वा)

इति वैकल्पिके ङीषि वह्वी, बहुः इत्यादि। गोपस्य स्त्रीत्यर्थे गोपशब्दात्–

पुंयोगादाख्यायाम् ॥४।१।४८॥ (ङीष् स्त्रियाम्)

इति ङीषि गोपीत्यादि। इन्द्रस्य स्त्री इत्यर्थे –

[1]इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणा-मानुक्[3] ॥४।१।४६॥ ([2]स्त्रियां [4]ङीष्)

इति ङीषि आनुगागमे च इन्द्राणी। एवम् वरुणानी रुद्राणी मृडानीं (**हिमारण्य-योर्महत्त्वे**) महद्धिमं हिमानी, महारण्यम् अरण्यानी। (**यवाद् दोषे**) दुष्टो यवो यवानी (**यवनाल्लिप्याम्**) यवनानां लिपिर्यवनानी (**मातुलोपाध्याययोरानुग्वा**) मातुलानी मातुली उपाध्यायानी उपाध्यायी (**या तु स्वयमेवाध्यापिका तत्र वा ङीषूवाच्यः**) उपाध्यायी उपाध्याया। (**आचार्य्यादणत्वं च**) आचार्य्यस्य स्त्री आचार्य्यानी। या तु स्वयमेव वेदमंत्रव्याख्यात्री सा आचार्य्या। चन्द्रवत् मुखं यस्या इति बहुव्रीहिसमासे चन्द्रमुखशब्दात्–

स्वा[1]ङ्गाच्चो[2] पसर्जनादसंयोगोपधात्[1] ॥४।१।५४॥ ([4]स्त्रियां ङीष् [5]वा)

इति वैकल्पिके ङीषि चन्द्रमुखी, चन्द्रमुखा, सुकेशी, सुकेशा इत्यादि।

[2]न [1]क्रोडादिबह्वचश्च ॥४।१।५६॥ ([3]ङीष् [4]स्त्रियाम्)

कल्याणक्रोडा। कुक्कुटत्वजातिविशिष्टा स्त्री कुक्कुटी इति विग्रहे कुक्कुटशब्दात्–

[1]जातेरस्त्रीवि[2]षयादयोप[1]धात् ॥४।१।६३॥ ([4]ङीष्)

इति ङीषि अल्लोपे स्वरयोगे ड्यन्तात् सुपि कुक्कुटी। **आकृतिग्रहणा जातिः**– शूकरी गर्दभी। **लिङ्गानाञ्च न सर्वभाक्, सकृदाख्यातनिर्ग्राह्या** वृषली। **गोत्रं च चरणैः सह**। – औपगवी कण्ठी बह्वृची। दक्षस्यापत्यं स्त्री इति विग्रहे – दक्षशब्दात् **'अत इञ्'** (४।१।९५) इति इञि अलोपे इकारान्तात् दाक्षिशब्दात्–

[1]इतो मनुष्य[2] जातेः ॥४।१।६५॥ ([3]ङीष् स्त्रियाम्[4])

इति ङीषि दाक्षी, एवं दाशरथी, वैयासकीत्यादि। कुरुत्वजातिविशिष्टा स्त्री **कुरूः** इति विग्रहे कुरुशब्दात् –

[२]ऊङु [१]तः ॥४।१।६६॥ (स्त्रियाम्[३])

इत्यूङि दीर्घे लिङ्गविशिष्टपरिभाषया सौ रुत्वे विसर्गे कुरूः। वधूशब्दवद्रूपम्। एवं वामे ऊरू यस्याः सा इति विग्रहे बहुव्रीहौ वामोरुशब्दात् –

संहित - शफ - लक्षण - वामादेश्च ॥४।१।७०॥ (ऊङ्)

इत्यूङि दीर्घे सुपि वामोरूः।

ऊरूत्तरपदादौपम्ये ॥४।१।६९॥ (ऊङ् स्त्रियाम्)

करभोरूः, रम्भोरूः। इत्यादि –

तद्धिताः ॥४।१।७६॥ (इत्यापञ्चमाध्यायमधिकारः)

युवन् शब्दात् स्त्रीत्वविवक्षायाम् –

यूनस्तिः ॥४।१।७७॥ (स्त्रियाम्)

इति तिप्रत्यये नलोपे 'युवति' शब्दात् लिङ्गविशिष्टपरिभाषया तद्धितान्तत्वाद्वा प्रातिपदिकत्वात् सुपि युवतिः, युवती, युवतय इत्यादि रुचिवद्रूपम्।

॥ इति स्त्रीप्रत्ययप्रकरणम् ॥

अथ कारकप्रकरणम्

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥२।३।४६॥

प्रातिपदिकार्थमात्रे प्रथमा, यथा – रामः, ज्ञानम्, उच्चैः। लिङ्गमात्राधिक्ये तटः, तटी, तटम्। परिमाणमात्रे द्रोणो व्रीहिः। वचनमात्रे एकः। द्वौ। त्रयः।

* सम्बोधने च ॥२।३।४७॥ (प्रथमा स्यात्)

हे देव!

कारके ॥१।४।२३॥ (तत्प्रयोजको हेतुश्च ॥१।४।५५॥ इति यावदधिकृत्य)

स्वतन्त्रः कर्ता ॥१।४।५४॥ (क्रियायाम्)

अभिहिते इति वक्तव्यमिति भाष्यवार्तिकबलात् कर्तृवाच्ये प्रयोगे उक्ते कर्तरि प्रथमा यथा – कृष्णः पठति।

कर्तुरीप्सिततमं कर्म ॥१।४।४९॥ (कारके)

इति कर्मसंज्ञायाम्–

कर्मणि द्वितीया ॥२।३।२॥ (अनभिहिते॥ २।३।१॥)

इति द्वितीया – कृष्णः पुस्तकं पठति।

[२]अकथितञ्च ॥१।४।५१॥ ([१]अपादानादिभिः [३]कारकं कर्म[४])

एतदेवाप्रधानं कर्मोच्यते।

दुहिर्मुषिः पृच्छति-याचिशास्तयो रुधिब्रुवी दण्डतिमथ्नती पचिः।
वदिर्जिर्यिर्भिक्षिचिञौ च वृङ्वृञौ, कृषिर्बहिर्हृञ् नयती तु धातवः।
द्विकर्मकास्सन्ति तदर्थकास्तथा विकल्पतस्स्युस्सकला विभक्तयः।
अमुख्यगौणाऽकथितादिनामतः सदैव कर्मान्यदमीषु युज्यते॥
(केशरी)

उपर्युक्तानां दुहादीनामूनविंशत्याः तत्समानार्थकानाञ्चान्येषां धातूनां प्रधानकर्मणा सार्धमन्यत् कर्म प्रयुज्यते, तदेवाकथितं गौणममुख्यं वा कर्मोच्यते। यथा गोपो गां दोग्धि

---

* आभिमुख्यकरणं सम्बोधनम्।

पयः। वामनो बलिम् याचते वसुधाम्। न्यायाधीशोऽपराधिनं दण्डयति शतम्। भक्तो देवं वृणुते वरम्। सूदस्तण्डुलान् पचति ओदनम्। कृष्णो व्रजमवरुणद्धि गाम्। पान्थो माणवकं पृच्छति पन्थानम्। स देवदत्तं मुष्णाति शतम्। कृष्णः व्रजं कर्षति वहति हरति नयति वा गाः। हरिः सुधां मथ्नाति क्षीरनिधिम्। मालाकारो वृक्षान् अवचिनोति पुष्पाणि। गुरुः शिष्यं ब्रूते शास्ति वदति वा धर्मम्। नेतारः स्वतंत्रतां जयन्ति जनहृदयम्। एवम् बलिं भिक्षते वसुधाम्। आचार्यः शिष्यान् ब्रूतेऽभिधत्ते वक्ति वा धर्मम्, इत्यादि।

साधकतमं करणम् ॥१।४।४२॥ (क्रियायाम्)

इति करणसंज्ञायाम् –

कर्तृकरणयोस्तृतीया ॥२।३।१८॥ (अनभिहिते)

इति तृतीया। भारतीयैरसहयोगेन स्वराज्यमुपलब्धम्। भारतीयैरित्यत्र तु **'स्वतन्त्रः कर्ता'** (१।४।५४) इति कर्तृसंज्ञावगन्तव्या।

सहयुक्तेऽप्रधाने ॥२।३।१९॥ (तृतीया)

गुहेन सहितो रामो लक्ष्मणेन च सीतया।

येनाङ्गविकारः ॥२।३।२०॥ (ततस्तृतीया)

अक्ष्णा काणः।

कर्मणा यमभिप्रैति स सम्प्रदानम् ॥१।४।३२॥ (कारकम्)

इति विप्रस्य सम्प्रदानसंज्ञायाम् –

चतुर्थी सम्प्रदाने ॥२।३।१३॥ (अनभिहिते)

इति चतुर्थी। विप्राय गां ददाति।

रुच्यर्थानां प्रीयमाणः ॥१।४।३३॥ (कारकं सम्प्रदानम्)

इति सम्प्रदानसंज्ञायाम्। रोचते सत्याग्रहिणे कारागारम्। चतुर्थी।

धारेरुत्तमर्णः ॥१।४।३५॥ (कारकं सम्प्रदानम्)

इति सम्प्रदानसंज्ञायाम्। महाजनाय रुप्यकशतं धारयति कृषकः।

स्पृहेरीप्सितः ॥१।४।३६॥ (कारकं सम्प्रदानम्)

इति सम्प्रदानसंज्ञायाम् –

गतास्ते दिवसा राजन्! मुक्तानां जन्म शुक्तिषु।
उदुम्बरफलायापि स्पृहयामोऽधुना वयम्॥

क्रुद्धद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः॥१।४।३७॥ (कारकं सम्प्रदानम्)

इति सम्प्रदानसंज्ञायाम् सर्वत्र चतुर्थी। भारतद्रव्यलुण्ठकेभ्यो वैदेशिकेभ्यो नेतारः कुप्यन्ति, द्रुह्यन्ति, ईर्ष्यन्ति, असूयन्ति चेत्यत्रापि।

नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च॥२।३।१६॥(चतुर्थी)

भारतमात्रे नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमास्थास्वास्थ्ये विद्यायै।

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु॥२।३।१७॥ (चतुर्थी पक्षे द्वितीया च।)

सत्याग्रही कारागारं तृणाय मन्यते, तृणं वा।

ध्रुवमपायेऽपादानम्॥१।४।२४॥ (कारकम्)

अपादाने पञ्चमी॥२।३।२८॥ (अनभिहिते)

कारागारादायाति। प्रासादादवतरति। धावतोऽश्वात् पतति।

भीत्रार्थानां भयहेतुः॥१।४।२५॥ (कारकम् अपादानम्)

इत्यपादानसंज्ञायां पञ्चमी। मिथ्याचाराद् बिभेति। दम्भाद् उद्विजते। देशद्रोहिभ्यो भारतं त्रायस्व। गोरण्डशासनाद् भारतं रक्ष।

वारणार्थानामीप्सितः॥१।४।२७॥ (कारकम् अपादानम्)

इत्यपादानसंज्ञायाम् पञ्चमी।कृषकेभ्यःशोषकवर्गान् वारयति राष्ट्रियमहासभाशासनम्।

जनिकर्तुः प्रकृतिः॥१।४।३०॥ (कारकम् अपादानम्)

इत्यपादानसंज्ञायाम् पञ्चमी। ब्रह्मणः प्रजाः प्रजायन्ते।

षष्ठी शेषे॥२।३।५०॥

गुरोः कुलम्। वाल्मीकेः रामायणम्। कर्मादिष्वपि सम्बन्धविवक्षायां षष्ठी, यथा, सतां गतम्।

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानां न बुधा ज्ञानकर्मणोः॥
कर्तृ-कर्मणोः कृति ॥२।३।६५॥ (अनभिहितयोः षष्ठी)

व्यासस्य कृतिः महाभारतम्। रामायणस्य कर्ता वाल्मीकिः। **(निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्)** किं निमित्तम् केन, कस्मै, कस्मात्, कस्य, कस्मिन्, वा निमित्ते आगमनम् भगवतः श्रीकृष्णस्य धृतराष्ट्रान्तिके। एवम् को हेतुः किं कारणम् किं प्रयोजनं केन कारणेनेत्यादिकं ज्ञेयम्।

आधारोऽधिकरणम् ॥१।४।४५॥ (कारकम्)

इत्यधिकरणसंज्ञायाम् –

*** सप्तम्यधिकरणे च ॥२।३।३६॥**
(अनभिहिते चाद् दूरान्तिकार्थेभ्यः)

कटे ह्यास्ते कुमारोऽसौ वटे गावः सुशेरते।
तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम्॥

दूरेऽन्तिके वास्ति बदरीनाथमन्दिरात् हिमालयः।

॥ इति कारकप्रकरणं समाप्तम्॥

●

---

* **औपश्लेषिकम् सामीप्यम् अभिव्यापकम् वैषयिकम्। इति चतुर्धाऽधिकरणम्।**

अथ समासः

ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वमिति समासप्रयोजनम्। तत्र पूर्वपद-प्रधानोऽव्ययीभाव उत्तरपदप्रधानस्तत्पुरुषोऽन्यपदप्रधानो बहुव्रीहिरुभयपदप्रधानो द्वन्द्व इति निष्कर्षः।

तत्राव्ययीभावः

प्राक्कडारात्समासः ॥२।१।३॥

इति समासाधिकारे।

समर्थः पदविधिः ॥२।१।१॥

इति नियमेन समर्थाश्रित एव समासो भवति, पदविधित्वात्, तत्र प्रधानतया विभक्तिप्रभृत्यर्थेष्वव्ययीभावः समासो जायते। यथा च 'अधिहरि' इत्यत्र हरौ इति लौकिके अस्व-पद-विग्रहे हरि+ङि अधि+सु इत्यलौकिके स्वपदविग्रहे –

अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासम्प्रतिशब्द-प्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ॥२।१।६॥ (सह सुपा सुप् समस्यते)

इत्यनेन सप्तमीविभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य हरिशब्देन सह समासे **'कृत्तद्धितसमासाश्च'** (१।२।४६) इति समासत्वात्प्रातिपदिकसंज्ञायाम् –

सुपो धातुप्रातिपदिकयोः ॥२।४।७१॥ (लुक्)

इति सुपो लुकि ततश्च –

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥१।२।४३॥

इत्यनेन समाससूत्रे **'अव्ययं विभक्ति०'** (२।१।६) इत्यादौ 'अव्ययम्' इति प्रथमानिर्दिष्टस्य 'अधि' इत्यस्य अव्ययस्य उपसर्जनसंज्ञायाम् –

उपसर्जनम् पूर्वम् ॥२।२।३०॥

इति तस्य पूर्वनिपाते अधिहरि इत्यस्मात् स्वाद्युत्पत्तौ **'अव्ययीभावश्च'** (१।१।४१) इत्यव्ययत्वात् **'अव्यादाप्सुपः'** (२।४।८२) इति सुपो लुकि।

'अधिहरि' इत्येवम् सार्वविभक्तिकं रूपम्। समीपार्थे-गुरोः समीपे=उपगुरु इति अस्वपदलौकिकविग्रहे गुरु + ङस् उप + सु इत्यलौकिकस्वपदविग्रहे **'अव्ययं विभक्ति०'**

(२।१।६) इत्यादिना समासे उपसर्जनसंज्ञायाम् पूर्वनिपाते सुपो लुकि उपगुरु इत्यादि। एवं सर्वेऽपि इकारान्तोकारान्ता अव्ययीभावसमासगाः शब्दा ज्ञेयाः। कृष्णस्य समीपम् = उपकृष्णम् इति लौकिके अस्वपद-विग्रहे कृष्ण + ङस् उप + सु इत्यलौकिके स्वपदविग्रहे समीपार्थे उपेत्यव्ययस्य कृष्णेन सह समासे ततः समासकृत्ये च कृते उपकृष्ण इत्यस्य प्रातिपदिकत्वात्सौ विभक्तौ समागतायाम् उपकृष्ण + सु इत्यवस्थायाम् अव्ययत्वात् सुपो लुकि प्राप्ते –

[5]नाव्य[2]यीभावा [1]दतो[7]ऽम्त्वपञ्च [6]म्याः ॥२।४।८३॥ (सुपो[3] लु[4]क्)

इति सोः अमादेशे अमि पूर्वरूपे 'उपकृष्णम्'। तृतीयासप्तम्योस्तु –

तृतीयास[3]सप्तम्योर्बहु[4]लम् ॥२।४।८४॥ (अव्य[3]यीभावात् अतो[1]ऽम्[5])

इति बाहुलके अमि उपकृष्णम्। पक्षे क्रमेण उपकृष्णेन उपकृष्णे इति। पञ्चम्यास्तु नित्यं विभक्तिकार्य्ये उपकृष्णात् (द्) इति ज्ञानशब्दवद्रूपम् द्विवचनबहुवचने तु न स्तः समीपार्थप्राधान्येन एकत्वार्थस्यौत्सर्गिकत्वात्। मक्षिकाणामभावो निर्मक्षिकम् इति लौकिके अस्वपद-विग्रहे मक्षिका + आम् निर् + सु इत्यलौकिके स्वपदविग्रहे समासादिकार्ये निर्मक्षिका इत्यत्र –

अव्ययीभावश्च ॥२।४।१८॥ (नपुंसकम्)

इति नपुंसकसंज्ञायाम् –

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥१।२।४७॥

इति मक्षिकाकारस्य ह्रस्वे निर्मक्षिकशब्दस्य प्रातिपदिकत्वात्सौ अमादेशे निर्मक्षिकम् इत्यादि उपकृष्णवद्रूपाणि। विष्णोः पश्चात् अनुविष्णु इति लौकिकास्वपदविग्रहे विष्णु + ङस् अनु + सु इत्यलौकिकस्वपदविग्रहे पश्चादर्थे अनु इत्यव्ययस्य विष्णुशब्देन समासे समासादिकार्ये अनुविष्णु इति सार्वविभक्तिकं रूपम्। **(योग्यतावीप्सापदार्थानतिवृत्ति-सादृश्यानि यथार्थाः)** तत्र योग्यतार्थे रूपस्य योग्यम् = अनुरूपम्। पदार्थानतिवृत्तिरूपेऽर्थे शक्तिमनतिक्रमस्य = यथाशक्ति। वीप्सार्थे गृहं गृहं प्रति = प्रतिगृहम्। इत्यादि। शरदः समीपम् उपशरदम् इति लौकिकेऽस्वपदविग्रहे शरद् + ङस् उप + सु इत्यलौकिके स्वपदविग्रहे समासादिकार्ये उपशरद् इति जाते –

अव्ययीभावे शरत्प्रभृतिभ्यः ॥५।४।१०७॥ (टच्)

इति टचि अनुबन्धलोपे दकारस्य **स्वर**संयोगे उपशरद इत्यस्य समासत्वात् तद्धितान्तत्वाद्वा प्रातिपदिकसंज्ञायाम् स्वाद्युत्पत्तौ **'उपशरदम्'** इत्यादि। राज्ञः समीपम् उपराजम् इति लौकिकास्वपदिविग्रहे राजन्+ङस् उप+सु इत्यलौकिके स्वपदविग्रहे समासादिकार्ये उपराजन् इत्यतः –

अनश्च ॥५।४।१०८॥ (अव्ययीभावे टच्)

इति टचि अनुबन्धलोपे –

[२]नस्तद्धिते[१] ॥६।४।१४४॥ ([३]भस्य [४]टेर्लोपः[५])

इति टिलोपे उपराज इत्यस्य प्रातिपदिकत्वात् सौ तस्यामादेशे उपराजम् इत्यादि। समिधः समीपम् इति लौकिकेऽस्वपदविग्रहे समिध्+ङस् उप+सु इत्यलौकिके स्वपदविग्रहे समासादिकार्ये उपसमिध् इत्यतः–

झयः ॥५।४।१११॥ (अव्ययीभावे टच्)

इति टचि अनुबन्धलोपे स्वरसंयोगे उपसमिध इत्यस्य प्रातिपदिकत्वात् स्वाद्युत्पत्तौ तस्यामि उपसमिधमित्यादि। इत्यव्ययीभावः।

॥ इत्यव्ययीभावः समासः॥

●

अथ तत्पुरुषसमासः

तत्पुरुषः ॥२।१।२२॥ (अधिकारोऽयं शेषो बहुव्रीहिः ॥२।२।२३॥ इत्यतः प्राक्)

कृष्णं श्रितः = कृष्णश्रित इति लौकिके विग्रहे कृष्ण + अम् श्रित + सु इत्यलौकिके विग्रहे –

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥२।१।२४॥

इति समासे **'कृत्तद्धितसमासाश्च'** (१।२।४६) इति प्रातिपदिकसंज्ञायाम् सुपो लुकि द्वितीयान्तस्य कृष्णशब्दस्योपसर्जनसंज्ञायाम् पूर्वनिपाते स्वाद्युत्पत्तौ कृष्णश्रित इत्यादि। शङ्कुलया खण्ड इति लौकिके शङ्कुला + टा खण्ड + सु इत्यलौकिके विग्रहे –

तृतीया तत्कृतार्थेन गुणवचनेन ॥२।१।३०॥ (तृतीयान्तार्थ-कृतेन गुणवचनेन अर्थेन च समासः तत्पुरुषश्च)

इति समासे प्रातिपदिकत्वात्सुपो लुकि स्वादौ शङ्कुलाखण्ड इत्यादि। धान्येन अर्थः इति विग्रहे समासे तत्कृत्ये च कृते धान्यार्थः। इत्यादि। हरिणा त्रातः इति लौकिकविग्रहे हरि + टा त्रात + सु इत्यलौकिकविग्रहे –

[1]कर्तृकरणे [3]कृता [4]बहुलम् ॥२।१।३२॥ ([2]तृतीया [5]समस्यते)

इति समासे समासत्वात्प्रातिपदिकसंज्ञायाम् सुपो लुकि स्वाद्युत्पत्तौ हरित्रातः इत्यादि। एवम् यूपाय दारु इति विग्रहे –

[1]चतुर्थी[3]तदर्थार्थबलिहितसुखरक्षितैः ॥२।१।३६॥ (सुप्[2] सुपा[4] समस्यते[5])

इति प्रकृतिविकृतिभावार्थकेन यूपार्थेन दारुणा समासे कृते प्रातिपदिकत्वांत्सुपो लुकि स्वाद्युत्पत्तौ नपुंसकत्वात् तल्लुकि यूपदारु। **(अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्)** द्विजाय अयं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः। जनहितम्। आत्मसुखम्। बालरक्षितम्। इत्यादि। युद्धात् भयम् इति विग्रहे –

[1]पञ्चमी [3]भयेन ॥२।१।३७॥ ([2]सुप् सुपा[4] समस्यते[5])

इति समासे तत्कार्ये प्रातिपदिककार्य्ये च युद्धभयमित्यादि।

षष्ठी ॥२।२।८॥ (सुप् सुपा समस्यते)

राजपुरुषः, विद्यालयः, वेदाध्ययनमित्यादि। हृदयस्य लेख इति विग्रहे समासादिकृत्ये कृते –

हृदयस्य हृल्लेखयदण्लासेषु ॥६।३।५०॥

इति हृदादेशे **'तोर्लि'** (८।४।६०) इति परसवर्णे हृल्लेख इत्यस्य प्रातिपदिकत्वात् सौ हृल्लेखः। एवं हृल्लासः।

सप्तमी शौण्डैः ॥२।१।४०॥ (सुप् सुपा समस्यते)

अक्षशौण्डः, तर्कचतुरः, न्यायनिपुणः, व्याकरणवाग्मी। अत्र सर्वत्रैव सूत्रेषु द्वितीयादिपदानां योगविभागात् यथायोग्यं सर्वैरेव सुबन्तैर्द्वितीयादिसुबन्तानाम् समासो ज्ञेयः। यथा – वृक्षमारूढः वृक्षारूढ इत्यादि।

॥ इति तत्पुरुषप्रकरणं समाप्तम् ॥

●

तत्पुरुषान्तर्गतः कर्मधारयो द्विगुश्च

अयं समासो हि तत्पुरुषस्यैवैको **भेदोऽस्ति** । तथाहि बालश्चासौ कृष्णः बालकृष्णः । इति लौकिकविग्रहे बाल + सु कृष्ण + सु इत्यलौकिके विग्रहे –

विशेषणं[1] विशेष्येण[3] [5]बहुलम् ॥२।१।५७॥ (सुप्[2] सुपा[4] समस्यते[6])

इति समासे –

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥१।२।४२॥

इति कर्मधारयसंज्ञायाम् समासतया प्रातिपदिकत्वात्सुपो लुकि स्वाद्युत्पत्तौ बालकृष्णः, इत्यादि । रक्ता चासौ लता रक्तलता इति लौकिकविग्रहे रक्ता + सु - लता + सु इत्यलौकिकविग्रहे समासे प्रातिपदिकत्वात् सुपो लुकि रक्तालता इति जाते **'तत्पुरुषः०'** (१।२।४२) इत्युक्तसूत्रेण कर्मधारयसंज्ञायाम् –

[4]पुंवत्कर्मधारयजातीयदेशीयेषु ॥६।३।४२॥ ([2]अनूङ् [3]स्त्रियाः [1]भाषितपुंस्कात्)

इति रक्तायाः पुंवद्भावे स्वाद्युत्पत्तौ रक्तलतेत्यादि । एवम् – नीलश्च तदुत्पलम् – नीलोत्पलम् । इत्यादि ज्ञेयम् । सर्वेषामप्येषां द्विवचनादौ तु बालौ च तौ कृष्णौ बालकृष्णौ, बालाश्च ते कृष्णा बालकृष्णाः । रक्ते च ते लते रक्तलते, रक्ताश्च ताः लताः रक्तलताः । नीले च ते उत्पले नीलोत्पले, नीलानि च तानि उत्पलानि नीलोत्पलानीत्यादीनि विग्रह - वाक्यानि ज्ञेयानि । घन इव श्यामः = घनश्यामः । इति लौकिकविग्रहे घन + सु श्याम + सु इत्यलौकिकविग्रहे –

उपमानानि सामान्यवचनैः ॥२।१।५५॥ (सह समस्यन्ते)

इति समासे समासत्वात् प्रातिपदिकसंज्ञायाम् सुपो लुकि समाससूत्रे प्रथमानिर्दिष्टस्य घन इत्युपमानस्य उपसर्जनतया पूर्वनिपाते स्वाद्युत्पत्तौ घनश्याम इत्यादि । नरः सिंह इव इति लौकिके नर + सु सिंह + सु इत्यलौकिके विग्रहे –

उपमितं[1] व्याघ्रादिभिः[2] सामान्याप्रयोगे[5] ॥२।१।५६॥ (सह[3] [4]समस्यते)

इति समासे समासत्वात् प्रातिपदिकतया सुपो लुकि उपमेयस्य प्रथमा-निर्दिष्टस्योपसर्जनसंज्ञायाम् पूर्वनिपाते नरसिंह इत्यस्मात् स्वाद्युत्पत्तौ नरसिंहः । एवम्

पुरुषव्याघ्रः। नरपुङ्गवः, पुरुषर्षभः, इत्यादि। अयमुपमितसमासो द्विधा उपमामूलको रूपकमूलकश्चेति। तत्र रूपकमूलको यथा – मुखमेव चन्द्रः मुखचन्द्रः प्रकाशते। धनमेव बलम् धनबलं मदयति। राहुरेव ग्रहः राहुग्रहश्चन्द्रमाच्छादयति। इत्यादि। **'मयूरव्यंसकादयश्च'** (२।१।७२) इति समासः। उपमामूलकस्तु नरसिंहादावुक्त एव। मुखं चन्द्र इव इत्यादावपि स ज्ञेयः। सप्त च ते ऋषयः सप्तर्षयः। इति लौकिकविग्रहे सप्त+जस् ऋषि+जस् इत्यलौकिकविग्रहे –

[1]दिक्संख्ये संज्ञायाम्[6] ॥२।१।५०॥ ([5]समस्येते[5] [2]सुबन्ते[2] [3]सुपा[3] [4]सह[4])

इति समासे प्रातिपदिकत्वात् सुपो लुकि सन्धौ सप्तर्षि इत्यस्मात् जसि सप्तर्षय इति। पञ्चानां गवां समाहारः पञ्चगवम् इति लौकिके विग्रहे पञ्च आम् गो+आम् इत्यलौकिके विग्रहे –

[5]तद्धितार्थोत्तरपदसमाहारे च ॥२।१।५१॥ ([2]सुबन्ते [3]सुबन्तेन [4]सह [1]दिक् संख्ये [6]समस्येते)

इति समासे प्रातिपदिकत्वात् सुपो लुकि पञ्चगो इत्यस्मात् –

[1]गोरतद्धितलुकि[4] ॥५।४।९२॥ (टच्[3] तत्पुरुषात्[2])

इति टचि अनुबन्धलोपे अवादेशे पञ्चगव इत्यत्र समासस्य –

संख्यापूर्वो[1] द्विगुः[3] ॥२।१।५२॥ (तत्पुरुषः[2])

इति द्विगुसंज्ञायाम्।

[2]द्विगुरेकवचनम्[3] ॥२।४।१॥ ([1]समाहारे)

इति एकवद्भावे –

[1]स नपुंसकम्[4] ॥२।४।१७॥ ([3]द्विगुर्द्वन्द्वश्च विहितैक[2]वद्भावः)

इति नपुंसकत्वविधाने –

प्रातिपदिकत्वात्सौ तस्यामि पूर्वरूपे च पञ्चगवम् इति सिध्यति। (**अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः**) त्रिलोकी, त्रिलिङ्गी, त्रिफलेत्यादि (**पात्राद्यन्तस्य न**) पञ्चपात्रम्, त्रिभुवनमित्यादि। कुत्सितः पुरुषः कुपुरुषः। इति लौकिके विग्रहे कु+सु–पुरुष+सु इत्यलौकिके विग्रहे –

[1]कुगतिप्रादयः ॥२।२।१८॥ ([2]समस्यन्ते[2] सुपा[2] सह)

इति समासे प्रातिपदिकत्वात् विभक्तेर्लुकि कुपुरुष इत्यस्मात्सौ कुपुरुषः। निश्चयेन चित्वा इति विग्रहे **'गतिश्च'** (१।४।६०) इति 'नि' इत्यस्य गति संज्ञायाम् **'कुगतिप्रादयः'** (२।२।१८) इति समासे –

[२]समासेऽनञ्पूर्वे[१] क्त्वो[३] ल्यप्[४] ॥७।१।३७॥

इति क्त्वा प्रत्ययस्य ल्यबादेशे अनुबन्धलोपे निश्चि+य इत्यत्र स्थानिवद्भावेन ल्यपः कृत्त्वात् –

ह्रस्वस्य पिति कृति तुक् ॥६।१।७१॥

इति तुकि अनुबन्धलोपे निश्चित्य इत्यस्य प्रातिपदिकत्वात् सौ तस्य अव्ययत्वाल्लुकि निश्चित्य इति साधु। एवं सञ्चित्य। सम्भूय। संस्कृत्येत्यादि। मालामतिक्रान्तः=अतिमाल इति लौकिके विग्रहे माला+अम्+अति+सु इत्यलौकिके विग्रहे **(अत्यादयः क्रान्ताद्यर्थे द्वितीयया)** इति वार्तिकबलात् अतिक्रान्तेऽर्थे **'कुगतिप्रादयः'** (२।२।१८) इति समासे प्रातिपदिकत्वात् विभक्तेर्लुकि 'अति' इत्यस्योपसर्जनतया पूर्वनिपाते अतिमाला इति जाते तत्र 'माला' इत्यस्य –

एकविभक्ति चापूर्वनिपाते ॥१।२।४४॥ (उपसर्जनम्)

इति उपसर्जनसंज्ञायाम् –

गोस्त्रियोरुपसर्जनस्य ॥१।२।४८॥ (ह्रस्वः)

इति ह्रस्वे अतिमाल इत्यस्मात् स्वाद्युत्पत्तौ रुत्वादिकार्य्ये अतिमालः, इत्यादि। शोभनश्चासौ राजा सुराजा इति लौकिके विग्रहे सु+सु राजन्+सु इत्यलौकिके विग्रहे समासे प्रातिपदिकतया सुपो लुकि सुराजन् इत्यतः–

[१]राजाहः सखिभ्यष्टच्[३] ॥५।४।९१॥ ([२]समासान्तः)

इति प्राप्तस्य टचः :–

[३]न [१]पूजनात् ॥५।४।६९॥ ([२]समासान्तः)

इति निषेधे सुराजन शब्दात् सौ उपधादीर्घे सुलोपे च सुराजा इत्यादि। एवम् अतिराजा। **'स्वतिभ्यामेव'** (वा०) समासान्तस्य निषेधात् – महान् चासौ राजा महाराज इति लौकिके महत्+सु राजन्+सु इत्यलौकिके विग्रहे विशेषणसमासे समासत्वेन प्रातिपदिकत्वात् सुपो लुकि महत् राजन् इति स्थिते –

[३]आन्महतः [१]समानाधिकरणजातीययोः ॥६।३।४६॥

इति तकारस्याकारे दीर्घे महाराजन् इत्यतः टचि टिलोपादिकार्य्ये महाराजेत्यस्मात् स्वाद्युत्पत्तौ रामवद् रूपसिद्धिः। एवम् महती चासौ नवमी महानवमी, महाराज्ञीत्यादि ।* समानाधिकरणादन्यत्र महतां वंशः महद्वंशः महता कृतम् महत्कृतम् इत्यादि। विबुधानां सखा विबुधसखः इत्यत्र षष्ठीतत्पुरुषसमासे **'राजाहःसखिभ्यष्टच्'** (५।४।९१) इति टचि रामवद्रूपाणि। नञ् समासोऽपि तत्पुरुषभेदः। न ब्राह्मणः अब्राह्मणः इति विग्रहे –

[1]नञ् ॥२।२।६॥ ([2]सुपा [2]सह [4]समस्यते)

इति समासे समासतया प्रातिपदिकत्वात् विभक्तेर्लुकि –

[2]नलोपो [1]नञः ॥६।३।७३॥ ([3]उत्तरपदे)

इति नलोपे सुपि रुत्वादिकार्ये अब्राह्मण इत्यादि। न अश्व अनश्व इति विग्रहे नञ्समासे प्रातिपदिकत्वात् सुपो लुकि नकारस्य लोपे अ अश्व इति जाते –

[1]तस्मान्नु [4]डचि[2] ॥६।३।७४॥ (उत्तर[3]पदस्याजादेरित्यर्थः)

इति नुटि अनश्वः। एवम् अनीशः, अनर्ध्यः, अनर्हः, इत्यादि। मयूरश्चासौ **व्यंसकः**। इति विग्रहे –

मयूरव्यंसकादयश्च ॥२।१।७२॥ (निपात्यन्ते)

इति निपातनात्समासे समासत्वात्प्रातिपदिकसंज्ञायां विभक्तेर्लुकि स्वाद्युत्पत्तौ मयूरव्यंसक इति रूपसिद्धिः। एवम् उदक् च अवाक् च उच्चावचम्। निश्चितञ्च प्रचितञ्चेति निश्चप्रचम्। इत्यादि। अविहितलक्षणः समासोऽनेनैव कार्यः।

॥ इति तत्पुरुषः ॥

●

*** टिप्पणी – महती चासौ राज्ञी - इत्यत्र 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (परि०) इति परिभाषया टचि प्राप्ते 'शक्तिलाङ्गला०' इति वार्तिके घटशब्दात्पृथग्घटीशब्दपाठादस्याः परिभाषाया अनित्यत्वान्न टच्। महाराज्ञी।**

अथ बहुव्रीहिः

शेषो बहुव्रीहिः ॥२।२।२३॥ (अधिकारः, चार्थे द्वन्द्वः ॥२।२।२९॥ इति यावत्)

प्राप्तम् उदकं यं स प्राप्तोदको ग्रामः, इति लौकिके विग्रहे प्राप्त + सु उदक+ सु इत्यलौकिके विग्रहे –

[२]अनेकम[१]न्यपदार्थे ॥२।२।२४॥ (सुप्[३] सुपा[४] सह[५] [६]समस्यमानम् बहुव्रीहिः[७])

इति समासे जाते समासत्वात् प्रातिपदिकसंज्ञायाम् सुपो लुकि –

सप्तमीविशेषणे[२]बहुव्रीहौ[१] ॥२।२।३५॥ (पूर्वम्[३])

इति विशेषणस्य पूर्वनिपाते सन्धिकार्ये स्वाद्युत्पत्तौ प्राप्तोदकः, स्त्रीलिङ्गे प्राप्तोदका इत्यादि रूपं विशेष्यानुसारं ज्ञेयम्। एवम् ऊढो रथो येन स ऊढरथोऽनड्वान् इत्यादि। उपहृतः पुरस्कारः यस्मै स उपहृतपुरस्कारः (परीक्षोत्तीर्णः छात्रः), उद्धृत ओदनो यस्याः सोद्धृतोदना (उषा), पीतम् अम्बरम् यस्य स पीताम्बरो (हरिः) इत्यादि ज्ञेयम्। वीरः पुरुषो यस्मिन् इति विग्रहे समासत्वात प्रातिपदिकसंज्ञायां सुपो लुकि –

[१]शेषाद्विभाषा[४] ॥५।४।१५४॥ ([२]बहुव्रीहौ कप्[३])

इति कप्प्रत्यये पकारस्येत्संज्ञायां लोपे -च- कृते स्वाद्युत्पत्तौ वीरपुरुषकः। वह्व्यः कुमार्यः यस्मिन् इति विग्रहे बहुव्रीहिसमासे समासत्वाद्प्रादिपदिकसंज्ञायां सुपो लुकि **'नद्यृतश्च'** (५।४।१५३) इति कप् प्रत्यये स्वाद्युत्पत्तौ बहुकुमारीकः इति रूपसिद्धिः। **'स्त्रियाः पुंवत्'** (६।३।३४) **इति** वक्ष्यमाणेन बह्वीशब्दस्य पुंवद्भावः)। कण्ठे कालो यस्य स इति लौकिके विग्रहे बहुव्रीहि-समासे समासत्वात् प्रातिपदिकतया सुपो लुकि प्राप्ते –

[१]हलदन्ता[२]त्सप्तम्याः संज्ञायाम्[५] ॥६।३।९॥ (अलुक्[३] उत्तर[४]पदे)

इति सप्तम्या अलुकि कण्ठेकालशब्दात् स्वाद्युत्पत्तौ कण्ठेकाल इत्यादि। चित्रा गावो यस्य स चित्रगुः। इति लौकिके विग्रहे – चित्रा + जस् गौ + जस् इत्यलौकिके विग्रहे समासे समासत्वाद्प्रादिपदिकसंज्ञायां सुपो लुकि –

स्त्रियाः[३] [४]पुंवद्[१]भाषित-पुंस्कादनूङ्[२] समानाधि[५]करणे स्त्रियाम[६] पूरणीप्रियादिषु[७] ॥६।३।३४॥

इति पूर्वपदस्य पुंवद्भावे गोशब्दस्य **'गोस्त्रियोः०'** (१।२।४८) इति ह्रस्वे चित्रगुरित्यादि। पूर्वं कृतं येन इति लौकिकविग्रहे पूर्व+सु कृत+सु इत्यलौकिकविग्रहे समासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि–

निष्ठा ॥२।२।३६॥ (बहुव्रीहौ पूर्वम्)

इति कृतशब्दस्य पूर्वनिपाते कृतपूर्वशब्दात् सौ कृतपूर्व इति रूपसिद्धिः। सीतया सह ससीत इति विग्रहे –

तेन सहेति तुल्ययोगे ॥२।२।२८॥ (बहुव्रीहिः)

इति समासे सुपो लुकि सहेत्यस्योपसर्जनतया पूर्वनिपाते सहसीता इत्यत्र –

वोपसर्जनस्य ॥६।३।८२॥ (सहस्य सः)

इति सहस्य सादेशे सीताकारस्य **'गोस्त्रियोरुपसर्जनस्य'** (१।२।४८) इति ह्रस्वे ससीत इत्यस्मात् स्वाद्युत्पत्तौ 'ससीतः' इत्यादि।

द्वौ वा त्रयो वा द्वित्राः। इति लौकिकविग्रहे द्वि औ त्रि जस् इत्यलौकिकविग्रहे–

[३]संख्ययाऽव्ययासन्नादूराधिक-संख्याः[१] संख्येये[२] ॥२।२।२५॥ (सह[४]समस्यन्ते[५])

इति समासे प्रातिपदिकसंज्ञायां सुपो लुकि द्वित्रि इत्यत्र –

[२]बहुव्रीहौ [१]संख्येये [४]डजबहुगणात्[३] ॥५।४।७३॥

इति डचि डित्वाट्टिलोपे द्वित्र इत्यस्मात् स्वाद्युत्पत्तौ बहुत्वाद् बहुवचने द्वित्रा इत्यादि। एवं पञ्चषाः, उपपञ्चाः, अधिकषोडशाः, इत्यादि।

॥ इति बहुव्रीहिः॥

●

अथ द्वन्द्वः

रामश्च कृष्णश्च रामकृष्णौ – इति लौकिकविग्रहे राम + सु कृष्ण + सु इत्यलौकिकविग्रहे –

चार्थे[1] द्वन्द्वः[5] ॥२।२।२९॥ ([2]इतरेतरयोगे समाहारे च [4]समस्यते अनेकं सुबन्तं[3])

इति इतरेतरयोगसमासे समासत्वाप्रादिपदिकसंज्ञायां सुपो लुकि द्वित्वाद् द्विवचने विभक्तिकार्ये रामकृष्णाविति रूपसिद्धिः। एवं बहुशब्दानां द्वन्द्वे धवखदिरपलाशाः। कुक्कुटश्च मयूरी चेति विग्रहे समासे तत्कृत्ये च कृते –

[2]परवल्लिङ्गं[3] द्वन्द्वतत्पुरुषयोः[1] ॥२।४।२६॥

इत्यनेनात्र परवल्लिङ्गेन स्त्रीलिङ्गे द्वित्वविवक्षायाम् औ विभक्तौ यणि कुक्कुटमयूर्यौ इमे, मयूरी च कुक्कुटश्चेति विग्रहे तु मयूरीकुक्कुटाविमौ। जाया च पतिश्चेति विग्रहे समासे प्रातिपदिकत्वात् सुपो लुकि **(जायाशब्दस्य जम्भावो दम्भावश्च वा वक्तव्यः)** इति वार्तिकात् जायाशब्दस्य वैकल्पिके जम्भावे दम्भावे च कृते द्विवचने विभक्तौ विभक्तिकार्ये जम्पती दम्पती पक्षे जायापती। हरश्च हरिश्चेति विग्रहे समासे प्रातिपदिकत्वात् सुपो लुकि –

द्वन्द्वे घि ॥२।२।३२॥ (पूर्वम्)

इति हरिशब्दस्य पूर्वनिपाते हरिहर इत्यस्माद् विभक्तिकार्ये हरिहरौ इत्यादि द्विवचनान्ता एव। हरिश्च हरश्च गुरुश्च इति बहूनां द्वन्द्वे हरिहरगुरवः। हरिगुरुहरा वा। समाहारद्वन्द्वे तु आहारश्च निद्राच भयञ्च सन्ततित्वं च तेषां समाहार इति विग्रहेण समाहारद्वन्द्वे प्रातिपदिकत्वात् सुपो लुकि **'स नपुंसकम्'** (२।४।१७) इति नपुंसके समाहारत्वात्स्वाभाविके एकत्वे स्वाद्युत्पत्तौ 'आहारनिद्राभयसन्ततित्वम्'। इत्यादीन्येकवचनरूपाणि। पाणी च पादौ च तयोः समाहारः पाणिपादम् इति विग्रहे समाहारद्वन्द्वे प्रातिपदिकत्वात् सुपो लुकि –

[2]द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम्[1] ॥२।४।२॥ (एकवत्[3])

इति एकवद्भावे स्वाद्युत्पत्तौ पाणिपादम् इत्यादि। एवम् मार्दङ्गिकपाणविकम्। रथिकाश्वारोहम्। हंसी च हंसश्च हंसौ इति विग्रहे तु –

[3]पुमान् [2]स्त्रिया ॥१।२।६७॥ ([1]एकविभक्तौ [4]एकशेषः)

इति पुंसो हंसस्य एकशेषे हंसीत्यस्य च लोपे विभक्तिकार्ये हंसौ * । इत्यादिषु न द्वन्द्वोऽनेकसुबन्ताभावात्। एवम् – शुक्लश्च शुक्ला च शुक्लञ्चेति विग्रहे –

[2]नपुंसकम [1]नपुंसकेनैकव[4]च्चास्यान्यतरस्याम्[5] ॥१।२।६९॥ ([3]एकशेषः एकविभक्तौ[6])

इति क्लीबस्यैकशेषे विकल्पेन एकवद्भावे च शुक्लं पक्षे शुक्लानि। माता च पिता च पितरौ इति विग्रहे – औ विभक्तौ

[2]पिता मात्रा[1] ॥१।२।७०॥ ([2]सह अन्यतरस्याम्[4] [5]एकशेषः)

इति पितुः एकशेषे गुणादिकार्ये पितरौ। पक्षे द्वन्द्वसमासे समासकार्ये च कृते मातृ-पितृ इति स्थितौ –

[3]आनङ् ऋतो[1] द्वन्द्वे[2] ॥६।३।२५॥ (उत्तरपदे[7])

इति मातुः ऋकारस्य आनङि मातापितृशब्दात् द्वित्वविवक्षया औ विभक्तौ मातापितृ + औ इति जाते गुणादिकार्ये कृते मातापितरावित्यादि। ईशश्च कृष्णश्च इति विग्रहे द्वन्द्वसमासे प्रातिपदिकत्वात् सुपो लुकि –

[2]अजाद्यदन्तम्[3] ॥२।२।३३॥ (द्वन्द्वे[1] पूर्वम्[4])

इति ईशशब्दस्य पूर्वनिपाते द्विवचने औ विभक्तौ ईशकृष्णौ। शिवश्च केशवश्च इति विग्रहे समासे प्रातिपदिकत्वात् सुपो लुकि –

[2]अल्पाच्तरम् ॥२।२।३४॥ ([3]पूर्वम् द्वन्द्वे[1])

---

* नैतादृश एकशेषविषये समासः शंक्यः पदद्वयाभावात् तथा 'समासस्य' (६।१।२२३) इत्यन्तोदात्तत्वप्रसङ्गात्। अत्र हि 'अनुदात्तौ सुप्पितौ' (३।१।४) इत्यनुदात्तत्वमेव।

इति शिवस्य पूर्वनिपाते द्विवचने औ विभक्तौ शिवकेशवावित्यादि । द्वौ च दश च द्वादशेति विग्रहे द्वन्द्वसमासे प्रातिपदिकत्वात् सुपो लुकि –

[1]द्व्यष्टनः [3]संख्यायामबहुव्रीह्यशीत्योः ॥६।३।४७॥ ([2]आत् उत्तरपदे[4])

इति द्विशब्दस्येकारस्याकारे द्वादशन् शब्दाद्बहुवचने जसादिविभक्तौ द्वादशेत्यादि । एवम् अष्टौ च दश चाष्टादश । द्वौ च विंशतिश्च द्वाविंशतिः । अष्टाविंशतिः । इत्यादि । त्रयश्च दश च त्रयोदशेति विग्रहे समासादिकार्ये –

त्रेस्त्रयः ॥६।३।४८॥ (संख्यायामबहुव्रीह्यशीत्योः उत्तरपदे)

इति त्रेः त्रयस् इत्यादेशे सन्धिकार्य्ये त्रयोदशन् शब्दात् विभक्तिकार्य्ये त्रयोदशेत्यादि । एवम् त्रयोविंशतिः । त्रयस्त्रिंशद् इत्यादि ।

॥ इति द्वन्द्वसमासप्रकरणम् ॥

अथ समासान्तप्रकरणम्

वाक् च त्वक् च तयोः समाहारः वाक्त्वचम् इति विग्रहे समाहारद्वन्द्वे प्रातिपदिकत्वात् सुपो लुकि –

द्वन्द्वाच्चुदषहान्तात् समाहारे ॥५।४।१०६॥ (टच्)

इति समासान्ते टचि अनुबन्धलोपे स्वरसंयोगे च वाक्त्वचेत्यदन्तात्स्वादौ वाक्त्वचमित्यादि। एवम् छत्रञ्चोपानहौ च तयोः समाहारः छत्रोपानहम्। शमीदृषदम् वाक्त्विषम्। समाहारे किम् प्रावृट्शरदौ। विष्णोः पूः विष्णुपुरम् इत्यत्र षष्ठीतत्पुरुषे –

ऋक्पूरब्धूःप[1]थामा[3]नक्षे[2] ॥५।४।७४॥ (अ[5] अनक्षे[4])

इति 'अ' प्रत्यये कोशात् क्लीबत्वे प्रातिपदिकतया सुपि · विष्णुपुरम्। विमला आपः यस्मिन् सरसि तद् विमलापं सरः। द्विर्गता आपो यस्मिन्निति विग्रहे बहुव्रीहौ अप्रत्यये –

द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥६।३।९७॥

इत्यपोऽकारस्य ईत्वे सवर्णदीर्घे द्वीप इति प्रातिपदिकत्वात् स्वाद्युत्पत्तौ द्वीपम्। एवमन्तरीपम्। प्रतीपम्। समीपम्। राज्ञो धूरिति विग्रहे तत्पुरुषे अप्रत्यये टापि राजधुरा राजपथः। रम्यपथो देश इत्यादि।

॥ इति समासान्तप्रकरणम् ॥

●

अथ तद्धिताः

समर्थानां प्रथमाद्वा ॥४।१।८२॥ (प्राग्दिशो विभक्तिः ॥५।३।१॥ इति यावत्पदत्रयमधिक्रियते)।

(समर्थानां मध्ये विधिसूत्रे प्रथमोच्चारितादित्यर्थः–)

प्राग्दीव्यतोऽण् ॥४।१।८३॥ (तेन दीव्यति खनति जयति जितम् ॥४।४।२॥ इत्यतः प्राग्विहितेषु अपवादविषयं परिहृत्य अण् प्रवर्तते । इत्यर्थाधिकारः)

अश्वपतेरपत्यमिति विग्रहे सूत्रे प्रथमोच्चारितात् षष्ठ्यन्तात् अश्वपति शब्दात्–

अश्वपत्यादिभ्यश्च ॥४।१।८४॥ (प्राग्दीव्यतीयेषु अर्थेषु अण्)

इत्यणि अनुबन्धलोपे **'कृत्तद्धितसमासाश्च'** (१।२।४६) इति प्रातिपदिकतया **'सुपो धातुप्रातिपदिकयोः'** (२।४।७१) इति सुब्लुकि ।*

[1]तद्धितेष्वचा[2] मादेः[3] ॥७।२।११७॥ ([4]वृद्धिः [5]ञ्णिति)

इति आदिवृद्धौ **'यस्येति च'** (६।४।१४८) इति इकारलोपे हलस्तकारस्य स्वरयोगे आश्वपतशब्दात् स्वाद्युत्पत्तौ क्लीबे आश्वपतम् । दितेरपत्यं पुमानिति विग्रहे दितिशब्दात्प्रथमोच्चारितात्–

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥४।१।८५॥ (प्राग्दीव्यतीयेषु अर्थेषु)

इति ण्यप्रत्यये अनुबन्धलोपे आदिवृद्धौ इकारलोपे तकारस्य यकारेण संयोगे दैत्यशब्दात्स्वाद्युत्पत्तौ दैत्यः इत्यादि । रघोरपत्यं पुमानिति विग्रहे रघुशब्दात्–

तस्यापत्यम् ॥४।१।९२॥ (यथाविहितं प्रत्ययः अण्)

इत्यणि आदिवृद्धौ राघु+अ इति जाते–

[1]ओर्गुणः[4] ॥६।४।१४६॥ ([2]भस्य तद्धिते[3])

इति गुणे अवादेशे राघवः । दक्षस्यापत्यम् पुमान् इति विग्रहे दक्षशब्दात् –

---

* **'सुपो धातुप्रातिपदिकयोः' (२।४।७१) इति सर्वत्र कृत्तद्धितसमासनामधातुप्रक्रियासु भवतीति च्छात्रैः सावधानतया ज्ञातव्यम् ।**

[3]अत् इञ्[4] ॥४।१।९५॥ ([1]तस्यापत्य[2] मित्यर्थे)

इति इञ् प्रत्यये आदिवृद्धौ अकारलोपे स्वरयोगे सुपि दाक्षिः। एवम् दाशरथिः, द्रौणिः, शिवस्यापत्यम् पुमान् इति विग्रहे शिवशब्दात् –

शिवादि[2]भ्योऽण्[3] ॥४।१।११२॥ ([1]तस्यापत्यम्)

इत्यणि अनुबन्धकार्य्ये सुपि शैवः। द्वयोर्मात्रोरपत्यम् इति विग्रहे द्वि + ओस् मातृ + ओस् इति स्थिते। **'तद्धितार्थोत्तरपदसमाहारे च'** (२।१।५१) इति तद्धितार्थविषये द्विगुसमासे समासत्वात्प्रातिपदिकतया सुपो लुकि – द्विमातृ शब्दात्।

[2]मातु[3]रुत्संख्यासम्भद्रपूर्वायाः[1] ॥४।१।११५॥ (प्राग्दीव्यतीयेषु अपत्यार्थे)

इत्यणि ऋकारस्य च उकारे रपरे च कृते आदिवृद्धौ द्वैमातुरः, त्रैमातुरः। षाण्मातुरः। सम्मातुरपत्यं साम्मातुरः। भद्रमातुरपत्यं भाद्रमातुरः।

विनतायाः अपत्यम् पुमान् इति विग्रहे विनताशब्दात् –

स्त्रीभ्यो ढक् ॥४।१।१२०॥ (तस्यापत्यमित्यर्थे)

इति ढकि कस्येत्संज्ञा तल्लोपे –

किति च ॥७।२।११८॥ (तद्धितेष्वचाम् आदेः वृद्धिः)

इति आदिवृद्धौ ढकारस्य च –

*** [3]आयनेयीनीयियः फढखछघां[2] प्रत्ययादीनाम्[1] ॥७।१।२॥**

इति एयादेशे **'यस्येति च'** (६।४।१४८) इत्यकारलोपे प्रत्ययथयोगे सुपि वैनतेयः। एवं भागिनेयः, सौपर्णेयः, गाङ्गेयः, इत्यादि। षष्ठ्यन्तात् पितृष्वसृशब्दात् –

पितृष्वसुश्छण् ॥४।१।१३२॥ (अपत्ये)

इत्यणि प्रातिपदिकत्वात्सुपो लुकि णित्त्वाद् वृद्धौ छस्य ईयि यणि सुपि पैतृष्वस्रीयः।

ढा[2]-[1] लोपः[4] ॥४।१।१३३॥ ([1]अपत्ये [3]पितृष्वसुः)

इति ज्ञापकादेव ढकि अन्त्यलोपे पैतृष्वसेयः।

---

* आयन् एय् ईन् ईय् इय् एते षञादेशाः क्रमात् फढखछघ इति प्रत्ययादिवर्णानाम्।

[1]मातृष्वसुश्च ॥४।१।१३४॥ (छण्[2] [3]अपत्ये [4]ढकि लोपश्च[5])

मातृष्वस्रीयः। मातृष्वसेयः। राज्ञोऽपत्यम् पुमान् इति विग्रहे राजन् शब्दाद् –

राजश्वशुराद् यत् ॥४।१।१३७॥ (अपत्ये)

'राज्ञो जातावेवेति वाच्यम्' (वा०) इति नियमात् यति –

ये चाभावकर्मणोः ॥६।४।१६८॥ (अन् प्रकृत्या)

इति प्रकृतिभावेन टिलोपनिषेधे राजन्यः। जात्यभावे तु **'तस्यापत्यम्'** (४।१।९२) इति अपत्येऽणि –

अन्[1] ॥६।४।१६७॥ ([3]प्रकृत्या [2]अणि)

इति प्रकृतिभावेन टिलोपनिषेधे राजनः। श्वशुरस्यापत्यम् श्वशुर्यः।

क्षत्राद्घः ॥४।१।१३८॥ (अयमपि जातावेव)

क्षत्रियः। अन्यत्र क्षात्रो धर्मः इत्यादिष्वणेव।

[1]कुलात्खः[2] ॥४।१।१३९॥ (अपत्ये)

कुलीनः– अन्यत्र कौल आचारः। इत्यादि।

स्वसुश्छः ॥४।१।१४३॥ (अपत्ये)

स्वस्रीयः।

भ्रातुर्व्यच्च ॥४।१।१४४॥ (अपत्ये चाच्छः)

भ्रातृव्यः, भ्रात्रीयः।

॥ इत्यपत्यार्थप्रकरणम् ॥

●

अथ रक्ताद्यर्थाधिकारः

कषायेण रक्तं वस्त्रमिति विग्रहे कषायशब्दात् –

तेन रक्तं रागात् ॥४।२।१॥ (अण्)

इत्यणि आदिवृद्धौ सुपि काषायम्। पुष्येण युक्तमह इति विग्रहे तृतीयान्तात् पुष्यशब्दात् –

[1]नक्षत्रेण युक्तः[2] कालः[3] ॥४।२।३॥ (इत्यर्थे अण्[4])

इत्यणि तद्धितान्तत्वेन प्रातिपदिकत्वात्सुपो लुकि। **(तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्)** इति यलोपे वृद्धौ सुपि पौषम्। तैषम्। **'टिड्ढा०'** (४।१।१५) इति ङीपि श्रावणी, प्रौष्ठपदी। इत्यादि। पौषी पौर्णमासी अस्मिन्निति विग्रहे पौषी शब्दात् –

सास्मिन् पौर्णमासीति संज्ञायाम् ॥४।२।२१॥ (अण्)

इत्यणि ईकारलोपे प्रातिपदिकत्वात्सौ पौषो मासः। एवम् माघः, चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, आश्विनः इत्यादि। इन्द्रो देवता अस्येति विग्रहे इन्द्रशब्दात् –

[1]सास्य[3] देवता[2] ॥४।२।२४॥ (इत्यर्थे अण्[4])

इत्यणि अनुबन्धकार्य्ये आदिवृद्धौ सुपि ऐन्द्रम्, वारुणम्। पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः। मातुः पिता मातामहः। पितुः पिता पितामहः इत्याद्यर्थे पितुर्व्यन् मातुर्ऌलच् मातापित्रोर्डामहच् इत्येवमादिषु प्रत्ययेषु कृतेषु –

पितृव्यमातुलमातामहपितामहाः ॥४।२।३६॥ (निपात्यन्ते)

इति पाणिनेरनुशासनबलात् सूत्रस्थपितृव्यादिशब्दा निपात्यन्ते। काकानां समूह इति विग्रहे काक-शब्दात् –

तस्य[1] समूहः[2] ॥४।२।३७॥ (इत्यर्थे अण्[3])

इत्यणि अलोपे सुपि काकम्। एवं बाकम्। मात्स्यम्। कापोतम्। इत्यादि।

ग्रामजनबन्धुभ्यस्तल् ॥४।२।४३॥

ग्रामता, जनता, बन्धुता। व्याकरणमधीते वेद वा इति विग्रहे व्याकरणशब्दात

[1]तदधीते तद्वेद[2] ॥४।२।५९॥ ([3]इत्यर्थे अण्)

इति अणि आदिवृद्धौ प्राप्तायाम् –

[3]न [2]य्वाभ्यां पदान्ताभ्याम्[1] पूर्वो[6] [7]तु [5]ताभ्यामैच्[8] ॥७।३।३॥ (वृद्धिः[4])

इति ऐजागमे स्वाद्युत्पत्तौ वैयाकरणः। न्यायमधीते वेद वा इत्यर्थे –

क्रतूक्थादिसूत्रान्ताट्ठक् ॥४।२।६०॥

इति उक्थादित्वात् ठकि.–

[2]ठस्येकः[3] ॥७।३।५०॥ ([1]प्रत्ययस्य)

इति ठस्य इकि **'न य्वाभ्याम्०'** (७।३।३) इति ऐजागमे नैयायिकः एवं पौराणिकः। ज्यौतिषिकः। ऐतिहासिकः। क्रममधीते वेद वेति विग्रहे –

[1]क्रमादिभ्यो वुन्[2] ॥४।२।६१॥ (तद्धितः)

इति वुनि –

युवोरनाकौ ॥७।१।१॥ (प्रत्यययोः)

इति वोः अकादेशे अकारलोपे स्वरसंयोगे स्वाद्युत्पत्तौ क्रमकः। एवम् शिक्षकः, मीमांसकः।

॥ इति रक्ताद्यर्थप्रकरणम् ॥

अथ शैषिकाः

चक्षुषा गृह्यते इति विग्रहे चक्षुष् शब्दात् ।

शेषे ॥४।२।९२॥

(अपत्यादिचतुरर्थ्यन्तादन्यः जातविधेर्विकारविधिं यावत् शेषस्तत्र यथाविहितम् अणादयः प्रत्ययाः स्युः) इत्यणि आदिवृद्धौ सुपि चाक्षुषम् (रूपम्) श्रावणः (शब्दः) औपनिषदः (पुरुषः) दृषदि पिष्टा दार्षदाः (सक्तवः) चतुर्भिरुह्यते चातुरं (शकटम्) चतुर्दश्यां दृश्यते चातुर्दशं (रक्षः) **'तस्य विकारः'** (४।३।१३४) इत्यतः प्राक् शेषाधिकारः । इह प्रकृतिविशेषाद् घादयः ट्युट्युलन्ताः प्रत्ययाः अर्थविशेषेषु उच्यन्ते ।

तत्र जातः ॥४।३।२५॥ तत्र भवः ॥४।३।५३॥ तत आगतः ॥४।३।७४॥ सोऽस्य निवासः ॥४।३।८९॥ तेन प्रोक्तम् ॥४।३।१०१॥

इत्यादयोऽर्थविशेषाः । तत्र राष्ट्रे जातो भवो वा इति विग्रहे राष्ट्रशब्दात् –

राष्ट्रावारपाराद्घखौ ॥४।२।९३॥

इपि घ प्रत्यये घस्य इयि शेषकार्ये राष्ट्रिय इत्यादि **(अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यम्)** अवारीणः, पारीणः, पारावारीणः, अवारपारीणः । इति । ग्रामे जात इति विग्रहे –

[1]ग्रामाद् यखञौ[2] ॥४।२।९४॥

ग्राम्यः, ग्रामीणः । नद्यां जात इत्याद्यर्थे नदीशब्दात् –

नद्यादिभ्यो ढक् ॥४।२।९७॥

इति ढकि तस्य एयादेशे आदिवृद्धौ ईलोपे नादेयम् । एवं वाराणसेयम् । दक्षिणस्यां दिशि जातः इति विग्रहे दक्षिणाशब्दात् –

दक्षिणापश्चात् [1]पुरसस्त्यक्[2] ॥४।२।९८॥

इति त्यकि आदिवृद्धौ सुपि दाक्षिणात्यः । एवं पाश्चात्त्यः, पौरस्त्यः, दिवि भवम् इति विग्रहे दिव् शब्दात् –

[1]द्युप्रागपागुदक्प्रतीचो यत्[2] ॥४।२।१०१॥

इति यति दिव्यम्, एवम् प्राच्यम्, अवाच्यम्, उदीच्यम्, प्रतीच्यम्, अमा सह भवति इति विग्रहे अमेत्यव्ययात्–

[1]अव्ययात्त्यप्[2] ॥४।२।१०४॥ (शेषेऽर्थे)

इति त्यपि अनुबन्धलोपे सुपि अमात्यः। एवम् इहत्यः, क्वत्यः, कुत्रत्यः, कुतस्त्यः, तत्रत्य इत्यादि। **'त्यबूनेर्ध्रुव इति वक्तव्यम्'** नित्यः। शालायाम् भवः इति विग्रहे शालाशब्दस्य–

[3]वृद्धिर्यस्या[1]चामादि[2]स्त[4]द्वृद्धम्[5] ॥१।१।७३॥

इति वृद्धसंज्ञायाम्–

[1]वृद्धाच्छः[3] ॥४।२।११४॥ (जाताद्यर्थे[2])

इति छे छस्य ईयि शालीयः। एवं मालीयः। तस्मिन् भवः तस्यायं वा इति विग्रहे तच्छब्दस्य–

त्यदा[1]दीनि च ॥१।१।७४॥ (वृद्धम्[2])

इति वृद्धसंज्ञायाम् छप्रत्यये छस्य ईयि तदीयः। एवम् यदीयः, एतदीयः। भवतः अयम् इति विग्रहे भवच्छब्दात् षष्ठ्यन्तात्–

भवतष्ठक्छसौ ॥४।२।११५॥ (वृद्धात्)

इति ठकि– तद्धितान्ततया प्रातिपदिकत्वात् सुपो लुकि।

[1]इसुसुक्तान्तात्कः[4] ॥७।३।५१॥ ([2]प्रत्ययस्य ठस्य[3])

इति ठस्य ककारे कित्त्वादादिवृद्धौ भावत्कः, छसि तु प्रत्ययकार्ये ईयि कृते–

सिति च ॥१।४।१६॥ (पूर्वं पदम्)

इति पदत्वात् तकारस्य **'झलां जशोऽन्ते'** (८।२।३९) इति दकारे भवदीयः, एवं अदसीयः इदमीयः, **(वा नामधेयस्य वृद्धसंज्ञा वक्तव्या)** रघुवरीयः, वङ्गीयः। युवयोर्युष्माकम् वा अयम् इति अर्थे युष्मच्छब्दात्–

[1]युष्मदस्मदोरन्यतरस्यां[4] खञ्च[2] ॥४।३।१॥ (चा[3]च्छः)

इति खञि खस्य ईनादेशे युष्मद्+ईन इत्यत्र –

[1]तस्मिन्नणि[2] च[3] यु[4]ष्माकास्माकौ ॥४।३।२॥

इति युष्माकादेशे आदिवृद्धौ अकारलोपे प्रत्यययोगे मूर्द्धन्यात्परस्य नस्य णत्वे सुपि यौष्माकीणः एवम् आस्माकीनः। अणि यौष्माकः, आस्माकः। छे युष्मदीयः, अस्मदीयः। तवायम्, ममायम्, इत्यर्थे एकार्थकात् युष्मदस्मच्छब्दात् खञि अणि च–

[४]तवकममकावेकवचने[५] ॥४।३।३॥ ([२]तस्मिन्नणि[३] च [१]युष्मदस्मदोः)

इति तवक-ममकादेशे आदिवृद्धौ सुपि तावकीनः। मामकीनः। तावकः, मामकः। छे तु तस्य ईयि–

[५]प्रत्ययोत्तरपदयोश्च ॥७।२।९८॥ ([१]युष्मदस्मदोर्म[२]पर्य्यन्तयोः[३] त्वमावेक[४]वचने)

इति मपर्य्यन्तयोः त्वमादेशे पररूपे सुपि त्वदीयः, मदीयः। मध्ये जात इत्यर्थे मध्यशब्दात्–

मध्यान्मः ॥४।३।८॥ (शैषिकः, अणोऽपवादः)

इति म प्रत्यये प्रातिपदिकत्वात् सुपि मध्यमः। काले भवः जातो वेत्यर्थे कालशब्दात्–

कालाट्ठञ् ॥४।३।११॥ (कालवाचिनः)

इति ठञि तस्य च **'ठस्येकः'** (७।३।५०) इति इकादेशे अकारलोपे स्वरयोगे सुपि कालिकः। एवम् मासिकः, वार्षिकः। सांवत्सरिकः, **'अव्ययानां भमात्रे टिलोपः'** इति टिलोपे पौनःपुनिकः, सायम्प्रातिकः। सायं जात इत्यर्थे–

सायं चिरं प्राह्णे प्रगेऽव्ययेभ्य[१] ष्ट्यु ट्युलौ[२] तुट्[३]च ॥४।३।२३॥

इति ट्युप्रत्यये अनुबन्धलोपे **'युवोरनाकौ'** (७।१।१) इति योरनादेशे तुडागमे च कृते सायन्तनम्, प्राह्णेतनम्, सनातनम्, श्वस्तनम्, ह्यस्तनम्, पुरातनम्। टित्त्वात् सायन्तनी अद्यतनी व्यवस्थेत्यादि। अध्यात्मे भवम् इत्यर्थे अध्यात्मशब्दात्–

तत्र भवः ॥४।३।५३॥ (ठञ्)

(तत्रेति सप्तमीसमर्थात्। भव इह सत्तामात्रमिष्यते तस्मिन्नर्थे यथाविहितं प्रत्ययो भवतीत्यधिकारे) 'अध्यात्मादिभ्यः ठञिष्यते' (४।३।६०) (वा०) इति ठञि ठस्येकादेशे ञित्त्वादादिवृद्धौ अकारलोपे आध्यात्मिकम्। अधिदेवे भवम् इति विग्रहे ठञि ठस्येकादेशे आदिवृद्धौ प्राप्तायाम्–

[1]अनुशतिकादीनाञ्च ॥७।३।२०॥ (उभयपदस्यादेरचो वृद्धिः)

इत्युभयपदवृद्धौ आधिदैविकमित्यादि। एवम् आधिभौतिकम्, पारलौकिकम्। उपाध्यायस्यायम्, उपाध्याये भवः, उपाध्यायादागतो वा इत्याद्यर्थे–

तत आगतः ॥४।३।७४॥ (इत्यधिकृत्य)

विद्यायोनिसम्बन्धेभ्यो वुञ् ॥४।३।७७॥

इति वुञि आदिवृद्धौ अनुबन्धलोपे वोरकादेशे औपाध्यायकः। पैतामहकः। होतुरागत इति विग्रहे–

ऋतष्ठञ् ॥४।३।७८॥ (विद्यायोनिसम्बन्धाद्)

इति ठञि ञित्त्वादादिवृद्धौ ठस्य (उगन्तात्परस्य) ककारे हौतृकम्, एवं भ्रातृकम्। पितुरागतम् इति विग्रहे पितृशब्दात्–

[1]पितुर्यच्च[2] ॥४।३।७९॥ (चाट्ठञ्[3])

इति यति

[2]रीङ् ऋतः[1] ॥७।४।२७॥ ([3]अकृत्सार्वधातुकयोः [4]यि च्वौ[5])

इति ऋकारस्य रीङादेशे **'यस्येति च'** (६।४।१४८) इति ईलोपे सुपि पित्र्यम्। पक्षे ठञि ञित्त्वाद् वृद्धौ ठस्य **'इसुसुक्तान्तात् कः'** (७।३।५१) इति कादेशे पैतृकम्। मथुरा निवासोऽस्य इति विग्रहे मथुराशब्दात्–

सोऽस्य निवासः ॥४।३।९८॥

इति अणि आदिवृद्धौ आलोपे प्रातिपदिककार्य्ये माथुरः। पाणिनिना प्रोक्तम् अधीते वेद वा इत्यर्थे पाणिनिशब्दात्–

[1]तेन [2]प्रोक्तम् ॥४।३।१०१॥ ([3]इत्यर्थे विहिताः[4] प्रत्ययाः[5] [6]स्युः)

इति छ प्रत्यये छस्य ईयादेशे इकारलोपे सुपि पाणिनीयम् ततो वेदार्थस्याणो **'प्रोक्ताल्लुक्'** (४।२।६४) इति लुकि पाणिनीयश्छात्रः * । हृदयस्य इदम् विकारो वा इति विग्रहे हृदयशब्दात्–

*** पणोऽस्यास्तीति पणी पणिनोऽपत्यम् पाणिनः। गोत्र-पाणिनस्यापत्यम् पणिनो वा युवापत्यमिति पाणिनिः। 'अत इञ्' (४।१।९५) इति इञ् प्रत्ययः। ततः 'तेन प्रोक्तम्' (४।३।१०१) इति छप्रत्यये निष्पन्नपाणिनीयशब्दात् पाणिनीयमधीते वेद वा इत्यर्थे विहितस्याणः लुकि पाणिनीयः छात्रः। पाणिनीया छात्रा।**

[1]तस्ये[2]दम् ॥४।३।१२०॥ (इत्यर्थे [3]अण्) –

[1]तस्य विकारः[2] ॥४।३।१३४॥ (इत्यर्थे [3]अण्)

इति तत्तदर्थेऽणि **'हृदयस्य हृल्लेखयदण्लासेषु'** (६।३।५०) इति हृदादेशे आदिवृद्धौ हार्दम्। एवमेव भस्मनः इदं, विकारो वा इति विग्रहे अणि **'अनू'** (६।४।१६७) इति प्रकृतिभावे सुपि भास्मनम्। एवम् मार्तिकम्। पैप्पलम् (चूर्णम्) मौर्वः, पालाशः खादिरः इत्यादि।

गोश्च पुरीषे ॥४।३।१४५॥ (मयट्)

गोः पुरीषं गोमयम्। गोर्विकार इति विग्रहे गो शब्दात्–

गोपयसोर्यत् ॥४।३।१६०॥ (विकारेऽर्थे)

इति यति अनुबन्धलोपे –

वान्तो यिप्रत्यये ॥६।१।७९॥ (ओदौतोः)

इति अवादेशे गव्यम्। अक्षैर्दीव्यति खनति जयति जितं वा इति विग्रहे –

प्राग्वहतेष्ठक् ॥४।४।१॥ (इत्यधिकृत्य)

तेन दीव्यति खनति जयति जितम् ॥४।४।२॥ (ठक्)

इति ठकि तस्येकि प्रकृतिकार्य्ये आक्षिकशब्दात् सुपि आक्षिकम्। दध्ना संस्कृतम् इति विग्रहे दधिशब्दात्–

[2]संस्कृतम् ॥४।४।३॥ ([4]ठक् [1]तेन [3]इत्यर्थे)

इति ठकि तस्येकि आदिवृद्धौ सुपि दाधिकम्। नावा तरति इति विग्रहे नौशब्दात्–

[2]तरति ॥४।४।५॥ ([1]तेन [3]इत्यर्थे [4]ठक्)

इति ठकि ठस्येकादेशे आवादेशे नाविक-शब्दात् सुपि नाविकः। धर्म्मेण चरति। इति विग्रहे धर्मशब्दात्–

[2]चरति ॥४।४।८॥ (तेन[1] इत्यर्थे[3] ठक्[4])

इति ठकि प्रत्ययकार्य्ये सुपि धार्मिकः। अपूपाः पण्यमस्येति विग्रहे–

तदस्य पण्यम् ॥४।४।५१॥ (इत्यर्थे ठक्)

इति ठकि आदिवृद्धौ इकादेशे सुपि आपूपिकः।* मृदङ्गं शिल्पं यस्य इति विग्रहे मृदङ्गशब्दात्

[2]शिल्पम् ॥४।४।५५॥ ([4]ठक् [3]इत्यर्थे [1]तदस्य)

इति ठकि इकादेशे आदिवृद्धौ सुपि मार्दङ्गिकः। धनुः प्रहरणमस्येति विग्रहे धनुष्-शब्दात्–

[2]प्रहरणम् ॥४।४।५७॥ ([1]तदस्य [3]इत्यर्थे ठक्[4])

इति ठकि ठस्य **'इसुसुक्तान्तात्कः'** (७।३।५०) इति कादेशे आदिवृद्धौ सुपि धानुष्कः। अपूपम्† (अपूपभक्षणं) शीलमस्येति विग्रहे अपूपशब्दात्–

[2]शीलम् ॥४।४।६१॥ ([1]तदस्य [3]इत्यर्थे ठक्[4])

इति ठकि ठस्येकादेशे आदिवृद्धौ सुपि आपूपिकः। द्वारे नियुक्त इति विग्रहे द्वार शब्दात्–

तत्र नियुक्तः ॥४।४।६९॥ (इत्यर्थे ठक्)

इति ठकि तस्येकि 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' (७।३।३) इति ऐजागमे दौवारिकः।

---

* मृदङ्गशब्दो लाक्षणिकः। मृदङ्गं = मृदङ्गवादनम्।

† अपूपशब्दो लाक्षणिकः। अपूपम् = अपूपभक्षणम्।

अथ यदधिकारः

शरणे साधु इति विग्रहे शरणशब्दात् –

प्राग्घिताद्यत् ॥४।४।७५॥ (इति यतोऽधिकारः, तस्मै हितम् ॥५।१।५॥ इति यावत्)

तत्र साधुः ॥४।४।९८॥ (इत्यर्थे यत्)

इति यति **'यस्येति च'** (६।४।१४८) इत्यलोपे सुपि शरण्यः। एवम् सभ्यः, कर्मण्यः। साधुरिह योग्यः। वत्सेभ्यो हितम् इति विग्रहे वत्सशब्दात् –

प्राक् क्रीताच्छः ॥५।१।१॥ (इति छाधिकारः, तेन क्रीतम् ॥५।१।३७॥ इति यावत्)

तस्मै हितम् ॥५।१।५॥ (इत्यर्थे छः)

...ते छ प्रत्यये सुपो लुकि छस्य ईयादेशे अलोपे सुपि वत्सीयं दुग्धम्। दन्तेभ्यो हितम् इत्यर्थे दन्तशब्दात् –

[3]शरीरावयवाद्यत्[4] ॥५।१।६॥ ([1]तस्मै हितमित्यर्थे[2])

इति यति अलोपे दन्त्यम्। एवं कण्ठ्यम्, ओष्ठ्यम्, नासिकायै हितमित्यर्थे चतुर्थ्यन्तान्नासिकाशब्दात् यति सुपो लुकि **'नस् नासिकायाः'** (वा०) इति नसादेशे नस्यम्। हृदयाय हितमित्यर्थे हृदय-शब्दात् यति हृदादेशे हृद्यम्। आत्मने हितमित्यर्थे आत्मन् शब्दात् –

[3]आत्मन्विश्वजनभोगोत्तरपदात्खः[4] ॥५।१।९॥ ([1]तस्मै हितमित्यर्थे[2])

इति खप्रत्यये खस्य ईनि –

[1]आत्माध्वानौ खे[1] ॥६।४।१६९॥ ([3]प्रकृत्या)

इति प्रकृतिभावे सुपि आत्मनीनम्, विश्वजनीनम्, मातृभोगीणम्।

प्राग्वतेष्ठञ् ॥५।१।१८॥ (तेन तुल्यं क्रिया चेद्वतिः ॥५।१।११५॥ इत्यतः प्राक् ठञधिक्रियते)

सप्तत्या क्रीतम् इति विग्रहे तृतीयान्तात् सप्ततिशब्दात्

तेन क्रीतम् ॥५।१।३७॥ (तृतीयान्तात् क्रीतमित्यर्थे ठञ्)

इति ठञि प्रातिपदिकत्वात् सुपो लुकि आदि वृद्धौ ठस्येकादेशे **'यस्येति च'** (६।४।१४८) इतीकारलोपे साप्ततिकम् । पञ्च पादाः परिमाणमस्येत्यर्थे पञ्चन् शब्दात् –

पंक्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवति-शतम् ॥५।१।५९॥ (इमे निपात्यन्ते तदस्य परिमाणमित्यर्थे स्त्रीलिङ्गे एकत्वे च संख्यासंख्येय - वाचकाः)

इति निपातनात् ति प्रत्यये प्रकृतेष्टिलोपे चकारस्य कुत्वे अनुस्वारपरसवर्णयोः पङ्क्तिः (पञ्चाक्षरा पञ्चपादा पंक्तिः । इति छन्दसि ।) एवं द्वौ दशतौ परिमाणमस्य संघस्येति विग्रहे द्विदशत् शब्दात् शतिच् प्रत्यये अनुबन्धलोपे प्रकृतेर्विनूभावे अनुस्वारे सुपि विंशतिः । इत्यादि ।

दण्डमर्हति इत्यर्थे दण्डशब्दात् –

[1]तदर्हति[3] ॥५।१।६३॥ ([5]द्वितीयासमर्थात् [4]इत्यर्थे यथाविहितं प्रत्ययाः स्युः)

इत्यर्थाधिकारे –

दण्डादिभ्यो यत् ॥५।१।६६॥

इति यति प्रकृतिकार्य्ये च दण्ड्य इत्यादि । ब्राह्मणेन तुल्यम् इत्यर्थे तृतीयान्तात् ब्राह्मणशब्दात् –

[1]तेन [2]तुल्यं [3]क्रिया [4]चेद्वतिः[5] ॥५।१।११५॥

इति वति प्रातिपदिकत्वात्सुपो लुकि ततश्च ब्राह्मणवत् इत्यस्माच्छब्दादागतस्य सुपोऽव्ययत्वात् लुकि ब्राह्मणवद् वर्तते । पुत्रेण तुल्यं पुत्रवत् पश्यति च्छात्रम् इत्यादि । मथुरायामिवेति विग्रहे मथुराशब्दात् सप्तम्यन्तात् –

तत्र तस्येव ॥५।१।११६॥ (वतिः)

इति वति पूर्ववत् कार्ये मथुरावत् साकेते प्रासादाः । गोर्भाव इति विग्रहे गोशब्दात् –

तस्य भावस्त्वतलौ ॥५।१।११९॥

आ च त्वात् ॥५।१।१२०॥ (ब्रह्मणस्त्वः ॥५।१।१३६॥ इत्यन्तमधिकारः)

अपवादैः सह समावेशार्थम् वचनम् कर्मणि विधानार्थं च। चकारो नञ्स्नञ्भ्यामपि समावेशार्थम्।

इति त्वे गोत्वमित्यादि। तलि गोता * इत्यादि। एवम् घटत्वं घटता, लघुत्वं लघुता, पटुत्वं पटुता इत्यादि। पृथोर्भावः इति विग्रहे पृथुशब्दात्–

[1]पृथ्वादिभ्य इमनिज्वा[2] ॥५।१।१२२॥

(वा वचनम् अणाद्यर्थम्) इति इमनिचि –

[4]र ऋतो[3] हला[1]देर्लघोः[2] ॥६।४।१६१॥ (इष्ठेमेयस्सु[5])

(पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्) इति ऋकारस्य रकारादेशे प्रथु+इमन् इति स्थिते –

[1]टेः ॥ ६।४।१५५॥ ([2]लोपः इष्ठेमेयस्सु[3])

इति टिलोपे प्रथिमन् शब्दात् पदकार्ये प्रथिमा, एवं म्रदिमा, भ्रशिमा, क्रशिमा, द्रढिमा, परिव्रढिमेति।

इगन्ताच्च लघुपूर्वात् ॥५।१।१३१॥ (भावेऽण्)

इति अणि पार्थवम्। मार्दवम् इत्यादि। तलि पृथुता मृदुता त्वे च पृथुत्वम् मृदुत्वमित्यादि। शुक्लस्य भावः। इति विग्रहे शुक्लशब्दात्–

वर्णदृढादिभ्यः ष्यञ् च ॥५।१।१२३॥ (चादिमनिच्)

इति ष्यञि अनुबन्धलोपे ञित्त्वादादिवृद्धौ **'यस्येति च'** (६।४।१४८) अलोपे शौक्ल्यशब्दात् सुपि शौक्ल्यम् पक्षे शुक्लिमा शुक्लता शुक्लत्वम्। एवम् दार्ढ्यम् द्रढिमा दृढत्वम्। जडस्य भावः कर्म वा इति विग्रहे–

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥५।१।१२४॥ (ष्यञ् चाद्भावे)

इति ष्यञि अनुबन्धलोपे आदिवृद्धौ प्रातिपदिकत्वात् सुपि जाड्यम्। एवं मौढ्यम् ब्राह्मण्यम्। षो ङीषर्थः। उचितस्य भाव इति विग्रहे उचितशब्दात् ष्यञि आदिवृद्धौ अलोपे च कृते औचित्य इति जाते **'षिद्गौरादिभ्यश्च'** (४।१।४१) इति ङीषि–

हलस्तद्धितस्य ॥६।४।१५०॥ (यलोपे ईति)

---

* **त्वान्तं क्लीबम्, तलन्तं स्त्रियाम्।**

इति यलोपे औचिती। एवम् याथाकामी **(अर्हतो नुम् च)** इति नुमि आर्हन्ती। सख्युर्भावः कर्म वा इति विग्रहे सखिशब्दात्–

सख्युर्यः ॥५।१।१२६॥

इति यप्रत्यये इकारलोपे सुपि सख्यम्। सेनापतेर्भावः कर्म वा इति विग्रहे–

पत्यन्तपुरोहितादिभ्यो यक् ॥५।१।१२८॥

इति यकि आदिवृद्धौ सुपि सैनापत्यम्। एवम् पौरोहित्यम्। मुद्गानां भवनं क्षेत्रम् इत्यर्थे मुद्गशब्दात्–

धान्यानां भवने क्षेत्रे खञ् ॥५।२।१॥

इति खञि आदिवृद्धौ खस्य च ईनादेशे अलोपे मौद्गीनम्। एवं कौद्रवीणम् इत्यादि। तारकाः सञ्जाता अस्येति विग्रहे तारकाशब्दात्–

तदस्य सञ्जातं तारकादिभ्य इतच् ॥५।२।३६॥

इति इतचि आकारलोपे सुपि तारकितम्। एवम् पण्डा **सदसद्विवेकिनी** बुद्धिः सञ्जाता अस्येति पण्डितः। हस्तः प्रमाणमस्येति विग्रहे हस्तशब्दात्–

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥५।२।३७॥

इति मात्रचि अनुबन्धलोपे सुपि हस्तमात्रम्। एवम् जानुदघ्नम्। यत् परिमाणमस्य इति विग्रहे यद् शब्दात्–

यत्तदेतेभ्यः परिमाणे वतुप् ॥५।२।३९॥

इति वतुपि अनुबन्धलोपे यद्+वत् इत्यत्र–

[२]आ सर्वनाम्नः[१] ॥६।३।९१॥ ([३]दृग्दृशवतुषु)

इति आकारान्तादेशे पदकार्ये यावान्। एतावान्। स्त्रीलिङ्गे यावती। एतावतीत्यादि। इदं परिमाणम् अस्येति विग्रहे इदम् शब्दात्–

[१]किमिदंभ्यां [३]वो [४]घः ॥५।२।४०॥ ([२]वतुप्)

इति वतुपि अनुबन्धलोपे वकारस्य च घकारे तस्य इयादेशे इदम्+इयत् इति जाते–

[१]इदं किमोरीश्की[२] ॥६।३।९०॥ ([३]दृग्दृशवतुषु)

इति शित्त्वात् सर्वस्यैव इदमः ईशादेशे अनुबन्धलोपे **'यस्येति च'** (६।४।१४८) इति ईकारलोपे केवलप्रत्ययमात्रात् इयत् शब्दात् व्यपदेशिवद्भावमादाय प्रातिपदिकतया सुपि इयान्। स्त्रीलिङ्गे इयती। का संख्या एषां ते कति। इति विग्रहे किम् शब्दात्–

किमः संख्यापरिमाणे डति च ॥५।२।४१॥ (चाद्वतुप्)

इति डति

टे[३]: ॥६।४।१४३॥ (भस्य[२] लोपः[४] [१]डिति)

इत्यनेन टिलोपे कतिशब्दात् जसि तल्लुकि कति इत्यादि। किं परिमाणमस्येति विग्रहे वतुपि वस्य पूर्वसूत्रेण घकारे तस्येयादेशे किमः 'क' इत्यादेशे अकारलोपे कियत् शब्दात् सुपि कियान् इत्यादि। पञ्च अवयवा अस्येति विग्रहे पञ्चन् शब्दात् –

संख्याया अवयवे तयप् ॥५।२।४२॥

इति तयपि नलोपे सुपि पञ्चतयम्। चतुष्टयम्। द्वौ अवयवौ अस्येत्यर्थे द्विशब्दात् – तयपि तस्य च –

द्वित्रिभ्यां तयस्यायज्वा ॥५।२।४३॥

इति अयजादेशे अनुबन्धलोपे इकारलोपे स्वरसंयोगे सुपि द्वयम् पक्षे द्वितयम्। त्रयम् त्रितयम्। एकादशानां पूरणः इति विग्रहे एकादशन् शब्दात् –

तस्य पूरणे डट् ॥५।२।४८॥

इति डटि डित्त्वाट्टिलोपे सुपि एकादशः। स्त्रीलिङ्गे टित्त्वात् ङीपि एकादशी। पञ्चानाम् पूरण इत्यर्थे पञ्चन् शब्दात् डटि –

[२]नान्ता[१] दसंख्यादेर्मट्[४] ॥५।२।४९॥ ([३]डटः)

इति डटो मडादेशे नलोपे पञ्चमः। एवं सप्तमः। अष्टमः इत्यादि। चतुर्णां पूरण इत्यर्थे चतुर् शब्दात् डटि अनुबन्धलोपे चतुर्+अ इत्यत्र –

[१]षट्कतिकतिपयचतुरां [३]थुक् ॥५।२।५१॥ (डटि[२])

इति चतुरः थुगागमे अनुबन्धलोपे सुपि चतुर्थः। एवं कतिथः। ष्टुत्वे षष्ठः। द्वयोः पूरणमित्यर्थे द्विशब्दात् –

द्वेस्तीयः ॥५।२।५४॥ (तस्य पूरणे)

इति [illegible]त्यये द्वितीयम्।

त्रेः[१] [illegible]प्रसारणं[३] च ॥५।२।५५॥ ([२]तीयः तस्य[४] पूरणे[५])

इति त्रिशब्दस्य तीयप्रत्यये सम्प्रसारणे च तृतीयः। विंशतेः पूरण इत्यर्थे विंशति - शब्दात् –

विंशत्यादिभ्यः तमडन्यतरस्याम् ॥५।२।५६॥

इति तमटि विंशतितमः। पक्षे डटि–

ति विंशतेर्डिति ॥६।४।१४२॥ (लोपः भस्य)

इति भस्य तिशब्दस्य लोपे **'यस्येति च'** (६।४।१४८) इत्यलोपे सुपि विंशः। एवम् त्रिंशत्तमः। डटि टिलोपे त्रिंशः, चत्वारिंशः। इत्यादि। इति भवनार्थाः। गावोऽस्यास्मिन् वा सन्तीति विग्रहे गो शब्दात् –

तदस्यास्त्यस्मिन्निति मतुप् ॥५।२।९४॥

इति मतुपि गोमान्। स्त्रीलिंगे गोमती। धीमान्। धीमतीत्यादि।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः[1] ॥

भूमा बहुत्वम्– यथा गोमान्। यवमान् इत्यादि। निन्दायाम्–कुष्ठवान्, कपटी इत्यादि। प्रशंसायाम्–रूपवान् (अग्रेण वः) । प्रशस्ता विद्या अस्ति अस्यासौ इत्यत्र मतुपि–

*** मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥८।२।९॥**

इति मस्य वकारे सुपि विद्यावान्, किंवान्, लक्ष्मीवान्, यशस्वान्। तडिदस्यास्ति इति विग्रहे मतुपि अनुबन्धलोपे–

झयः ॥८।२।१०॥ (मतोर्वः)

इति मस्य वकारे –

तसौ मत्वर्थे ॥१।४।१९॥ (भम्)

इति भ संज्ञायाम् जश्त्वाभावे तडित्वान्, विद्युत्वान्, इत्यादि। दण्डोऽस्यास्तीति विग्रहे दण्डशब्दात् –

अत इनिठनौ ॥५।२।११५॥ (मत्वर्थे)

इति इनि प्रत्यये अलोपे पदकार्ये दण्डी। ठनि ठस्येकि दण्डिकः। एवं धनी, धनिकः इत्यादि। प्रशस्तं यशोऽस्यास्तीति विग्रहे 'यशस्' शब्दात् –

---

(१) आदिपदेन इनि ठन् विनि प्रभृतयः प्रत्ययाः। यथा–धनी, कपटी, धनिकः, मेधावी इत्यादयः।

* सूत्रवैशिष्ट्यं परिशिष्टे दृश्यम्।

अस्मायामेधास्रजो विनिः ॥५।२।१२१॥ (मत्वर्थे)

इति विनि प्रत्यये अनुबन्धलोपे यशस्विन्निति प्रातिपदिकात्स्वादौ यशस्वीत्यादि। प्रशस्ता वाक् अस्यास्तीति विग्रहे वाच् शब्दात् –

वाचो ग्मिनिः ॥५।२।१२४॥ (मत्वर्थे)

इति ग्मिनि प्रत्यये अनुबन्धलोपे कुत्वे जश्त्वे सुपि वाग्ग्मी। स्त्रीलिङ्गे वाग्ग्मिनी। कस्मादिति विग्रहे किम् शब्दात् पञ्चम्यन्तात् –

किंसर्वनामबहुभ्योऽ[1]द्व्यादिभ्यः[2] ॥५।३।२॥ ([3]प्राग्दिशः [4]प्रत्ययाः)

इत्यधिकारात् –

*** [2]पञ्चम्यास्तसिल्[3] ॥५।३।७॥ (किंसर्वनाम[1]बहुभ्यः)**

इति तसिल् प्रत्यये तद्धितत्वात् प्रातिपदिकसंज्ञायां **'सुपो धातुप्रातिपदिकयोः'** (२।४।७१) इति सुपो लुकि –

प्राग्दिशो विभक्तिः ॥५।३।१॥ (दिक्शब्देभ्यः सप्तमीपञ्चमी-प्रथमाभ्यो दिग्देशकालेष्वस्ताति: ॥५।३।२७॥ इत्यतः प्राक् सर्वे प्रत्यया विभक्तिसंज्ञकाः)

इति तसिलो विभक्तिसंज्ञायाम्(१) –

[2]कु[3]तिहोः ॥७।२।१०४॥ ([1]किमः)

इति क्वादेशे कृते निष्पन्नात् कुतः शब्दात् सुपि **'तद्धितश्चासर्वविभक्तिः'** (१।१।३८) इति अव्ययात्(२) सुपो लुकि कुतः। अस्मादिति विग्रहे पञ्चम्यन्तात् इदम् शब्दात् तसिलि सुपो लुकि –

---

* **पञ्चम्यन्तेभ्यः इत्यर्थः।**

(१) अस्मिन प्रकरणे 'दिक्शब्देभ्यः' (५।३।२७) इत्यादि सूत्रात् पूर्वं 'प्राग्दिशो विभक्तिः' (५।३।१) इत्यधिकारसूत्रादारभ्य ये तसिलादयः 'था हेतौ' (५।३।२६) इति सूत्रं यावत् प्रत्यया भविष्यन्ति तेषां विभक्तिसंज्ञा भविष्यति तेषु परेषु विभक्तिकार्याणि भविष्यन्ति।

(२) अत्र प्रकरणे 'तसिलादयः प्राक्पाशपः' इति परिगणनात् पाशप् प्रत्ययविधानसूत्रात्पूर्वं तसिल्प्रभृतयो ये प्रत्यया वक्ष्यन्ते तदन्तानां सर्वेषां शब्दानां 'तद्धितश्चासर्वविभक्तिः०' (१।१।३८) इत्यनेनाव्ययसंज्ञा, ततश्च सुपो लुक् भविष्यति।

[१]इदम् [२]इश् ॥५।३।३॥ ([३]प्राग्दिशीयेषु)

इति इशादेशे अनुबन्धलोपे इतस् शब्दात् सुपि तस्याव्ययत्वाल्लुकि इतः। एवम् एतद् शब्दात् तसिलि –

एतदोऽन् ॥५।३।५॥ (प्राग्दिशीये)

इति एतदः अनादेशे अनुबन्धलोपे अतस् इत्यतः समागतस्य सुपो लुकि–

अतः। एवम् तस्मादिति विग्रहे तसिलि सुपो लुकि त्यदाद्यत्वे ततस् शब्दात् सुपि तस्य लुकि ततः। एवं, यतः, अदसः तसिलि त्यदादिकार्ये, **'अदसोऽसेर्दादुदोमः'** (८।२।८०) इति मत्वोत्वे अमुतः, सर्वतः, विश्वतः, इत्यादि –

पर्य्यभिभ्यां च ॥५।३।९॥ (तसिल्)

परितः (सर्वतः) अभितः (उभयतः)। तस्मिन्निति विग्रहे सप्तम्यन्तात् तद् शब्दात् –

* सप्तम्यास्त्रल् ॥५।३।१०॥ (किंसर्वनामबहु०)

इति त्रलि सुपो लुकि त्रलो विभक्तिसंज्ञायाम् **'त्यदादीनामः'** (७।२।१०२) इति अत्वे पररूपे सुपो लुकि तत्र यत्र कुत्र बहुत्र। एवम् एतस्मिन्निति विग्रहे त्रलि, एतदोऽनि, अनुबन्धलोपे अत्र। अस्मिन्निति विग्रहे –

इद[१]मो [३]हः ॥५।३।११॥ (सप्तम्याः[२] प्राग्दिशीये[४])

इति ह प्रत्यये **'इदम् इश्'** (५।३।३) इति इशादेशे अनुबन्धलोपे इहशब्दात् सुपि तस्य लुकि इह। कस्मिन्निति विग्रहे सप्तम्यन्तात् किम् शब्दात् –

कि[१]मोऽत् ॥५।३।१२॥ ([२]सप्तम्याः)

इति अति सुपो लुकि किम्+अत् इति जाते –

[२]क्वाति[३] ॥७।२।१०५॥ (किमः[१] विभक्तौ[४])

इति क्वादेशे **'यस्येति च'** (६।४।१४८) इत्यलोपे तलोपे सुपि तस्य लुकि क्व पक्षे त्रलि **'कु तिहोः'** (७।२।१०४) इति क्वादेशे कुत्र। सर्वस्मिन् काले इति विग्रहे सप्तम्यन्तात् सर्वशब्दात् –

[२]सर्वैकान्यकिंयत्तदः [३]काले दा[४] ॥५।३।१५॥ ([१]सप्तम्याः)

इति दाप्रत्यये सुपो लुकि –

---

* **सप्तम्यन्तेभ्य इत्यर्थः। सर्वत्रैव विषये अन्तशब्दप्रयोगो ज्ञेयः।**

[1]सर्वस्य [2]सोऽन्यतरस्यां[5] दि[4] ॥५।३।६॥ ([3]प्राग्दिशीये)

इति सादेशे अव्ययत्वासुपो लुकि सदा। पक्षे सर्वदा। एवम् एकदा अन्यदा यदा, तदा **'किमः कः'** (७।२।१०३) इति कादेशे कदा। काले किम्-सर्वत्र देशे। अस्मिन् काले इति विग्रहे सप्तम्यन्तात् इदम् शब्दात्-

[2]इदमोर्हिल्[4] ॥५।३।१६॥ ([1]सप्तम्याः [3]काले)

इति र्हिलि सुपो लुकि -

[2]एतेतौ रथोः[3] ॥५।३।४॥ ([1]इदमः प्राग्दिशीययोः[4])

इति एतादेशे सुपि तस्य लुकि एतर्हि। काले किम्-इह देशे। अस्मिन् काले इति विग्रहे सप्तम्यन्तात् इदम् शब्दात्-

[4]अधुना ॥५।३।१७॥ ([2]इदमः सप्तम्याः[1], [3]काले)

इति अधुना प्रत्यये **'इदम् इश्'** (५।३।३) इति शित्त्वात् सर्वस्य इदम इशादेशे इ+अधुना इत्यत्र **'यस्येति च'** (६।४।१४८) इति इ लोपे केवलात् अधुनेति प्रत्ययमात्रात् व्यपदेशिवद्भावमादाय प्रातिपदिकत्वात् सुपि तस्य लुकि * अधुना।

[4]दानीं च ॥५।३।१८॥ ([1]इदमः [2]सप्तम्यन्तात् काले[3])

इति दानीम् प्रत्यये इदमश्चेशादेशे इदानीम्।

[1]तदो दा[4] च[6] ॥५।३।१९॥ ([2]सप्तम्यन्तात् [3]काले [5]दानीम्)

तस्मिन् काले इति विग्रहे तदा तदानीम्। कस्मिन् काले इति विग्रहे किम् शब्दात् सप्तम्यन्तात्-

[5]अनद्यतने [4]र्हिलन्यतरस्या[6]म् ॥५।३।२१॥ ([1]सप्तम्याः [2]किं सर्वनामबहुभ्यः काले[3])

इति र्हिलि तस्य विभक्तित्वात् **'किमः कः'** (७।२।१०३) इति कादेशे कर्हि, यर्हि, तर्हि। एतस्मिन्निति विग्रहे एतर्हि त्यदाद्यत्वे रूपम्। समाने अहनि इत्यर्थे -

---

*** उदितवति परस्मिन् प्रत्यये शास्त्र-योनौ**
गतवति विलयञ्च प्राकृतेऽपि प्रपञ्चे।
सपदि पदमुदीतं केवलः प्रत्ययो यत्
तदियदिति मिमीते कोऽधुना पण्डितोऽपि॥

[५]सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥५।३।२२॥ (निपात्यन्ते अव्ययानि)

इति समानस्य सादेशे द्यस् प्रत्यये च कृते सद्य इति रूपं निष्पद्यते। एवं पूर्वस्मिन् वर्षे इत्यर्थे पूर्वशब्दस्य परादेशे उत् प्रत्यये च परुदिदि निष्पन्नं भवति। पूर्वशब्दस्य परादेशे आरि प्रत्यये च कृते परारि इति सम्पद्यते। अस्मिन् वर्षे इत्यर्थे इदम इशादेशे समसण् प्रत्यये अनुबन्धलोपे इसमस् इति जाते णित्त्वादादिवृद्धौ मूर्धन्यादेशे रुत्वविसर्गे ऐषमः इति सिद्ध्यति। परस्मिन् अहनि इत्यर्थे परशब्दात् 'एद्यवि' प्रत्यये परेद्यवि इति जायते। अस्मिन् अहनि इत्यर्थे इदमः अर्शादेशे 'द्य' प्रत्यये अद्य इति सिद्ध्यति। एवमेवावशिष्टेषु पूर्वेद्युप्रभृतिशब्देषु **'एद्युस्'** प्रत्यये कृते पूर्वेद्युरन्येद्युरन्यतरेद्युरित्याद्यव्ययशब्दसिद्धिः। तेन प्रकारेण इति विग्रहे तृतीयान्तात् तद् शब्दात् –

[१]प्रकारवचने [३]थाल् ॥५।३।२३॥ ([२]किमादिभ्यः)

इति थालि सुपो लुकि त्यदाद्यत्वे तथेति प्रातिपदिकात् सुपि तस्य अव्ययत्वात् लुकि तथा। एवम् यथा, सर्वथा, उभयथा, अमुथा। अनेन प्रकारेण इति विग्रहे इदमस्तृतीयान्तात् थालमपवाद्य –

[१]इदमस्थमुः ॥५।३।२४॥ ([२]प्रकारवचने)

इति थमु प्रत्यये अनुबन्धलोपे **'एतेतौ रथोः'** (५।३।४) इति इदमः इदादेशे सुपि तस्याव्ययत्वात् लुकि इत्थम्। एवम् केन प्रकारेणेत्यर्थे तृतीयान्तात् किम्शब्दात् –

[२]किमश्च ॥५।३।२५॥ ([१]प्रकारवचने थालोऽपवादको [३]थमुः)

इति थमु प्रत्यये **'किमः कः'** (७।२।१०३) इति कादेशे सुपि तस्याव्ययत्वात् लुकि कथम् इत्यादि। एकः प्रकारो यस्याः सा क्रिया इति विग्रहे एकशब्दात् प्रथमान्तात् प्रकारेऽर्थे –

संख्याया विधार्थे धा ॥५।३।४२॥

इति धा प्रत्यये सुपो लुकि एकधाशब्दात् प्रातिपदिकत्वात् सुपि तस्य अव्ययत्वात् लुकि एकधा। एवम् द्विधा, त्रिधा चतुर्धा पञ्चधा इत्यादि। अयमेषामतिशयेन आढ्य इति विग्रहे प्रथमान्तात् आढ्यशब्दात् –

अतिशायने तमबिष्ठनौ ॥५।३।५५॥

इति तमपि सुपो लुकि अनुबन्धलोपे सुपि आढ्यतमः। एवम् लघुतमः–

अजादी गुणवचनादेव ॥५।३।५८॥ (अतिशायने)

इति नियमात् लघुशब्दादिष्ठनि **'टेः'** (६।४।१५५) इति टिलोपे लघिष्ठः। अतिशयेन पचतीति विग्रहे पचति इति तिङन्तात् –

[1]तिङश्च ॥५।३।५६॥ ([2]अतिशायने [3]तमप्)

इति तमपि अनुबन्धलोपे पचतितम इति जाते।

तरप्तमपौ घः ॥१।१।२२॥

इति तमपो घ संज्ञायाम् –

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥५।४।११॥

इति आमि दीर्घे पचतितमाम्। एवम् पठतितमाम् इत्यादि तिङन्तमात्रे ज्ञेयम्। अयमनयोरतिशयेनाढ्य इति विग्रहे प्रथमान्तात् आढ्यशब्दात् –

द्विवचनविभज्यो[1]पपदे [2]तरबीयसुनौ ॥५।३।५७॥ ([3]प्रातिपदिकात् [4]तिङन्ताच्चातिशायने)

इति तरपि सुपो लुकि अनुबन्धलोपे सुपि आढ्यतरः। एवम् लघुतरः। पचतितराम्। पठतितराम्। ईयसुनि टिलोपे लघीयान्। पटुतरः। पटीयान्, अयमनयोरेषां वा प्रशस्य इति प्रशस्यतरः प्रशस्यतमः। ईयसुनि इष्ठनि अस्यैव तु सुपो लुकि –

प्रशस्यस्य श्रः ॥५।३।६०॥ (अजाद्योः)

इति श्रादेशे अकारलोपं बाधित्वा –

[1]प्रकृत्यैकाच् ॥६।४।१६३॥ (इष्ठेमेयस्सु)

इति प्रकृतिभावे गुणे प्रातिपदिकत्वात् सुपि श्रेयान्, श्रेष्ठः।

[2]ज्य च ॥५।३।६१॥ ([1]प्रशस्यस्य [3]अजाद्योः)

इत्यनेन ज्यादेशे ज्य+ईयस् इत्यत्र –

ज्यादादीयसः ॥६।४।१६०॥ (ज्याद् ईयसः आद् भवति)

इति **'आदेः परस्य'** (१।१।५४) इति नियमादीकारस्याकारे ततो दीर्घे ज्यायस् इति प्रातिपदिकात् सुपि ज्यायान्। वृद्धशब्दस्यापि ईयसुनि इष्ठनि च –

वृद्धस्य च ॥५।३।६२॥ (ज्यः अजाद्योः)

इति ज्यादेशे ज्यायान्, ज्येष्ठ इति पूर्ववद्रूपे भवतः। अयमनयोरेषां वा अतिशयेन युवा इति विग्रहे प्रथमान्तात् युवन् शब्दात् ईयसुनि इष्ठनि च सुपो लुकि –

युवाल्पयोः कनन्यतरस्याम् ॥५।३।६४॥

इति कनादेशे कनीयस् कनिष्ठ इति प्रातिपदिकाभ्यां सुपि कनीयान्, कनिष्ठ इति। पक्षे –

[1]स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि[2]परं पूर्वस्य[4]च [5]गुणः ॥६।४।१५६॥ ([3]लुप्यते [6]इष्ठेमेयस्सु)।

इति युवन् शब्दस्य वनो लोपे उकारस्य च गुणेऽवि यवीयस् यविष्ठ इति प्रातिपदिकाभ्यां सुपि यवीयान्, यविष्ठः। एवं स्थवीयान्, स्थविष्ठः, दवीयान्, दविष्ठः। ह्रसीयान्, ह्रसिष्ठः। क्षेपीयान्, क्षेपिष्ठः। क्षोदीयान्, क्षोदिष्ठः। ह्रस्वक्षिप्रक्षुद्रादीनां पृथ्वादित्वादिमनिचि ह्रसिमा। क्षेपिमा। क्षोदिमेत्यादीन्यपि रूपाणि। अयमनयोरेषां वातिशयेन प्रिय इति विग्रहे प्रियशब्दात् प्रथमान्तात् ईयसुनि इष्ठनि च सुपो लुकि अनुबन्धलोपे च –

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां[1] प्रस्थस्फवर्बंहिगर्वर्षिवृन्दाः[3] ॥६।४।१५७॥ ([1]इष्ठेमेयस्सु)

इति प्रियस्य प्रादेशे गुणे प्रेयस् प्रेष्ठ इति प्रातिपदिकाभ्यां सुपि प्रेयान्, प्रेष्ठः। एवम् स्थेयान्, स्थेष्ठः। स्फेयान्, स्फेष्ठः। वरीयान्, वरिष्ठः। बंहीयान्, बंहिष्ठः। गरीयान्, गरिष्ठः। वर्षीयान्, वर्षिष्ठः। त्रपीयान्, त्रपिष्ठः। द्राघीयान्, द्राघिष्ठः इत्यादि। **'प्रियोरुबहुलगुरुदीर्घाणां'** पृथ्वादित्वात् इमनिचि प्रेमा, वरिमा, बंहिमा, गरिमा द्राघिमा इत्यादि। अयमनयोरेषां वा अतिशयेन अन्तिक इति विग्रहे अन्तिकशब्दात् ईयसुनि इष्ठनि च सुपो लुकि –

अन्तिकबाढयोर्नेदसाधौ ॥५।३।६३॥ (अजाद्योः)

इति 'अन्तिक' शब्दस्य नेदादेशे नेदीयस् नेदिष्ठ इति प्रातिपदिकाभ्यां सुपि नेदीयान् नेदिष्ठः। एवं बाढशब्दस्य **साधीयान्**, साधिष्ठः। अयमनयोरेषां वा अतिशयेन स्रग्वी इति विग्रहे स्रग्विन् शब्दात् प्रथमान्तात् ईयसुनि इष्ठनि च कृते सुलोपे अनुबन्धलोपे

विन्मतोर्लुक् ॥५।३।६५॥ (अजाद्योः)

इति विनो लुकि **'प्रकृत्यैकाच्'** (६।४।६३) इति प्रकृतिभावेन **'टेः'** (६।४।१५५) इति टिलोपाभावे – स्रजीयस् स्रजिष्ठ इति प्रातिपदिकाभ्यां सुपि स्रजीयान्, स्रजिष्ठः।

एवमनयोरेषां वा अतिशयेन त्वग्वान् इति विग्रहे त्वचीयान्, त्वचिष्ठः इत्यादि विन्मतुपोः लुकि रूपं ज्ञेयम्। प्रशस्तः पटुः इति विग्रहे प्रथमान्तात् पटु शब्दात् –

प्रशंसायां रूपप् ॥५।३।६६॥ (सुप्तिङ्भ्याम्)

इति रूपप् प्रत्यये सुपो लुकि अनुबन्धलोपे पटुरूप इति प्रातिपदिकात् सुपि पटुरूपः। एवं तिङन्तादपि प्रशस्तं पचतीति पचतिरूपम्। ईषदूनो विद्वान् इति विग्रहे प्रथमान्तात् विद्वच्छब्दात् –

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥५।३।६७॥

इति कल्पप् प्रत्यये सुपो लुकि अनुबन्धलोपे **'वसुस्रंसुध्वंस्वनडुहां दः'** (८।२।७२) इति सस्य दत्वे चर्त्वे च कृते प्रातिपदिकत्वात् सुपि विद्वत्कल्पः। एवं विद्वद्देश्यः विद्वद्देशीयः। एवं तिङन्तादपि ईषदूनं पचति इति विग्रहे, पचतिकल्पम्, पचतिदेश्यम्, पचतिदेशीयम्। अपरिसमाप्ता असम्पूर्णा पाकक्रियेति यावत् –

प्रागिवात्कः ॥५।३।७०॥ ('इवे प्रतिकृतौ' ॥५।३।९६॥ इत्यतः प्राक् काधिकारः)

कस्यायमश्व इति विग्रहे प्रथमान्तात् अश्वशब्दात् –

अज्ञाते ॥५।३।७३॥ (कः)

इति क प्रत्यये सुपो लुकि प्रातिपदिकादश्वकशब्दात् सौ अश्वकः। एवं कुत्सितोऽश्वोऽश्वकः। इत्यत्रापि प्रथमान्तादश्वेति प्रातिपदिकात् –

कुत्सिते ॥५।३।७४॥ (कः)

इति क प्रत्यये सुपो लुकि सौ अश्वकः। इत्यादि। उच्चैरेव इति विग्रहे –

[1]अव्ययसर्वनाम्ना[6]मकच् [5]प्राक् टेः[4] ॥५।३।७१॥ ([2]तिङश्च [3]प्रागिवीयेष्वर्थेषु)

इति ऐकारात्पूर्वम् अकचि अनुबन्धलोपे प्रातिपदिकत्वात् सुपि तस्याव्ययत्वाल्लुकि उच्चकैः। एवं नीचकैः। सर्वकः। इत्यादि। **"ओकारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् अन्यत्र तु सुबन्तस्य टेः प्रागकच्"** इति नियमात् युष्मदस्मद् शब्दात् ओसि टेः प्रागकचि युष्मकद् ओस् अस्मकद् ओस् इति जाते म-पर्य्यन्तयोः तयोः युवावादेशे युवकद् ओस् आवकद् ओस् इत्यत्र **'योऽचि'** (७।२।८९) इति दस्य यकारे रुत्वविसर्गयोः युवकयोः, आवकयोः। एवम् युष्मकासु। अस्मकासु। युष्मकाभिः, अस्मकाभिः। युवकाभ्याम्, आवकाभ्याम् इत्यादि। अन्यत्र त्वया, मया इत्यत्र सुबन्तस्य पदस्य टेः प्राक्

अकचि त्वयका, मयका इति । तिङन्ततस्तु पचतकि पठतकि इत्यादि । अश्व इव प्रतिकृतिः (प्रतिरूपकम्) इति विग्रहे –

अवक्षेपणे कन् ॥५।३।९५॥

इति कनोऽनुवृत्तौ –

* इवे प्रतिकृतौ ॥५।३।९६॥ (कन्)

इति अश्वशब्दात् कन् प्रत्यये सुपो लुकि अनुबन्धलोपे सुपि अश्वकः। मृदादिनिर्मिता प्रतिमा प्रतिकृतिः। (**'प्रतिकृतेः स्त्रीत्वेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते'** इति पुलिंङ्गत्वम् ।) पञ्च वारान् भुंक्ते करोति वा इत्यर्थे पञ्चन् शब्दात् द्वितीयान्तात् –

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥५।४।१७॥

इति कृत्वसुच् प्रत्यये सुपो लुकि अनुबन्धलोपे नलोपे पञ्चकृत्वस् शब्दात् सुपि तस्य च अव्ययत्वाल्लुकि पञ्चकृत्वः। एवम् षट्कृत्वः। सप्तकृत्वः। इत्यादि । द्विवारं भुंक्ते करोति वा इत्यादौ तु द्विशब्दात् –

[२]द्वित्रिचतुर्भ्यः सुच्[३] ॥५।४।१८॥ ([१]क्रियाभ्यावृत्तिगणने)

इति सुचि अनुबन्धलोपे तद्धितान्तत्वेन प्रादिपदिकत्वात् सुपि तल्लुकि द्विः। एवं त्रिः, चतुः **'रात्सस्य'** (८।२।२४) इति सलोपः। एकवारं भुंक्ते पचति वा इत्यर्थे एकशब्दात् –

एकस्य सकृच्च ॥५।४।१९॥ (सुच्)

इति सुचि सकृदादेशे च अनुबन्धलोपे संयोगान्तलोपे प्रातिपदिकत्वात् सुपि अव्ययत्वात् लुकि सकृद् भुंक्ते पचति वा। प्राचुर्य्येण प्रस्तुतम् अन्नम् इति विग्रहे प्रथमान्ताद् अन्नशब्दात् –

* तत्प्रकृतवचने मयट् ॥५।४।२१॥ (भावे अधिकरणे च)

*** इवे उपमानत्ववति वर्तमानात् प्रातिपदिकात् प्रथमान्तात् प्रतिकृतौ प्रकृतिभूते उपमेये कन् प्रत्ययो भवति। तदुपमेयं सा प्रतिकृतिश्चेदित्यर्थः।**

*** बहुलतया उपस्थितः प्रकृतशब्दार्थः तस्य वचने बोधने, तदधिकरणे च मयट् प्रत्ययो भवतीत्यर्थः। अत्र 'वचन'शब्दो भावेऽर्थेऽधिकरणेऽर्थे च ल्युटि कृते सिध्यति तेनोभयोऽर्थः सूच्यते ।**

इति मयटि सुपो लुकि अनुबन्धलोपे सुपि अन्नमयम् वर्तते। प्रचुरमन्नमस्तीत्यर्थः। यवागूमयम्। अपूपमयं वर्तते। अधिकरणेऽर्थे प्रचुरा अपूपा अस्मिन्निति विग्रहे **'प्राचुर्यविशेषणकापूपाधिकरणेऽर्थे'** मयटि कृते सुपो लुकि अनुबन्धलोपे सुपि विशेष्यनिघ्नतया अपूपमयो यज्ञः अपूपमयं पर्व इत्यादि। प्रज्ञ एव इति विग्रहे प्रथमान्तात् प्रज्ञशब्दात् स्वार्थे –

प्रज्ञादिभ्यश्च ॥५।४।३८॥ (अण् स्वार्थे)

इत्यणि सुपो लुकि आदिवृद्धौ अकारलोपे स्वरसंयोगे प्रातिपदिकत्वात्सुपि प्राज्ञः, स्त्रीलिङ्गे **'टिड्ढा०'** (४।१।१५) इति ङीपि प्राज्ञी। एवम् दैवतः बान्धवः। बहूनि ददाति इति विग्रहे द्वितीयान्तात् बहुशब्दात् –

बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् ॥५।४।४२॥

इति शसि प्रातिपदिकत्वात् सुपि तस्य अव्ययत्वाल्लुकि बहुशः। एवमल्पशः। द्वौ द्वौ ददाति इति विग्रहे वीप्सार्थे द्विशब्दात् द्वितीयान्तात् –

* संख्यैकवचनाच्च वीप्सायाम् ॥५।४।४३॥ (शस्)

इति शसि प्रादिपदिकत्वात् सुपि तस्याव्ययत्वाल्लुकि द्विशः। एवं त्रिशः, चतुश्शः, पञ्चशः, षट्छः इत्यादि। एकवचनादपि - कार्षापणं ददाति कार्षापणशः, माषशः, पादशः इत्यादि। ग्रामादागच्छति इति विग्रहे पञ्चम्यन्ताद् ग्रामशब्दात् –

प्रतियोगे पञ्चम्यास्तसिः ॥५।४।४४॥

इत्यतः पञ्चम्यास्तसिरित्यनुवृत्तौ –

अपादाने चाहीयरुहोः ॥५।४।४५॥ (पञ्चम्याः तसिः)

इति तसि प्रत्यये अनुबन्धलोपे अव्ययत्वात्सुपो लुकि ग्रामतः। एवं नगरतो वृक्षतः। इत्यादि। आदौ इति विग्रहे आदि शब्दात् सप्तम्यन्तात्।

आद्यादिभ्यस्तसेरुपसंख्यानम् (सार्वविभक्तिकोऽयं तसिः)

इति तसि प्रत्यये सुपो लुकि अनुबन्धलोपे सुपि तल्लुकि च आदितः। एवं मध्यतः स्वरतः, वर्णतः **(आकृतिगणोऽयम्)**। अकृष्णः कृष्णः सम्पद्यते इति विग्रहे प्रथमान्तात् कृष्ण शब्दात् –

*** एकार्थो येनोच्यते स इह एकवचनार्थः। एकार्थवाची परिमाण इत्यर्थः। संख्या च एकवचनं च तयोः समाहारः संख्यैकवचनम् तस्माद् इति समाहारद्वन्द्वः।**

कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ॥५।४।५०॥ (अभूततद्भावे वक्तव्यम्)

इति च्वि प्रत्यये सुपो लुकि। कृष्ण + च्वि + भवति इत्यत्र –

अस्य च्वौ ॥७।४।३२॥ (ईत्)

इति कृष्णाकारस्येकारे च्वेः सर्वथा लोपे – च्वि डाच् प्रभृतीनां

प्राग्रीश्वरान्निपाताः ॥१।४।५६॥

इति निपाताधिकारे गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिः सह निपातसंज्ञायाः समावेशात् अव्ययत्वम्।

कृष्णीभवति। एवम् शुक्लीभवति। श्वेतीकरोति। पण्डितीभवतीत्यादि। अशुचिः शुचिः सम्पद्यते इति विग्रहे **'कृभ्वस्ति०'** (५।४।५०) इति च्वौ –

च्वौ च ॥७।४।२६॥ (अचः दीर्घः)

इति दीर्घे शुचीभवति, एवं लघूभवति, पटूस्यात्। कृत्स्नं शस्त्रम् अग्निः सम्पद्यते इति विग्रहे अग्निशब्दात् प्रथमान्तात् –

विभाषा साति कात्स्न्र्ये ॥५।४।५२॥ (अभूताद्यर्थे)

इति साति प्रत्यये सुपो लुकि अनुबन्धलोपे अग्निसात् इत्यस्य –

सात्पदाद्योः ॥८।३।१११॥

इति षत्वनिषेधे जश्त्वे च अग्निसाद् भवति। पटत् पटत् करोति इति विग्रहे –

'डाचि विवक्षिते द्वे बहुलम्' (५।४।५७ वा०)

द्विरुच्चारितात् पटत् पटत् शब्दात् –

अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच् ॥५।४।५७॥

इति डाचि अनुबन्धलोपे टिलोपे पटत् पटाकरोतीत्यवस्थायाम्।

[४]नित्यमा[२]म्रेडिते [१]डाचि ॥६।१।१००॥ ([५]एकं पूर्वपरयोः[३] पररूपम्[६])

इति डाच्परके आम्रेडिते परे पूर्व-पटत्-तकारस्य परपटापकारस्य चेत्युभयोः पकाररूपे जाते पटपटाकरोति, खटखटाकरोति।

अथ द्विरुक्तप्रकरणम्

पौनः पुन्येऽर्थे लोके पदं द्विः प्रयुज्यते । तस्य सिद्धिं ब्रूते –

सर्वस्य द्वे ॥८।१।१॥ (अधिकारात्)

वीप्सार्थविवक्षायाम् –

नित्यवीप्सयोः ॥८।१।४॥ (सर्वस्य द्वे)

इति पचतीत्यस्य द्वित्वे पचति पचति । एवम् वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः । भुक्त्वा भुक्त्वा गतः । इत्यादि । सुन्दर इत्येकमात्रस्य –

वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ॥८।१।८॥ (द्वे भवतः)

इत्यनेन असूयायाम् द्वित्वे सुन्दर सुन्दर वृथा ते सौन्दर्यम् । सम्मतौ – देश देश वन्द्योऽसि । कोपे – मूर्ख मूर्ख तूष्णीं भव । कुत्सने – पण्डित पण्डित वृथा ते पाण्डित्यम् । जल्प जल्प पश्यामि ते जल्पनम् । **'सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकप्रयोगो न्यायसिद्धः'** आचार्य आगतः आचार्य आगतः प्रणम प्रणम, गोपि ! गोपि ! कृष्णः कृष्णः । शङ्करः शङ्करः, तं पश्य इत्यादि । द्वे द्वे इति विग्रहे –

द्वन्द्वं रहस्यमर्य्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥८।१।१५॥ (द्वित्वं पूर्वस्याम् उत्तरस्यात्वं नपुंसकत्वञ्च)

इति द्विशब्दस्य द्विर्वचने पूर्वपदस्य अम्भावे उत्तरपदस्य अत्वे नपुंसकत्वे च निपातिते द्वन्द्वम् इति सिध्यति । द्वन्द्वं मन्त्रयते । **'द्वन्द्वम्'** इति योगविभागात् अन्यत्रापि । द्वन्द्वानि सहते । शीतोष्णमेकं द्वन्द्वम् । सुखदुःखञ्च परम् । **'चार्थे द्वन्द्वः'** (२।२।२९) इत्यादि ज्ञेयमेवम् – तत्र सौत्रम् पुंस्त्वम् ।

॥ इति पूर्वार्द्धम् ॥

पूर्वार्द्धे प्रश्नप्रकारः

१. के वर्णा घोषप्रयत्नाः ? के चाघोषाः ? केऽल्पप्राणाः ? के च महाप्राणाः ? इत्युल्लिख्य अधस्तनेषु केषुचित् सप्तस्वेव ससूत्रोल्लेखं सन्धिकार्यं दर्शयत् । १५

वेदाध्ययनम् । देवर्णम् । एकैकम् । हरेऽव । वाग्घरिः । प्रत्यङ्ङात्मा । त्वङ्कुरोषि । रामोऽर्च्यः । पुनारमते ।

२. रामाय, सखा, कर्ता, पन्थाः, प्राङ्, दध्ना, तुभ्यम्, इयम्, पञ्च, स्वः । एतेषु पञ्चैव ससूत्रोल्लेखं संसाध्य 'गन्तृ', दण्डिन्, इन्द्र, दाक्षि, युवन्' एतेषु केषांचित् पञ्चानामेव स्त्रीलिङ्ग-स्वरूपं लिखत । १५

३. अधस्तनेषु वाक्येषु केषाञ्चन पञ्चानां विभक्तिविधायकानि सूत्राणि लिखत – १५

हे राजेन्द्रप्रसाद प्रथमराष्ट्रपते ! महात्मागान्धी भारतमातृमन्दिरम् उद्घाटितवान् । सुभाषः पाश्चात्यान् जयति ब्रह्मदेशम् । भारतीयैरसहयोगेन स्वराज्यमुपलब्धम् । ऋते नेहरुं को गौरण्डनीतिमर्मवित् ।

४. तत्पुरुष-बहुव्रीहि-द्वन्द्व – समासानामेकैकमुदाहरणं सविग्रहं दर्शयित्वा राघवः । द्वैमातुरः । युष्मदीयः । श्वस्तनम् । ब्राह्मणवत् । धीमान् । तर्हि । स्रजिष्ठः । बहुशः । एषु पञ्चस्वेव केषुचित् तद्धितविधिं सविशेष-सूत्रोल्लेखं दर्शयत । १५

॥ ॐ श्रीकृष्णः शरणम्मम ॥

पाणिनीयप्रबोधः

(उत्तरार्धे)

तिङन्तप्रकरणे (भ्वादयः परस्मैपदिनः)

* मङ्गलाचरणम् *

नौरोजी - लोकमान्यप्रभृतिनरवरैर्गान्धि - बोसादिभिस्तैः
कांग्रेसान्दोलनेन ध्रुवमधिगमिते भारतीये स्वराज्ये।
श्रीगोपालोपनद्धः सरलसुरगिरा मालवीयोपदिष्टः
सम्पूर्णान्द-शिष्टश्चिरमिह जयतात् पाणिनीयप्रबोधः॥

तिङ् अन्ते येषां तानि तिङन्तानि, तेषां प्रकरणम् तिङन्तप्रकरणम्। तिङन्तम्, आख्यातम्, क्रियापदञ्चेति पर्यायशब्दाः। तिपः 'ति' इत्यत आरभ्य महिङः 'ङ्' पर्यन्ताः 'तिङ्' प्रत्यया अष्टादशाग्रे वक्ष्यन्ते। इमे धातुभ्यः परे प्रयुज्यन्ते। धातवो हि पाणिनिमहर्षिणा भ्वाद्यादिषु दशसु धातुगणेषु पठिताः। कियन्तः सौत्राः कियन्तः पारिभाषिकाश्च।

भूवादयो धातवः॥१।३।१॥ सनाद्यन्ता धातवः॥३।१।३२॥

इति सूत्राभ्यां स्वयं तेनैव सूचिताः सन्तिः। तत्र प्रायेण सहस्रद्वय–(२०००) संख्याका गणधातवो भवन्ति। सौत्राणां पारिभाषिकाणां (सनाद्यन्तधातूनां) च सङ्कलनया असंख्या धातवो भवितुमर्हन्ति। ते च परस्मैपदिन आत्मनेपदिन उभयपदिन इति त्रिविधाः सन्ति। तेष्वपि सेट्, अनिट्, वेट् इति त्रयो भेदा भवन्ति। तेषां सर्वेषामपि गणधातूनां दश प्रकरणानि सन्ति। तथा हि–

भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च।
तुदुधादी तनुक्रन्यादी चुरादिश्चेति धातवः॥

इत्येते दशविधा धातवः पाणिनिना गणभेदेन धातुपाठप्रकरणे पठिताः। तत्रासति विशेषे सर्वधातुभ्यः शब्विकरणं जायते! **(प्रकृतिप्रत्यययोर्मध्ये पतितं विकरणमुच्यते)**

अदादिभ्यः तस्य लुक्, जुहोत्यादिभ्यः तस्य श्लुः भवति। कार्य्यविशेषकृते लुक्, श्लु लुप्, इत्यादिनामभिः प्रत्ययानामभाव एव सूच्यते। अग्रिमेषु गणेषु शब्बाधकानि श्यन्-प्रभृतीनि विकरणानि जायन्ते। **तद्यथा 'दिवादिभ्यः श्यन्'** (३।१।६९) **'स्वादिभ्यः श्नुः'** (३।१।७३) **'तुदादिभ्यः शः'** (३।१।७७) **'रुधादिभ्यः श्नम्'** (३।१।७८) **'तनादिकृञ्भ्य उः'** (३।१।७९) **'क्र्यादिभ्यः श्ना'** (३।१।८१) इति। **चुरादिभ्यस्तु स्वार्थे णिचि** कृते पूर्वोक्तात् **'सनाद्यन्ता धातवः'** (३।१।३२) इति सूत्रबलाद् णिजन्तपारिभाषिक-धातुतया शबेव भवति। सनाद्याश्च प्रत्ययाः –

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा।
यगायेयङ्णिङश्चेति द्वादशामी सनादयः॥

इति द्वादश प्रत्ययाः सन्ति। यन्नाम्ना सन्नन्त-यङन्तादिप्रकरणानि भवन्ति। इत्येवं विकरणभेदेन भूप्रभृतीनां गणविशेष-धातूनां * सार्वधातुकप्रत्ययेषु रूपभेदा भवन्ति। आर्द्धधातुकप्रत्ययेषु तु सर्वगणीयानामपि धातूनां गणभेदप्रयुक्तं न किमपि कार्य्यं जायते। प्रत्युत, सेडनिड्वेट्त्वप्रयुक्ता एव रूपभेदा भवन्ति। धातूनां **सेडनिड्वेट्त्व**सूचकानि पद्यानि सूत्राणि च यथावसरमग्रे समागमिष्यन्ति। धातुभ्यः प्रयुज्यमानाः तिङ्प्रत्ययाः तिङन्तपदानि आख्यातानि निर्मान्ति। ते च परस्मैपदिनो यथा –

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषे –	तिप्	तस्	झि
मध्यमपुरुषे –	सिप्	थस्	थ
उत्तमपुरुषे –	मिप्	वस्	मस्

आत्मनेपदिनो यथा –

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषे –	त	आताम्	झ
मध्यमपुरुषे –	थास्	आथाम्	ध्वम्
उत्तमपुरुषे –	इट्	वहि	महिङ्

एष्वादौ **'ति'** शब्दोऽन्ते च **'ङ्'** शब्दो विद्यतेऽतश्च प्रत्याहारबुद्ध्यैषां **'तिङ्'** संज्ञाऽस्ति।

इह परस्मैपदिनो नव (९) आत्मनेपदिनश्च नव (९) इति मिलित्वा अष्टादश तिङ्प्रत्ययाः सन्ति। ते च वर्तमानादिकालबोधक-लडादि-वेदमात्रविषयकलेङ्भिन्न-दशलकारभेदेन

---

* **सर्वेभ्यो धातुभ्यः सर्वेषु च लकारेषु प्राप्तियोग्यतया सार्वधातुक इति। अर्द्धेभ्यः प्रायो धातुभ्योऽर्द्धेष्वेव लकारेषु जायन्त इत्यार्द्धधातुक इत्यन्वर्थताऽनयोः।**

प्रत्येकं नवति–(९०) संख्याका भवन्तो मिलित्वोभयपदिषु धातुषु (१८०) अशीत्युत्तरशतसंख्याकाः सम्पद्यन्ते। तेषां प्रत्ययानां योगेन तादृशधातूनां तावन्ति रूपाणि भवन्ति। तत्रापि विकल्पभेदतस्तु शतद्वयादप्यधिकानि रूपाणि एकस्यैव धातोर्जायन्ते। इत्येवमेकस्यापि धातोः शबादिविकरणभेदेन णिजादिप्रत्ययभेदेन कोटिसंख्याकानि रूपाणि भवितुमर्हन्ति।

अत्र दश लकाराः– **लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ्** प्राचीनाचार्यमतेनायं पाठः। **अ इ उ ऋ ए ओ** इति स्वरक्रमः टिति। **अ इ उ ऋ** इति स्वरक्रमः ङिति उच्चारणार्थः। अत्र तु प्रयोगसिद्धिधियाऽयं क्रमः * **लट्, लङ्, लोट्, लिङ् (विधिः) लृट्, लृङ्, लुट्, लुङ्, लिट्, लिङ् (आशीः)** इति। एषामेव स्थाने **तिङ्**-प्रत्यया भवन्ति। तेषु प्रथममध्यमोत्तमा इति त्रयः पुरुषभेदा भवन्ति। तेष्वपि प्रत्येकमेकवचन-द्विवचन-बहुवचनानीति त्रीणि वचनानि सन्तीति संक्षेपादग्रे स्फुटीभविष्यन्ति–

भ्वादयः

शबाद्यविद्यायोगेन धातुब्रह्मविवर्तजम्

तिङ्सुबन्तादिकं छात्रा विद्यु ≍ पदजगद्धितम्।

भू= सत्तायम्। इति सत्ताक्रियार्थकस्य भू' इत्यस्य–

† भूवादयो धातवः ॥१।३।१॥

इति धातुसंज्ञायां ततः कर्तृविवक्षायाम्–

वर्तमाने[१]लट्[४] ॥३।२।१२३॥ (धातोः[२] परः[३] प्रत्ययः[५])

इति वर्तमानेऽर्थे–

लः[१] कर्मणि[५] च[९] भावे[७] चाकर्मकेभ्यः[६] ॥३।४।६९॥ (सकर्मकेभ्यः[२] कर्तरि[४] धातुभ्यः[३] कर्तरि[८])

इति कर्त्रर्थे लटि अनुबन्धलोपे–

---

* वेद एव व्यवहियते लेट् लकारः, अतस्तद्विवरणम् अप्रासङ्गिकम्।

† भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी। भूवौ आदी येषां ते भूवादयः। अत्रैक आदिशब्दो व्यवस्थावाचकः, अन्यश्च प्रकारवाचकः। व्यवस्थावाचकादिशब्दस्य 'भू' शब्देनान्वयः, प्रकारवाचकादिशब्दस्य 'वा' शब्देनान्वयः। ततश्च वादयः वासदृशाः क्रियावाचिन इति यावत् भ्वादयः भूप्रभृतयः सर्वेऽपि धातवो ज्ञेया इत्यर्थो भवति।

लस्य ॥ ३।४।७७॥

इत्यधिकारे –

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ॥ ३।४।७८॥

इति लस्य स्थाने तिङादेशे कर्तव्ये –

तङानावात्मनेपदम् ॥ १।४।१००॥

इति तङ आत्मनेपदसंज्ञायाम् ततोऽवशिष्टानां तिबादीनां नवानाम् तिपूतस्झि-सिपूथस्थ-मिब्वस्मसाम् –†

लः[1] परस्मैपदम्[3] ॥ १।४।९९॥ (आदेशाः[2])

इति परस्मैपदसंज्ञायाम् –

अनुदात्तङित[1] आत्मनेपदम्[3] ॥ १।३।१२॥ (धातोः[2])

इति अनुदात्तेतो ङितश्च धातोः आत्मनेपदे निश्चिते –

स्वरितञितः[1] कर्त्रभिप्राये[4] क्रियाफले[5] ॥ १।३।७२॥ (धातोः[2] आत्मनेपदम्[3])

इति स्वरितेतः ञितश्च धातोः कर्तृगामिनि क्रियाफले आत्मनेपदे निश्चिते इह तु –

शेषात् कर्तरि परस्मैपदम् ॥१।३।७८॥

इति परस्मैपदे तत्र –

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १।४।१०५॥

ततश्च –

[1]अस्मद्युत्तमः [5]॥ १।४।१०७॥ (उपपदे[2] समानाधिकरणे[3] स्थानिन्यपि[4])

इत्युभयोरभावे –

---

† परस्मैपदे लट्लकारे प्रत्ययस्वरूपम् बालैरेवं कण्ठस्थीकार्य्यम् –

ति, तः, अन्ति। सि, थः, थ। मि, वः, मः। इति। अदन्तविकरणेषु गणेषूत्तमपुरुषे, 'अतो दीर्घो यञि' (७।३।१०१) इति दीर्घः। आत्मनेपदे लङि च वमयोरेव दीर्घः।

शेषे[1]प्रथमः[5] ॥१।४।१०८॥ (उपपदे[2] समानाधिकरणे[3] स्थानिन्यपि[4])

इति प्रथमपुरुषोपस्थितौ –

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥१।४।१०१॥

इति तिङः प्रतित्रिकं प्रथमादिसंज्ञायाम् –

*** [1]तान्येक[6] वचनद्विवचनबहुवचनान्येकशः[5] ॥१।४।१०२॥ ([2]तिङस्त्रीणि[3] त्रीणि[4])**

इति तेषां त्रिकाणाम् प्रत्येकमेकैकस्य क्रमश एकवचनद्विवचनबहुवचनसंज्ञायाम् –

विभक्तिश्च[6] ॥१।४।१०४॥ (तिङः[1] सुपश्च[2] प्राप्तैकत्वादि-संज्ञानि[3] त्रीणि[4] त्रीणि[5])

इति प्रथमाद्येकत्वादिसंज्ञाविशिष्टविभक्तिसंज्ञायाम् ।

द्व्येकयोर्द्विवचनैककवचने ॥१।४।२२॥

इति प्रथमपुरुषैकत्वविवक्षायाम् तिपि अनुबन्धस्येत्संज्ञायां लोपे च भू+ति इति स्थितौ –

तिङ्शित्सार्वधातुकम् ॥३।४।११३॥

इति 'ति' प्रत्ययस्य सार्वधातुकसंज्ञायाम् –

कर्तरि[6] शप् ॥३।१।६८॥ (धातोः[1] परः[2] प्रत्ययः[4] सार्वधातुके[5])

इति धातोः परे शब्विकरणे समागते अनुबन्धनिवृत्तौ भू+अ ति इति जाते, शपः शित्त्वात्सार्वधातुकसंज्ञायाम् – ततश्च भू इत्यस्य **'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्'** (१।४।१३) इत्यङ्गसंज्ञायाम् ।

सार्वधातुकार्द्धधातुकयोः ॥७।३।८४॥ (इकः अङ्गस्य गुणः)

इति धातोः ऊकारस्य ओकारे गुणे भो+अ ति इत्यत्र अवादेशे भवति इति सिद्धम् । प्रथमपुरुषद्विवचनविवक्षायां भवतः ।

---

* **तानि = प्राप्तप्रथममध्यमोत्तमसंज्ञानि** ।

बहुषु बहुवचनम् ॥१।४।२१॥

इति प्रथमपुरुषबहुवचनविवक्षायां धातोः झिप्रत्यये –

[३]झोऽन्तः[४] ॥७।१।३॥ (प्रत्ययस्य[१] आदेः[२])

इति झोऽन्तादेशे शबादिकार्ये भव + अन्ति इति जाते –

अतो[२] गुणे[३] ॥६।१।९७॥ (अपदान्तात्[१] पूर्वपरयोः[४] एकम्[५] पररूपम्[६])

इति विकरणाकारस्य अन्तिप्रत्ययस्थे अकारे परे उभयोः पररूपैकादेशे भवन्ति। मध्यमपुरुषे भवसि, भवथः, भवथ। उत्तमपुरुषे भव+ मि इत्यवस्थायाम् –

'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' ॥१।४।१३॥

इति भवेत्यस्य अङ्गसंज्ञायाम् –

अतो[१] दीर्घो[३] यञि[४] ॥७।३।१०१॥ (अङ्गस्य[२] सार्वधातुके[५])

इति अतोऽङ्गस्य विकरणस्य दीर्घे भवामि, भवावः, भवामः। यस्मिन्नर्थे प्रत्ययो भवति सोऽर्थ उक्तो जायते। ततश्च –

"उक्ते कर्तरि प्रथमा तृतीया स्यादनुक्तके।
उक्ते कर्मणि प्रथमा द्वितीया स्यादनुक्तके॥"

इति नियमात् कर्तृवाच्ये कर्तुरुक्तत्वात् प्रथमा विभक्तिर्भवति तयैव सह तिङां पुरुषे वचने च सामानाधिकरण्यं जायते। तथाहि – स देशभक्तो भवति, तौ देशभक्तौ भवतः, ते देशभक्ता भवन्ति। त्वं कांग्रेसाध्यक्षो भवसि, युवां कांग्रेसाध्यक्षौ भवथः, यूयं कांग्रेसाध्यक्षाः भवथ। अहं कर्तव्यपालको भवामि, आवां कर्तव्यपालकौ भवावः, वयं कर्तव्यपालका भवामः। इति वाक्यानि भवन्ति। (**'पुरुषाणां मिथः सहोक्तौ यः परः स शिष्यते।** वचनानि तु संकलनया कर्तव्यानि'।) तद्यथा – देवदत्तः त्वञ्च शब्दशास्त्रज्ञौ भवथः। त्वम् अहञ्च सत्याग्रहिणौ भवावः। स त्वम् अहञ्च देशकालात्मज्ञा भवामः। लोकमान्यो गान्धी च स्वर्गीयौ भवतः। दादाभाई तिलको मालवीयश्च स्वर्गीया भवन्ति। स तौ च पण्डिता भवन्ति। स युवां च देशभक्ता भवथ। त्वम् आवां च कर्तव्यप्रिया भवामः। इति वाक्यानि प्रयुज्यन्ते।

(**अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन सहितः सकलो दिवसोऽद्यतनः तद्भिन्नोऽनद्यतनः**) तत्रानद्यतने भूतकाले प्रथमपुरुषैकत्वविवक्षायाम् –

[5]अनद्यतने लङ्[3] ॥३।२।१११॥ ([1]धातोः भूते[6] प्रत्ययः[4] परश्च[2])

इति * लङि लकारे भवति इति जाते –

इतश्च[4] ॥३।४।१००॥ (ङितः[1] लस्य[2] परस्मैपदानां[3] लोपः[5])

इति इकारलोपे भवत् इत्यवस्थायाम्

[4]लुङ्लङ्लृङ्क्ष्व[3]डुदात्तः[2] ॥६।४।७१॥ (अङ्गस्य[1])

इत्यनेन अडागमे कर्तव्ये **'आद्यन्तौ टकितौ'** (१।१।४६) इति सूत्रबलादङ्गस्यादौ अडागमे जाते अनुबन्धनिवृतौ अभवत् । द्विवचनविवक्षायाम् अभवतस् **इत्यवस्थायाम्** –

[3]तस्थस्थमिपां तान्तन्तामः[4] ॥३।४।१०१॥ (ङितो[1] लस्य[2])

इति तसः तामादेशे अभवताम् । एवम् अभवन्तीत्यत्र इकारलोपे संयोगान्तलोपे च अभवन् । अभवः, अभवतम्, अभवत । अभवम्, अभवावस् इत्यत्र ।

नित्यं[5] ङित[1] ॥३।४।९९॥ (लस्य[2] उत्तमस्य[3] सः[4] लोपः[6])

इति सकारलोपे अभवाव । एवम् अभवाम । कर्तृयोगे – ह्यः सोऽभवत्स्थितः । ह्यः त्वमभवः स्थितः । परह्योऽहमभवम् स्थितः । पूर्वेद्युः सा त्वम् अहञ्च अभवाम स्थिता इत्यादि । विध्याद्यर्थे आशिषि वा भूधातोः –

लोट्[3] च ॥३।३।१६२॥ (विध्याद्यर्थे[5] धातोः[1] प्रत्ययः[4] परः[2])

आशिषि[5] लिङ्[3] लोटौ ॥३।३।१७३॥ (धातोः[1] परौ[2] प्रत्ययौ[4])

इति * लोटि लकारे भवति इति जाते –

ए[2]रुः[3] ॥३।४।८६॥ (लोटः[1])

इति इकारस्य उकारे भवतु । आशिषि तु –

तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ॥७।१।३५॥

इति तातङादेशे कर्तव्ये **'अनेकाल् शित् सर्वस्य'** (१।१।५५) इति सर्वस्यैव तोः 'तातङि' अनुबन्धनिवृतौ भवतात् । भवतस् इत्यत्र ।

*** लङि – त्, ताम्, अन् । स्, तम्, त । अम् व, म । इति प्रत्ययरूपम् । वमयोः दीर्घौ अदन्तविकरणेषु गणेषु ।**

*** लोटि – तु (तात्) ताम्, अन्तु । हि (तात्) तम्, त । आनि, आव, आम ।**

लोटो लङ्वत् ३।४।८५ (कार्य्यम्)

इति लोटः लङ्वद्भावे तसः तामि कृते भवताम्, भवन्तु। भवसि इत्यत्र –

[२]सेर्ह्य[३]पिच्च[४] ॥३।४।८७॥ (लोटः[१])

इति लोटः सेह्यादिशे 'भव हि' इति जाते –

अतो[१] हेः[३] ॥६।४।१०५॥ (अङ्गस्य[२] लुक्[४])

इति हेर्लुकि भव। आशिषि तु हेः सर्वस्यैव तातङादेशे भवतात्, भवतम्, भवत। भवमि इत्यत्र –

[२]मेर्निः[३] ॥३।४।८९॥ (लोटः[१])

इति मेन्यादिशे भवनि इति जाते –

[३]आडुत्तमस्य[२] पिच्च[४] ॥३।४।९२॥ (लोटः[१])

इति टित्त्वान्नेः आदौ आडागमे अनुबन्धनिवृत्तौ दीर्घे भवानि **'नित्यं ङितः'** (३।४।९९) इति सलोपे भवाव भवाम। कर्तृयोगे आज्ञायाम् आशिषि च प्रयोगः – स्वराज्यं स्थिरं भवतु भवतात् वा। त्वं वीरो भव भवतात् वा। अहं सुधीर्भवानि। इत्यादि। भूधातोर्विध्याद्यर्थे –

[५]विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्[३] ॥३।३।१६१॥ (धातोः[१] प्रत्ययः[४] परः[२])

इति † लिङि तस्य स्थाने तिपि भवतीति जाते **'इतश्च'** (३।४।१००) इति इकारलोपे भवत् इत्यवस्थायाम्

यासुट्[३] [२]परस्मैपदेषूदात्तो[४] ङिच्च[५] ॥३।४।१०३। (लिङः[१])

इति टित्त्वात् प्रत्ययस्यादौ यासुडागमे अनुबन्धनिवृत्तौ भव यासुत् इति जाते –

[३]सुट्तिथोः[२] ॥३।४।१०७॥ (लिङः[१])

इति तकारात् प्राक् सुडागमे अनुबन्धनिवृत्तौ भव यासुस्त् इति स्थितौ –

---

† **लिङि (विधौ) – यात्, याताम्, युः। याः, यातम्, यात। याम्, याव, याम।**

इमे प्रत्यया अदन्तविकरणभिन्नगणेषु ज्ञेयाः। अदन्तविकरणगणेषु भ्वादिदिवादितुदादिचुरादिप्रक्रियादिषु तु – इत्, इताम्, इयुः। इः, इतम्, इत। इयम्, इव, इम।

*** लिङः[२] [३]सलोपोऽनन्त्यस्य[१] ॥७।२।७९॥ (सार्वधातुके[४])**

इति उभयस्य सकारस्य लोपे –

अतो[२] ये[३]यः[४] ॥७।२।८०॥ (लिङः[१] सार्वधातुके[५])

इति या इत्यस्य इयादेशे भव इयूत् इति जाते –

लोपो[२] [१]व्योर्वलि[३] ॥६।१।६६॥

इति यकारलोपे गुणे जश्त्वे वैकल्पिके चर्त्वे च भवेत् भवेद् भवेताम् । भवेयुः झि इत्यत्र –

[२]झेर्जुस्[४] ॥३।४।१०८॥ (लिङः[१] प्रत्ययस्य[३])

इति झेर्जुसि अनुबन्धनिवृत्तौ रुत्वविसर्गयोः भवेयुः । भवेः, भवेतम्, भवेत, भवेयम्, भवेव, भवेम । सम्भावनायाम् – स तत्र भवेत् स्थितः । त्वं तत्र नियुक्तो भवेः । अहं राजदूतो भवेयम् ।

लृडादिलकारेषु सार्वधातुक-प्रत्ययनिमित्तक-गणकार्य्य-विशेषो न जायते, किन्तु सेडनिडादि-प्रयोजकार्द्धधातुक-निमित्तक-कार्य्यविशेष एव जायते । अतस्तत्र सर्वेभ्योऽपि धातुभ्यो गणकार्य्यनिरपेक्षमेवेडाद्यागमकार्य्यं भवति । तथाहि – भूधातोः भविष्यत्काले –

[३]लृट् शेषे[५] च ॥३।३।१३॥ (धातोः[१] भविष्यति[६] प्रत्ययः[४] परः[२])

इति† लृटि लकारे तत्स्थाने तिपि भू + ति इत्यवस्थायां शपं बाधित्वा –

स्यतासी[३] लृलुटोः[५] ॥३।१॥३३॥ (धातोः[१] प्रत्ययौ परौ[२])

इत्यनेन **'यथासंख्यमनुदेशः समानाम्'** (१।३।१०) इति सूत्रसाम्यात् स्य-प्रत्यये तस्य –

आर्द्धधातुकं[४] शेषः[२] ॥३।४।११४॥ ([१]तिङ्शिद्भ्यां प्रत्ययः[३])

इति आर्द्धधातुकसंज्ञायाम् –

[२]आर्द्धधातुकस्येड्[३] [१]वलादेः ॥७।२।३५॥

*** सेति लुप्तषष्ठ्यन्तम् । अथवा चैत्रस्य गुरुकुलमितिवत् षष्ठीसमासे तदीयम् अन्त्यस्येति विशेषणम् ।**

† लृटि – स्यति, स्यतः, स्यन्ति । स्यसि, स्यथः, स्यथ । स्यामि, स्यावः, स्यामः ।

इति टित्त्वात्स्य इति विकरणप्रत्ययस्यादौ इडागमे अनुबन्धनिवृत्तौ गुणे अवादेश **'आदेशप्रत्यययोः'** (८।३।५९) इति सस्य मूर्द्धन्यादेशे भविष्यति, भविष्यतः, भविष्यन्ति। भविष्यसि, भविष्यथः, भविष्यथ। भविष्यामि, भविष्यावः, भविष्यामः। कर्तृयोगे – शिक्षाविशेषज्ञ एव शिक्षासचिवो भविष्यति। त्वं संविधानविधाता भविष्यसि। अहं राष्ट्रधर्मोपदेष्टा भविष्यामि। भूधातोः –

लिङ्[५]निमित्ते [३]लृङ् क्रियातिपत्तौ[७] ॥३।३।१३९॥ ([१]धातोः भविष्यति[६] प्रत्ययः[४] परः[२])

इति * लृङि तत्स्थाने तिपि **'स्यातासी लृलुटोः'** (३।१।३३) इति स्यागमादिकार्ये कृते **भविष्यति** इति जाते **'इतश्च'** (३।४।१००) इति इकारलोपे **'लुङ्लङ्लृङ्क्ष्वडुदात्तः'** (६।४।७९) इति अडागमे अनुबन्धनिवृत्तौ जश्त्वे वैकल्पिके च चर्त्वे अभविष्यत् अभविष्यद्, अभविष्यताम्, अभविष्यन्। अभविष्यः, अभविष्यतम्, अभविष्यत। अभविष्यम्, अभिविष्याव, अभविष्याम। कर्तृयोगे – यदि महात्मा गान्धी दृढोऽभविष्यत्तदैवं देशविभागो नाभविष्यत्। राजर्षे टण्डन! यदि च त्वं कार्य्यसमितौ विजय्यभविष्यस्तदाप्येवं नाभविष्यत्। यद्यहं तत्र सदस्योऽभविष्यम् तर्हि त्वेवं कदापि नाभविष्यत्। यदि महामुनिर्मालवीयोऽभविष्यत्तर्हि बङ्गीयार्य्याणां दुर्दशा नाभविष्यत् इत्यादि। भूधातोः अनद्यतने भविष्यति अर्थे –

अनद्यतने[५] लुट्[३] ॥३।३।१५॥ (धातोः[१] भविष्यति[६] परः[२] प्रत्ययः[४])

इति † लुटि लकारे तत्स्थाने तिपि शपं बाधित्वा **'स्यातासी लृलुटोः'** (३।१।३३) इति यथासंख्यविधानात् तासि विकरणे आगते तस्यार्धधातुकत्वाद् इडागमे गुणे अवादेशे भवितास् ति इति जाते –

लुटः प्रथमस्य डारौरसः ॥२।४।८५॥

इति तिपो डादेशे अनुबन्धनिवृत्तौ भवितास् + आ इति स्थितौ डित्त्वसामर्थ्याद् आस् इति अभस्यापि टेर्लोपे भवित् + आ इति जाते हलन्ततकारस्य स्वरसंयोगे भविता। भवितास् रौ इत्यत्र –

रिच[३] ॥७।४।५१॥ ([१]तासस्त्योर्लोपः[२])

इति सलोपे भवितारौ एवं भवितारः। भवितास् + सि इत्यत्र –

---

* लृङि – स्यत्, स्यताम्, स्यन्। स्यः, स्यतम्, स्यत। स्यम्, स्याव, स्याम।

† लुटि – ता, तारौ, तारः। तासि, तास्थः, तास्थ। तास्मि, तास्वः, तास्मः।

तासस्त्योर्लोपः ॥७।४।५०॥ (सि)

इति सलोपे भवितासि, भवितास्थः, भवितास्थ । भवितास्मि, भवितास्वः, भवितास्मः। कर्तृयोगे – श्वः स विहारप्रान्तपतिर्भविता । देशरत्नराजेन्द्रप्रसाद ! श्वस्त्वं भारतराष्ट्रपतिर्भवितासि । अहं श्वो राजर्षिटण्डनस्य संस्कृतिसम्मेलने समुपस्थितो भवितास्मि । भूधातोः भूतेऽर्थे –

लुङ्[३] ॥३।२।११०॥ (भूते[५] धातोः[१] परः[२] प्रत्ययः[४])

इति * लुङ् तत्स्थाने तिपि **'इतश्च'** (३।४।१००) इतीकारलोपे भू+त् इति जाते शपं बाधित्वा –

† च्लि[३] लुङि[५] ॥३।१।४३॥ (धातोः[१] परः[२] प्रत्ययः[४])

इति च्लिविकरणप्रत्ययागमे तस्य –

च्लेः सिच् ॥३।१।४४॥

इति सिचि तस्य –

[१]गातिस्थाघुपाभूभ्यः [२]सिचः [४]परस्मैपदेषु ॥२।४।७७॥ (लुक्[३])

इति लुकि –

भूसु[१]वोस्तिङि[५] ॥७।३।८८॥ (गुणो[३] न[२] सार्वधातुके[४])

इति गुणनिषेधे अडागमे पाक्षिके जश्त्वे च अभूत् (द्) अभूताम् । बहुवचने झोऽन्तादेशे इकारलोपे संयोगान्तलोपे सिचो लुकि भू + अन् इत्यत्र –

[२]भुवो[३]वुग्लु[४]ङ्लिटोः ॥६।४।८८॥ (अचि[५] अङ्गस्य[१])

इति कित्त्वात् धातोरन्ते वुगागमे अनुबन्धनिवृत्तौ स्वरसंयोगे भूवन् इति सम्पन्ने अडागमे अभूवन् इति सिध्यति । अभूः, अभूतम्, अभूत । अभूवम्, अभूव, अभूम । कर्तृयोगे – भारतदेशः स्वतन्त्रोऽभूत् । लालबहादुरशास्त्रिन् ! अत्र त्वं प्रधानमंत्री अभूः । अहं द्रष्टाऽभूवम् । भूधातोः परोक्षभूतानद्यतने –

[५]परोक्षे लिट्[३] ॥३।२।११५॥ ([१]धातोः [२]परः [४]प्रत्ययः [७]भूतेऽनद्यतने[६])

*** लुङि – ईत्, इष्टाम्, इषुः । ईः, इष्टम्, इष्ट । इषम्, इष्व, इष्म (सेटो धातोः) सीत्, स्ताम्, सुः । सीः, स्तम्, स्त । सम्, स्व, स्म । (अनिटो धातोः)**

† च्लेः लुकि चङाद्यादेशे च लङ्वदपि प्रत्ययाः त्, ताम्, अन् इत्यादि ।

इति लिटि * तत्स्थाने तिपि तस्य च–

लिट् च ॥३।४।११५॥ (आर्द्धधातुकम्)

इत्यार्द्धधातुकसंज्ञायां शबाद्यभावे–

परस्मैपदानां[२] [३]णलतुसुस्थलथुसणल्वमाः ॥३।४।८२॥ (लिटः[१])

इति णलादेशे अनुबन्धनिवृत्तौ भू+ अ इति स्थिते **'भुवो वुग्लुङ्लिटोः'** (६।४।८८) इति वुगागमे भूव् + अ इति जाते–

एकाचो द्वे प्रथमस्य ॥६।१।१॥ आजादेर्द्वितीयस्य ॥६।१।२॥

इत्यधिकारे–

लिटि धातोरनभ्यासस्य ॥६।१।८॥

इति वृक्षप्रचलनन्यायेन भूवः द्वित्वे भूव् भूव् + अ इत्यत्र–

[२]पूर्वोऽभ्यास:[३] ॥६।१।४॥ (द्वयोः[१])

इति पूर्वस्य अभ्याससंज्ञायाम्–

हलादिः[२] शेषः[३] ॥७।४।६०॥ (अभ्यासस्य[१])

इति अभ्यासवकारलोपे भूभूव् + अ इत्यत्र–

ह्रस्वः[२] ॥७।४।५९॥ (अभ्यासस्याचः[१])

इति अभ्यासस्याचो ह्रस्वे भुभूव् + अ इति जाते–

[१]भवतेरः[३] ॥७।४।७३॥ (अभ्यासस्य[२])

इत्यभ्यासोकारस्य अत्वे भभूव् + अ इत्यत्र–

अभ्यासे[१] चर्च[४] ॥८।४।५४॥ (झलां[२] जश्[३])

(झशां जशः खयां चरः। इति विवेकः) इति अभ्यासझशः भकारस्य जश्त्वेन बकारे अन्त्यवकारस्य च स्वरसंयोगे बभूव इति सिद्धम्। बभूवतुः, बभूवुः। सिपः थलि तस्य च **'लिट् च'** (३।४।११५) इति आर्द्धधातुकतया **'आर्द्धधातुकस्येड्वलादेः'** (७।२।३५) इति इडागमे वुकि द्वित्वादिकार्ये बभूविथ, बभूवथुः, बभूव। बभूव, बभूविव, बभूविम।

---

* **लिटि– अ, अतुस्, उस्। थ, अथुस्, अ। अ, व, म।**

कर्तृयोगे – युधिष्ठिरो राजा बभूव । त्वं पूर्वजन्मनि विप्रो बभूविथ । तत्राहमनुपस्थितो बभूव । (**उत्तमपुरुषेऽपि चित्तविक्षेपादिना परोक्ष्यमस्त्येव** । यथा – सुप्तोऽहं किल विललाप ।)

भूधातोः आशीर्वादेऽर्थे **'आशिषि लिङ्लोटौ'** (३।३।१७३) इति * लिङि तत्स्थाने तिपि **'इतश्च'** (३।४।१००) इति इकारलोपे भू+त् इति स्थितौ प्रत्ययस्य –

[२]लिङाशिषि[१] ॥३।४।११६॥ (आर्द्धधातुकम्[३])

इत्यार्द्धधातुकसंज्ञायाम् शबाद्यभावे लिङः परस्मैपदानां **'यासुट् परस्मैपदेषूदात्तो ङिच्च'** (३।४।१०३) इति यासुडागमे –

[४]किदाशिषि[१] ॥३।४।१०४॥ (लिङः[२] यासुट्[३])

इति यासुटः कित्त्वेन –

ङिति[१] च ॥१।१।५॥ (न[२] इको[३] गुणवृद्धी[४])

इति गुणनिषेधे । **'सुट्तिथोः'** (३।४।१०७) इति तकारस्य सुटि अनुबन्धलोपे भूया स् स् त् इति जाते –

[५]स्कोः [४]संयोगाद्योरन्ते[३] च ॥८।२।२९॥ (झलि[१] पदस्य[२] लोपः[५])

इति वारद्वयं सलोपे भूयात् । एवं भूयास्ताम्, भूयासुः । भूयाः, भूयास्तम्, भूयास्त । भूयासम्, भूयास्व, भूयास्म । कर्तृयोगे – वाराणसेयसंस्कृतविश्वविद्यालयसञ्चालको यशस्वी भूयात् । श्रीकेशरिकृष्णशास्त्रिन् ! त्वं चिरायुर्भूयाः । अहं परोपकारी भूयासम् । इत्थं सर्वत्र धातुरूपेषु वाक्यनिर्माणप्रकारो ज्ञेयः । धातोरुपसर्गयोगे बहुधाऽर्थभेदो जायते, तथात्मनेपद-परस्मैपदादिभेदोऽपि भवति । धातूपसर्गनिपातानामनेकार्थत्वं प्रसिद्धम् । तथाहि ।

धातवश्चोपसर्गाश्च निपाताश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारप्रहारपरिहारवत् ॥

---

* **आशीर्लिङि – यात्, यास्ताम्, यासुः । याः, यास्तम्, यास्त । यासम्, यास्व, यास्म ।**

धात्वर्थप्रकाशे – चोपसर्गाणां त्रिधा गतिर्निगद्यते ।

तथाहि –

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्य उपसर्गास्त्रिधा मतः । इति ।

ते चोपसर्गाः –

ते प्राग्धातोः ॥१।४।८०॥ (गत्युपसर्गसंज्ञकाः)

इति धातुतः पूर्वमेव प्रयुज्यन्ते ।

तद्यथा – अभिभवति = परास्तं करोति । भवनार्थस्य बाधः । पराजयते = परास्तो भवति पराभवरूपेऽर्थे भवनार्थोऽनुवर्तते । प्रभवति बिहारे शिक्षा-मंत्री देववाणीमुन्नेतुम् । प्रभवति समर्थो भवतीत्यत्र प्रोपसर्गः भवनार्थं समर्थरूपार्थेन विशिनष्टि । इत्येवं धात्वर्थस्त्रिधोन्नेयः । एवं सम्भवति । उद्भवति । विभवतीत्यादिप्रयोगा ज्ञेयाः । * **उपसर्गाश्च विंशतिः पद्येन घोष्याः** । अनु + भू = अनुभवे, अवबोधे, भोगे वा । अभि + भू, परि+भू=पराजयकरणे । परा+भू=पराजयभवने । उद्+भू= उत्पत्तौ । सम्+भू= सम्भावनायाम्, अनिश्चये वा । अडादिभिर्निष्पन्नरूपैर्धातुभिः सह उपसर्गयोगो भवति । यथा – अन्वभवत् । पर्य्यभविष्यत् । उद्बभूव इत्यादि । द्रु = गतौ । सार्वधातुकलकारेषु भूवद्रूपम्-द्रवति, अद्रवत्, द्रवतु, द्रवेत् । लृटि द्रु + स्यति इत्यवस्थायाम् –

अनिट् स्वरान्तो भवतीति दृश्यतामिमे तु सेटः कथिता महर्षिभिः ।
अदन्त-ऋदन्त-ऋताश्च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि ॥
गणस्थ ऊदन्त उताश्च रुष्णुवौ क्षुविस्तथोर्णोतिरथो युणुक्ष्णवः ।
इति स्वरान्ता निपुणैः समीरितास्ततो हलन्ता अपि सन्निरूपिताः ॥

अन्यच्च

ऊदृदन्तैर्यौतिरुक्षणुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥

(निहताः = अनुदात्ताः अनिट इत्यर्थः) इति नियमाद् अनुदात्ताद् द्रुधातोः –

[२]एकाच [१]उपदेशेऽनुदात्तात्[३] ॥७।२।१०॥ (धातोः[४] आर्द्धधातुकस्य[५] इट्[६] नँ[७])

---

* प्रपरापसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्य्यपयः ।
उप आङिति विंशतिरेष सखे उपसर्गगणः कथितः कविना ॥

इति इण्निषेधे गुणे मूर्धन्यादेशे द्रोष्यति, अद्रोष्यत्, द्रोता। द्रुधातोः लुङि तिपि अनुबन्धनिवृत्तौ **'इतश्च'** (३।४।१००) इति इकारलोपे द्रु+त् इति स्थितौ **'च्लि लुङि'** (३।१।४३) इति च्लौ तस्य –

णिश्रिद्रुस्रुभ्यः[1] कर्तरि[3] चङ् ॥३।१।४८॥ (धातुभ्यः[2] च्लेः[4] लुङि[6])

इति चङि अनुबन्धनिवृत्तौ द्रु+अत् इति जाते –

चङि[7] ॥६।१।११॥ (अनभ्यासस्य[1] एकाचः[4] धातोः[2] प्रथमस्य[3] अजादेः[5] द्वितीयस्य[6] द्वे[7])

इति धातोर्द्वित्वे **'पूर्वोऽभ्यासः'** (६।१।४) इति अभ्याससंज्ञायाम् **'हलादिः शेषः'** (७।४।६०) इति आदिहलो दस्य शेषे अन्यहलो रेफस्य लोपे **'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ'** (६।४।७७) इति उवङि अनुबन्धनिवृत्तौ अडागमे अदुद्रुवत्, अदुद्रुवताम्, अदुद्रुवन्। अदुद्रुवः, अदुद्रुवतम्, अदुद्रुवत। अदुद्रुवम्, अदुद्रुवाव, अदुद्रुवाम। लिटि शेषे अनुबन्धनिवृत्तौ द्रु+अ इत्यत्र **'अचो ञ्णिति'** (७।२।११५) इति प्राप्तां वृद्धिम् –

द्विर्वचनेऽचि ॥१।१।५९॥ (अच आदेशो न द्विर्वचने कर्तव्ये)

इति निषिध्य द्वित्वादिकार्ये दुद्रु+अ इति जाते ततः **'अचो ञ्णिति'** (७।२।११५) इति वृद्धौ आवादेशे दुद्राव। दुद्रु+अतुस् इत्यत्र –

[1]असंयोगाल्लिट्[3] कित्[4] ॥१।२।५॥ (अपित्[2])

इति कित्त्वाद् गुणनिषेधे उवङि दुद्रुवतुस् इति जाते रुत्वविसर्गयोः दुद्रुवतुः, दुद्रुवुः। दुद्रु+थ इत्यत्र –

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥७।२।१३॥ (न इट्, अन्यस्माद् अनिटोऽपि स्यादेव)

इति इण्निषेधे गुणे दुद्रोथ, दुद्रुवथुः, दुद्रुव। उत्तमे णलि तु –

[2]णलुत्तमो[1] वा[3] ॥७।१।९१॥ ([4]णित्)

इति वैकल्पिके णिति वृद्धौ आवादेशे दुद्राव पक्षे गुणे अवादेशे दुद्रव **'कृसृभृवृस्तुद्रु०'** (७।२।१३) इति इण्निषेधे दुद्रुव, दुद्रुम। आशीर्लिङि द्रु+यात् इत्यवस्थायाम् –

[3]अकृत्सार्वधातुकयोर्दीर्घः[2] ॥७।४।२५॥ (अजन्ताङ्गस्य[1] यादौ[4] ङिति[5] प्रत्यये[6])

इति दीर्घे सलोपे द्रूयात्, द्रूयास्ताम्, द्रूयासुः। द्रूयाः, द्रूयास्तम्, द्रूयास्त। द्रूयासम्, द्रूयास्व, द्रूयास्म। उप + द्रु = उपद्रवकरणे। अनु + द्रु = अनुसरणे। एवम् **स्रु = क्षरणे** 'गतौ' इति यावत्। स्रवति। अस्रवत्। स्रवतु। स्रवेत्। स्रोष्यति। अस्रोष्यत्। स्रोता। असुस्रुवत्। सुस्राव। स्रूयात्। प्र = स्रु = मूत्रोत्सर्गे। **श्रु + श्रवणे**। श्रु + ति इत्यवस्थायां शपं बाधित्वा –

श्रुवः[1] शृ[3] च[4] ॥३।१।७४॥ (श्नुः[2] कर्त्तरि[5] सार्वधातुके[6])

इति श्नुप्रत्यये श्रुवश्च 'शृ' इत्यादेशे **'लशक्वतद्धिते'** (१।३।८) इति श्नुवः शस्येत्संज्ञायां लोपे च **(ऋवर्णान्नस्य णत्वं वाच्यम्)** इति नस्य णत्वे गुणे शृणोति। शृणु + तः इत्यत्र –

[2]सार्वधातुकमपित्[1] ॥१।२।४॥ (ङित्[3])

इति श्नु-तसोर्ङित्त्वे **'ङिति च'** (१।१।५) इति गुणनिषेधे शृणुतः। शृणु = अन्ति इत्यत्र **'अचिश्नु०'** (६।४।७७) इति प्राप्तम् उवङ् बाधित्वा –

हुश्नुवोः[1] सार्वधातुके[2] ॥६।४।८७॥ (हु[2] इत्यङ्गस्य श्नुप्रत्ययान्तस्य[3] [4]अनेकाचोऽसंयोगपूर्वस्य[5] यण्[6] अचि[7])

इति यणि शृण्वन्ति। शृणोषि, शृणुथः, शृणुथ। शृणोमि, शृणु + वः इत्यत्र –

*** लोप[3] शा[2]स्यान्यतरस्यां[5] म्वोः[4] ॥६।४।१०७॥ ([1]असंयोगपूर्वस्य)**

इति पाक्षिके उकारलोपे शृण्वः, शृणुवः। शृण्मः, शृणुमः। अशृणोत्, अशृणुताम्, अशृण्वन्। अशृणोः, अशृणुतम्, अशृणुत। अशृणवम्, अशृण्व, अशृणुव। अशृण्म, अशृणुम। शृणोतु, शृणुतात्, शृणुताम्, शृण्वन्तु। शृणु + हि इत्यत्र –

[2]उतश्च [3]प्रत्ययादसंयोगपूर्वात्[1] ॥६।४।१०६॥ ([4]हेर्लुक्)

इति हेर्लुकि शृणु। पक्षे तातङि शृणुतात्, शृणुतम्, शृणुत। मेन्यादेशे आडागमे गुणे अवादेशे शृणवानि। सलोपे शृणवाव, शृणवाम। शृणुयास्त् इत्यत्र – **'लिङः सलोपोऽनन्त्यस्य'** (७।२।७९) इति सकारद्वयलोपे शृणुयात्, शृणुयाताम्, शृणुयास् + झि इत्यत्र **'झेर्जुस्'** (३।४।१०८) इति झेर्जुसि अनुबन्धनिवृत्तौ शृणुयास् + उस् इत्यत्र सलोपे शृणुया + उस् इति जाते –

---

* अस्य श्नुप्रत्ययोकारस्य इत्यर्थः।

[३]उस्यपदान्तात्[१] ॥६।१।९६॥ ([२]आत् एकम्[५] पूर्वपरयोः[४] पररूपम्[६])

इति या इत्याकारस्य उस उकारस्य चेत्युभयोः पररूपे उकारे शृणुयुः। शृणुयाः, शृणुयातम्। शृणुयात। शृणुयाम्, शृणुयाव, शृणुयाम। लृट्लृङ्लुट्सु द्रुवत्। श्रोष्यति। अश्रोष्यत्। श्रोता। लुङि श्रु + सुत् इत्यत्र –

*** अस्तिसिचोऽपृक्ते ॥७।३।९६॥ (हलि सार्वधातुके ईट्)**

इति टित्त्वाद् तकारस्यादौ ईडागमे श्रु +स् ईत् इति जाते –

सिचि[४] वृद्धिः[३] परस्मैपदेषु[५] ॥७।२।१॥ ([१]इकः [२]अङ्गस्य)

इति धातोर्वृद्धौ मूर्द्धन्यादेशे श्रौषीत् इति जाते अडागमे अश्रौषीत्। अश्रौष्टाम्, अश्रौषुः + झि इत्यत्र –

[१]सिजभ्यस्तविदिभ्यश्च ॥३।४।१०९॥ ([३]झेर्जुस्[४]ङितः[२])

इति झेर्जुसि अनुबन्धनिवृत्तौ रुत्वविसर्गयोः अश्रौषुः। अश्रौषीः, अश्रौष्टम्, अश्रौष्ट। अश्रौषम्, अश्रौष्व, अश्रौष्म। लिटि, आशीर्लिङि च द्रुवत्। शुश्राव। श्रूयात्। प्रति + श्रु = प्रतिज्ञायाम्। सं + श्रु = अवधाने (आत्मनेपदम्) सार्वधातुके स्वादिस्थ-सुधातुवद्रूपम्। संशृणुते छात्रवर्गः पाणिनीयप्रबोधम् इत्यादि। **क्षि + क्षये**। क्षयति, अक्षयत्, क्षयतु, क्षयेत्, क्षेष्यति, अक्षेष्यत्, क्षेता, अक्षैषीत् लिटि द्वित्वादिकार्ये किक्षि + अ इत्यत्र –

[२]कुहोश्चुः[३] ॥७।४।६२॥ ([१]अभ्यासस्य)

इति चुत्वे चिक्षि + अ इत्यत्र वृद्धौ आयादेशे चिक्षाय। कित्त्वाद् गुणनिषेधे इयङादेशे चिक्षियतुः, चिक्षियुः। चिक्षि + थ इत्यत्र **'एकाच उपदेशेऽनुदात्तात्'** (७।२।१०) इति इण्-निषेधे पुनः क्रादिनियमाद् इटः प्राप्तौ –

[२]अचस्ता[४]स्वत्थ[७]ल्य[६]निटो नित्यम्[५] ॥७।२।६१॥ ([३]धातोः [१]उपदेशे '[इण् न[९]])

इति इण्निषेधे –

*** सिच् च अस् च तयोः समाहारः सिचस्, अस्ति च तत् सिचश्चेति अस्तिसिचस् तस्मात् अस्तिसिचस इति वक्तव्ये सौत्रत्वात् पञ्चम्या लुकि अस्तिसिचस् इति जाते सस्य रुत्वे उत्वे गुणे पूर्वरूपे 'अस्तिसिचोऽपृक्ते' (७।३।९६) इति सूत्रस्वरूपम्।**

[२]ऋतो भारद्वाजस्य[१०] ॥७।२।६३॥ ([४]तास्वत्थल्य[७] [६]निटो नि[५]त्यम्[१] उपदेशे [३]धातोः [८]इट् न[९] अन्यस्मा[११]दनिटोऽपि[१२] स्याद्[१३] एव)

अयमत्र निष्कर्षरूपतः प्राचीनः सङ्ग्रहश्च –

† अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम्।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्॥

अस्यार्थस्तु = अजन्तः अकारवान् वा यः कोऽपि धातुः तासि प्रत्यये अनिट् स्यात् अयम् थलि वेट् भवति। ईदृक् = तासि अनिट् ऋदन्तो धातुः थलि नित्यानिट् भवति। क्राद्यन्यः (कृसृभृवृस्तुद्रुस्रुश्रुभिन्नः) ऋदन्तः अजन्तः अकारवान् वा थलि नित्यानिट् वेट् वा स सर्वोऽपि लिटि वमयोः से ध्वे च सेट् स्यात् इति नियमात् वैकल्पिके इटि गुणे अयादेशे चिक्षयिथ पक्षे चिक्षेथ, चिक्षियथुः, चिक्षिय। चिक्षाय, चिक्षय, क्रादिनियमान्नित्यमिटि इयङि चिक्षियिव, चिक्षियिम। क्षीयात्। अप+क्षि = ह्रासे। **जि+जये** जयति, अजयत्, जयतु, जयेत्, जेष्यति, अजेष्यत्, जेता, अजैषीत्, जिजि+अ इत्यत्र –

[४]सन्लिटोर्जेः[२] ॥७।३।५७॥ ([१]अभ्यासात् [३]कुः)

इति अभ्यासात् परस्य जेः कुत्वेन गकारे जिगि+अ इति जाते वृद्धौ आयादेशे जिगाय **'एरनेकाच०'** (६।४।८२) इति यणि जिग्यतुः, जिग्युः। जिगयिथ, जिगेथ, जिग्यथुः, जिग्य। जिगाय, जिगय **'वार्णादाङ्गं बलीयः'** (परि०) इति नियमात् परत्वेन च सवर्णदीर्घमपोह्य **'एरनेकाच०'** (६।४।८२) इति यणि जिग्यिव, जिग्यिम। जीयात्। वि+जि = सर्वोत्कर्षस्थितौ (आत्मनेपदी) स नेहरूर्विजयते = सर्वोत्कर्षेण वर्तते। परा+जि = अभिभवे (आत्मनेपदी) अभिभवो न्यूनीकरणम् न्यूनीभवनञ्च। शत्रून् पराजयते। अध्ययनात् पराजयते म्लायतीत्यर्थः। **इ = गतौ** * प्रायेणाय-मुत्पूर्वः। उदयति। लङि तिबादेशे अयदिति जाते –

आडजादीनाम् ॥६।४।७२॥ (लुङ्लङ्लृङ्क्षु)

इति आडागमे –

---

† **'कृसृभृवृस्तु०' (७।२।१३) इत्यादिनियमसूत्राणां प्रभावादियं कारिका निर्गता।**

* **वैयाकरणान्तरमतेनायं धातुः। पाणिनिनये तु इट-किट-कटी = गतौ कटीत्यतः प्रकृष्टो ज्ञेयः।**

आटश्च[1] ॥६।१।९०॥ (अचि[2] एका[4] पूर्वपरयोः[3] वृद्धिः[5] संहितायाम्[6])

इति वृद्धौ उपसर्गयोगे उदायत्, उदयेत्, उदेष्यति, उदैष्यत्, उदेता, उदैषीत्। लिटि इ + अ इत्यत्र –

द्विर्वचनेऽचि ॥१।१।५९॥ (द्वित्वनिमित्तेऽचि अच आदेशो न द्वित्वे कर्तव्ये)

इति वृद्धिं निषिध्य द्वित्वादिकार्ये ततः **'अचो ञ्णिति'** (७।२।११५) इति, वृद्धौ आयादेशे इ + आय इति जाते –

[1]अभ्यासस्यासवर्णे[4] ॥६।४।७८॥ (अचि[5] ष्णु[2]रियङुवङौ[3])

इति इयङि इयायेति सिद्धे उपसर्गयोगे उदियाय **'एरनेकाचो०'** (६।४।८२) इति यणि, उदियतुः, उदियुः, उदयिथ उदेथ, उदियथुः, उदिय। उदियाय, उदियय, क्राद्यन्यत्वादिटि **'एरनेकाचो०'** (६।४।८२) इति यणि उदियिव, उदियिम। उदीयात् इत्यत्र –

एते[2]र्लिङि[4] ॥७।४।२४॥ (उपसर्गात्[1] ह्रस्वः[3])

इति ह्रस्वस्तु एतीति अदादिस्थस्येणो निर्देशान्न भवति – ऋ=गतौ।

[1]पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः[2] ॥७।३।७८॥ (शिति[3])

इति ऋच्छादेशे ऋच्छति। लङि आडागमे आ+ ऋच्छत् इत्यत्र **'आटश्च'** (६।१।९०) इति वृद्धौ। आर्च्छत्, ऋच्छतु, ऋच्छेत्, ऋ+स्यति इत्यत्र **'एकाच उपदेशेऽनुदात्तात्'** (७।२।१०) इति इण्निषेधे प्राप्ते –

ऋद्धनोः स्येः[3] ॥७।२।७०॥ (इट्[2])

इति इटि गुणे, मुर्धन्यादेशे अरिष्यति, आरिष्यत्। अर्ता। लुङि। ऋ + त् इति स्थितौ च्लौ तस्य च –

सर्तिशास्त्यर्तिभ्यश्च[1] ॥३।१।५६॥ (च्लेर्[2]ङ्[3])

इति च्लेरङ् तु भौवादिकस्यास्य ऋच्छतेर्न स्याद् अनयोः सर्तिशास्त्योः साहचर्य्यात् किन्तु च्लेः सिजादेशे अपृक्ते ईटि सिचि वृद्धौ आर्षीत्, आर्ष्टाम्, आर्षुः। आर्षीः, आर्ष्टम्, आर्ष्ट। आर्षम्, आर्ष्व, आर्ष्म। लिटि प्राप्तां वृद्धिं निषिध्य द्वित्वादौ ऋ ऋ + अ इति स्थितौ अभ्याससंज्ञायाम् –

[२]उरत्[३] ॥७।४।६६॥ (अभ्यासस्य[१])

इत्यभ्याससंज्ञकस्य ऋकारस्य अरि हलादिशेषे – अ ऋ+अ इत्यत्र **'अचो ञ्णिति'** (७।२।११५) इति वृद्धौ अ + आर् अ इत्यत्र –

अत[३] आदेः[२] ॥७।४।७०॥ (अभ्यासस्य[१] दीर्घः[४])

इति अभ्यासाकारस्य दीर्घे आ + आर् अ इति जाते सवर्णदीर्घे रेफस्य स्वरयोगे आर इति सिध्यति । ऋ अतुस् इत्यत्र –

ऋच्छत्यृताम् ॥७।४।११॥ (अङ्गानां गुणः लिटि)

इति प्राप्तं गुणं **'द्विर्वचनेऽचि'** (१।१।५९)

इति निषेध्य द्वित्वे कृते अभ्यासादिकार्ये अ ऋ + अतुस् जाते **'अत आदेः'** (७।४।७०) इति अभ्यासाकारस्य दीर्घे, ततः **'ऋच्छत्यृताम्'** (७।४।११) इति ऋकारस्य अरि गुणे आअर् + अतुस् इति स्थितौ सवर्णदीर्घे रेफस्य स्वरयोगे आरतुः । एवम् आरुः । अ ऋ+थ इत्यत्र **'ऋतो भारद्वाजस्य'** (७।२।६३) इति इण्निषेधे प्राप्ते –

इड[४]त्त्यर्तिव्य[१]यतीनाम् ॥७।२।६६॥ (थलि[२] नित्यम्[३])

इति नित्यमिटि गुणे सवर्णदीर्घे आरिथ, आरथुः, आर । उत्तमणलि णित्त्वस्य वैकल्पिकत्वाद् वृद्धौ दीर्घत्वे आर । पक्षे गुणे दीर्घत्वे आर । **'क्रादिनियमादिटि'** आरिव, आरिम । ऋ+यात् इत्यत्र –

गुणो[२]ऽर्ति[१]संयोगाद्योः ॥७।४।२९॥ (यकि[३] यि[४] असा[५]र्वधातुके लिङि[६])

इति गुणे यकारस्य द्वित्वे अर्य्यात् । अर्य्यास्ताम्, अर्य्यासुः । अर्याः, अर्य्यास्तम्, अर्य्यास्त । अर्य्यासम, अर्य्यास्व, अर्य्यास्म । एवम् **सृ + गतौ । 'पाघ्राध्मा०'** (७।३।७८) इति द्रुतगत्यर्थे धावादेशे धावति, अधावत्, धावतु, धावेत् । केवलगत्यर्थे सरतीत्यादि । आर्धधातुके प्रत्यये तु सरिष्यति, असरिष्यत्, सर्ता । लुङि **'सर्तिशास्त्यर्तिभ्यश्च'** (३।१।५६) इत्यत्र अविद्यमानशपा शासिना साहचर्य्याद् अविद्यमानशपोः जुहोत्यादिकयोः एव सर्त्यर्त्योः ग्रहणात् इह न अङ् किन्तु अनिट्कत्वाद् इटः अभावे **'सिचि वृद्धिः परस्मैपदेषु'** (७।२।१) इति वृद्धौ असार्षीत्, असार्ष्टाम्, असार्षुः, इत्यादि । लिटि ससार, सस्रतुः । ससर्थ, ससृव इत्यादि । लिङि – सृ + यात् इत्यत्र –

[२]रिङ् [३]शयग्लिङ्क्षु ॥७।४।२८॥ ([१]ऋतः [६]असार्वधातुके [४]यि [५]ङ्किति)

इति ऋतो रिङि अनुबन्धनिवृत्तौ रिङ्विधानसामर्थ्याद् दीर्घाभावे स्रियात्। प्र + सृ = विस्तारे। अप + सृ =दूरीभावे। सं + सृ = सातत्यगतौ। अनु + सृ = पश्चाद्गतौ। निः + सृ = निर्गमे। अभि + सृ =नायक-नायिका - संगमे। वि + सृ =द्वैधीभावे। अति + सृ = विरेचने। उप + सृ = समीपसञ्चारे। आ + सृ = धारासम्पाते। एवम् **स्मृ = चिन्तायाम्।** स्मरति, अस्मरत्, स्मरतु, स्मरेत्, स्मरिष्यति, अस्मरिष्यत्, स्मर्ता, अस्मार्षीत्। लिटि द्वित्वे अभ्यासकार्य्ये सस्मृ + अ इति जाते पूर्वविप्रतिषेधेन **'अचो ञ्णिति'** (७।२।११५) इति वृद्धौ – सस्मार

[२] ऋतश्च [१]संयोगादेर्गुणः[४] ॥७।४।१०॥ ([३]अङ्गस्य [५]लिटि)

इति किदर्थे गुणे अरि कृते सस्मरतुः, सस्मरुः, सस्मर्थ, सस्मरिव इत्यादि। लिङि **'गुणोऽर्तिसंयोगाद्योः'** (७।४।२९) इति गुणे स्मर्यात्। वि + स्मृ =विस्मरणे। **सं + स्मृ =** पूर्वस्मृतौ। एवम् **ह्रृ = कौटिल्ये।** ह्वरति, अह्वरत्, ह्वरतु, ह्वरेत्। ह्वरिष्यति, अह्वरिष्यत्, ह्वर्ता, अह्वार्षीत्, जह्वार, जह्वरतुः, जह्वर्थ, जह्वरिव इत्यादि। ह्वर्यात्। **तॄ + प्लवनतरणयोः।** तरति, अतरत्, तरतु, तरेत्। तॄ + स्यति - इत्यत्र सेट्कत्वात् **'आर्धधातुकस्येड्वलादेः'** (७।२।३५) इति इटि गुणे च कृते मूर्धन्यादेशे तरिष्यति इत्यवस्थायाम् –

वृतो वा ॥७।२।३८॥ (इटो दीर्घोऽलिटि)

इति वैकल्पिके इटो दीर्घे तरीष्यति। तरीता, तरिता। लुङि तार् + इस् ईत् इति स्थितौ

[१]इट [४]ईटि ॥८।२।२८॥ ([२]सस्य[३]लोपः)

इति सलोपे **(सिज्लोप एकादेशे सिद्धो वक्तव्यः)** इति वार्तिकबलात् **'अकः सवर्णे दीर्घः'** (६।१।१०१) इति दीर्घैकादेशे अतारीत्। **'वृतो वा'** (७।२।३८) इत्यनेन प्राप्तस्य दीर्घस्य –

सिचि च परस्मैपदेषु ॥७।२।४०॥ (वृतो इटो न दीर्घः)

इति निषेधे अतारिष्टाम्, अतारिषुः। अतारीः, अतारिष्टम्, अतारिष्ट। अतारिषम्, अतारिष्व, अतारिष्म। लिटि वृद्धौ ततार। ततॄ + अतुस् इत्यत्र – **'ऋच्छत्यृताम्'** (७।४।११) इति गुणे ततर् अतुस् इति जाते –

तॄफलभजत्रपश्च ॥६।४।१२२॥ (हलमध्यस्थाकारस्य एकारोऽभ्यासलोपः किति लिटि थलि च सेटि)

इति अभ्यासलोपे अकारस्य एत्वे। तेरतुः, तेरुः। तेरिथ, तेरथुः, तेर। ततार, ततर, तेरिव, तेरिम। तॄ + यात् इत्यत्र –

ऋत[1]इ[4]द्धातोः[2] ॥७।१।१००॥ (अङ्गस्य[3])

इत्यनेन इरि तिर्यात् इति जाते –

हलि[6] च ॥८।२।७७॥ [1]धातो र्वोः[2] उपधाया[3] दीर्घः[5] इकः[4])

इति उपाधादीर्घे तीर्यात्, तीर्यास्ताम्, तीर्यासुः, इत्यादि । **पा = पाने । 'पाघ्राध्मा०'** (७।३।७८) इति **पिबादेशे अदन्ते, अत** एव लघूपधगुणाभावे पिब + अति इति स्थितौ **'अतो गुणे'** (६।१।९७) **इति पररूपैकादेशे** पिबतीत्यादि । अपिबत्, पिबतु, पिबेत्, पास्यति, अपास्यत्, पाता । पा सिच् + त् इति स्थितौ **'गातिस्था०'** (२।४।७७) इति सिचो लुकि अडागमे अपात्, अपाताम् । झौ सिचो लुकि –

आतः[3] ॥३।४।११०॥ (सिचो[1] लुकि[2] एव[4] झे[5]र्जुस्[6])

इति झेर्जुसि अनुबन्धलोपे – **'उस्यपदान्तात्'** (६।१।९६) इति अकारोकारयोरुकारैकादेशे रुत्वे विसर्गे अडागमे च अपुः । अपाः, अपातम्, अपात । अपाम्, अपाव, अपाम । लिटि तु **द्वित्वे अभ्यासकार्ये** पपा + अ इति स्थितौ –

आत[1] औ[4]णलः[3] ॥७।१।३४॥ (धातोः[2])

इति णल औकारे वृद्ध्येकादेशे पपौ । पपा अतुस् इत्यत्र –

आतो लोप इटि च ॥६।४।६४॥ (आर्द्धधातुके ङिति अचि)

इति आलोपे पकारस्य स्वरयोगे पपतुः, पपुः । **भारद्वाजनियमाद्** वैकल्पिके इटि पपिथ, पपाथ । **क्रादिनियमादिटि** पपिव, पपिम । आशीर्लिङि पा + यात् इत्यत्र –

[3]एर्लिङि[4] ॥६।४।६७॥ (घु[1]मास्थागापाजहातिसाम् आतः[2] ङिति[5])

इति एत्वे पेयात्, पेयास्ताम्, पेयासुः । **इत्यादिरूपाणि** । एवम् **घ्रा = गन्धोपादाने ।** घ्रा + अति इत्यत्र **'पाघ्राध्मा०'** (७।३।७८) **इत्यनेन जिघ्रादेशे** जिघ्रति, अजिघ्रत्, जिघ्रतु, जिघ्रेत्, घ्रास्यति । घ्रा + सिच् + त् इति स्थितौ –

[4]विभाषा घ्राधेट्शाच्छासः[1] ॥२।४।७८॥ (सिचो[2] लुक्[3])

इति वैकल्पिके सिचो लुकि अडागमे अघ्रात् । झौ तु सिचो लुकि – **'आतः'** (३।४।११०) इति झेर्जुसि **'उस्यपदान्तात्'** (६।१।९६) इति पररूपे अडागमे च अघ्रुः । अघ्राः, अघ्रातम्, अघ्रात । अघ्राम्, अघ्राव, अघ्राम । पक्षे – **'अस्तिसिचोऽपृक्ते'** (७।३।९६) इति अपृक्तस्येटि घ्रा + स् ईत् इत्यत्र –

यमरमनमातां[1]सक्[2] च ॥७।२।७३॥ (सिचि[3] परस्मैपदेषु[4] इट्[5])

इति धातोः सगागमे सिचश्चेटि अनुबन्धनिवृत्तौ घ्रास्+इस् ईत् इति जाते **'इट ईटि'** (८।२।२८) इति सलोपे सवर्णदीर्घे अडागमे अघ्रासीत्, अघ्रासिष्टाम् इत्यादि। लिटि – जघ्रा+अ इत्यत्र – **'आत औ णलः'** (७।१।३४) इति णल औकारे वृद्ध्येकादेशे जघ्रौ। जघ्रा+अतुस् इत्यत्र – **'आतो लोप इटि च'** (६।४।६४) इति आलोपे जघ्रतुः। **भारद्वाजनियमात्** वैकल्पिके इटि जघ्रिथ, जघ्राथ। **क्रादिनियमादिटि** जघ्रिव, जघ्रिम। घ्रायात् इत्यत्र –

*** [6]वान्यस्य[1] संयोगादेः[2] ॥६।४।६८॥ (धातोः[4] आत[3] एत्वम्[5] [7]आर्द्धधातुके लिङि[8])**

इति वैकल्पिके एत्वे घ्रेयात्, घ्रायात्। वि+आ+घ्रा=हिंसायाम्। एवम् **ध्मा=शब्दाग्निसंयोगयोः। म्ना=अभ्यासे।** धमति, मनतीत्यादि। लुङि अध्मासीत्, अम्नासीत् इत्यादि। **दाण्-दाने 'पाघ्राध्मा०'** (७।३।७८) इति यच्छादेशे यच्छति, दास्यति, अदास्यत्, दाता **'गातिस्था०'** (२।४।७७) इति सिचो लुकि अदात्, अदाताम्, अदुः। इत्यादि। ददौ। दा+यात् इत्यत्र –

दाधा घ्वदाप् ॥१।१।२०॥ (दाप्दैपौ अदाब्व्याच्यौ)

इति घु संज्ञायाम् **'एर्लिङि'** (६।४।६७) इति धातोराकारस्य एत्वे देयात्, देयासुः। इत्यादि। आ+दाण्=आदाने। **ष्ठा=गतिनिवृत्तौ।**

[1]धात्वादेः षः[2] सः[3] ॥६।१।६४॥

इति षकारस्य सकारे **(निमित्तापाये नैमित्तिकस्याप्यपायः)** इति परिभाषया ष्टुत्वनिवृत्तौ स्था इति धातुरूपम् जायते, तस्य धातुत्वात् तिपि तिष्ठादेशे तिष्ठति। स्थास्यति। **'गातिस्था०'** (२।४।७७) इति सिचो लुकि अस्थात्। इत्यादि रूपाणि। लिटि द्वित्वे स्था स्था+अ इति स्थिते अभ्यासह्रस्वे।

शर्पूर्वाः[2] खयः[3] ॥७।४।६१॥ (अभ्यासस्य[1] शेषाः[4])

इति खयः थकारस्य शेषे तदन्यस्य सकारस्य लोपे **'अभ्यासे चर्च'** (८।४।५४) इति थकारस्य तकारे तस्था+अ इति स्थितौ णलः औकारे वृद्धौ तस्थौ। अलोपे तस्थतुः इत्यादि। **'एर्लिङि'** (६।४।६७) इति नित्यमेत्वे स्थेयात्। **धेट्=पाने।** धयति इत्यादि। लृडादौ तु –

---

* **(घुमास्थादेः अन्यस्य)।**

[४]आदेच[२] [१]उपदेशेऽशिति[५] ॥६।१।४५॥ ([३]धातोः)

इत्येकारस्य आकारे धास्यति, अधास्यत्। धाता, लुङि – **'विभाषा धेट्श्व्योः'** (३।१।४९) इति चङि द्वित्वादिकार्ये अदधत्। पक्षे **'विभाषा घ्राधेट्शाच्छासः'** (२।४।७८) इति वैकल्पिके सिचो लुकि अधात्। पक्षे **'यमरमनमातामू ०'** (७।२।७३) इति सकि सिचश्चेटि अधासीत् इत्यादि। **एवं ध्यै = चिन्तायाम्।** ध्यायति इत्यादि। लिटि – दध्यौ, दध्यतुः, दध्युः, ध्येयात्, ध्यायात्। **ग्लै, म्लै = हर्षक्षये।** ग्लायतीत्यादि ग्लेयात्, ग्लायात्। **कै गै रै = शब्दे।** कायतीत्यादि। **गम्लृ = गतौ – गम् +** अति इत्यत्र –

इषुगमियमां छः ॥७।३।७७॥ (शिति)

इति मस्य छत्वे तुकि चुत्वे गच्छति। अगच्छत्, गच्छतु, गच्छेत्। लृटि गम् + स्यति इत्यत्र –

शकिस्तु कान्तेष्वनिडेक इष्यते घसिश्च सान्तेषु वसिः प्रसारणी।
रभिस्तु भान्तेष्वथ मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरे॥
यमिर्यमन्तेष्वनिडेक इष्यते रमिश्च यश्च श्यनि पठ्यते मनिः।
नमिश्चतुर्थो हनिरेव पञ्चमो गमिश्च षष्ठः प्रतिषेधवाचिनाम्॥
दिहिर्दुहिर्मेहतिरोहती वहिर्नहिस्तु षष्ठो दहतिस्तथा लिहिः।
इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्तिताः॥
दिशिं दृशिं दंशिमथो मृशिं स्पृशिं रिशिं रुशिं क्रोशतिमष्टमं विशिम्।
लिशिं च शान्तानिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान्॥
रुधिः सराधिर्युधिबन्धिसाधयः क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः।
इमे तु धान्ता दश येऽनिटो मतास्ततः परं सिद्ध्यतिरेव नेतरे॥
शिषिं पिशिं शुष्यतिपुष्यती त्विषिं विषिं श्लिषिं तुष्यतिदुष्यती द्विषिम्।
इमान्दशैवोपदिशन्त्यनिड्विधौ गणेषु षान्तान्कृषिकर्षती तथा॥
तपिं तिपिं चापिमथो वपिं स्वपिं लिपिं लुपिं तृप्यतिदृप्यती सृपिम्।
स्वरेण नीचेन शपिं छुपिं क्षिपिं प्रतीहि पान्तान्यठितांस्त्रयोदश॥
अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन् शदिं सदिं स्विद्यतिपद्यती खिदिम्।
तुदिं नुदिं विंद्यतिविन्त इत्यपि प्रतीहि दान्तान्दश पञ्च चानिटः॥
पचिं वचिं विचिरिंचिरञ्जिपृच्छतीन्
निजिं सिचिं मुचिभजिभञ्जिभृज्जतीन्।
त्यजिं यजिं युजिरुजिसज्जिमज्जतीन्
भुजिं स्वजिं सृजिमृजीविद्ध्यनिट्स्वरान्॥

इति नियमादनिट्कतया **'एकाच उपदेशेऽनुदात्तात्'** (७।२।१०) इति इण्निषेधे प्राप्ते।

[1]गमेरिट्[4] परस्मैपदेषु[5] ॥७।२।५८॥ ([2]सादौ [3]आर्द्धधातुके)

इति इडागमे मूर्द्धन्यादेशे गमिष्यति, अगमिषयत्। गन्ता। लुङि गम्+त् इत्यत्र च्लौ तस्य –

[1]पुषादिद्युताद्यॄलृदितः [4]परस्मैपदेषु ॥३।१।५५॥ ([2]च्लेरङ्[3])

इत्यङि अडागमे अगमत्। लिटि जगम्+अ इत्यत्र –

अत उपधायाः ॥७।२।११६॥ (वृद्धिर्ञ्णिति)

इति उपधाकारस्य वृद्धौ जगाम,। जगम्+अतुस् इत्यत्र –

[1]गमहनजनखनघसां [3]लोपः क्ङित्यनङि[5] ॥६।४।९८॥ ([2]उपधाया [4]अचि)

इति उपधाकारस्य लोपे जग्मतुः, जग्मुः। जगम्+थ इत्यत्र **'एकाच उपदेश०'** (७।२।१०) इति इण्निषेधे क्रादिनियमादिडागमे प्राप्ते –

[1]उपदेशेऽत्वतः[2] ॥७।२।६२॥ ([3]तास्वत्थ[6]ल्यनि[5]टो [4]नित्यम्[7]इट्[8]न)

इनि पुनः इण्निषेधे प्राप्ते **भारद्वाजनियमात्** वैकल्पिके इटि जगमिथ। पक्षे **'नश्चापदान्तस्य०'** (८।३।२४) इत्यनुस्वारे **'अनुस्वारस्य ययि०'** (८।४।५८) इति परसवर्णे जगन्थ, जग्मथुः, जग्म। जगाम, जगम। **क्रादिनियमादिटि** जग्मिव, जग्मिम। गम्यात्।

अति + गम् = अतिक्रमे। अधि + गम् = प्राप्तौ। अनु + गम् = अनुसरणे।
अप + गम् = अपसरणे। अव + गम् = ज्ञाने। आ + गम् = आगमने।

उप + आ + गम् =सङ्गमे। उत् + गम् = उदये। प्रति + उद् + गम् =अभ्युपपत्तौ। उप + गम् = पार्श्वगमने। सम् + गम् = मेलने **(अकर्मकत्वे आत्मनेपदी)। यम = उपरमे। 'इषुगमियमां छः'** (७।३।७७) इति मस्य छादेशे तुकि चुत्वे यच्छति, यंस्यति, अयंस्यत्। यम्+ता इत्यत्र मकारस्य अनुस्वारे तस्य परसवर्णत्वेन नकारे यन्ता। यम् + स + ई + त् इत्यत्र **'यमरमनमातां०'** (७।२।७३) इत्यनेन सिचः इटि धातोः सगागमे **'इट ईटि'** (८।२।२८) इति सिचो लोपे सवर्णदीर्घे धातोर्मस्य अनुस्वारे अडागमे च अयंसीत्, अयंसिष्टाम्, अयंसिषुः। ययाम। ययम्+अतुस् इत्यत्र –

[5]अत [4]एकहल्मध्येऽ[2]नादेशादेर्लिटि[1] ॥६।४।१२०॥ ([3]धातोः [6]एत् [7]अभ्यासस्य [8]लोपः किति[9])

इति एकहल्मध्याकारस्य एत्वे अभ्यासलोपे च येमतुः। येमुः। ययम्+थ इत्यत्र (**अजन्तोऽकारवान् वा यस्तास्यनिड् थलि वेडयम्।**) इति नियमाद् वैकल्पिके इटि ययम्+इथ इत्यत्र –

[१]थलि [८]च [७]सेटि ॥६।४।१२१॥ ([४]अत [३]एकहल्मध्येऽनादे-शा[२]देर्लि[१]टि [५]एत् [६]अभ्यासलोपः)

इत्येत्वे अभ्यासलोपे च येमिथ, इडभावे अनुस्वारे परसवर्णे ययन्थ, येमथुः, येम। ययाम, ययम। क्रादिनियमादिटि येमिव, येमिम, यम्यात्। एवं **णम=प्रह्वत्वे शब्दे च।**

[२]णो [३]नः ॥६।१।६५॥ ([१]धात्वादेः)

(**णोपदेशास्त्वनर्दनाटिनाथनाधनन्दनक्कनृतः**) इति णस्य नत्वे नमति। यमिवद्रूपम्। **यभ्=मैथुने। (सन्तानकामनया पवित्रदम्पतिसंयोगे इति यावत्)** यभति। यभ्+स्यति इत्यत्र **'खरि च'** (८।४।५५) इत्यनेन चर्त्वेन पकारे यप्स्यति, अयप्स्यत्। यभ+ता इत्यत्र इडभावे –

[२]झषस्त[२]थो[३]र्धोऽधः[४] ॥८।२।४०॥

इति तकारस्य धकारे भकारस्य –

झलां जश् झशि ॥८।४।५३॥

इति जश्त्वेन बकारे यब्धा। यभ्+सीत् इत्यत्र अनिट्कत्वात् इडभावे –

वदव्रजहलन्तस्याचः ॥७।२।३॥ (सिचि वृद्धिः परस्मैपदेषु)

इति वृद्धौ याभ्+सीत् इति जाते चर्त्वे अडागमे अयाप्सीत्। अयाभ्+स्ताम् इत्यत्र –

[१]झलो [४]झलि ॥८।२।२६॥ ([२]सस्य [३]लोपः)

इति सलोपे तकारस्य धत्वे भस्य बत्वे अयाब्धाम्। अयाप्सुः। अयाप्सीः। अयाब्धम्। अयाब्ध। अयाप्सम्। अयाप्स्व। अयाप्स्म। ययाभ, येभतुः, येभुः। यभ्यात्। **दह=भस्मीकरणे।** दहति, अदहत्, दहतु, दहेत्। दह+स्यति इत्यत्र – ढत्वमपोह्य

[१]दादेर्धातो[२]र्घः[४] ॥८।२।३२॥ ([३]हः [५]झलि [६]पदान्ते)

इति घत्वे **'एकाचो बशो भष्०,** (८।२।३७) इति दस्य धकारे **'खरि च'** (८।४।५५) इति चर्त्वे सस्य मूर्द्धन्यादेशे धक्ष्यति, अधक्ष्यत्, दग्धा, अधाक्षीत्, अदाग्धाम्, अधाक्षुः

इत्यादि । ददाह, देहतुः इत्यादि । दह्यात् । **त्यज् = हानौ ।** त्यजति, त्यक्ष्यति, अत्यक्ष्यत्, त्यक्ता, अत्याक्षीत्, तत्याज । तत्यजिथ, तत्यक्थ । तत्यजिव, तत्यजिम । त्यज्यात् । **तप = सन्तापे ।** तपति, तप्स्यति, अतप्स्यत्, तप्ता, अताप्सीत्, तताप, तेपतुः । तेपिथ, ततप्थ । तेपिव, तेपिम, तप्यात् । **क्रमु = पादविक्षेपे ।** क्रम् + ति इत्यत्र –

[२]वा[१] भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥३॥१॥७०॥ ([३]श्यन् कर्तरि[४] [५]सार्वधातुके)

इति वैकल्पिके श्यनि, अनुबन्धनिवृत्तौ क्रम् + यति इति जाते –

क्रमः[१] [४]परस्मैपदेषु ॥७।३।७६॥ ([२]दीर्घः शिति[३])

इति दीर्घे क्राम्यति । क्रामति । क्रमिष्यति । अक्रमिष्यत् । क्रमिता । अक्रम् + इस् + ईत् इत्यत्र **'वदव्रजहलन्तस्याचः'** (७।२।३) इति नित्यवृद्धौ प्राप्तायाम् –

[४]नेटि[२] ॥७।२।४॥ ([३]सिचि [५]वृद्धिः [१]हलः)

इति निषेधे प्राप्ते तं बाधित्वा –

[३]अतो [१]हलादेर्लघोः[२] ॥७।२।७॥ ([४]वा [५]वृद्धिः इटि[६] सिचि[७] परस्मैपदेषु[८])

इति पाक्षिकी वृद्धिः प्राप्ता तस्याः–

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥७।२।५॥ (न वृद्धिः)

इति निषेधे **'इट ईटि'** (८।२।२८) इति सलोपे । **(सिज्लोप एकादेशे सिद्धो वक्तव्यः)** इति बलात् दीर्घैकादेशे अक्रमीत् । चक्राम, चक्रमतुः । क्रम्यात् । अति + क्रम = उल्लंघने । अप + क्रम = अपसरणे । आ + क्रम = आक्रमणे । उत् + क्रम = उद्गमने । परा + क्रम = पराक्रमे । उप + क्रम = प्रारम्भे **(आत्मनेपदे)** । वि + क्रम = साधुपादविक्षेपे (आत्मनेपदे) । (साधु विक्रमते वाजीत्याद्युदाहरणम्) । **भ्रमु = सञ्चलने । 'वा भ्राशभ्लाशभ्रमु०'** (३।१।७०) इति पाक्षिके श्यनि भ्रम्यति । पक्षे भ्रमति । भ्राम्यतीति तु दैवादिकस्य । अभ्रम्यत्, अभ्रमत् । भ्रम्यतु, भ्रमतु । भ्रम्येत्, भ्रमेत् । सेट्कत्वादिट् भ्रमिष्यति, अभ्रमिष्यत् । भ्रमिता । मान्ताद् वृद्धिनिषेधे अभ्रमीत् । बभ्राम । बभ्रम् + अतुस् इत्यत्र –

वा जृभ्रमुत्रसाम् ॥६।४।१२४॥ (अतः एत् अभ्यासलोपः किति लिटि सेटि थलि च)

इति एत्वे अभ्यासलोपे च भ्रेमतुः। पक्षे बभ्रमतुः। भ्रेमिथ, बभ्रमिथ, भ्रेमिव, बभ्रमिव। भ्रम्यात्। वि + भ्रम् = विभ्रान्तौ। सम् + भ्रम = भ्रान्तौ। **चमु = अदने।** चम् + अति इत्यत्र –

ष्ठिवुक्लमुचमां[१] शिति[४] ॥७।३।७५॥ ([२]अचः दीर्घः[३])

इति प्राप्तस्य दीर्घस्य **(आङि चाम इति वक्तव्यम्)** इति नियमादिह निषेधे चमति। आङ्योगे। आचामति। आचामत्। चमिष्यति। अचमिष्यत्। चमिता, अचमीत्। चचाम, चेमतुः। चेमिथ। चम्यात्। **ष्ठिवु = निरसने। 'धात्वादेः षः सः'** (६।१।६४) इति प्राप्ते **(सुब्धातुष्ठिवुष्वस्कतीनां प्रतिषेधो वक्तव्यः)** इति निषेधे – ष्ठिवति इत्यत्र **'ष्ठिवुक्लमुचमां शिति'** (७।३।७५) इति अचो दीर्घे ष्ठीवति। ष्ठिव् + इष्यति इत्यत्र –

पुगन्तलघूपधस्य च ॥७।३।८६॥ (अङ्स्य गुणः सार्वधातुकार्धधातुकयोः)

इति गुणे ष्ठेविष्यति। अष्ठेवीत्, ष्ठिव् ष्ठिव् + अ इत्यत्र – **'शर्पूर्वाः खयः'** (७।४।६१) इति थकारशेषे अन्यहलश्च लोपे **'अभ्यासे चर्च'** (८।४।५४) इति थस्य तकारे **'पुगन्तलघूपधस्य च'** (७।३।८६) इति उपधागुणे तिष्ठेव। कित्त्वाद्गुणाभावे तिष्ठिवतुरित्यादि **'ठद्वितीयोऽयं धातुः'** इति पक्षे तु अभ्यासे ठकारशेषे ठस्य टकारे टिष्ठेवेत्यादि। आशीर्लिङि **'हलि च'** (८।२।७७) इति दीर्घे ष्ठीव्यात्। **चिती = संज्ञाने।** चेतति, चेतिष्यति, अचेतीत्, चिचेत, चित्यात्। एवं **षिधु = गत्याम्। शुच = शोके। वृषु = वर्षणे।** वर्षति। अवर्षीत्। ववर्ष, वृष्यात्। **हृषु = अलीके। घृषु = घर्षणे। च्युतिर् = आसेचने।** च्योतति। च्योतिष्यति। लुङि।

[१]इरितो वा[५] ॥३।१।५७॥ ([३]च्लेरङ्[४] धातोः[२])

इति च्लेरङि ङित्त्वाद् गुणाभावे, अच्युतत्। पक्षे अच्योतीत्, चुच्योत। च्युत्यात्। एवम् **घुषिर् अविशब्दने, शब्दे इत्यन्ये। मुर्च्छा = मोह-समुच्छाययोः 'हलि च'** (८।२।७७) इत्यनुवर्तमाने **'उपधायाञ्च'** (८।२।७८) इति दीर्घे **'मूर्च्छति'** इत्यादि। **कूज = अव्यक्ते शब्दे। फुल्ल = विकसने। तुष् = तुष्टौ। पुष् = वृद्धौ। जीव = प्राण-धारणे। शील = समाधौ। कील = बन्धने। पीव = स्थौल्ये। रक्ष = पालने। गद पठ = व्यक्तायां वाचि।** गदति, अगदत्। गदिष्यति। अगदीत्। अगादीत्। पठति। अपठीत्, अपाठीत्। **भष् = बुक्कने। टुणदि = समृद्धौ।** इति सानुबंन्धस्य धातोः –

[२]आदिर्ञिटुडवः[३] ॥१।३।५॥ ([१]उपदेशे इतः[४])

इति टुकारस्येत्संज्ञायां लोपे च तद्वदेव इकारनिवृत्तौ –

[1]इदितो [3]नुम् [2]धातोः ॥७।१।५८॥

इति नुमागमे कर्त्तव्ये **'मिदचोऽन्त्यात्परः'** (१।१।४७) इति अकारस्यान्तावयवे नुमि अनुबन्धनिवृत्तौ शपि नन्दति, नन्दिष्यति, अनन्दिष्यत्, अनन्दीत्, इदित्त्वान्नलोपाभावे नन्द्यात्। अभि + नन्द = प्रशंसायाम्। एवं **णिदि = निन्दायाम्।** निन्दति। **मडि = भूषायाम्।** मण्डति। **रहि = गतौ।** रंहति। **खजि = गति-वैकल्ये।** खञ्जति। **मुडि = खण्डने।** मुण्डति। **कदि, क्रदि = आह्वान-रोदनयोः। चुबि = वक्त्र-संयोगे। गुजि = अव्यक्ते शब्दे। कुडि = वैकल्ये। लुटि = स्तेये। लुठि इत्येके। बृहि = वृद्धौ। वाछि = इच्छायाम्। लाछि - लक्षणे। अहि = गतौ।** अंहति। द्वित्वे अभ्यासकार्ये **'अत आदेः'** (७।४।७०) इति अभ्यासदीर्घे आ + अंह इत्यत्र –

[1]तस्मान्नुड् [4]द्विहलः[2] ॥७।४।७१॥ (अङ्गस्य[3])

इति नुटि अनुबन्धनिवृत्तौ आनंह, आनंहतुः, आनंहिथ, आनंहथुः, आनंह। आनंहिव। आनंहिम। **अर्ह = पूजायाम्।** अर्हति, आनर्ह, अर्हिष्यति। **अर्च = गति-पूजनयोः।** अर्चति, आनर्च। **अर्द = गतौ याचने च।** अर्दति, आनर्द। **अर्ज = अर्जने।** आनर्ज। **गर्ज = शब्दे। तर्ज = भर्त्सने। चर्ब = अदने। दंश = दंशने (दंष्ट्राव्यापारे इति यावत्)**

दंश-सञ्ज-स्वञ्जां[1] शपि[3] ॥६।४।२५॥ (नलोपः[2])

इति नलोपे दशति। **'व्रश्च-भ्रस्ज०'** (८।२।३६) इति शस्य षत्वे।

षढोः कः सि ॥८।२।४१॥

इति षस्य ककारे सस्य मूर्द्धन्यादेशे कषोर्योगे क्षकारे दंक्ष्यति। दंष्टा। **'वदव्रज०'** (७।२।३) इति वृद्धौ अदांक्षीत्। ददंश। आशीर्लिङि –

अनिदितां हल उपधायाः क्ङिति ॥६।४।२४॥ (नलोपः)

इति नलोपे दश्यात्। **लुञ्च् = अपनयने।** लुञ्चिष्यति। अलुञ्चीत्। लुच्यात्। **अञ्चु = गति-पूजनयोः।** अञ्चति, अञ्चिष्यति, आञ्चीत्। आनञ्च। अच्यात्। **पूजार्थे तु 'नाञ्चेः पूजायाम्'** (६।४।३०) इति नलोपाभावे - अञ्च्यात्। **दृशिर् =प्रेक्षणे, 'पाघ्राध्मा०'** (७।३।७८) इति पश्यादेशे पश्यति। लृटि तु दृश् + स्यति इत्यत्र –

सृ[1]जिदृशो[4]र्झल्य[2]मकि[3]ति ॥६।१।५८॥

इति मित्त्वाद् ऋकारस्यान्तावयवे अमि अनुबन्धनिवृत्तौ दृ अश् + स्यति इति जाते। यणादेशे ऋकारस्य रेफे द्रश् + स्यति इत्यत्र **'व्रश्चभ्रस्ज०'** (८।२।३६) इति षत्वे तस्य **'षढोः कः सि'** (८।२।४१) इति कत्वे मूर्द्धन्यादेशे द्रक्ष्यति। लुङि – दृश् + च्लि त् इत्यत्र –

शल[2] [1]इगुपधादनिटः[3] क्सः[6] ॥३।१।४५॥ (च्लेः[5] [4]धातोः)

इति च्लेः क्सादेशे प्राप्ते ।

न[५] दृशः[१] ॥३।१।४७॥ (च्लेः[३] क्सः[४] धातोः[२])

इति क्सादेशनिषेधे **'इरितो वा'** (३।१।५७) इति पाक्षिके अङि –

ऋदृशोऽङि गुणः ॥७।४।१६॥ (अङ्गस्य)

इति गुणे अदर्शत् । पक्षे सिचि अमि यणि हलन्तलक्षणायां वृद्धौ च अद्राक्षीत् । ददर्श । थलि –

विभाषा सृजिदृशोः ॥७।२।६५॥ (थलि इट् न)

इतीड्निषेधे पाक्षिके दद्रष्ठ, ददर्शिथ, दृश्यात् । **ज्वर = रोगे** । ज्वरिष्यति । लुङि–

[२]अतो [१]ल्रान्तस्य ॥७।२।२॥ (सिचि[४] वृद्धिः[३] परस्मैपदेषु[५])

इति वृद्धौ अज्वारीत् । **ज्वल = दीप्तौ** । लुङि ज्वरवद् वृद्धौ । अज्वालीत् । **स्वन, ध्वन = शब्दे । लगे = सङ्गे** । लगिष्यति । लुङि सिचि **'ह्म्यन्तक्षण०'** (७।२।५) इति वृद्धिनिषेधे- अलगीत् । ललाग, लेगतुः । लग्यात् । **णद = अव्यक्ते शब्दे । 'णो नः'** (६।१।६५) इति णस्य नकारे नदति । ननाद, नेदतुः । **रस् = शब्दे रसति** । वि + रस् = कुशब्दे । **लस = श्लेषणक्रीडनयोः । वि + लस् = विलासे । फल = निष्पत्तौ** । फलति । फलिष्यति । पफाल । **'तृफलभजत्रपश्च'** (६।४।१२२) इत्येत्वेऽभ्यासलोपे च फेलतुः । फल्यात् । **दल = विशरणे । चर = गतौ । रण, भण, क्वण, = शब्दे । लप, जप, जल्प, गल्प = व्यक्तायां वाचि । मह = पूजायाम् । रह = त्यागे । पत्लृ = पतने** पतति, पतिष्यति, लुङि-ऌदित्वात् च्लेरङि पत् + अत् इति स्थितौ –

पतः[१] पुम्[२] ॥७।४।१९॥ (अङि[३])

इति पुमागमे कर्त्तव्ये मित्त्वादकारात्परे पुमि अनुबन्धनिवृत्तौ अडागमे, अपप्तत्, अपप्तताम्, अपप्तन् । अपप्तः, अपप्ततम्, अपप्तत । अपप्तम्, अपप्ताव, अपप्ताम । पपात, पेततुः । पत्यात् । **अत = सातत्यगमने** । अतति, अतिष्यति, आतीत्, आत आततुः । अत्यात् । इत्यादि । **वस = निवासे** । वसति । वस् + स्यति इत्यत्र –

सः[१] स्या[३]र्द्धधातुके[४] ॥७।४।४९॥ (तः[२])

इति सस्य तकारे वत्स्यति । अवत्स्यत् । वस्ता, अवात्सीत् । अवात् + स + ताम् इत्यवस्थायाम् – **'झलो झलि'** (८।२।२६) इति सलोपे अवात्ताम्, अवात्सुः । लिटि द्वित्वादौ व वस् = अ इत्यत्र –

लिट्यभ्यासस्योभयेषाम् ॥६।१।१७॥ (सम्प्रसारणम्)

इति अभ्यासस्य सम्प्रसारणे – **'सम्प्रसारणाच्च'** (६।१।१०८) इति पूर्वरूपे उपधावृद्धौ उवास। वस् अतुस् इत्यत्र **(सम्प्रसारणं तदाश्रयं च कार्यं बलीयः।)** इति नियमाद्।

* वचिस्वपियजादीनां किति ॥६।१।१५॥ (सम्प्रसारणम्)

इति सम्प्रसारणे **'सम्प्रसारणाच्च'** (६।१।१०८) इति पूर्वरूपे उस् इत्यस्य द्वित्वे अभ्यासकार्य्ये सवर्णदीर्घे –

[1]शासिवसिघसीनाञ्च ॥८।३।६०॥ ([2]इण्कुभ्यां [3]सस्य षः[4])

इति सस्य षत्वे ऊषतुः, ऊषुः। उवसिथ, उवस्थ, ऊषथुः; ऊष। उवास, उवस्व, ऊषिव, ऊषिम। उष्यात्। उप + वस = अभोजने। **वद = व्यक्तायां वाचि।** वदति, वदिष्यति। **'वदव्रज०'** (७।२।३) इति वृद्धौ अवादीत्। पिति **'लिट्यभ्यासस्योभयेषाम्'** (६।१।१७) इति, किति **'वचिस्वपियजादीनां किति'** (६।१।१५) इति सम्प्रसारणे उवाद, ऊदतुः, ऊदुः, उवदिथ। उद्यात्। **खनु = अवदारणे** खनति। खनिष्यति। अखनीत्, अखानीत्। चखान। चखन् + अतुस् इत्यवस्थायाम्, **'गमहनजनखन०'** (६।४।९८) इति उपधालोपे चख्नतुः, चख्नुः, चखनिथ। लिङि –

[3]ये विभा[5]षा ॥६।४।४३॥ ([4]ङिति [1]जनसनखनाम् [2]आत्)

इति वैकल्पिके आत्वे खायात् पक्षे, खन्यात्।

॥ इति परस्मैपदिनः ॥

●

---

* यजिर्वपिर्वहिश्चैव वसिर्वेञ्व्येञ इत्यपि।
ह्वेञ्वदी श्वयतिश्चैव यजाद्याः स्युरिमे नव॥

आत्मनेपदिनः

एध=वृद्धौ। इति वृद्ध्यर्थकात् एध् धातोः **'लः कर्मणि च भावे चाकर्मकेभ्यः'** (३।४।६९) इति कर्त्तरि लकारोपस्थितौ **'वर्तमाने लट्'** (३।२।१२३) इति वर्तमानार्थके † लटि अनुबन्धलोपे लस्य **'तिप्तस्झि०'** (३।४।७८) इत्यादिना तिङादेशे कर्त्तव्ये –

अनुदात्तङित आत्मनेपदम् ॥१।३।१२॥

'अनुदात्तङित आत्मनेपदम्' (१।३।१२) इति अनुदात्तेत्त्वादात्मनेपदे विधेये –

'तङानावात्मनेपदम्' (१।४।१००) इति तङ आत्मनेपदत्वात् प्रथमपुरुषैकत्वविवक्षायाम् त प्रत्यये एध्+त इत्यत्र –

[२]टित [४]आत्मनेपदानां टे[५] रे[६] ॥३।४।७९॥ ([१]धातोर्लस्य[३] ।)

इति तप्रत्ययाकारस्य एत्वे शपि अनुबन्धनिवृत्तौ एध्+अते, इत्यत्र धकारस्य स्वरसंयोगे एधते। द्विवचनविवक्षायाम् आताम् प्रत्यये टेः एत्वे शपि एध+आते, इति जाते –

[४]आतो [३]ङितः ॥७।२।८१॥ ([१]अतः सार्वधातु[२]कस्य [५]इय्)

इति आकारस्य इयादेशे **'लोपो व्योर्वलि'** (६।१।६६) इति यलोपे एध+इते इति जाते गुणे एधेते। बहुत्वविवक्षायाम् झप्रत्यये तस्य अन्तादेशे शपि एध+अन्ते, इत्यत्र पररूपे एधन्ते। एध् थास् इत्यत्र –

[३]थासः से[४] ॥३।४।८०॥ ([१]टितो [२]लस्य)

इति थासः से कृते शपि एधसे। एध्+आथामित्यत्र शपि टेरेत्वे एध+आथे इत्यत्र आत इयादेशे यलोपे गुणे एधेथे, एधध्वे। एध+ए इत्यत्र **'अतो गुणे'** (६।१।९७) इति पररूपे एधे। एध+वहे इत्यत्र **'अतो दीर्घो यञि'** (७।३।१०१) इति दीर्घे एधावहे, एधामहे। कर्तृवाच्यतया कर्तुः तिङा सामानाधिकरण्यात् परोपकारी यशसि समेधते। तौ एधेते। ते एधन्ते इत्यादि।

---

† **लटि – ते, आ (इ) ते, अन्ते (ते)। से, आ (इ) थे, ध्वे। ए, वहे, महे। इति प्रत्ययाकारो ज्ञेयः। प्रारम्भत इमे प्रत्यया जिह्वारूढाः कार्याः। ततो धातुरूपकथने सुविधा स्यात्।**

* लङि तप्रत्यये शपि एधत इत्यत्र **'आडजादीनाम्'** (६।४।७२) इति धातोः आडागमे **'आटश्च'** (६।१।९०) इति वृद्धौ ऐधत, ऐधेताम्, ऐधन्त। ऐधथाः, ऐधेथाम्, ऐधध्वम्। ऐधे, ऐधावहि, ऐधामहि। † लोटि एधते इत्यत्र –

[३]आमेतः[२] ॥३।४।९०॥ ([१]लोटः)

इति एकारस्यामादेशे एधताम्, एधेताम्, एधन्ताम्। एधसे, इत्यत्र –

[२]सवाभ्यां वामौ[४] ॥३।४।९१॥ ([३]एतः [१]लोटः)

इति एकारस्य वकारे एधस्व, एधेथाम्। एधध्वे इत्यत्र एतः अमि एधध्वम्। एध ए इत्यत्र –

[३]एत ऐ[४] ॥३।४।९३॥ ([१]लोट [२]उत्तमस्य)

इति एकारस्यैकारे **'आडुत्तस्य पिच्च'** (३।४।९२) इत्याडागमे एधआ+ऐ इत्यत्र **'आटश्च'** (६।१।९०) इति वृद्धौ एध+ऐ इत्यत्र **'वृद्धिरेचि'** (६।१।८८) इति वृद्धौ एधै, एध+वहै इत्यत्र, आडागमे सवर्णदीर्घे एधावहै, एधामहै। †† विधिलिङि तप्रत्यये शपि अनुबन्धनिवृत्तौ एध+त, इत्यत्र –

[२]लिङः [३]सीयुट् ॥३।४।१०२॥ ([१]आत्मनेपदस्य)

इति टित्त्वात् तप्रत्ययस्यादौ सीयुडागमे अनुबन्धनिवृत्तौ **'लोपो व्योर्वलि'** (६।१।६६) इति यलोपे 'एध सी त' इति जाते **'सुट्तिथोः'** (३।४।१०७) इति सुटि, अनुबन्धलोपे एध+सीस्त इति स्थितौ **'लिङः सलोपोऽनन्त्यस्य'** (७।२।७९) इति उभयसलोपे गुणे एधेत, एधेयाताम्, एध+झ इत्यत्र –

[२]झस्य रन्[३] ॥३।४।१०५॥ ([१]लिङः)

इति झस्य रनादेशे सीयुडादिकार्ये एधेरन्। एधेयाः, एधेयाथाम्, एधेध्वम्। उत्तमपुरुषैकवचने –

[२]इटोऽत्[३] ॥३।४।१०६॥ ([१]लिङः)

*** लङि – त, आ (इ) ताम्, अन्त (त)। थास्, आ (इ) थाम्, ध्वम्। इ, वहि, महि।**

† लोटि – ताम्, आ (इ) ताम्, अन्ता (ता) म्। स्व, आ (इ) थाम्, ध्वम्। ऐ, आवहै, आमहै।

†† विधिलिङि – ईत, ईयाताम्, ईरन्। ईथाः, ईयाथाम्, ईध्वम्। ईय, ईवहि, ईमहि।

इति इटः अदादेशे सीयुडादिकार्ये एधेय, * ।एधेवहि, एधेमहि । † लृटि तप्रत्यये टेरेत्वे **'स्यतासी लृलुटोः'** (३।१।३३) इति स्यप्रत्यये तस्य वलाद्यार्द्धधातुकत्वात् इटि मूर्धन्यादेशे एधिष्यते, एधिष्येते एधिष्यन्ते । एधिष्यसे, एधिष्येथे, एधिष्यध्वे । एधिष्ये, एधिष्यावहे, एधिष्यामहे । †† लृङि आडागमे वृद्धौ ऐधिष्यत, ऐधिष्येताम्, ऐधिष्यन्त । ऐधिष्यथाः, ऐधिष्येथाम्, ऐधिष्यध्वम् । ऐधिष्ये, ऐधिष्यावहि, ऐधिष्यामहि । □ लुटि एधिता, एधितारौ, एधितारः । एधितास् + से इत्यत्र **'तासस्त्योर्लोपः'** (७।४।५०) इति सलोपे एधितासे, एधितासाथे । एधितास् + ध्वे, इत्यत्र –

[1]धि च ॥८।२।२५॥ ([2]सस्य लोपः[3])

इति सलोपे एधिताध्वे । एधितास् + ए इत्यत्र –

ह[3] ए[4]ति ॥७।४।५२॥ ([2]सस्य तासस्त्योः[1])

इति सो हकारे एधिताहे, एधितास्वहे, एधितास्महे । () लुङि तप्रत्यये शपं बाधित्वा च्लौ तस्य सिचि अनुबन्धनिवृत्तौ **आर्द्धधातुकत्वात्** इटि मूर्धन्यादेशे ष्टुत्वे आडागमे वृद्धौ ऐधिष्ट, ऐधिषाताम्, ऐधिष् + झ इत्यत्र –

[1]आत्मनेपदेष्वनतः[2] ॥७।१।५॥ ([3]अङ्गात् झः[4] अत्[5])

इति झस्य अति कृते ऐधिषत । ऐधिष्ठाः, ऐधिषाथाम् । ऐधिस् + ध्वम् इत्यत्र **'धि च'** (८।२।२५) इति सलोपे ऐधिध्वम् इति जाते –

इणः[1] [3]षीध्वंलुङ्लिटां [4]धोऽङ्गात्[2] ॥८।३।७८॥ ([5]मूर्धन्यः)

---

* इदमस्थमुः (५।३।२४) इति उदित्करणेन 'न विभक्तौ तुस्माः' (१।३।२४) इत्यस्यानित्यतया 'हलन्त्यम्' (१।३।३) इति तलोपः।

† लृटि – स्यते, स्येते, स्यन्ते। स्यसे, स्येथे, स्यध्वे। स्ये, स्यावहे, स्यामहे।

†† लृङि – स्यत, स्येताम्, स्यन्त। स्यथाः, स्येथाम्, स्यध्वम्। स्ये, स्यावहि, स्यामहि।

□ लुटि – ता, तारौ, तारः। तासे, तासाथे, ताध्वे। ताहे, तास्वहे, तास्महे।

() लुङि – सेट्कधातुषु इष्ट, इषाताम्, इषत। इष्ठाः, इषाथाम्, इध्वम्। इषि, इष्वहि, इष्महि। अनिट्केषु स्त, साताम्, सत। स्थाः, साथाम्, ध्वम्। सि, स्वहि, स्महि। च्लेश्चङादिकार्ये तु लङ्वत् प्रत्यया ज्ञेयाः।

इति धस्य ढत्वे ऐधिढ्वम् (इड्भिन्न इणिह गृह्यते) इति मते न मूर्द्धन्यः। ऐधिषि, ऐधिष्वहि, ऐधिष्महि। □ लिटि तु –

[३]इजादेश्च [४]गुरुमतोऽनृच्छः[२] ॥३।१।३६॥ ([लिटि][१] [५]धातोः [६]आम्)

इत्यामि कृते –

[१]आमः ॥२।४।८१॥ ([लेः][२] लुक्[३])

इटि लिटो लुकि एधाम् इत्यत्र –

*** [२]कृञ्चानुप्रयुज्यते[३] लिटि[४] ॥३।१।४०॥ (आमः[१])**

इति लिट्परकस्य कृञोऽनुप्रयोगे –

आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य ॥१।३।६३॥ (आत्मनेपदम्)

इत्यात्मनेपदे तङि कर्तव्ये प्रथमपुरुषैकत्वविवक्षायां तप्रत्यये तस्य **'लिट् च'** (३।४।११५) इत्यार्धधातुकत्वे एधाम्+कृ+त इति जाते –

[१]लिटस्त [२]झयोरेशिरेच्[३] ॥३।४।८१॥

इति तकारस्य एशित्वादेशे अनुबन्धनिवृत्तौ एधाम्+कृ+ए इत्यत्र परत्वात् प्राप्तं यणं **'द्विर्वचनेऽचि'** (१।१।५९) इति निषिध्य **'लिटि धातोरनभ्यासस्य'** (६।१।८) इति द्वित्वे अभ्यासकार्ये एधाम् चकृ+ए इत्यत्र **'इको यणचि'** (६।१।७७) इति यणि एधाम्+चक्रे इति जाते मस्यानुस्वारे परसवर्णे एधाञ्चक्रे, एधाञ्चक्राते **'लिटस्तझयोरेशिरेच्'** (३।४।८१) इति इरेचि यणि एधाञ्चक्रिरे, **'एकाच उपदेशेऽनुदात्तात्'** (७।२।१०) इति इण्निषेधे मूर्द्धन्यादेशे एधाञ्चकृषे, ऐधाञ्चक्राथे **'इणः षीध्वंलुङ्लिटां धोऽङ्गात्'** (८।३।७८) इति धस्य मूर्द्धन्यादेशेन ढत्वे एधाञ्चकृढ्वे, एधाञ्चक्रे, **'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि'** (७।२।१३) इति इटो निषेधे एधाञ्चकृवहे, एधाञ्चकृमहे। भुवोऽनुप्रयोगे भुवः परस्मैपदित्वात् एधाम्+भू अ इति जाते द्वित्वादिकार्ये परसवर्णे एधाम्बभूवेत्यादि। एवमसोऽनुप्रयोगे तस्यापि परस्मैपदित्वात् एधाम्+अस्+अ इत्यत्र द्वित्वे अभ्यासकार्ये **'अत आदेः'** (७।४।७०) इति अभ्यासदीर्घे ततः सवर्णदीर्घे एधामास, एधामासतुः, एधामासुः।

□ **लिटि – ए, आते, इरे। से, आथे, ध्वे। ए, वहे, महे।**

* **'कृभ्वस्तियोगे०' (५।४।५०) इति सूत्रस्थ-कृशब्दादारभ्य, 'कृञो द्वितीयतृतीय०' (५।४।५८) इति सूत्रस्य – 'ञ् कारान्तः' 'कृञ् प्रत्याहारः। तेनः कृ - भू - अस् इति त्रयो धातवो लभ्यन्ते।**

एधामासिथ, एधामासथुः, एधामास । एधामास, एधामासिव, एधामासिम । † आशीर्लिङि तप्रत्यये **'लिङाशिषि'** (३।४।११६) इति आर्धधातुकत्वेन शपोऽभावे **'लिङः सीयुट्'** (३।४।१०२) इति सीयुडागमे अनुबन्ध-निवृत्तौ । यलोपे – **'सुट् तिथोः'** (३।४।१०७) इति तकारस्यादौ सुडागमेऽनुबन्धनिवृत्तौ सकारस्य मूर्धन्यादेशे ष्टुत्वेन तकारस्य टकारे एध्+सीष्ट इति जाते वलादित्वादिटि मूर्धन्यादेशे एधिषीष्ट, एधिषीयास्ताम्, एधिषीरन् । एधिषीष्ठाः, एधिषीयास्थाम्, एधिषीढ्वम्, इड्भिन्नेण्ग्रहणपक्षे एधिषीध्वम् । एधिषीय, एधिषीवहि, एधिषीमहि । सम्+एध=समृद्धौ । यथा विद्वत्सु **विधिज्ञः** समेधते । इत्यादि । **ईह= चेष्टायाम्।** ईहते, ईहाञ्चक्रे इत्यादि । **सम्+ईह**=उत्कटेच्छायाम् । निर्+ईह=अनिच्छायाम् । **ईक्ष=दर्शने** ।ईक्षते, ईक्षाञ्चक्रे, इत्यादि । निर्+ईक्ष= निरीक्षणे । परि+ईक्ष = परीक्षायाम् । सम्+ईक्ष = समीक्षायाम् । इत्यादि । **प्रायः सर्वोपसर्ग-योगेनैवेक्षधात्वर्थविशेषो ज्ञेयः।** यथा – अन्वीक्षते, अपेक्षते, अधीक्षते, वीक्षते, प्रेक्षते, प्रतीक्षते, उदीक्षते, उपेक्षते । इत्यादि ।

ऊह = वितर्के। ऊहाञ्चक्रे । * सम्+ऊह=सङ्गीभावे । अप+ऊह=दूरीकारे । दुर्+ऊह=जटिलतायाम् । अति+ऊह= बोधे । प्रति = ऊह = विघ्ने । **गर्ह = कुत्सायाम्।** गर्हते । जगर्हे । **कपि = चलने।** इदित्त्वान्नुमि कम्पते, कम्पिष्यते, चकम्पे, कम्पिषीष्ट । अनु+कम्प=अनुकम्पायाम् । एवम् **स्पदि = किञ्चिच्चलने।** स्पन्दते । स्पन्दिष्यते । द्वित्वादिकार्ये **'शर्पूर्वाः खयः'** (७।४।६१) इति खयः शेषे पस्पन्दे इत्यादि । **क्लिदि=परिदेवने ।** क्लिन्दते, क्लिन्दिष्यते, चिक्लिन्दे । **वदि=अभिवादनस्तुत्योः।** वन्दते, वन्दिष्यते, ववन्दे, वन्दिषीष्ट । **लघि = गतौ।** लङ्घते । **शकि = शङ्कायाम्।** **शसि=आशंसायाम्** (प्रायेणायमाङ्पूर्वः) ।आशंसते ।आशंसिष्यते, आशशंसे, आशंसिषीष्ट । **मुडि=मार्जने।** मुण्डते । मुण्डिष्यते । **चडि=कोपे।** चण्डते । **जृभि=गात्रविनामे।** जृम्भते, जजृम्भे, जृम्भिषीष्ट । **दुवेपृ=कम्पने।** वेपते । **काशृ=दीप्तौ।** काशते, काशिष्यते । प्र+काश=प्रदीप्तौ । वि+काश=उत्फुल्लने । अव+काश = रिक्तीभावे । निस्+काश=निस्सारणे । **स्पर्द्ध=संघर्षे। स्वाद=आस्वादने। पर्द= कुत्सिते शब्दे। यती=प्रयत्ने। भ्राजृ, भासृ=दीप्तौ। रासृ=शब्दे। भाष=कथने। लोकृ, लोचृ= दर्शने।** लोकते, लोकिष्यते । लिटि द्वित्वादिकार्य्ये अभ्यासह्रस्वत्वेन **'एच इग्घ्रस्वादेशे'** (१।१।४८)

---

† **आशीर्लिङि – सीष्ट, सीयास्ताम्, सीरन् । सीष्ठाः, सीयास्थाम्, सीध्वम् । सीय, सीवहि, सीमहि ।**

* **'उपसर्गाद्ध्रस्व ऊहतेः' (७।४।२३) (यि ङिति) इति ह्रस्वे समुह्यते इत्यादि रूपम् यकि प्रत्यये जायते ।**

इति ओत उकारे लुलोके। **बाधृ = प्रतिघाते।** बाधते। **घट = चेष्टायाम्।** घटते। घटिष्यते। जघटे। घटिषीष्ट। सम् + घट = सङ्गमे। वि + घट = विश्लेषणे। उद् + घट = अपावरणे। **त्वरा = सम्भ्रमे।** धातोः अनुबन्धनिवृत्तौ त्वरते, त्वरिष्यते, तत्वरे। **कत्थ = श्लाघायाम्।** कत्थते। कत्थिष्यते। चकत्थे। **च्युङ् = गतौ।** च्यवते। च्योष्यते, अच्योष्ट, चुच्युवे, च्योषीष्ट। **एवं प्लुङ् = गतौ। डीङ् = विहायसा गतौ।** **(प्रायेणायमुत्पूर्वः)** उड्डयते। उड्डयिष्यते। उड्डयिष्यत। **'एरनेकाचोऽसंयोगपूर्वस्य'** (६।४।८२) इति यणि उपसर्गयोगे उड्डिड्ये। उड्डिड्याते। उड्डिड्यिरे।

६विभाषेटः३ ॥८।३।७९॥ (इणः१ षीध्वंलुङ्लिटां४ धो५-ऽङ्गात्२ ढः७)

इति वैकल्पिके ढत्वे उड्डिड्यिढ्वे, उड्डिड्यिध्वे। **पूङ् = पवने।** पवते, पविष्यते। **ष्मिङ् = ईषद्धासे।** स्मयते, स्मेष्यते। अस्मेष्ट। लिटि द्वित्वादि-कार्ये संयोगपूर्वकत्वात् यणोऽभावे **'अचि श्नुधातुभ्रुवाम्०'** (६।४।७७) इति इयङि **'आदेशप्रत्यययोः'** (८।३।५९) इति षत्वे सिष्मिये, क्रादिनियमादिटि सिष्मियिषे, **'विभाषेटः'** (८।३।७९) इति वैकल्पिके ढत्वे सिष्मियिढ्वे, सिष्मियिध्वे। सिष्मियिवहे, सिष्मियिमहे। **द्युत = दीप्तौ,** द्योतते, द्योतिष्यते। लुङि तु –

द्युद्भ्यो१ लु२ङि ॥१।३।९१॥ (परस्मैपदं४ वा३)

इति वैकल्पिके परस्मैपदे, तिपि च्लिप्रत्यये। द्युत + च्लि + त्, इति स्थितौ **'पुषादिद्युताद्यृलृदितः परस्मैपदेषु'** (३।१।५५) इति च्लेः अङि ङित्त्वाद् गुणाभावे अडागमे अद्युतत्। पक्षे अद्योतिष्ट। अद्योतिषाताम् इत्यादि। लिटि द्वित्वे द्युत् द्युत्+ए इति जाते –

द्युतिस्वाप्योः१ सम्प्रसारणम्३ ॥७।४।६७॥ (अभ्यासस्य२)

इति यकारस्य इकारे सम्प्रसारणे **'सम्प्रसारणाच्च'** (६।१।१०८) इति उकारस्य पूर्वरूपे दित् द्युत् ए इति जाते **'हलादिःशेषः'** (७।४।६०) इति अभ्यासकार्ये दिद्युते, दिद्युताते, दिद्युतिरे। द्योतिषीष्ट। **रुच = दीप्तौ अभिप्रीतौ च।** रोचते, अरुचत्, अरोचिष्ट। रुरुचे, रोचिषीष्ट। **स्रंसु - ध्वंसु - भ्रंसु = अवस्रंसने (अधःपतने)।** स्रंसते, स्रंसिष्यते, **'द्युद्भ्यो लुङि** (१।३।९१) इति वैकल्पिके परस्मैपदे, तिपि **'पुषादिद्युतादि०'** (३।१।५५) इति च्लेरङि **'अनिदितां हल उपधायाः क्ङिति,'** (६।४।२४) इति नलोपे * अस्रसत् पक्षे

---

* नकारजावनुस्वारपञ्चमौ झलि धातुषु।
सकारजश्शकारश्चर्षाट्टवर्गस्तवर्गजः॥

अस्रंसिष्ट । एवं ध्वंसु - भ्रंस्वोरपि रूपाणि । **श्विता = वर्णे । ञिष्विदा = स्नेहनमोचनयोः । ञिमिदा = स्नेहने । घुट = परिवर्तने । रुट लुट लुठ = उपघाते । शुभ = दीप्तौ । स्रम्भु = विश्वासे । क्षुभ = सञ्चलने । वृतु = वर्तने,** वर्तते । लृटि तु –

वृद्भ्यः स्यसनोः ॥१।३।९२॥ (परस्मैपदं वा)

इति परस्मैपदे वृत् + स्यति इत्यत्र –

[६]न [१]वृद्भ्यश्चतुर्भ्यः[२] ॥७।२।५९॥ ([३]से [४]परस्मैपदे इट्[५])

इति इण्निषेधे लघूपधगुणे वर्त्स्यति, पक्षे तङि इडागमे वर्तिष्यते । अवर्त्स्यत् । अवर्तिष्यत । लुङि द्युतादित्वात्परस्मैपदे च्लेरङि डित्त्वाद् गुणाभावे अवृतत्, अवर्तिष्ट । ववृते । वर्तिषीष्ट । नि + वृत् = निवृत्तौ । निर् + वृत् = निष्पत्तौ । प्र + वृत् = प्रवृत्तौ । आ + वृत् = अभ्यासे । परा + वृत् = पश्चान्निवृत्तौ । अनु + वृत् = अनुसरणे । वि + वृत् = अतत्त्वतोऽन्यथाभावे । उद् + वृत् = उपरिभावे । अति + वृत् = लङ्घने । परि + वृत् = विनिमये । एवम् **वृधु = वृद्धौ । मृधु = शब्दकुत्सायाम् ।** इह त्रय एव वृतादौ पठिताः । द्युतादिः समाप्तः । **मुद = हर्षे ।** मोदते, मोदिष्यते, मुमुदे, मोदिषीष्ट । **रमु = क्रीडायाम् ।** रमते । रंस्यते । अरंस्यत । मस्यानुस्वारे परसवर्णेन नकारे रन्ता । अरंस्त । रेमे । रंसिष्ट । उप + रम् = निवृत्तौ, मृतौ च । आ + रम् = विहारे, वि, परि + रम् = निवृत्तौ ।

व्याङ्परिभ्यो रमः ॥१।३।८३॥ उपाच्च ॥१।३।८४॥ (परस्मैपदम्)

इति सूत्राभ्याम् सोपसर्गो रमिः परस्मैपदी । **अभि + रभ् = आनन्दे । रभ = राभस्ये । (आरम्भे) (प्रायेणायमाङ्पूर्वः)** आरभते । **'खरि च'** (८।४।५५) इति चर्त्वेन भकारस्य पकारे आरप्स्यते । रभ् + ता इत्यत्र **'झषस्तथोर्धोऽधः'** (८।२।४०) इति तस्य धकारे **'झलां जश् झशि'** (८।४।५३) इति भस्य बत्वे आरब्धा । अरभ् + स्त इत्यत्र **'झलो झलि'** (८।३।२६) इति सलोपे तस्य धत्वे जश्त्वेन भस्य बत्वे आङ्योगे आरब्ध । **'खरि च'** (८।४।५५) इति भस्य पकारे आरप्साताम्, आरप्सत । आरब्धाः, आरप्साथाम्, आरब्ध्वम् । आरप्सि, आरप्स्वहि, आरप्स्महि । आरेभे । आरप्सीष्ट । एवम् **डुलभष् = प्राप्तौ ।** आ + लभ = स्पर्शे हिंसायाञ्च । उप + आ + लभ् = भर्त्सने । वि + प्र + लभ = प्रतारणायाम् । **भिक्ष = याचने ।** भिक्षते । भिक्षिष्यते । बिभिक्षे । भिक्षिषीष्ट । एवम् **शिक्ष = विद्योपादाने,** शिक्षते । **षेवृ = सेवायाम्,** सेवते । सेविष्यते । द्वित्वादिकार्ये **'आदेशप्रत्यययोः'** (८।३।५९) इति आदेशसकारतया इणोऽभ्यासात् परस्य सस्य मूर्धन्यादेशे सिषेवे । सेविषीष्ट । **त्रैङ् = पालने ।** शपि आयादेशे त्रायते । लृडादौ **'आदेच**

उपदेशेऽशिति' (६।१।४५) इति एकारस्य आत्वे त्रास्यते। लिटि द्वित्वादिकार्ये **'आतो लोप इटि च'** (६।४।६४) इति आलोपे तत्रे। तत्राते। तत्रिरे, **'क्रादिनियमादिटि'** तत्रिषे इत्यादि। एवम् **प्यैङ् = वृद्धौ। अय = गतौ,** अयते, अयिष्यते। आयिष्ट **'विभाषेटः'** (८।३।७९) इति वैकल्पिके ढत्वे आयिढ्वम्, आयिध्वम्। लिटि तु –

दयायासश्च ॥३।१।३७॥ (आम् लिटि)

इत्यामि आम्निमित्तकलुगादिकार्य्ये आयाम् इत्यस्मात् लिट्परके कृञोऽनुप्रयोगे द्वित्वादिकार्ये आमो मकारस्य अनुस्वारे परसवर्णे अयाञ्चक्रे, अयाञ्चक्राते। अयाम्बभूव। अयामास। अयिषीष्ट।अयिषीढ्वम्।(ध्वम्) **'ते प्राग्धातोः'** (१।४।८०) इति परोपसर्गयोगे परायते इत्यत्र –

[1]उपसर्गस्यायतौ[4] ॥८।२।१९॥ ([2]रो लः[3])

इति रस्य लत्वे पलायते। एवम् प्लायते। **दय = दानगतिरक्षणहिंसादानेषु।** दयते। दयिष्यते। दयाञ्चक्रे। **रय = गतौ। कल = शब्दसंख्यानयोः। देवृ = देवने।** देवते। देविष्यते। **स्फायी = वृद्धौ।** स्फायते। स्फायिष्यते। अस्फायिढ्वम् (ध्वम्)। लिटि द्वित्वे **'शर्पूर्वाः खयः'** (७।४।६१) इति फकारशेषे सलोपे च अभ्यासस्य चर्त्वेन पकारे पस्फाये। स्फायिषीढ्वम् (ध्वम्)। **व्यथ = भयसंचलनयोः।** व्यथते। व्यथिष्यते। लिटि द्वित्वे व्यथ् व्यथ् + ए इत्यत्र –

व्यथो[1] लिटि[4] ॥७।४।६८॥ (अभ्यासस्य[2] सम्प्रसारणम्[3])

इति यकारस्य इकारे सम्प्रसारणे **'सम्प्रसारणाच्च'** (६।१।१०८) इति अकारस्य पूर्वरूपे विथ् व्यथ् ए इति जाते हलादिशेषे विव्यथे। व्यथिषीष्ट। इत्यादि। **प्रथ = प्रख्याने।** प्रथते। प्रथिष्यते। पप्रथे। इत्यादि। **त्रपूष् = लज्जायाम्।** त्रपते। त्रप् + स्यते इत्यत्र –

स्वरतिसूतिसूयतिधूञूदितो[1] वा[4] ॥७।२।४४॥ ([3]आर्द्धधातुकस्येड्[5] वलादेः[2])

इति वैकल्पिके इटि त्रपिष्यते पक्षे त्रप्स्यते। अत्रपिष्यत। अत्रप्स्यत। त्रपिता। त्रप्ता। अत्रपिष्ट। पक्षे **'झलो झलि'** (८।२।२६) इति सलोपे अत्रप्त, अत्रप्साताम्। इत्यादि। **'तृफलभजत्रपश्च'** (६।४।१२२) इति एत्वाभ्यासलोपे त्रेपे। त्रपिषीष्ट, त्रप्सीष्ट। इत्यात्मनेपदिनः।

●

अथोभयपदिनः

स्वरितञितामू (उभयपदिनां) धातूनान्तु –

स्वरितञितः[1] कर्त्रभिप्राये[4] क्रियाफले[3] ॥१।३।७२॥ ([2]धातोः आत्मनेपदम्[5])

इति सूत्रेण कर्तृगामिनि क्रियाफले आत्मनेपदप्रत्यये अन्यत्र परस्मैपदप्रत्यये च उभयथा रूपाणि भवन्ति। तथाहि **णीञ् = प्रापणे।** इत्यस्य **'भूवादयो धातवः'** (१।३।१) इति धातुसंज्ञायाम् लटि अनुबन्धनिवृत्तौ नत्वे च कर्तृगामिनि क्रियाफले आत्मनेपदे तप्रत्यये शपि गुणे अयादेशे नयते। एवम्परस्मैपदे नयतीत्यादि। लृटि नेष्यते, नेष्यति। अनेष्यत (त्) नेता। अनेष्ट, अनैषीत्, निन्ये, निनाय। नेषीष्ट, नीयात्। प्र + नी = प्रेम्णि। अप + नी = दूरीकृतौ। अनु + नी = वशीकारे (अनुनये)। निर् + नी = निश्चये (निर्णये)। दुर् + नी = दूरीकारे, (दुर्णये)। अभि + नी = अनुकारे (अभिनये)। वि + नी = शिक्षायाम् (विनयने)। उद् + नी = उत्थापने (उन्नयने)। परि – नी = विवाहे। उप + नी = यज्ञोपवीतसंस्कारे, (ब्रह्मचारिणो गुरुकुलप्रापणे इत्यर्थः)। आ + नी = ग्रहणे (आनयने)। **श्रिञ् = सेवायाम्** (आश्रये) आप्तौ च। श्रयते (ति)। श्रयिष्यते (ति)। लुङि श्रि + त, इत्यत्र च्लौ तस्य **'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्'** (३।१।४८) इति चङि **'चङि'** (६।१।११) इति द्वित्वे अभ्यासकार्ये शिश्रि + अत इत्यत्र **'अचिश्नु०'** (६।४।७७) इति इयङि अडागमे अशिश्रियत (त्)। शिश्रिये, शिश्राय। श्रयिषीष्ट, श्रीयात्। सम् + आ + श्रि = अवलम्बने। प्र + श्रि = नम्रतायाम्। उद् + श्रि = उन्नीतौ। **धृञ् = धारणे।** धरते (ति)। धरिष्यते (ति)। धर्ता। अधृ + स् त इत्यत्र –

उश्च ॥१।२।१२॥ (लिङ्सिचौ कितौ आत्मनेपदेषु)

इति सिचः कित्त्वे गुणनिषेधे।

हस्वादङ्गात् ॥८।२।२७॥ (सिचो लोपः झलि)

इति सिचो लोपे अधृत। अधृ + सीत्, इत्यत्र **'सिचि वृद्धिः परस्मैपदेषु'** (७।२।१) इति वृद्धौ षत्वे अधार्षीत्। दध्रे, क्रादिनियमादिटि दध्रिषे। दध्रिवहे। दध्रिमहे। दधार, दधृ + थ, इत्यत्र **'ऋतो भारद्वाजस्य'** (७।२।६३) इति इण्निषेधे गुणे दधर्थ, दध्रथुः, दध्र। दधार, दधर क्रादिनियमान्नित्यमिटि यणि दध्रिव। दध्रिम। धृ + षीष्ट, इत्यत्र – **'उश्च'** (१।२।१२) इति लिङः कित्त्वाद् गुणाभावे धृषीष्ट। परस्मैपदे **'रिङ् शयग्लिङ्क्षु'** (७।४।२८) इति ऋतो रिङि ह्रस्वविधानारम्भसामर्थ्यात् दीर्घाभावे ध्रियात्। उद् + धृ = उन्नयने उद्धारे

मोचने च। **आ + धृ = आश्रये।** **दुर् + धृ दुर्मोचने।** **हृञ् = हरणे।** जहे, जहिषे, जहिवहे (महे)। जहार, जहिव। **प्र + हृ = प्रहारे, अप + हृ = चौर्य्ये।** **सम् + हृ = नाशे (संहारे)।** **उप + सम् + हृ = समाप्तौ।** **अनु + हृ = अनुकरणे।** **अभि + अव + हृ = भोजने।** **वि + अव + हृ = आदान-प्रदानयोः (व्यवहारे)।** **निर् + हृ = शववहने।** **वि + हृ = विहारे (भ्रमणे)** **उद् + हृ = उद्धारे।** **परि + हृ = परिहारे (दोषमार्जने)।** **उत् + हृ = उपहारदाने।** **आ + हृ = आदाने।** **उद् + आ + हृ = उदाहरणदाने।** **वि + आ + हृ = स्पष्टोक्तौ।** **भृञ् = भरणे।** क्रादिनियमादिडभावे बभृषे। बभृध्वे। बभृवहे भारद्वाजनियमादिडभावे गुणे बभर्थ। क्रादिनियमादिडभावे बभृव। आ + भृ = आभूषणे (शरीरालङ्करणे)। **दुयाचृ = याचने।** याचिष्यते **(ति)**। ययाचे, ययाच। याचिषीष्ट। याच्यात्। **शप = आक्रोशे।** अशप्त, अशाप्सीत्। शेपे, शशाप। **लृष् = स्पृहायाम्।** **(प्रायेणायमभिपूर्वः)** **'वा भ्राश०'** (३।१।७०) इति वैकल्पिके श्यनि अभिलष्यते (ति) अभिलषते (ति) इत्यादि। **डुपचष् = पाके।** पचते (ति) पक्ष्यते (ति)। अपक्त। **'वदव्रज०'** (७।२।३) इति वृद्धौ अपाक्षीत्। पेचे। पेचिषे, पेचिथ, पपक्थ। पेचिव। पक्षीष्ट। पच्यात्। **भज = सेवायाम्।** भजते (ति)। भक्ष्यते (ति)। **बभज् + ए** इत्यत्र **'तृफलभजत्रपश्च'** (६।४।१२२) इति एत्वे अभ्यासस्य च लोपे भेजे। भेजिषे। भेजिथ, बभक्थ। भेजिव। भक्षीष्ट, भज्यात्। **यज = देवपूजासङ्गतिकरणदानेषु** । यज् + स्यते इत्यत्र **'व्रश्चभ्रस्ज०'** (८।२।३६) इति जस्य षत्वे **'षढोः कः सि'** (८।२।४१) इति षस्य ककारे सस्य मूर्धन्यादेशे यक्ष्यते (ति) यष्टा। यज् + स् + त, इत्यत्र **'झलो झलि'** (८।२।२६) इति सलोपे षत्वे ष्टुत्वे अडागमे अयष्ट। अयक्षाताम्। अयक्षत। अयज् + सीत्, इत्यत्र **'वदव्रज०'** (७।२।३) इति वृद्धौ अयाक्षीत्। **'झलो झलि'** (८।२।२६) इति सलोपे षत्वे ष्टुत्वे अयाष्टाम्। यज् + ए, इत्यत्र **'वचिस्वपि०'** (६।१।१५) इति सम्प्रसारणे ततो द्वित्वे अभ्यासकार्ये सवर्णदीर्घे ईजे। क्रादिनियमादिटि ईजिषे। ययज् + अं, इत्यत्र **'लिट्यभ्यासस्योभयेषाम्'** (६।१।१७) इति सम्प्रसारणे पूर्वरूपे **'अत उपधायाः'** (७।२।११६) इति वृद्धौ इयाज। यज + अतुस् इत्यत्र पूर्वं **'वचिस्वपि०'** (६।१।१५) इति सम्प्रसारणे पूर्वरूपे द्वित्वादिकार्ये दीर्घे ईजतुः। ईजुः। इयजिथ, इयष्ठ। क्रादिनियमादिटि ईजिव (म)। यक्षीष्ट, इज्यात्। **टुवप = बीजसन्ताने।** वपते (ति)। वप्स्यते (ति)। अवप्त। अवाप्सीत्। अवाप्ताम्। इत्यादि। लिटि किति **'वचिस्वपि०'** (६।१।१५) इति पूर्वं सम्प्रसारणे ततो द्वित्वे ऊपे। **'क्रादिनियमादिटि'** ऊपिषे। ऊपिध्वे। **'लिट्यभ्यासस्य०'** (६।१।१७) इति सम्प्रसारणे उवाप। **'वचिस्वपि०'** (६।१।१५) इति पूर्वं सम्प्रसारणे ततो द्वित्वे ऊपतुः। उवपिथ, उवप्थ। **क्रादिनियमादिटि** ऊपिव। **वह = प्रापणे।** वहते (ति)। वह् + स्यते इत्यत्र **'हो ढः'** (८।२।३१) इति ढत्वे **'षढोः कः सि'** (८।२।५१) इति ककारे सस्य मूर्धन्यादेशे कृषोः संयोगेन क्षकारे वक्ष्यते (ति)। वह + ता इत्यत्र ढत्वे तकारस्य धकारे तस्य च ष्टुत्वेन ढकारे वढ् = ढा इति जाते –

ढो[1] ढे [3]लोपः[2] ॥८।३।१३॥

इति ढलोपे –

द्व्[४]लोपे पूर्वस्य दीर्घोऽणः ॥६।३।१११॥

इति प्राप्तं दीर्घमपवादत्वेन बाधित्वा–

सहिव[१]होरोद[३]वर्णस्य[२] ॥६।३।११२॥ (द्व्[४]लोपे)

इति अकारस्य ओकारे वोढा। वह+सूत इत्यत्र **'झलो झलि'** (८।२।२६) इति सलोपे ढकारादिकार्ये अडागमे अवोढ, अवक्षाताम्। इत्यादि। हलन्तलक्षणायां वृद्धौ कृतायां ढकारादिकार्ये अवाक्षीत्, अवोढाम् इत्यादि। पूर्वं सम्प्रसारणे ततो द्वित्वादिकार्ये। ऊहे। ऊहिढ्वे, ऊहिध्वे। उवाह। ऊहतुः। उवहिथ, उवोढ। ऊहिव (म)। वक्षीष्ट। उह्यात्1 **अप + वह = कुमार्गनयने। सम् + वह = गात्रव्यथादूरीकारे। निर् + वह = भारस्वीकृतौ। दुर् + वह = असह्ये।** वि, **उद् + वह = परिणये। ह्वेञ् = स्पर्द्धायाम्।** शब्दे च ह्वयते (ति)। **'आदेच उपदेशेऽशिति'** (६।१।४५) इत्यात्वे ह्वास्यते (ति)। ह्वाता। अह्वा + त इत्यत्र च्लौ–

आत्म[४]नेपदेष्वन्य[५]तरस्याम् ॥३।१।५४॥ ([१]लिपिसिचिह्वश्च च्ले[२]रङ्[३])

इति वैकल्पिके च्लेरङि **'आतो लोप इटि च'** (६।४।६४) इत्यातो लोपे अडागमे, अह्वत, अह्वेताम्, अह्वन्त इत्यादि। पक्षे अह्वास्त। परस्मैपदे तु–

लिपिसिचिह्वश्च ॥३।१।५३॥ (च्लेरङ्)

इति नित्यं च्लेरङि आलोपे अडागमे अह्वत्, अह्वताम्, अह्वन् इत्यादि। ह्वे + ए इत्यत्र नित्यतया – द्वित्वात् पूर्वम्–

* अभ्यस्तस्य[१] च ॥६।१।३३॥ (ह्वः[२] सम्प्र[३]सारणम्)

इति सम्प्रसारणे पूर्वरूपे ततः हु, इत्यस्य द्वित्वे अभ्यासकार्ये जुहु + ए इति जाते उवङि, जुहुवे, जुहुवाते, जुहुविरे। **क्रादिनियमादिटि** जुहुविषे, जुहुवाथे, जुहुविध्वे, जुहुविढ्वे। जुहुवे, जुहुविमहे। जुहाव, जुहुवतुः, जुहुवुः। जुहविथ, जुहोथ, जुहुविव। ह्वासीष्ट। परस्मैपदे ह्वे + यात् इत्यत्र **'वचिस्वपियजादीनां किति'** (६।१।१५) इति वस्य उकारे सम्प्रसारणे पूर्वरूपे दीर्घे हूयात्, हूयास्ताम् इत्यादि। **आ + ह्वेञ् = गर्वोक्तौ** (आह्वाने)।

॥ इत्युभयपदिनो भ्वादयः समाप्ताः ॥

●

---

* अभ्यस्तीभविष्यत इत्यर्थः।

अथादादयः। तत्र परस्मैपदिनः

पाणिनीयधातुपाठे अदादिप्रकरणे परस्मैपदीयधातुषु अवसाने **'चर्करीतञ्च'** इति गणसूत्रं पठितं विद्यते। यस्यार्थो भवति चर्करीतमपि अदादिधातुषु परस्मैपदी ज्ञेयः। **'चर्करीतम्'** इति यङ्लुङन्ताः सर्वेऽपि धातवः अदादिवद् व्यवहर्तव्याः। तेन च तत्र शपो लुक् परस्मैपदिनः प्रत्ययाः प्रयोक्तव्या इति निष्कर्षः। इदञ्च तत्र प्रकरणे स्मर्तव्यम्।

अद = भक्षणे। 'भूवादयो धातवः' (१।३।१) इति धातुत्वात् लटि तत्स्थाने तिपि शपि–

अदिप्रभृतिभ्यः शपः ॥२।४।७२॥ (लुक्)

इति शपो लुकि दस्य चर्त्वेन तकारे अत्ति, अत्तः, अदन्ति। अत्सि, अत्थः, अत्थ। अद्मि, अद्वः, अद्मः। अद्+त् इत्यत्र–

[1]अदः [5]सर्वेषाम् ॥७।३।१००॥ ([6]मते [2]अपृक्तस्य सार्वधातुकस्य[3] अट्[4])

इति अपृक्तप्रत्ययस्याडागमे अदत् इति जाते **'आडजादीनाम्'** (६।४।७२) इति आटि **'आटश्च'** (६।१।९०) इति वृद्धौ आदत्, आत्ताम्, आदन्। आदः, आत्तम्, आत्त। आदम्, आद्व, आद्म। अत्तु, अत्तात्, अत्ताम्, अदन्तु। अद्+हि इति स्थितौ–

हुझल्भ्यो हेर्धिः ॥६।४।१०१॥

इति हेर्धौ अद्धि, अत्तात्, अत्तम्, अत्त। अदानि, अदाव, अदाम। अद्यात्, अद्याताम्, अद्युः। अद्याः अद्यातम्, अद्यात। अद्याम्, अद्याव, अद्याम। अत्स्यति, आत्स्यत्, अत्ता–

[2]लुङ्सनोर्घस्लृ[3] ॥२।४।३७॥ ([1]अदः)

इति अदः घस्लादेशे ऌदित्वात् **'पुषादिद्युतादि०'** (३।१।५५) इति च्लेरङि अडागमे अघसत्। इत्यादि। लिटि णलादिकार्ये–

लिट्यन्ततरस्याम् ॥२।४।४०॥ (अदो घस्लृ)

इति वैकल्पिके घस्लादेशे अनुबन्धनिवृत्तौ घस्+अ, इति स्थितौ द्वित्वे अभ्यासकार्ये उपधावृद्धौ जघास, जघस्+अतुस् इत्यत्र **'गमहनजनखनघसां लोपः क्ङित्यनङि'** (६।४।९८) इत्युपधालोपे, **'खरि च'** (८।४।५५) इति घस्य ककारे **'शासिवसिघसीनाञ्च'** (८।३।६०) इति सस्य मूर्धन्यादेशे कूषोः संयोगेन क्षकारे जक्षतुः, जक्षुः। घस्लादेशस्य

तास्यभावान्नेण् निषेधः जघसिथ, जक्षथुः, जक्ष। जघास, जघस, जक्षिव, जक्षिम। पक्षे अद्+अ इत्यत्र द्वित्वादिकार्ये **'अत आदेः'** (७।४।७०) इति अभ्यासाकारस्य दीर्घे ततः सवर्णदीर्घे आद, आदतुः, आदुः, थलि तु वैकल्पिकं भारद्वाजीयमिटं प्रबाध्य **'इड्त्यर्तिव्ययतीनाम्'** (७।२।६६) इति नित्यम् इटि आदिथ, आदथुः, आद। क्रादिनियमादिटि आदिव, आदिम। अद्यात्। **हन = हिंसागत्योः**। हन्ति। हन्+तस् इत्यत्र –

[1]अनुदात्तोपदेश-वनति-तनोत्यादीनाम[3]नुनासिक-लोपो झलि[4] [5]ङ्क्ङिति ॥६।४।३७॥ ([2]अङ्गानाम्)

इति नलोपे सकारस्य रुत्वे विसर्गे च हतः। **'गम-हन-जन०'** (६।४।९८) इति उपधालोपे –

[2]हो [1]हन्तोर्ण्न्मेषु[4] ॥७।३।५४॥ ([3]कुः)

इति हस्य घत्वे घ्नन्ति। **'नश्चापदान्तस्य०'** (८।३।२४) इति अनुस्वारे हंसि, हथः हथ। हन्मि, हन्वः, हन्मः। अहन्, अहताम्, अघ्नन्। अहन्, अहतम्, अहत। अहनम्, अहन्व, अहन्म। हन्तु, हतात्, हताम्, घ्नन्तु। हन्+हि, इत्यत्र नलोपे –

[1]हन्तेर्जः[3] ॥६।४।३६॥ ([2]अङ्गस्य हौ[4])

इति लुप्तनकारस्य हन्तेर्जकारे –

असिद्धवदत्राभात् ॥६।४।२२॥ (आपादपरिसमाप्तेराभीयम् अत्र प्रकरणे समानाश्रये कार्य्ये कर्तव्ये पूर्वतनमाभीयं कार्यम् असिद्धम् भवतीति सूत्रार्थः)

ततश्च आभीयतया जस्य नलोपस्य चासिद्धत्वान्न हेर्लुक्। ततश्च जहीति रूपसिद्धिः। पक्षे हतात्, हतम्, हत। हनानि, हनाव (म)। हन्यात्, हन्याताम्, हन्युः। इत्यादि। **'ऋद्धनोः स्ये'** (७।२।७०) इति इटि हनिष्यति। अहनिष्यत्। हन्ता। लुङि –

लुङि च ॥२।४।४३॥ (हनो वधः)

इति हनः वधादेशे **'अतो लोपः'** (६।४।४८) इति अलोपे तिपि सिचि अपृक्ते ईटि **'आर्द्धधातुकस्येड्वलादेः'** (७।२।३५) इति सिच इटि **'इट ईटि'** (८।२।२८) इति सिचो लोपे सवर्णदीर्घे अडागमे अवधीत्, अत्र अलोपस्य स्थानिवत्त्वाद् **'अतो हलादेर्लघोः'** (७।२।७) इति न वृद्धिः। अवधिष्टाम्, अवधिषुः। इत्यादि। लिटि द्वित्वादिकार्ये – **'हो**

हन्तेर्ञ्णिन्नेषु' (७।३।५४) इति कुत्वे उपधावृद्धौ जघान। **'गमहनजन०'** (६।४।९८) इति उपधालोपे कुत्वे जघ्नतुः जघ्नुः।

अभ्यासाच्च ॥७।३।५५॥ (हन्तेः हः कुः)

इति कुत्वे। अकारवत्त्वात् थलि वैकल्पिके च इटि जघनिथ पक्षे जघन्थ, जघ्नथुः, जघ्न। जघान, जघन, जघ्निव, जघ्निम। हन्+यात् इत्यत्र–

हनो[1] वध[2] लिङि ॥२।४।४२॥

इति वधादेशे अतो लोपे वध्यात्, वध्यास्ताम्, इत्यादि। अव+हन्=खण्डने। वि–आ+हन्=प्रतिबन्धे। सम्+हन्=संघाते। आ+हन्=आघाते (अकर्मकत्वे आत्मनेपदी)। **शासु= अनुशिष्टौ** (अयं द्विकर्मकः) शास्ति, शास्+तः इत्यत्र–

शास[1] [3]इदङ्हलोः[4] ॥६।४।३४॥ (उप[2]धायाः ङिति[5])

इति उपधाया इकारे **'शासिवसिघसीनां च'** (८।३।६०) इति षत्वे ष्टुत्वे च शिष्टः। शास्+झि इत्यत्र–

जक्षित्यादयः[1] षट्[2] ॥६।१।६॥ (अभ्यस्तम्[3])

इति अभ्यस्त-संज्ञायाम्–

[4]अदभ्यस्तात्[1] ॥७।१।४॥ ([2]आदेः झस्य[3])

इति झकारमात्रस्य अदादेशे शास्+अति शासति। शास्सि। शिष्ठः। शिष्ठ। शास्मि, शिष्वः, शिष्मः। शास्+त्, इत्यत्र अडागमे हल्ङ्यादिलोपे प्रत्ययलक्षणेन पदत्वे–

[5]तिप्यनस्तेः[1] ॥८।२।७३॥ ([2]पदस्य सः[3] दः[4])

इति सस्य दत्वे पाक्षिके चर्त्वे अशाद्, (त्) अशिष्टाम्। अशासुः। सिपि हल्ङ्यादिलोपे–

[7]सिपि धातो[1] [4]रुर्वा[5] ॥८।२।७४॥ (पदस्य[2] सः[3] दः[6])

इति सकारस्य पाक्षिके रुत्वे दत्त्वे च अशाः, अशात्, अशाद्, इति रूपत्रयम्। अशिष्टम्। अशिष्ट। अशासम्, अशिष्व (ष्म)। शास्तु, शिष्टात्, शास+हि, इत्यत्र–

शा[2] हौ[3] ॥६।४।३५॥ (शासः[1])

इति शासः शादेशे कृते तस्याभीयत्वेन असिद्धत्वात् **'हुझल्भ्यो हेर्धिः'** (६।४।१०१) इति हेध्यदिशे कृते शाधि। आशिषि शिष्टात्। शासानि। शिष्यात्, शिष्याताम्, शिष्युः। शासिष्यति। अशासिष्यत्। शासिता। **'सर्तिशास्त्यर्तिभ्यश्च'** (३।१।५६) इति च्लेः अङि शास्+अत् इति जाते **'शास इदङ् हलोः'** (६।४।३४) इति उपधाया इकारे **'शासिवसि०'**

(८।३।६०) इति मूर्धन्यादेशे अडागमे अशिषत् । शशास, शशासतुः, शशासिथ । शिष्यात्, शिष्यास्ताम्, शिष्यासुः । **विद = ज्ञाने** । विद् + ति इत्यत्र –

[1]विदो [2]लटो वा[5] ॥३।४।८३॥ (परस्मैपदानां[3] णलादयः[4])

इति तिपो वैकल्पिके णलि अनुबन्धनिवृत्तौ गुणे वेद, विदतुः, विदुः । वेत्थ, विदथुः, विद । वेद, विद्व, विद्म । पक्षे वेत्ति, वित्तः, विदन्ति । अवेत् (द्), अवित्ताम्, अविदुः । अवेद् + स् इत्यत्र – अपृक्तहलो लोपे –

[2]दश्च ॥८।२।७५॥ (सिपि[5] धातोः[1] रुः[3] वा[4])

इति दस्य वैकल्पिके रुत्वे अवेः । पक्षे अवेद् (त्) । विद् + तु इत्यत्र –

विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ॥३।१।४१॥

इति आमि लोडन्तकृञोऽनुप्रयोगे अनुस्वारे परसवर्णे गुणाभावे च निपातिते विदाङ्कृ + तु इति जाते –

तनादिकृञ्भ्य उः ॥३।१।७९॥ (कर्तरि)

इति उप्रत्यये **'सार्वधातुकार्द्धधातुकयोः'** (७।३।८४) इति ऋकारस्य अरि गुणे उकारस्य च ओकारे गुणे विदाङ्करोतु, विदाङ्करुतात् इत्यत्र –

[2]अत [2]उत्सा[4]र्वधातुके ॥६।४।११०॥ ([1]करोतेः ङि[5]ति)

इति अकारस्योकारे विदाङ्कुरुतात् इत्यादि । आमोऽभावपक्षे वेत्तु, वित्तात् । विद्धि । वेदानि । विद्यात् । वेदिष्यति । अवेदीत् ।

उषविदजागृभ्योऽन्यतरस्याम् ॥३।१।३८॥ (आम्)

इत्यामि विदेश्च तत्साहचर्याददन्तनिपातनाद्गुणाभावे कृञोऽनुप्रयोगे द्वित्वादिकार्ये विदाञ्चकार, विदाम्बभूव, विदामासेत्यादि । पक्षे विवेद । विद्यात् । **इण् = गतौ** । एति, इतः । इ + अन्ति इत्यत्र –

इणो[1] यण्[3]॥६।४।८१॥ ([2]अङ्गस्य अचि[4])

इति यणि यन्ति । ऐत्, ऐताम्, * आयन् । ऐः, ऐतम्, ऐत । आयम्, ऐव, ऐम । एतु । अयानि । इयात् । एष्यति । एता । लुङि इणः –

इणो गा लुङि ॥२।४।४५॥

---

* **'असिद्धवदत्राभात्'** (६।४।२२) इति यत्वासिद्ध्या आट् ।

इति गादेशे **'गातिस्था०'** (२।४।७७) इति सिचो लुकि अगात्, अगाताम्, अगुः। लिटि वृद्धौ द्वित्वादिकार्ये अभ्यासह्रस्वे आयादेशे इ+आय इति जाते **'अभ्यासस्यासवर्णे'** (६।४।७८) इति इयङि इयाय, द्वित्वं प्रबलमिति पक्षे इ इ+अतुस् इत्यत्र **'इणो यण्'** (६।४।८१) इति यणि इयतुस् इति स्थितौ –

दी[३]र्घ इणः[१] किति[४] ॥७।४।६९॥ (अभ्या[२]सस्य लि[५]टि)

इति अभ्यासस्य दीर्घे ईयतुः, ईयुः। इययिथ, इयेथ। ईयिव। ईयात्। निर्+ईयात् इत्यत्र –

ए[२]तेर्लिङि[६] ॥७।४।२४॥ (उप[१]सर्गाद् ह्रस्वः[५]अङ्गस्य[३] यि[७] ङ्ङि[८]ति अणः[४])

इति ह्रस्वे निरियात्। अभीयादित्यत्र **'उभयत आश्रयणे नान्तादिवत्'** (परि०) इति परिभाषया –

अन्तादिवच्च ॥६।१।८५॥ (एकः पूर्वपरयोः)

इत्यस्य अप्रवृत्त्या ह्रस्वाभावः। समेयादित्यत्र सम्+आ इयादिति स्थितौ **'धातूपसर्गकार्य्यमन्तरङ्गम्'** इति गुणेऽणोऽभावाद् ह्रस्वो न भवति। सम्+इ=समागमे। अनु+इ=अन्वये। उत्+इ=उद्गमे। आ, अभि+इ=आगमे। वि+इ=विकारे। अपि+इ=प्रलये। **अस्=भुवि**। अस्ति, अस्+तः इत्यत्र –

श्नसोरल्लोपः ॥६।४।१११॥ (सार्वधातुके ङ्किति)

इति अकारस्य लोपे स्तः, सन्ति। **'तासस्त्योर्लोपः'** (७।४।५०) इति सलोपे असि, स्थः, स्थ। अस्मि, स्वः, स्मः। लङि अस्+त् इत्यत्र **'अस्तिसिचोऽपृक्ते'** (७।३।९६) इति ईडागमे, आटि वृद्धौ आसीत्, अल्लोपासिद्ध्या आटि आस्ताम्, आसन्। आसीः, आस्तम्, आस्त। आसम्, आस्व, आस्म। अस्तु, स्तात्, स्ताम्, सन्तु। अस्+हि, इत्यत्र, **'हुझल्भ्यो हेर्धिः'** (६।४।१०१) इति हेर्धौ प्राप्ते परत्वात् तं बाधित्वा –

ध्वसोरद्धावभ्यासलोपश्च ॥६।४।११९॥

इति सकारस्य एत्वे ततः **'असिद्धवदत्राभात्'** (६।४।२२) इति एत्वस्य आभीयतया असिद्धत्वात् हेर्धौ **'श्नसोरल्लोपः'** (६।४।१११) इति अलोपे एधि, स्तात्, स्तम्, स्त। असानि, असाव, असाम। स्यात्, स्याताम्, स्युः। स्याः, स्यातम्, स्यात। स्याम्, स्याव, स्याम। आर्द्धधातुके लकारे तु –

अस्तेर्भूः ॥२।४।५२॥ (आर्द्धधातुके)

इति भ्वादेशे सर्वं भूधातुवद् रूपम्। भविष्यतीत्यादि। **रुदिर् = अश्रुविमोचने।** रुद्+ति इत्यत्र शपो लुकि–

*** रुदादिभ्यः[1] सार्वधातुके[3] ॥७।२।७६॥ (वलादेः[2] इट्[4])**

इति तिप इडागमे गुणे रोदिति। रुदितः, रुदन्ति। रोदिषि, रुदिथः, रुदिथ। रोदिमि, रुदिवः, रुदिमः। लङि रुद्+त् इत्यत्र–

रुदश्च[2] पञ्चभ्यः[1] ॥७।३।९८॥ (हलि[3] सार्वधातुके[4] अपृक्ते[5] ईट्[6])

इति ईडागमे गुणे धातोः अडागमे अरोदीत्–

अड्[7] गार्ग्यगालवयोः[1] ॥७।३।९९॥ (रुदः[2] पञ्चभ्यः[3] अपृक्तस्य[4] सार्वधातुकस्य[5] हलः[6])

इति गार्ग्यगालवयोर्मतेन प्रत्ययस्य अडागमे, गुणे धातोश्च अडागमे अरोदत्। रुद्+ताम् इत्यत्र **'रुदादिभ्यः सार्वधातुके'** (७।२।७६) इति इटि धातोः अडागमे अरुदिताम्, अरुदन्। अरोदीः, अरोदः, अरुदितम्, अरुदित। रोदितु, रुदितात्। रुद्यात्। रोदिष्यति। **'इरितो वा'** (३।१।५७) इति वैकल्पिके अङि डित्त्वाद् गुणाभावे अडागमे अरुदत्, पक्षे अरोदीत्। **ञिष्वप = शये।** स्वपिति, स्वपितः। अस्वपीत्। अस्वपत्। स्वपितु। स्वपितात्। स्वपिहि। स्वप्यात्। स्वप्स्यति। अस्वाप्सीत्, अस्वाप्सुः। लिटि द्वित्वे **'लिट्यभ्यासस्योभयेषाम्'** (६।१।१७) इति सम्प्रसारणे पूर्वरूपे सुप्स्वप्+अ इत्यत्र हलादिशेषे उपधावृद्धौ **'आदेशप्रत्यययोः'** (८।३।५९) इति षत्वे सुष्वाप। पूर्वम् **'वचिस्वपियजादीनां किति'** (६।१।१५) इति सम्प्रसारणे ततो द्वित्वादिकार्ये सुषुपतुः। सुष्वपिथ, सुष्वप्थ **'क्रादिनियमादिटि'** सुषुपिव। सुप्यात्। **श्वस = प्राणने।** श्वसिति। अश्वसीत्। अश्वशत्। श्वसितु। श्वस्यात्। श्वसिष्यति **'ह्म्यन्तक्षणश्व०'** (७।२।५) इति वृद्धिनिषेधे अश्वसीत्। शश्वास। शश्वसतुः। शश्वसिथ। शश्वसिव। श्वस्यात्, **अन = प्राणने।** प्रायेणायं प्रपूर्वः। प्रानिति इत्यत्र–

अनितेः[3] ॥८।४।१९॥ (उपसर्गात्[1] नोः[4] णः[5] रषाभ्याम्[2])

इति णत्वे प्राणिति। प्राणीत्, प्राणत्। प्राणिष्यति। अप्राणीत्। प्राण। प्राण्यात्। प्राण्यास्ताम्। **जक्ष + भक्षहसनयोः।** जक्षिति, जक्षितः। जक्ष+झि, इत्यत्र **'जक्षित्यादयः षट्'** (६।१।६) इति अभ्यस्तत्वात् **'अदभ्यस्तात्'** (७।१।४) इति झस्य अति जक्षति।

---

* **'पूर्वत्र पञ्चमी परत्र सप्तमीं षष्ठीं प्रकल्पयति' इति नियमाद् सार्वधातुकस्येति ज्ञेयम्।**

अजक्षीत्, अजक्षत्, अजक्षिताम्, अभ्यस्तत्वात् झेर्जुसि अजक्षुः। जक्षितु। जक्ष्यात्। जक्षिष्यति। अजक्षीत्। जजक्ष। जक्ष्यात्। इति रुदादयः। **यु + मिश्रणे अमिश्रणे च।** यु + ति, इत्यत्र शपो लुकि –

उतो[1] [3]वृद्धिर्लुकि[4] हलि[5] ॥७।३।८९॥ (अङ्गस्य[2] सार्वधातुके[7] पिति[6]।)

इति वृद्धौ यौति। युतः, युवन्ति। अयौत्। यौतु। **(भाष्ये ङिच्च पिन्न, पिच्च ङिन्न, इति व्याख्यानात्)** वृद्धिनिषेधे। युयात्। यविष्यति। अयावीत्। युयाव, युयुवतुः, युयुवुः। यूयात्। **रु = शब्दे –**

तुरुस्तुशम्यमः सार्वधातुके ॥७।३।९५॥ (हलि वा ईट्)

इति ईडागमे गुणेऽवादेशे रवीति पक्षे उतो वृद्धौ रौति, रुवीतः, रुतः, रुवन्ति। अरवीत् अरौत्। अरुवीताम् अरुताम्। रवीतु रौतु, रुवीतात् रुतात्। रुवीयात् रुयात्। रविष्यति। अरावीत्। रुराव, रुरुवतुः। रुरुविथ। रुरुविव। रूयात्। **णु = स्तुतौ।** नौति, नुतः। नविष्यति। अनावीत्। नुनाव, नुनुवतुः। नूयात्। **दुक्षु = शब्दे।** क्षौति, क्षविष्यति। **या = प्रापणे।** याति। अयात्। अया + झि इत्यत्र –

[2]लङः शाकटायनस्यैव[5] ॥३।४।१११॥ ([1]आतः झे[3] र्जुस्[4])

इति झेर्जुसि अनुबन्धनिवृत्तौ। **'उस्यपदान्तात्'** (६।१।९६) इति पररूपे अयुः, पक्षे अयान्। यातु। यायात्। यास्यति। **'यमरमनमातां०'** (७।२।७३) इति सकि सिचश्चेटि **'इट ईटि'** (८।२।२८) इति सलोपे दीर्घे अयासीत्। ययौ। यायात्, यायास्ताम्। **वा = गतिगन्धनयोः। भा = दीप्तौ। ष्णा = शौचे। पा = रक्षणे। रा = दाने। ला = आदाने। मा = माने। ख्या = प्रकथने। वच् = परिभाषणे।** वक्ति। सम्प्रसारणस्य किति विधानान्नेह वक्तः, वचन्ति। **(अयमन्तिपरो नेति केचित्। बहुवचनपर इत्यन्ये।)** अवक् (ग्), वक्तु, वक्तात्, वग्धि। वच्यात्। वक्ष्यति, अवक्ष्यत्। लुङि-वच् च्लि + त् इत्यत्र **'अस्यतिवक्ति०'** (३।१।५२) इति च्लेरङि –

[1]वच् उम्[3] ॥७।४।२०॥ ([2]अङ्गस्य अङि[4])

इति मित्त्वात् वकारात्परे उमागमे गुणे अडागमे च कृते अवोचत्। पिति लिटि कृते द्वित्वे सम्प्रसारणम्, किति तु कृते सम्प्रसारणे द्वित्वम् उवाच, ऊचतुः। उवचिथ उवक्थ, उच्यात्। **वश् = कान्तौ।** वष्टि **'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे उष्टः, उशन्ति। अवट्, औष्टाम्, औशन्। वष्टु। हौ सम्प्रसारणात् पूर्वरूपत्वे हेर्धित्वषत्वष्टुत्वजश्त्वानि ज्ञेयानि उड्ढि। उश्यात्। वशिष्यति। वशिता **'अतो हलादेः'** (७।२।७) इति वृद्धौ अवाशीत् अवशीत्। उश्यात्, उश्यास्ताम्, उश्यासुः।

॥ इति परस्मैपदिनः ॥

अथात्मनेपदिनः

शीङ् = स्वप्ने – लटि – शपो लुकि

शीङः सार्वधातुके गुणः ॥७।४।२१॥

इति गुणे शेते, शयाते।

आत्मनेपदेष्वनतः ॥७।१।५॥ (प्रत्ययादेः झस्य अत्)

इति झस्याति टेरेत्वे शे + अते इत्यत्र

[1]शीङो रुट्[4]॥७।१।६॥ ([2]झस्य अतः[3])

इति अकारस्यादौ रुडागमे अनुबन्धनिवृत्तौ शेरते। शेषे, शयाथे, शेध्वे। शये, शेवहे, शेमहे। अशेत, अशयताम्, अशेरत। अशेथाः, अशेयाथाम्, अशेध्वम्। अशयि, अशेवहि, अशेमहि। शेताम्, शयाताम्, शेरताम्। शेष्व, शयाथाम्, शेध्वम्। शयै, शयावहै, शयामहै। शयीत, शयीयाताम्, शयीरन्। शयीथाः। शयीयाथाम्। शयीध्वम्। शयीय, शयीवहि, शयीमहि। शयिष्यते। शयिता। अशयिष्ट। शिश्ये। शिश्यिध्वे (द्वे)। शयिषीष्ट। शयिषीध्वम् (द्वम्) **इङ् = अध्ययने। (प्रायेणायमधिपूर्वः।)** अधीते, अधीयाते, अधीयते। अधीषे, अधीयाथे, अधीध्वे। अधीये, अधीवहे, अधीमहे। अध्यैत, अध्यैयाताम्, अध्यैयत। अध्यैथाः, अध्यैयाथाम्, अध्यैध्वम्। अध्यैयि, अध्यैवहि, अध्यैमहि। अधीताम्, अधीयाताम्, अधीयताम्। अधीष्व, अधीयाथाम्, अधीध्वम्। अध्ययै, अध्ययावहै; अध्ययामहै। अधीयीत, अधीयीताम्, अधीयीरन्। अधीयीथाः, अधीयीयाथाम्, अधीयीध्वम् (द्वम्)। अधीयीय, अधीयीवहि, अधीयीमहि। अध्येष्यते। लृङि इ + स्यत, इत्यत्र –

[4]विभाषा लुङ्लृङोः[3] ॥२।४।५०॥ ([1]इङो गाङ्[2])

इति गाङादेशे गा + स्यत इति जाते।

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥१।२।१॥

इति ङिद्वद्भावे **'घुमास्थागापा०'** (६।४।६६) इति ईत्वे षत्वे अडागमे उपसर्गयोगे अध्यगीष्यत। इत्यादि। पक्षे अध्यैष्यत। इत्यादि। अध्येता। लुङि गाङादेशे – सिचो ङित्वे ईत्वे षत्वे ष्टुत्वे। अडागमे उपसर्गयोगे यणि अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत। पक्षे अध्यैष्ट, अध्यैषाताम्। लिटि –

[२]गाङ् लिटि[३] ॥२।४।४९॥ ([१]इङः)

इति गाङादेशे द्वित्वे अभ्यासादिकार्ये जगा+ए इति स्थितौ **'आतो लोप इटि च'** (६।४।६४) इति आतो लोपे उपसर्गयोगे, अधिजगे, अधिजगाते। अध्येषीष्ट, अध्येषीयास्ताम्, अध्येषीरन्। **चक्षिङ् = व्यक्तायां वाचि दर्शने च।** चक्ष्+ते इत्यत्र **'स्कोः संयोगाद्योरन्ते च'** (८।२।२९) इति कलोपे चष्+ते इति जाते **'ष्टुना ष्टः** (८।४।४१) इति ष्टुत्वेन तकारस्य टकारे चष्टे, चक्षाते, चक्षते। इत्यादि। अचष्ट। चष्टाम्। चक्षीत। आर्धधातुके तु–

चक्षिङः ख्याञ् ॥२।४।५४॥ (आर्धधातुके)

इति ख्यादेशे ञित्त्वादुभयपदित्वे ख्यास्यते, ख्यास्यति। लुङि–**'अस्यतिवक्तिख्यातिभ्योऽङ्'** (३।१।५२) इति अङि **'आतो लोप इटि च'** (६।४।६४) इति आतो लोपे अडागमे। अख्यत, अख्यत्। लिटि तु–

वा[४] लिटि[३] ॥२।४।५५॥ (चक्षिङः[१] ख्याञ्[२])

इति वैकल्पिके ख्यादेशे चख्ये, चख्यौ पक्षे चचक्षे। ख्यासीष्ट। **'वाऽन्यस्य संयोगादेः'** (६।४।६८) इति वैकल्पिके एत्वे ख्येयात्, ख्यायात। वि, प्र+ख्या=प्रसिद्धौ। सं+ख्या=गणनायाम्। वि+आ+ख्या+व्याख्याने। आ+ख्या=कथायाम्। **षूङ्=प्राणिप्रसवे।** सूते, सुवाते। असूत। सूताम् **'भूसुवोस्तिङि'** (७।३।८८) इति गुणनिषेधे सुवै, सुवावहै, (महै)। सू+स्यते इत्यत्र **'स्वरतिसूतिसूयतिधूञूदितो वा'** (७।२।४४) इति वैकल्पिके इटि गुणे अवादेशे षत्वे सविष्यते पक्षे सोष्यते। सविता, सोता, असविष्ट, असोष्ट, सुषुवे, सुषुविढ्वे (ध्वे)। सविषीष्ट, सोषीष्ट, सविषीढ्वम् (ध्वम्)। **आङः शासु=इच्छायाम्। (आत्मनेपदे)।** आशास्ते, आशासाते, आशासते, आशास्त। आशास्ताम्। आशासीत। आशासिष्यते। आशासिष्यत। आशासिता। आशासिष्ट। आशशासे। आशासिषीष्ट। इत्यादि। **आसृ = उपवेशने।** आस्ते। आस्त। आस्ताम्, आध्वम्। आसीत। आसिष्यते। आसिता, आसिष्ट। **'दयायासश्च'** (३।१।३७) इत्यामि आञ्चक्रे। आसिषीष्ट। उप+आस=भक्तौ। **वसृ=आच्छादने** वस्ते, अवस्त, वस्ताम्, त। वसिष्यते, अवसिष्यत। वसिता, अवसिष्ट। **'न शसददवादिगुणानाम्'** (६।४।१२६) इति एत्वाभ्यासलोपनिषेधे ववसे, ववसिषे, ववसिध्वे, ववसिवहे। वसिषीष्ट। इत्यादि। **ईशृ = ऐश्वर्ये। 'व्रश्च०'** (८।२।३६) इति षत्वे ष्टुत्वे, ईष्टे, ईशाते, ईशते। ईश्+से इत्यत्र–

ईशः से ॥७।२।७७॥ (सार्वधातुके इट्)

इति इडागमे षत्वे ईशिषे, ईशाथे, ईश् + ध्वे इत्यत्र –

ईडज[1]नोर्ध्वे[4] च[5] ॥७।२।७८॥ (ईशः[2] से[3] सार्व[6]धातुके इट्[7])

इति इडागमे ईशिध्वे, ईशे, ईड्वहे (महे) । ऐष्ट । **(प्रकृतिग्रहणेन विकृतेरग्रहणम्)** इति नियमादिडभावे ऐड्ढ्वम् । ईष्टाम्, ईशिष्व, ईशिध्वम् । इहोभयत्रैव **(एकदेशविकृतमनन्यवद्)** इति परिभाषयेट् । ईशीत, ईशिष्यते । ऐशिष्यत । ईशिता । ऐशिष्ट । **'इजादेश्च गुरुमतोऽनृच्छः'** (३।१।३६) इत्यामि ईशाञ्चक्रे । ईशिषीष्ट । एवम् **ईड = स्तुतौ** । ईट्टे, ईडाते, ईडते इत्यादि ईशिवद्रूपम् ।

॥ इत्यात्मनेपदम् ॥

अथोभयपदिनः

ष्टुञ् = स्तुतौ। **'तुरुस्तुशम्यमः सार्वधातुके'** (७।३।९५) इति वैकल्पिके ईटि स्तुवीते स्तुते। स्तुवाते स्तुवते। स्तवीति स्तौति। अस्तुवीत अस्तुत। अस्तवीत् अस्तौत्। स्तुवीताम् स्तुताम्। स्तवीतु स्तौतु। स्तुवीत, स्तुवीयात्, स्तुवीरन्। स्तुवीयात् स्तुयात्। स्तोष्यते (ति), अस्तोष्यत (त्), स्तोता। अस्तोष्ट तिपि सिचि अपृक्ते ईटि –

स्तुसुधूञ्भ्यः परस्मैपदेषु ॥७।२।७२॥ (सिच इट्)

इति सिच इटि वृद्धौ आवादेशे **'इट ईटि'** (८।२।२८) इति सिचो लोपे अस्तावीत्। तुष्टुवे, तुष्टाव, तुष्टुवतुः, तुष्टुवुः। क्रादिषु पाठात् सर्वत्रेडभावः – तुष्टोथ, तुष्टुव, तुष्टुम। स्तोषीष्ट स्तूयात्। **ब्रूञ् = व्यक्तायां वाचि।** ब्रूते, ब्रुवाते, ब्रुवते – परस्मैपदे तु –

ब्रुवः[1] पञ्चाना[४]मादित[३] आहो[९] ब्रुवः[८] ॥३।४।८४॥ (लटः[२] परस्मै[५]पदानां [६]णलदयो वा[७])

इति तिपो णलि ब्रुवश्चाहादेशे अनुबन्धनिवृत्तौ स्वरसंयोगे आह, आहतुः, आहुः –

आहस्थः ॥८।२।३५॥ (झलि)

इति हस्य थकारे तस्य चर्त्वेन तकारे आत्थ, आहथुः। पक्षे –

ब्रुव[1] ईट्[५] ॥७।३।९३॥ (हलादेः[२] पितः[३] सार्वधातुक[४]स्य)

इति ईडागमे गुणे अवादेशे ब्रवीति, ब्रूतः, ब्रुवन्ति। अब्रूत, अब्रुवाताम्, अब्रुवत। अब्रवीत्, अब्रूताम्, अब्रुवन्। ब्रूताम्, ब्रवीतु, ब्रुवीत, ब्रुवीयाताम्, ब्रुवीरन्। ब्रूयात्, ब्रूयाताम्, ब्रूयुः। लृटि –

ब्रुवो वचिः ॥२।४।५३॥ (आर्द्धधातुके)

इति वच्यादेशे कुत्वे षत्वे कषयोः संयोगे वक्ष्यते, वक्ष्यति। लुङि ब्रुवः वच्यादेशे च्लौ तस्य **'अस्यतिवक्तिख्यातिभ्योऽङ्'** (३।१।५२) इति अङि **'वच - उम्'** (७।४।२०) इति मित्त्वात् अकारात्परे उमागमे गुणे धातोः अडागमे अवोचत, अवोचत्। लिटि वच्यादेशे पूर्वम् **'वचिस्वपियजादीनां किति'** (६।१।१५) इति सम्प्रसारणे पूर्वरूपे ततो द्वित्वे अभ्यासादिकार्ये ऊचे, ऊचाते, ऊचिरे। परस्मैपदे द्वित्वे अभ्यासकार्ये उपधावृद्धौ उवाच, अतुसादौ पूर्वं सम्प्रसारणे ततो द्वित्वादिकार्ये ऊचतुः, ऊचुः। **भारद्वाजनियमाद्** वैकल्पिके इटि उवचिथ, उवक्थ। **क्रादिनियमादिटि** ऊचिव, ऊचिम। वक्षीष्ट, उच्यात्। **दुह = प्रपूरणे।** दुह् + ते इत्यत्र शपो लुकि **'दादेर्धातोर्घः'** (८।२।३२) इति हस्य घत्वे।

'झषस्तथोर्धोऽधः' (८।२।४०) इति तस्य धत्वे **'झलां जश् झशि'** (८।४।५३) इति घस्य गकारे **दुग्धे, दुहाते,** दुहते। दुघ्+से इत्यत्र **'एकाचो बशो भष् झषन्तस्य स्ध्वोः'** (८।२।३७) **इति दकारस्य** धकारे जश्त्वेन घकारस्य गकारे तस्य चर्त्वेन ककारे सस्य मूर्धन्यादेशे धुक्षे, दुहाथे, धुग्ध्वे। दुहे, दुह्वहे दुह्महे। **'पुगन्तलघूपधस्य च'** (७।३।८६) इति गुणे दोग्धि, दुग्धः, दुहन्ति। धोक्षि। अदुग्ध, अदुहाताम्, अदुहत। अधोक्, अधोग्, अदुग्धाम्, अदुहन्। दुग्धाम्, दुहाताम्, दुहताम्। धुक्ष्व। दोग्धु, दुग्धात्, दुग्धाम्, दुहन्तु। दुग्धि। दोहानि। दुहीत, दुहीयाताम्। दुहीरन्। दुह्यात्, दुह्याताम्, दुह्युः। धोक्ष्यते, धोक्ष्यति। दोग्धा। लुङि च्लौ तस्य –

शल[२] इगु[१]पधादनिटः[४] क्सः[६] ॥३।१।४५॥ (धातोः[३] च्लेः[५])

इति क्सादेशे –

लुग्वा[३] दुह[१]दिहलिहगुहामात्मनेपदे[४] दन्त्ये[५] ॥७।३।७३॥ (क्सस्य[२])

इति क्सस्य लुकि हस्य घत्वे प्रत्ययतकारस्य धकारे जश्त्वेन च घस्य गकारे अडागमे अदुग्ध। पक्षे दस्य भष्भावेन धकारे घस्य गत्वे गस्य कत्वे धुक्+स त इति जाते सस्य च षत्वे कृषोः संयोगेन क्षकारे अडागमे अधुक्षत –

क्सस्याचि ॥७।३।७२॥ (लोपः)

इति क्साकारस्य लोपे अधुक्षाताम्। * अधुक्षन्त। अदुग्धाः, अधुक्षथाः, अधुक्षाथाम्, अधुग्ध्वम्, अधुक्षध्वम्। अधुक्षि, अदुह्वहि, अधुक्षावहि, अधुक्षामहि। अधुक्षत्, अधुक्षताम्, अधुक्षन्। दुदुहे, दुदोह। क्रादिनियमादिटि दुदोहिथ, दुदुहिव, दुदुहिम –

लिङ्सिचा[४]वात्मनेपदेषु[५] ॥१।२।११॥ (इकः[१] हलन्तात्[२] झलादी[३] कितौ[६])

इति कित्त्वात् गुणाभावे वर्णकार्ये धुक्षीष्ट, दुह्यात्, दुह्यास्ताम्, दुह्यासुः। **लिह = आस्वादने।** आत्मनेपदे शपो लुकि ङित्त्वाद् गुणाभावे **'होढः'** (८।२।३१) इति ढत्वे

---

* **अचीति परसप्तमीत्वान्न भाविबुद्ध्या पूर्वमलोपः।**

'झषस्तथोर्धोऽधः' (८।२।४०) इति तस्य धत्वे- ष्टुत्वेन ढकारे लिढ्+ढे इत्यत्र **'ढो ढे लोपः'** (८।३।१३) इति पूर्वढलोपे **'ढ्रलोपे पूर्वस्य दीर्घोऽणः'** (६।३।१११) इति पूर्वस्वरदीर्घे लीढे, लिहाते, लिहते। लिक्षे, लिहाथे, लीढ्वे। लिहे, लिह्वहे, लिह्महे। परस्मैपदे तु **'वार्णादाङ्गं बलीयः'** (परि०) इति पूर्वं गुणे ततो वर्णकार्ये * लेढि, लीढः, लिहन्ति। अलीढ अलेट् (इ)। लीढाम्। पूर्वं गुणे ततो वर्णकार्ये लेढु, लीढात्। लिह्यात्। लेक्ष्यते (ति)। अडामे अलीढ, अलिक्षत, अलिक्षाताम्, अलिक्षन्त। अलीढाः, अलिक्षथाः, अलिक्षाथाम्, अलीढ्वम्, अलिक्षध्वम्, अलिक्षि, अलिह्वहि, अलिक्षावहि, अलिक्षामहि। अलिक्षत्, अलिक्षताम्। लिलिहे लिलेह। कित्त्वाद् गुणाभावे लिक्षिष्ट, लिह्यात्। **द्विष = अप्रीतौ।** द्विष्टे, द्वेष्टि। अद्विष्ट, अद्वेट्–

द्विषश्च ॥३।४।११२॥ (लङः झेर्जुस् वा)

अद्विषुः, अद्विषन्। अद्विक्षत (त्)। दिद्विषे, दिद्वेष। द्विक्षीष्ट, द्विष्यात्।

॥ इत्युभयपदिनोऽदादयश्च समाप्ताः ॥

●

---

* **वर्णकार्यस्य त्रिपादीस्थत्वेन गुणस्य च 'पूर्वत्रासिद्धम्' (८।२।१) इति असिद्ध्यापि प्रवृत्तिः।**

अथ जुहोत्यादयः । तत्र परस्मैपदिनः

हु=दानादनयोः। इति हुधातोर्लटि तिपि शपस्तु –

जुहोत्या[1]दिभ्यः श्लुः[3] ॥२।४।७५॥ (शपः[2])

इति श्लौ ततः –

श्लौ ॥६।१।१०॥ (अनभ्यासस्य धातोः द्वे)

इति धातोर्द्वित्वे अभ्यासकार्ये **'सार्वधातुकार्धधातुकयोः'** (७।३।८४) इति गुणे जुहोति जुहुतः, जुहु+झि, इति स्थितौ समुदितस्य धातोः–

उभे[1]ऽभ्य[2]स्तम् ॥६।१।५॥ (द्वित्वे सति)

इति अभ्यस्त-संज्ञायाम् **'अदभ्यस्तात्'** (७।१।४) इति झस्य अति कृते जुहु+अति इति जाते **'हुश्नुवोः सार्वधातुके'** (६।४।८७) इति यणि जुह्वति। जुहोषि, जुहुथः, जुहुथ। जुहोमि, जुहुवः, जुहुमः। अजुहोत्, अजुहुताम्। झेर्जुसि –

जुसि च ॥७।३।८३॥ (इकः अङ्गस्य गुणः)

इति गुणे अवादेशे अडागमे च अजुहवुः। अजुहोः, अजुहुतम्, अजुहुत। अजुहवम्। अजुहुव, अजुहुम। जुहोतु, जुहुतात्। जुहु+हि इत्यत्र **'हुझल्भ्यो हेर्धिः'** (६।४।१०१) इति हेर्धौ जुहुधि। जुहवानि। जुहुयात्। होष्यति। अहौषीत्। लिटि –

भीहीभृहुवां[1] श्लुवच्च[5] ॥३।१।३९॥ (लिटि[2] वा[3] आम्[4])

इति आमि श्लुवच्च कार्य्ये द्वित्वादौ गुणे अवादेशे लिटो लुकि जुहवाम् इत्यतः कृञोऽनुप्रयोगे द्वित्वादिकार्य्ये परसवर्णे जुहवाञ्चकार, एवं जुहवामास*। जुहवाम्बभूव। पक्षे जुहाव, जुहुवतुः, जुहुवुः। जुहविथ, जुहोथ। जुहुविम। हूयात्। **ञिभी=भये,** बिभेति –

भियोऽन्यतरस्याम् ॥६।४।११५॥ (हलि सार्वधातुके क्ङिति इत्)

इति पाक्षिके ह्रस्वेकारे बिभितः, बिभीतः, बिभ्यति। अबिभेत्, अबिभिताम् (भी) अबिभयुः। बिभेतु। बिभितात्, बिभीतात्, बिभ्यतु। बिभियात्, बिभीयात्। भेष्यति।

---

* ~~आमन्तात् कृञोऽनुप्रयोगविधानात्~~ **'अस्तेर्भूः'** (२।४।५२) इत्यस्तेर्न भ्वादेशः।

अभैषीत् । बिभयाञ्चकार । बिभयामास । बिभयाम्बभूव, बिभाय, बिभयिथ, बिभेथ, भीयात् । **ह्री = लज्जायाम् ।** जिह्रेति, जिह्रीतः, जिह्रियति । अजिह्रेत् । अजिह्रयुः । जिह्रेतु । जिह्रीयात् । ह्रेष्यति । अह्रैषीत् । जिह्रयाञ्चकार, जिह्रयाम्बभूव, जिह्रयामास, जिह्राय, जिह्रियतुः । जिह्रयिथ, जिह्रेथ । जिह्रयिव । ह्रीयात् । **ओहाक् = त्यागे,** जहाति, जहा + तः इत्यत्र –

[४]जहातेश्च ॥६।४।११६॥ ([१]हलि [२]ङिति [३]सार्वधातुके [५]आत [६]इत् वा[७])

इति आत इत्वे जहितः, पक्षे –

[३]ई [६]हल्यघोः[७] ॥६।४।११३॥ ([१]श्नाभ्यस्तयोरातः[२] [४]सार्वधातुके क्ङिति[५])

इति ईत्वे जहीतः, जहा + अति, इत्यत्र –

श्नाभ्यस्तयोरातः ॥६।४।११२॥ (लोपः सार्वधातुके क्ङिति)

इति आलोपे जहति । अजहात्, अजहिताम्, अजहीताम्, अजहुः । जहातु, जहितात्, जहीतात् । जहा + हि, इत्यत्र –

[२]आ च हौ[५] ॥६।४।११७॥ ([१]जहातेः [३]इत् वा[४])

इति पाक्षिके इकारे आत्वे च कृते जहिहि, जहाहि, ईकारे जहीहि इति –

[२]लोपो यि[३] ॥६।४।११८॥ ([१]जहातेः [४]सार्वधातुके क्ङिति[५])

इति आलोपे जह्यात् । जह्याताम्, जह्युः । हास्यति । हाता । लुङि सगिटौ – अहासीत् । जहौ । हेयात् ।

॥ इति परस्मैपदिनः ॥

अथात्मनेपदिनौ

ओहाङ् = गतौ। अनुबन्धनिवृत्तौ हा धातोर्लटि लादेशे टेरेत्वे शपि तस्य श्लौ द्वित्वादिकार्ये जहा + ते इति जाते –

[1]भृञामित्[5] ॥७।४।७६॥ ([2]त्रयाणां [3]श्लौ अभ्यासस्य[4])

इति अभ्यासस्य इत्त्वे **'ई हल्यघोः'** (६।४।११३) इति आकारस्य ईत्वे जिहीते, परिशेषाद् अजादौ **'श्नाभ्यस्तयोरातः'** (६।४।११२) इति आकारलोपे जिहाते, जिहते। जिहीषे, जिहाथे, जिहीध्वे। जिहे, जिहीवहे, जिहीमहे। अजिहीत, अजिहाताम्, अजिहत। अजिहीथाः। जिहीताम्, जिहाताम्। जिहीत, जिहीयाताम्, जिहीरन्। हास्यते। अहास्त। जहे। हासीष्ट। एवम् **माङ् = माने।** मिमीते। अमिमीत। मिमीताम्। मिमीत। मास्यते। इत्यादि।

॥ इत्यात्मनेपदिनौ ॥

अथोभयपदिनः

डुभृञ् = धारणपोषणयोः । **'भृञामित्'** (७।४।७६) इति अभ्यासस्येत्वे बिभृते, बिभ्राते, बिभ्रते । बिभर्ति, बिभृतः, बिभ्रति । लङि अबिभृत । तिपि गुणे **हल्ङ्यादिलोपे** रेफस्य विसर्गे अबिभः, अबिभृताम्, अबिभरुः । बिभृताम्, बिभर्तु । बिभ्रीत, बिभृयात्, भरिष्यते । अभृत, अभार्षीत् । बिभराञ्चक्रे (कार) पक्षे बभ्रे, बभार । भृषीष्ट, **'रिङ् शयग्लिङ्क्षु'** (७।४।२८) इति रिङादेशे भ्रियात् । **डुदाञ् = दाने** । **'श्नाभ्यस्तयोरातः'** (६।४।११२) इति आलोपे चर्त्वे दत्ते, ददाते, ददते । ददाति, दत्तः, ददति । अदत्त । अददात् । दत्ताम् । ददातु । **'घ्वसोरेद्धावभ्यासलोपश्च'** (६।४।११९) इति अभ्यासलोपे अकारस्य एत्वे देहि । ददीत, दद्यात् । दास्यते, (ति) ।

स्थाघ्वोरिच्च ॥१।२।१७॥ (सिचः कित्)

इति धातोराकारस्य इकारे सिचः कित्त्वाच्च गुणाभावे **'हस्वादङ्गात्'** (८।२।२७) इति सिचो लोपेऽडागमे अदित, अदिषाताम्, अदिषत । **'गातिस्थाघुपा०'** (२।४।७७) इति सिचो लुकि अडागमे अदात्, अदाताम्, अदुः । ददे, ददौ, ददिथ, ददाथ, ददिव । दासीष्ट, देयात् । एवं **डुधाञ् = धारणपोषणयोः** । **'श्नाभ्यस्तयोरातः'** (६।४।११२) इत्याकारलोपे दध् + ते इत्यत्र –

[२]दधस्तथोश्च[६] ॥८।२।३८॥ ([३]बशो [४]भष् [१]झषन्तस्य स्ध्वोः[५])

इति दकारस्य भष्त्वेन धकारे धध् + ते इति जाते धकारस्य **'खरि च'** (८।४।५५) इति चर्त्वेन तकारे धत्ते, दधाते, दधते । दधाति, धत्तः, दधति । अधत्त, अदधाताम्, अदधत । अदधात्, अधत्ताम्, अदधुः । धत्ताम्, धत्स्व । दधातु, धेहि । दधीत, दध्यात्, धास्यते (ति) । अधित्, अधात् । दधे, दधौ, दधिथ, दधाथ, दधिव । धासीष्ट, धेयात् ।

॥ इत्युभयपदिनो जुहोत्यादयश्च समाप्ताः ॥

अथ दिवादयः। तत्र परस्मैपदिनः

दिवु = क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु।

इति दिव् धातोः तिपि शपम्बाधित्वा –

दिवादिभ्यः श्यन् ॥३।१।६९॥ (कर्तरि)

इति श्यनि अनुबन्धनिवृत्तौ दिव्+यति इति स्थितौ – **'हलि च'** (८।२।७७) इति इकारस्य दीर्घे दीव्यति। अदीव्यत्। दीव्यतु। दीव्येत्। देविष्यति। अदेवीत्। दिदेव। दीव्यात्। एवं **षिवु = तन्तुसन्ताने।** सीव्यति। **ष्ठिवु = निरसने।** ष्ठीव्यति। **ष्लुष = दाहे।** ष्लुष्यति। ष्लोषिष्यति। अष्लोषीत्। पुष्लोष। ष्लुष्यात्। **पुष = पुष्टौ।** पुष्यति। पोक्ष्यति। पुषादित्वादङि अपुषत्। पुष्यात्। **शुष = शोषणे।** **तुष = प्रीतौ।** **दुष = वैकृत्ये।** **ष्विदा = गात्रप्रक्षरणे।** (धर्म-स्तुतावित्यर्थः)। **क्षुध = बुभुक्षायाम्।** **शुध = शौचे।** **षिध = संसिद्धौ।** **श्लिष = आलिङ्गने।** श्लिष्यति, श्लेक्ष्यति। श्लेष्टा –

श्लिष आलिङ्गने ॥३।१।४६॥ (च्लेः क्सः)

इति क्सादेशे अनुबन्धनिवृत्तौ **'षढोः कः सि'** (८।२।४१) इति षस्य कत्वे सस्य च मूर्धन्यादेशे क्षोर्योगे क्षकारे अडागमे अश्लिक्षत्, अश्लिक्षताम्, अश्लिक्षन्। अन्यत्र पुषादित्वादङि समश्लिषज्जतु – काष्ठम्। **नशु = अदर्शने।** नश्यति –

रधा[1]दिभ्यश्च ॥७।२।४५॥ (आर्धधा[3]तुकस्येड्[4] [2]वलादेः वा[5])

(रध नश तृप दृप द्रुह मुह ष्णुह ष्णिह इति रधादिः) इति वैकल्पिके इटि नशिष्यति, पक्षे नश्+स्यति इत्यत्र –

मस्जि[2]नशोर्झलि[4] ॥७।१।६०॥ (अ[1]ङ्ग्योः नुम्[3])

इति अकारोत्तरे नुमि अनुबन्धनिवृत्तौ **'नश्चापदान्तस्य झलि'** (८।३।२४) इति अनुस्वारे नंश्+स्यति इति जाते **'व्रश्चभ्रस्ज०'** (८।२।३६) इति षत्वे **'षढोः कः सि'** (८।२।४१) इति कत्वे **'अनुस्वारस्य ययि परसवर्णः'** (८।४।४८) इति परसवर्णे नङ्क्ष्यति। पुषादित्वादङि अनशत्। ननाश, नेशतुः। नेशिथ, ननंष्ठ। नेशिव, नेश्व। नेशिम, नेश्म। नश्यात्। प्र – नश्यति इत्यत्र –

उपसर्गादसमासेऽपि णोपदेशस्य ॥८।४।१४॥ (नो णः)

इति णत्वे प्रणश्यति। प्रनष्टा इत्यादौ –

न[1]शेः षान्त[2]स्य ॥८।४।३६॥ (नः[3] [4]णो न[5])

इति णत्वाभावः। **तृप = प्रीणने।** तृप्यति। **'रधादिभ्यश्च'** (७।२।४५) इति इटि तर्पिष्यति पक्षे–

अनु[2]दात्तस्य चर्दुपध[3]स्यान्यतर[7]स्याम् ॥६।१।५९॥ ([1]उपदेशे [5]ऽजाल्य[4]मकिति[6])

इति ऋकारान्त्यावयवे अमि यणि त्रप्स्यति। अमोऽभावे उपधागुणे तर्प्स्यति। **(स्पृशमृशकृषतृपदृपः च्लेः सिज्वा वाच्यः)** इति वैकल्पिके सिचि **'रधादिभ्यश्च'** (७।२।४५) इति वैकल्पिके इटि **'अस्तिसिचोऽपृक्ते'** (७।३।९६) इति अपृक्ते ईटि **'इट ईटि'** (८।२।२८) इति सिचो लोपे उपधागुणे अडागमे अतर्पीत्। इडभावे **'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्'** (६।१५९) इति ऋकारान्त्यावयवे अमि यणि **'वदव्रजहलन्तस्याचः'** (७।२।३) इति वृद्धौ धातोः अडागमे अत्राप्सीत्। अमभावे अतार्प्सीत्। सिजभावे **'पुषादित्वादङि'** अतृपत्। ततर्प, ततृपतुः। ततर्पिथ, तत्रप्थ। तृप्यात्। एवं **दृप = हर्षमोहनयोः (मोहनं गर्वः)। द्रुह = जिघांसायाम्।** द्रुह्यति। द्रोहिष्यति। पक्षे दादित्वान्नित्ये घत्वे प्राप्ते –

वा द्रुहमुहष्णुहष्णिहाम् ॥८।२।३३॥ (हस्य घः)

इति घत्वविकल्पः। ध्रोक्ष्यति, ढत्वपक्षेऽप्येवमेव ध्रोक्ष्यति। द्रोहिता, द्रोग्धा, द्रोढा। **पुषादित्वादङि** अद्रुहत्, दुद्रोह। दुद्रोहिथ, दुद्रोग्ध, दुद्रोढ। दुद्रुहिव, दुद्रुह्व। द्रुह्यात्। **एवं मुह = वैचित्ये। ष्णुह = उद्गिरणे। ष्णिह = प्रीतौ।** (रधादयो वृतः)। **श्रमु = उपशमे।** लटि श्यनि –

शमा[1]मष्टा[2]नां [4]दीर्घः श्य[5]नि ॥७।३।७४॥ (अचः[3])

इति अचो दीर्घे शाम्यति। शमिष्यति। अशमत्। शशाम। शेमतुः। शेमिथ। शेमिव। शम्यात्। एवं **तमु = काङ्क्षायाम्। दमु = उपशमे। (दमनकरणे।) श्रमु = तपसि खेदे च। भ्रमु = अनवधाने। 'वाभ्राशम्लाशभ्रमु०'** (३।१।७०) इति वैकल्पिके श्यनि भ्राम्यति, पक्षे औत्सर्गिके शपि भ्रमति। भ्रमिष्यति। अभ्रमत्। बभ्राम। **'वा जृभ्रमुत्रसाम्'** (६।४।१२४) इति वैकल्पिके एत्वाभ्यासलोपे भ्रेमतुः। पक्षे बभ्रमतुः। भ्रेमिथ, बभ्रमिथ। वि + भ्रम = प्रमादे। सम् + भ्रम् = त्वरायाम्। **क्षमू = सहने।** क्षाम्यति। **'स्वरतिसूतिसूयतिधूञूदितो वा'** (७।२।४४) इति ऊदित्वाद्वैकल्पिके इटि क्षमिष्यति, पक्षे क्षंस्यति। अक्षमत्। चक्षाम। चक्षमिथ, चक्षन्थ। चक्षमिव। इडभावपक्षे –

ग्वोश्च४ ॥८।२।६५॥ (²मो³ नो¹ धातोः)

इति मकारस्य नकारे तस्य च णत्वे चक्षण्व । चक्षमिम चक्षण्म । (**अषितः क्षाम्यतेः क्षान्तिः । क्षमूषः क्षमतेः* क्षमा**) इति विवेकः । **क्लमु = ग्लानौ ।** क्लाम्यति, शपि **'ष्ठिवुक्लमुचमां शिति'** (७।३।७५) इति दीर्घे क्लामति । अक्लाम्यत् । अक्लामत् । क्लमिष्यति । अक्लमीत् । चक्लाम । चक्लमतुः, चक्लमिथ । क्लम्यात् । **मदी = हर्षे ।** माद्यति ।

प्र + मद = अनवधाने । उद् + मद = उन्मत्ततायाम् । **इति शमायदः । असु = क्षेपणे ।** अस्यति, असिष्यति । **पुषादित्वादङि –**

अस्यतेस्थुक् ॥७।४।१७॥ (अङि)

इति कित्त्वात् सकारात्परे थुकि अनुबन्धनिवृत्तौ आडागमे वृद्धौ आस्थत्, आस, आसतुः, अस्यात् । दुर्, निर्, अप + अस् = दूरीकरणे त्यागे वा । अनु + आ + अस् = सेवायाम् । **यसु = प्रयत्ने ।** प्रयस्यति । **भ्रंशु = अधःपतने । 'अनिदिताम०'** (६।४।२४) इति, नलोपे भ्रश्यति, भ्रंशिष्यति । अभ्रशत् । भ्रश्यात् । **कृश = तनूकरणे ।** कृश्यति । कर्शिष्यति । अकृशत् । **ञितृषा = पिपासायाम् ।** तृष्यति । तर्षिष्यति । अतृषत् । **हृष् = तुष्टौ ।** हृष्यति । हर्षिष्यति । अहृषत् । जहर्ष, जहृषतुः । हृष्यात् । **कुप् = क्रोधे ।** कुप्यति । कोपिष्यति । अकुपत् । चुकोप । कुप्यात् । **लुभ = गार्ध्ये ।** लुभ्यति, लोभिष्यति । **'तीषसहलुभरुषरिषः'** (७।२।४८) इति वैकल्पिके इटि लोभिता, लोब्धा । अलुभत् । **क्षुभ् = सञ्चलने ।** क्षुभ्यति । क्षोभिष्यति, अक्षुभत् । **गृधु = अभिकाङ्क्षायाम् ।** गृध्यति, गर्धिष्यति, अगृधत् । **ऋधु = वृद्धौ ।** ऋध्यति । अर्धिष्यति । आर्धत् । आनर्ध, आनर्धिथ । ऋध्यात् । (पुषादयो वृतः ।) **त्रसी = उद्वेगे । 'वा भ्राश०'** (३।१।७०) इति श्यनि त्रस्यति, त्रसति । त्रसिष्यति **'अतो हलादेर्लघोः'** (७।२।७) इति वृद्धिविकल्पे अत्रसीत्, अत्रासीत् । तत्रास, **'वा जृभ्रमुत्रसाम्'** (६।४।१२४) इति एत्वाभ्यासलोपे त्रेसतुः, तत्रसतुः । **नृती = गात्रविक्षेपे** । नृत्यति –

सेऽसिचि कृतचृतछृदतृदनृतः ॥७।२।५७॥ (इट् वा)

इति वैकल्पिके इटि नर्तिष्यति पक्षे नर्त्स्यति । सिचि तु नित्य इटि – अनर्तीत् । ननर्त । नृत्यात् । **जृष् = वयोहानौ ।** षकारानुबन्धलोपे **'ऋत इद्धातोः'** (७।१।१००) इति ऋकारस्येत्वे रपरे **'हलि च'** (८।२।७७) इति दीर्घे जीर्यति । **'वृतो वा'** (७।२।३८) इति वैकल्पिके दीर्घे जरीष्यति जरिष्यति । लुङि **'जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च'**

---

* षित्त्वात् **'षिद्विदादिभ्योऽङ्'** (३।३।१०४) इत्यङि स्त्रीत्वाट्टापि क्षमा ।

(३।१।५८) इति वैकल्पिके अङि **'ऋदृशोऽङि गुणः'** (७।४।१६) इति गुणे अडामे अजरत्। पक्षे अजारीत्। जजार। **'ऋच्छत्यृताम्'** (७।४।११) इति गुणे **'वाऽृभ्रमु०'** (६।४।१२४) इति पाक्षिके एत्वाभ्यासलोपे जेरतुः, जजरतुः। जेरिथ, जजरिथ। जीर्यात्। **शो = तनूकरणे।**

ओतः श्यनि ॥७।३।७१॥ (लोपः)

इति ओकारलोपे श्यति। अश्यत्। श्यतु। श्येत्। **'आदेच उपदेशेऽशिति'** (६।१।४५) इत्यात्वे शास्यति। शाता। **'विभाषा घ्राधेट्शाच्छासः'** (२।४।७८) इति सिचो लुकि अशात्। पक्षे **'यमरमनमातां सक्'** (७।२।७३) इति सकि सिचश्च इटि अशासीत्। शशौ, शशतुः, शशिथ, शशाथ। शायात्। एवं **छो = छेदने। षोऽन्तकर्मणि। 'एर्लिङि'** (६।४।६७) इति एत्वे सेयात्। **दो = अवखण्डने। 'गतिस्था०'** (२।४।७७) इति सिज्लुकि अदात्। देयात्। **व्यध + ताडने। 'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे विध्यति। व्यत्स्यति। व्यद्धा। अव्यात्सीत्। विव्याध, विविधतुः। विव्यधिथ, विव्यद्ध। विविधिव, विविधिम। विध्यात्।

॥ इति परस्मैपदिनः॥

अथात्मनेपदिनः

जनी = प्रादुर्भावे –

ज्ञाजनोर्जा ॥७।३।७९॥ (शिति)

इति धातोर्जादेशे जायते। अजायत। जायताम्। जायेत। जनिष्यते। लुङि च्लौ तस्य –

दीप-जन-बुध-पूरि-तायि-प्यायिभ्योऽन्यतरस्याम् ॥३।१।६१॥ (च्लेः चिण् ते)

इति वैकल्पिके चिणि –

चिणो लुक् ॥६।४।१०४॥

इति तकारस्य लुकि–

जनिवध्योश्च ॥७।३।३५॥ (चिणि ञ्णिति कृति च यदुक्तं तन्न)

इति वृद्धि-निषेधे अडागमे अजनि। अजनिष्ट। अजनिषाताम्। **'गमहनजन०'** (६।४।९६) इत्युपधालोपे – जज्ञे। जनिषीष्ट। **दीपी = दीप्तौ।** अदीपि, अदीपिष्ट।

पूरी = आप्यायने। अपूरि, अपूरिष्ट। **क्लिश = उपतापे।** क्लिश्यते। क्लेशिष्यते। अक्लेशिष्ट। चिक्लिशे। क्लेशिषीष्ट। **पद = गतौ।** पद्यते। पत्स्यते –

[४]चिण् ते[२]पदः[१] ॥३।१।६०॥ ([३]च्लेः)

इति च्लेः चिणि तकारस्य लुकि वृद्धौ अडागमे अपादि, अपत्साताम्। पेदे। पत्सीष्ट। वि + आ + पद् = मरणे। उत् + पद् = प्रादुर्भावे। उप + पद् = उपपत्तौ। सम् + पद् = सम्पत्तौ। निस् + पद् = प्रादुर्भावे। वि + पद् = विपत्तौ। प्र + पद् = प्रपन्नतायाम्। एवं **बुध् = अवगमने।** बुध्यते। भोत्स्यते, अबोधि, अबुद्ध, अभुत्साताम्, अभुत्सत। भुत्सीष्ट। **युध = सम्प्रहारे।** युध्यते। योत्स्यते। अयुद्ध। **खिद = दैन्ये।** खिद्यते। खेत्स्यते। अखित्त। **विद = सत्तायाम्।** विद्यते। वेत्स्यते। अवित्त, अवित्साताम्। विविदे। वित्सीष्ट। निर + विद् = निर्वेदे। परि + विद् = दोषे। अधि + विद् = त्यागे। सम् + विद् = सम्यग्ज्ञाने। **मन = ज्ञाने।** मन्यते। मंस्यते। अमंस्त। मेने। मंसीष्ट। **युज = समाधौ।** युज्यते। योक्ष्यते। अयुक्त, अयुक्षाताम्। **सृज = विसर्गे। (संसृज्यते सरसिजैररुणांशुभिन्नैः)। 'सृजिदृशोर्झल्य-मकिति'** (६।१।५८) इति अमागमे स्रक्ष्यते। स्रष्टा। असृष्ट, असृक्षाताम्। सृक्षीष्ट **'लिङ्सिचावात्मनेपदेषु'** (१।२।११) इति कित्त्वाद्गुणाभावः। **लिश = अल्पीभावे।** लिश्यते। लेक्ष्यते। च्लेः क्सादेशे अलिक्षत, अलिक्षाताम्, अलिक्षन्त। लिक्षीष्ट।

॥ इत्यात्मनेपदिनः॥

अथोभयपदिनः

णह = बन्धने। नह्यते (ति) **'नहो धः'** (८।२।३४) इति धत्वे **'खरि च'** (८।४।५५) इति चर्त्वेन तकारे नत्स्यते (ति) अनद्ध। अनात्सीत्। नेहे। ननाह, नेहतुः, नेहिथ, ननद्ध। नेहिव, नेहिम। नत्सीष्ट। नह्यात्। सम् + नह् .....उद्योगे। **रञ्ज = रागे।** **'अनिदिताम्०'** (६।४।२४) इति नलोपे रज्यते (ति)। रङ्क्ष्यते,। अरङ्क्त। **'वदव्रज०'** (७।२।३) इति वृद्धौ अराङ्क्षीत्। ररञ्जे। ररञ्ज। रङ्क्षीष्ट, रज्यात्। अप, वि + रञ्ज = विरक्तौ। उप + रञ्ज = राहुग्रासे। **मृष = तितिक्षायाम्।** मृष्यते (ति)। मर्षिष्यते (ति) मर्षिता। अमर्षिष्ट, अमर्षीत्। ममृषे, ममर्ष। मर्षिषीष्ट, मृष्यात्।

॥ इत्युभयपदिनो दिवादयश्च समाप्ताः॥

अथ स्वादयः। तत्रोभयपदिनः

षुञ् = **अभिषवे**। **स्नान-स्वपन-पीड़न-सुरासन्धानादिरभिषवः**। शपं बाधित्वा –

स्वादिभ्यः श्नुः ॥३।१।७३॥ (शपोऽपवादः)

इति श्नुविकरणे, अनुबन्धनिवृत्तौ सुनुते। **'हुश्नुवोः०'** (६।४।८७) इति यणि सुन्वाते। **'आत्मनेपदेष्वनतः'** (७।१।५) इति झस्याति सुन्वते। **लोपश्चास्यान्यतरस्यां म्वोः'** (६।४।१०७) इति उकारलोपे सुन्वहे, सुनुवहे। परस्मैपदे तु सुनोति, सुनुतः। असुनुत, असुनोत्। सुनुताम्, सुनोतु। सुन्वीत, सुनुयात्। सोष्यते (ति), असोष्ट। **'स्तुसुधूञ्भ्यः परस्मैपदेषु'** (७।२।७२) इति इटि वृद्धौ असावीत्। सुषुवे। सुषाव। सोषीष्ट, सूयात्। **धुञ् = कम्पने**। धुनुते, धुनोति। अधुनुत, अधुनोत्। धुनुताम्, धुनोतु। धुन्वीत, धुनुयात्। धोष्यते (ति)। अधोष्ट, अधौषीत्। दुधुवे, दुधाव, दुधविथ, दुधोथ। धोषीष्ट, धूयात। अयं दीर्घान्तोऽपि धूनोतीत्यादि। अत्र दीर्घपक्षे **'स्वरतिसूतिसूयति-धूञूदितो वा'** (७।२।४४) इति वैकल्पिके इटि धविष्यते, (ति)। धोष्यते (ति)। अधविष्ट, अधोष्ट। **'स्तुसुधूञ्भ्यः'** (७।२।७२) इति नित्ये इटि वृद्धौ अधावीत्, लिटि दुधुवे, दुधाव। दुधुवतुः। दुधविथ दुधोथ। **(पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्)** स्वरतीत्यादि वैकल्पिकस्येटः :–

श्युकः किति ॥७।२।११॥ (नेट्)

इति बाधे प्राप्ते **क्रदिनियमान्नित्ये** इटि दुधुविव, दुधुविम। धविषीष्ट, धोषीष्ट। **चिञ् = चयने**। चिनुते, चिनोति। अचेष्ट, अचैषीत्। लिटि द्वित्वादिकार्ये –

विभाषा चेः ॥७।३।५८॥ (अभ्यासात्कुः सनि लिटि च)

इति वैकल्पिके कुत्वे चिक्ये, चिच्ये, चिकाय। चेषिष्ट, चीयात्। प्र, उप + चि = वृद्धौ। अप + चि = हानौ। सम् + चि = संग्रहे। अनु + अव + आ + चि = आनुषङ्गे। निस् + चि = दृढीकारे। वि + चि = मार्गणे। उत् + चि = उन्नीतौ। नि, सम् + उत् + चि = समुदाये। परि + चि = सम्पर्के साक्षात्कारे वा। **वृञ् = वरणे**। वृणुते, वृणोति। **'वृतो वा'** (७।२।३८) इति वैकल्पिके इटो दीर्घे वरीष्यते, (ति) वरिष्यते (ति)। लुंङ

लिङ्सिचोरात्मनेपदेषु ॥७।२।४२॥ (वृतो वा इट्)

इति वैकल्पिके इटि **'वृतो वा'** (७।२।३८) इति वैकल्पिके दीर्घे अवरीष्ट अवरिष्ट। इडभावपक्षे **'हस्वादङ्गात्'** (८।२।२७) इति सिचो लोपे अवृत। अवारीत्, **'वृतो वा'** (७।२।३८) इत्यनेन प्राप्तस्य इड्दीर्घस्य –

सिचि च परस्मैपदेषु ॥७।२।४०॥ (वृतो न इटो दीर्घः)

इति निषेधे अवारिष्टाम्। वव्रे, ववार, वव्रतुः। क्रादिनियमादिण्निषेधे प्राप्ते –

बभूथाततन्थजगृम्भववर्थेति निगमे ॥७।२।६४॥

इति नियमादिटि ववरिथ। **क्रादिनियमादिण्निषेधे** ववृव, ववृम। **'लिङ्सिचोरात्म-नेपदेषु'** (७।२।४२) इति वैकल्पिके इटि **'वृतो वा'** (७।२।३८) इति प्राप्तस्य दीर्घस्य –

न लिङि ॥७।२।३९॥ (वृत इटो दीर्घः)

इति निषेधे वरिषीष्ट, इडभावे वृषीष्ट। व्रियात्। **स्तृञ् = आच्छादने।** स्तृणुते, स्तृणोति। स्तरिष्यते (ति)। स्तर्ता। लुङि –

ऋतश्च संयोगादेः ॥७।२।४३॥ (लिङ्सिचोरिड् वा तङि)

इति वैकल्पिके इटि अस्तरिष्ट, पक्षे **'हस्वादङ्गात्'** (८।२।२७) इति सिज्लोपे अस्तृत। अस्तार्षीत्। लिटि द्वित्वादौ **'शर्पूर्वाः खयः'** (७।४।६१) इति तकारशेषे – **'ऋतश्च संयोगादेर्गुणः'** (७।४।१०) इति गुणे तस्तरे। तस्तार, तस्तरतुः, तस्तर्थ, तस्तरिव। उक्तसूत्रेण वैकल्पिके इटि गुणे स्तरिषीष्ट। **'उश्च'** (१।२।१२) इति कित्त्वे गुणाभावे स्तृषीष्ट **'गुणोऽर्तिसंयोगाद्योः'** (७।४।२९) इति गुणे स्तर्यात्।

॥ इत्युभयपदिनः ॥

परस्मैपदिनः

शक्लृ = सामर्थ्ये, शक्नोति, अशक्नोत्, शक्नोतु। शक्नुयात्। शक्ष्यति। शक्तासि। लृदित्त्वादङि अशकत्। शशाक, शेकतुः। शक्यात्। **एवम् आप्लृ = व्याप्तौ। टुदु = उपतापे।** दुनोति। दोष्यति। अदौषीत्। दुदुवतुः। दुदविथ, दुदोथ। दुदुविव। दूयात्। वि + दु = परितापे। **हि = गतौ, वृद्धौ** च। तस्य लिटि द्वित्वादिकार्ये –

[1]हेरचङि[4] ॥७।३।५६॥ ([2]अभ्यासात् कुः[3])

इति हस्य कुत्वेन घकारे जिघाय, जिघ्यतुः, जिघयिथ, जिघेथ। जिघ्यिव। हीयात्।

॥ इति परस्मैपदिनः॥

अथात्मनेपदी

अशूङ् = व्याप्तौ संघाते च।

शात् ॥८।४।४४॥ (स्तोः न श्चुः)

इति श्चुत्वनिषेधे अश्नुते, अश्नुवाते, अश्नुवते। आश्नुत। अश्नुताम्। अश्नुवीत। **'स्वरतिसूति०'** (७।२।४४) इति वैकल्पिके इटि अशिष्यते अक्ष्यते। आशिष्ट आष्ट। लिटि द्वित्वे आ अश ए इति जाते –

अश्नोतेश्च ॥७।४।७२॥ (* तस्मान्नुट्)

इति नुटि आनशे। वैकल्पिके इटि आनशिषे, आनक्षे। आनशिध्वे, आनड्ढ्वे। अशिषीष्ट, अक्षीष्ट। **प्र + अश् = भोजने।**

॥ इत्यात्मनेपदी स्वादयश्च समाप्ताः ॥

---

* दीर्घीभूतादित्यर्थः।

अथ तुदादायः। तत्रोभयपदिनः

तुद = व्यथने।

तुदादिभ्यः शः ॥३।१।७७॥ (शपोऽपवादः)

इति शप्रत्यये। अनुबन्धनिवृत्तौ शित्त्वेन सार्वधातुकतया **'सार्वधातुकमपित्'** (१।२।४) इति ङित्त्वाद् गुणाभावे तुदते, तुदति। तोत्स्यते (ति)। अतुत्त, अतौत्सीत्। तुत्सीष्ट, तुद्यात्। **चुद, गुद = प्रेरणे। क्षिप = प्रेरणे।** क्षेप्स्यते (ति)। **दिश = अतिसर्जने,** देक्ष्यते। अदिक्षत (त्)। उप + दिश = उपदेशे। सम्, आ + दिश् = आज्ञायाम्। निर् + दिश = बोधने। वि + अप + दिश् = छद्मनि। वि + दिश् = दूरीकारे। अधि + आ + दिश् = आज्ञायाम्। **कृष = विलेखने।** क्रक्ष्यते, कर्क्ष्यते। लिङ्सिचोः कित्त्वादमोऽभावे अकृष्ट, अकृक्षत। अक्राक्षीत्, अकार्क्षीत्। अकृक्षत्। चकृषे, चकर्ष। कृक्षीष्ट, कृष्यात्। **मुच्लृ = मोचने।**

शे मुचादीनाम् ॥७।१।५९॥ (नुम्)

इति मित्त्वादुकारात्परे नुमि अनुबन्धनिवृत्तौ अनुस्वारे परसवर्णे मुञ्चते, (ति) मोक्ष्यते (ति)। अमुक्त लृदित्वादङि अमुचत्। मुमुचे, मुमोच। मुमोचिथ, मुमुचिव। मुच्यात्। **विद्लृ = लाभे। लुप्लृ = छेदने।** वि + लुप् = लोपने। **लिप् = उपदेहे।** उपदेहो वृद्धिः। लिम्पते (ति)। लुङि च्लौ तस्य –

आत्मनेपदेष्वन्यतरस्याम् ॥३।१।५४॥ (लिपिसिचिह्वश्च च्लेरङ्)

इति वैकल्पिकेऽङि अलिपत पक्षे अलिप्त। **'लिपिसिचिह्वश्च'** (३।१।५३) इति नित्यमङि अलिपत्। लिलिपे, लिलेप, लिलेपिथ,। लिलिपिव। लिप्सीष्ट लिप्यात्। निर् + लिप = विरागे। एवं **षिच = क्षरणे।** अभि + षिच = स्नपने (अभिषवे)।

॥ इत्युभयपदिनः ॥

अथ परस्मैपदिनः

खिद = परिघाते। खिन्दति। खेत्स्यति, अखैत्सीत्। चिखेद। खिद्यात्। **पिश = अवयवे,** पिंशति। पेशिष्यति। **कृत्ती = छेदने।** कृन्तति **'सेऽसिचि कृतचृतछृदतृदनृतः'** (७।२।५७) इति वैकल्पिके इटि कर्त्स्यति कर्तिष्यति। कर्तिता। इति मुचादिः। **ओव्रश्चू = छेदने।**

'ग्रहिज्या०' (६।१।१६) इति सम्प्रसारणे वृश्चति। **'स्वरतिसूति०'** (७।२।४४) इति वैकल्पिके इटि व्रश्चिष्यति व्रक्ष्यति। वव्रश्च, वव्रश्चिथ वव्रष्ठ। वृश्च्यात्। **उछि = उञ्छे। (उञ्छः कणश आदानाम्। कणिशाद्यर्जनं शिलम्)** इति यादवः। उञ्छति। औञ्छीत्। उञ्छाञ्चकार। **उज्झ = उत्सर्गे। ऋच्छ = गतीन्द्रियप्रलयमूर्तिभावेषु।** आर्च्छीत्। लिटि द्वित्वे अभ्यासकार्य्ये अ ऋच्छ + ति इति जाते **'ऋच्छत्यृताम्'** (७।४।११) इति गुणे **'अत आदेः'** (७।४।७०) इति दीर्घे आ अर्च्छ + अ इति स्थितौ **'तस्मान्नुड् द्विहलः'** (७।४।७१) इति नुटि अनुबन्धलोपे आनर्छ, आनर्छतुः। इत्यादि। **इष = इच्छायाम्।** इच्छति। **'तीषसह०'** (७।२।४८) इति वैकल्पिके इटि एषिता एष्टा। ऐषीत्। इयेष, ईषतुः। **लुभ = विमोहने।** लोभिता लोब्धा। अलोभीत्। **लिख = अक्षरविन्यासे। मिल = सङ्गमे। कुट = कौटिल्ये।** कुटति। लृटि –

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥१।२।१॥

इति ङित्त्वाद्गुणाभावे कुटिष्यति। **कुच = सङ्कोचे।** प्रायेणायं सम्पूर्वः। संकुचिष्यति। **स्फुट = विकसने। स्फुर, स्फुल = सञ्चलने। घुट = परिवर्तने। त्रुट = त्रोटने।** **'वाभ्राशम्लाश०'** (३।१।७०) इति श्यनि त्रुट्यति अपि। **पुट = संश्लेषणे। णू = स्तवने।** नुवति। नुविष्यति। **धू = विधूनने।** धुवति। अधुवीत्। **(वृत् कुटादिः)। टुमस्जो = शुद्धौ।** श्चुत्वेन सस्य शकारे **'झलां जश् झशि'** (८।४।५३) इति शस्य जकारे मज्जति। **'मस्जिनशोर्झलि'** (७।१।६०) इति नुमि कर्तव्ये **(मस्जेरन्त्यात् पूर्वो नुम् वाच्यः)** इति जकारात् पूर्वे नुमि **'स्कोः संयोगाद्यो०'** (८।२।२९) इति सलोपे कुत्वादिकार्य्ये मङ्क्ष्यति। **रुजो = भङ्गे। भुजो = कौटिल्ये। मृश = आमर्शने। (आमर्शनं स्पर्शः) 'अनुदात्तस्य०'** (६।१।५९) इति अमागमे म्रक्ष्यति पक्षे मर्क्ष्यति। अम्राक्षीत् आमार्क्षीत् अमृक्षत्। वि, परा + मृश = विचारे। **स्पृश = संस्पर्शने। विश = प्रवेशे।** वेक्ष्यति। अविक्षत्। सम् + विश = शयने। आ + विश = आवेशे। उप + विश = उपवेशने। नि + विश = प्रवेशे (आत्मनेपदे)। अभि + नि + विश = आसक्तौ। निर् + विश = उपभोगे। **सृज् = विसर्गे।** सृजति। लृटि – अकिति झलि **'सृजिदृशोर्झल्यमकिति'** (६।१।५८) इति नित्यममागमः स्रक्ष्यति। **'विभाषा सृजिदृशोः'** (७।२।६५) इति वैकल्पिके इटि ससर्जिथ सस्रष्ठ। **प्रच्छ = ज्ञीप्सायाम्।** **'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे पृच्छति। प्रक्ष्यति। पप्रच्छतुः, प्रपच्छिथ, प्रपष्ठ। पृच्छ्यात्। **कृ = विक्षेपे।** **'कृत इद्धातोः'** (७।१।१००) इति रपरे इकारे किरति। करीष्यति करिष्यति। अकारीत्। **'ऋच्छत्यृताम्'** (७।४।११) इति गुणे चकरतुः। कीर्य्यात्। **गृ = निगरणे।** तस्य –

अचि विभाषा ॥८।२।२१॥ (ग्रो रो लः)

इति वैकल्पिके लत्वे गिलति, गिरति। **षद्लृ = विशरणगत्यवसादनेषु। 'पाघ्राध्मा०'** (७।३।७८) इति सीदादेशे सीदति। सत्स्यति। असदत्। **शद्लृ = शातने।** तस्य –

शदेः शितः ॥१।३।६०॥ (आत्मनेपदम्)

इति आत्मनेपदे **'पाघ्राध्मा०'** (७।३।७८) इति शीयादेशे शीयते। अशीयत। शीयताम्। शीयेत। अन्यत्र परस्मैपदे शत्स्यति। अशत्स्यत्। लृदित्वादङि अशदत्। शशाद शेदतुः। शद्यात्। **घूर्ण = भ्रमणे।** घूर्णति। घूर्णिष्यति। **दृभी = ग्रन्थे।** दृभति। दर्भिष्यति। अदर्भीत्। ददर्भ। दृभ्यात्।

॥ इति परस्मैपदिनः ॥

अथात्मनेपदिनः

पृङ् = व्यायामे। प्रायेणायं व्याङ्पूर्वः। पृ + अते इत्यत्र – **'रिङ् शयग्लिङ्क्षु'** (७।४।२८) इति ऋतो रिङि **'अचिश्नु०'** (६।४।७७) इति इयङादेशे व्याप्रियते, व्याप्रियत। व्याप्रियताम्। व्याप्रियेत। व्यापरिष्यते। व्यापर्ता। व्यापृत। व्यापप्रे। व्यापृषीष्ट। **मृङ् = प्राणत्यागे** ङित्त्वादात्मनेपदे सिद्धे –

म्रियतेर्लुङ्लिङोश्च ॥१।३।६१॥ (शितः आत्मनेपदम्)

इति नियमादपि म्रियते। अम्रियत। म्रियताम्। म्रियेत। लृङादिषु तु परस्मैपदे मरिष्यति। अमरिष्यत्। मर्त्ता। लुङि अमृत। ममार। मृषीष्ट। **ओविजी = भयचलनयोः।** प्रायेणायमुत्पूर्वः उद्विजते।

विज इट् ॥१।२।२॥ (ङित्)

इति इटः ङित्त्वे उद्विजिष्यते। उद्विविजे। उद्विजिषीष्ट। **जुषी = प्रीतिसेवनयोः।** जुषते। जोषिष्यते। **दृङ् = आदरे। प्रायेणायमाङ्पूर्वः।** आद्रियते। आदरिष्यते। आदर्ता। आदृत। आदद्रे। आदृषीष्ट। **धृङ् = अवस्थाने।** ध्रियते। धरिष्यते। धर्त्ता, अधृत। दध्रे। धृषीष्ट।

॥ इत्यात्मनेपदिनः तुदादयश्च समाप्ताः ॥

· अथ रुधादयः। तत्रोभयपदिनः

रुधिर् = आवरणे। इर इत्संज्ञायां लोपे च रुध् धातोस्तप्रत्यये टेरेत्वे –

रुधादिभ्यः श्नम् ॥३।१।७८॥ (शपोऽपवादः)

इति मित्त्वादचोऽन्ते श्नमि अनुबन्धनिवृत्तौ **'श्नसोरल्लोपः'** (६।४।१११) इति अकारलोपे **'झषस्तथोर्धोऽधः'** (८।२।४०) इति तकारस्य धकारे रुन्ध् + धे इति जाते, धातोः धकारस्य जश्त्वेन दकारे, ततः –

झ[२]रो झ[५]रि [४]सवर्णे ॥८।४।६५॥ (हलः[१] लोपः[३] अन्य[६]-तरस्याम्)

इति दकारलोपे रुन्धे। अत्र णत्वस्यासिद्धत्वात् **'नश्चापदान्तस्य०'** (८।३।२४) इत्यनुस्वारे तस्य **'अनुस्वारस्य ययि परसवर्णः'** (८।४।५८) इति परसवर्णे तस्यासिद्धत्वान्न पुनर्णकारः। रुन्धाते, रुन्धते। रुन्त्से, रुन्धाथे, रुन्ध्वे। रुन्धे, रुन्ध्वहे, रुन्ध्महे। **'अट्कुप्वाङ्०'** (८।४।२) इति णत्वे रुणद्धि, रुन्धः, रुन्धन्ति। रुणत्सि, रुन्धः, रुन्ध। रुणद्धि, रुन्ध्वः, रुन्ध्मः। अरुन्ध, अरुन्धाताम्, अरुन्धत। **'हलङ्याब्भ्यो दीर्घात्०'** (६।१।६८) इति तकारस्य लोपे **'झलां जशोऽन्ते'** (८।२।३९) इति धस्य दकारे **'वावसाने'** (८।४।५६) इति वैकल्पिके तकारे अरुणत् अरुणद्। अरुन्धाम्, अरुन्धन्। **'दश्च'** (८।२।७५) इति वैकल्पिके रुत्वे अरुणः अरुणत् (द्)। रुन्धाम्। रुणद्धु। **'हुझल्भ्यो हेर्धिः'** (६।४।१०१) रुन्धि, रुणधानि, रुणधाव, रुणधाम्। रुन्धीत, रुन्ध्यात्। रोत्स्यते, रोत्स्यति। अरुद्ध, अरुत्साताम् **'इरितो वा'** (३।१।५७) इत्यङि अरुधत्, पक्षे अरौत्सीत्। रुत्सीष्ट, रुध्यात्। अनु + रुध् = अनुवर्त्तने। अव + रुध् = आवरणे। उप + रुध् = निवारणे। वि + रुध् = वैरभावे। प्रति + रुध् = प्रतिरोधे। **भिदिर् = विदारणे। भिन्ते, भिनत्ति। छिदिर् = द्वैधीकरणे। विचिर् = पृथग्भावे।** विङ्क्ते, विञ्चाते। विनक्ति। **रिचिर् = विरेचने।** रिङ्क्ते। रिणक्ति। अरिङ्क्त, अरिणक्। अरिक्त। अरिचत्, अरैक्षीत्। अति + रिच् = आधिक्ये। **क्षुदिर् = सम्पेषणे।** क्षुन्ते, क्षुन्दाते। क्षुणत्ति। अक्षुन्त, अक्षुणत्। **युजिर् = योगे।** प्र + युज् = प्रयोगे। सं + युज् = संयोगे। उत् + युज् = उद्योगे। अनु + युज् = प्रश्ने। अभि + युज् = आक्रमणे। वि + आ + युज् = व्यायोगे (व्यायामे)। वि + युज् = वियोगे। उप + युज् = उपयोगे। आ, नि + युज् = नियोगे (आज्ञायाम्)।

॥ इत्युभयपदिनः॥

अथ परस्मैपदिनः

भञ्जो = आमर्दने। तस्य मित्त्वादचोऽन्ते श्नमि अनुबन्धनिवृत्तौ भनञ्ज्+ति, इति जाते –

श्नान्नलोपः ॥६।४।२३॥

इति धातोर्नकारलोपे कुत्वेन जस्य गकारे चर्त्वेन ककारे भनक्ति। **'श्नसोरल्लोपः'** (६।४।२३) इति अलोपे नकारस्यानुस्वारपरसवर्णयोः भङ्क्तः। भञ्जन्ति। अभनक्। भङ्क्ष्यति। अभाङ्क्षीत्। बभञ्ज, बभञ्जिथ, बभङ्क्थ। बभञ्जिव। **'अनिदिताम्०'** (६।४।२४) इति नलोपे भज्यात्। वि+भञ्ज=विभागे। **अञ्जू = व्यक्तिम्रक्षणकान्तिगतिषु।** अनक्ति, अङक्तः। आनक्(ग्)। **'स्वरति०'** (७।२।४४) इति वैकल्पिके इटि अञ्जिष्यति। अङ्क्ष्यति, लुङि –

अञ्जेः सिचि ॥७।२।७१॥ (नित्यमिट्)

इति इडागमे, **'इट ईटि'** (८।२।२८) इति सलोपे आडागमे वृद्धौ आञ्जीत्। आनञ्ज, आनञ्जतुः, आनञ्जिथ, आनङ्क्थ, अज्यात्। अभि+अञ्ज्=तैलमर्दने। वि+अञ्ज्=प्रकाशने। उत्+अञ्ज्=नेत्राञ्जने। सम्+अञ्ज्= परस्परनिरीक्षणे। **शिष्लृ=विशेषणे।** शिनष्टि। शिंष्टः। शिंषन्ति, शिनक्षि, अशिनट् (ड्)। **'हुझल्भ्यो हेर्धिः'** (६।४।१०१) इति हेः धौ कृते **'झलां जश् झशि'** (८।४।५३) इति षस्य जश्त्वेन डकारे ष्टुत्वेन धस्य ढत्वे, **'झरो झरि०'** (८।४।६५) इति डलोपे अनुस्वारपरसवर्णौ शिण्ढि शिण्ड्ढि। शिंष्टात्। शिनषाणि, शिंष्यात्, शेक्ष्यति, अशिषत्, शिशेष, शिष्यात्। एवम् **पिष्लृ=संचूर्णने। भुज=पालनाभ्यवहारयोः।** भुनक्ति, अभुनक्। भुनक्तु, भुञ्ज्यात्। भोक्ष्यति, अभौक्षीत्, बुभोज, भुज्यात्। आ+भुज आभोगे (व्याप्तौ)। उप+भुज=उपभोगे। सम्, परि+भुज=संभोगे।

॥ इति परस्मैपदिनः ॥

अथात्मनेपदम्

पालनाभ्यवहारार्थकस्य भुजधातोः पालनातिरिक्तेऽर्थे –

भुजोऽनवने ॥ १।३।६६ ॥ (तङानौ)

इत्यात्मनेपदे भुङ्क्ते, अभुङ्क्त, भुङ्क्ताम्, भुञ्जीत । भोक्ष्यते, अभुक्त, बुभुजे, भुक्षीष्ट । **ञिइन्धी = दीप्तौ ।** अनुबन्धनिवृत्तौ, **'श्नान्नलोपः'** (६।४।२३) इन्धि धातोर्नलोपे, श्नमोऽकारलोपे, तकारस्य धकारे, धातुधकारस्य जश्त्वेन दकारे, ततो **'झरो झरि०'** (८।४।६५) इति लोपे इन्धे, इन्धाते, इन्धते । ऐन्ध । इन्धाम् । इन्त्स्व, इनधै, इनधावहै । इन्धीत, इन्धिष्यते, ऐन्धिष्ट, इन्धाञ्चक्रे, इन्धिषीष्ट । **विद = विचारणे ।** चर्त्वे तलोपे विन्ते, विन्दाते । अविन्त । विन्ताम् , विन्दीत, वेत्स्यते, अवित्त, विविदे, वित्सीष्ट –

वेत्ति रूपं विद = ज्ञाने विन्ते विद = विचारणे ।
विद्यते विद = सत्तायाम्, लाभे विन्दति विन्दते ॥

॥ इत्यात्मनेपदिनः रुधादयश्च समाप्ताः ॥

अथ तनादयः। तत्रोभयपदिनः

तनु = विस्तारे –

तनादिकृञ्भ्य उः ॥३।१।७९॥ (सार्वधातुके कर्त्तरि)

इति उकारे विकरणे तनुते, तनोति। अतनुत, अतनोत्। तनुताम् तनोतु। तन्वीत, तनुयात्। तनिष्यते, तनिष्यति। तनिता।

तनादिभ्यस्तथासोः ॥२।४।७९॥ (सिचो लुग् विभाषा)

इति सिचो लुकि **'अनुदात्तोपदेश०'** (६।४।३७) इति नलोपे अडागमे अतत, अतनिष्ट। अतनिषाताम्। अतनिषत। अतथाः। अतनिष्ठाः। अतनिषाथाम्। अतनिध्वम्। अतनिषि, अतनिष्वहि, अतनिष्महि। अतानीत्। अतनीत्। तेने। ततान। तनिषीष्ट। तन्यात्। वि+तनु = विस्तारे। सम्+तनु = सन्ताने। **क्षिणु = हिंसायाम्। (उप्रत्यये लघूपधस्य गुणो वा)** इति वार्त्तिकबलात् वैकल्पिके धातोरुपधागुणे क्षेणुते क्षिणुते। क्षेणोति। क्षिणोति। अक्षेणुत, अक्षिणुत। क्षेणुताम्, क्षिणुताम्, क्षिणोतु, क्षेणोतु। क्षेण्वीत, क्षिण्वीत। क्षेणुयात्। क्षिणुयात्। क्षेणिष्यते, क्षेणिष्यति। क्षेणिता। अक्षेणिष्ट, अक्षेणीत्। चिक्षिणे। चिक्षेण। क्षेणिषीष्ट। क्षिण्यात्। एवम् - **तृणु = अदने। डुकृञ् = करणे।** लटि करुते इत्यत्र –

[२]अत [३]उत्सार्व[५]धातुके ॥६।४।११०॥ (ङिति[४] [१]करोतेः)

इति करोतेरकारस्योकारे कुरुते, **'हलि च'** (८।२।७७) इति प्राप्तसय दीर्घस्य –

न[४] भकु[१]र्छुराम् ॥८।२।७९॥ (उप[२]धाया दीर्घः[३])

इति निषेधे कुर्वाते –

नित्यं करोतेः॥६।४।१०८॥ (उतः लोपः म्वोः)

इति उकारलोपे कुर्वहे, कुर्महे। करोति, कुरुतः, कुर्वन्ति। अकुरुत, अकरोत्। कुरुताम्, करोतु। कुर्वीत –

ये[३] च ॥६।४।१०९॥ ([२]उतो लोपः[५] नित्यं[४] करोतेः[१])

इति उकारलोपे **'नभकु०'** (८।२।७९) इति दीर्घाभावे कुर्य्यात्। **'उस्यपदान्तात्'** (६।१।९६) कुर्य्युः। करिष्यते, करिष्यति। कर्ता। अकृत, अकार्षीत्। चक्रे, चकार।

कृषीष्ट, क्रियात् । अप + कृ = अपकारे । अप + आ + कृ = दूरीकरणे । सम् + कृ = संस्कारे । अनु + कृ = अनुकरणे । वि + कृ = विकारे । परि + कृ = परिष्कारे । उप + कृ = उपकारे । वि + आ + कृ = व्याख्याने । वि + प्र + कृ = अपकारे । प्र + कृ = प्रकर्षकरणे । सम् + कुरुते इत्यत्र –

सुट् कात् पूर्वः ॥६।१।१३५॥

इत्यधिकारे –

सम्पर्युपेभ्यः करोतौ भूषणे ॥६।१।१३७॥ (सुट्)

समवाये च ॥६।१।१३८॥

इत्याद्यर्थे कात् पूर्वे सुटि अनुबन्धनिवृत्तौ मोऽनुस्वारे संस्कुरुते । संस्करोति । **'आदेशप्रत्यययोः'** (८।३।५९) इति षत्वे परिष्कुरुते, परिष्करोति । अलम् + कृ = अलङ्कारे । उरी, उररी + कृ = स्वीकारे । पुरस् + कृ = पूजायाम्, अग्रतः करणे च । तिरस् + कृ = भर्त्सने । बहिष् + कृ = दूरीकरणे पृथक्कारे वा । सत् + कृ = सत्कारे । नमस् + कृ = प्रह्वीभावे । सजूष् + कृ = साहाय्यकरणे । धिक् + कृ = धिक्कारे ।

॥ इत्युभयपदिनः ॥

अथात्मनेपदम्

मनु = अवबोधने । मनुते । मंस्यते । अमंस्त । मेने । मंसीष्ट । **वनु = याचने ।**

॥ इत्यात्मनेपदम् तनादयश्च समाप्ताः ॥

अथ क्र्यादयः। तत्रोभयपदिनः

डुक्रीञ् – द्रव्यविनिमये (क्रयविक्रये)।

क्र्यादिभ्यः श्ना ॥३।१।८१॥ (सार्वधातुके कर्तरि)

इति श्नाविकरणे अनुबन्धनिवृत्तौ **'ई हल्यघोः'** (६।४।११३) इति ईत्वे णत्वे क्रीणीते। **'श्नाभ्यस्तयोरातः'** (६।४।११२) इति आलोपे क्रीणाते, क्रीणते। क्रीणाति। क्रीणीतः। क्रीणन्ति। अक्रीणीत। अक्रीणात्। क्रीणीताम्। क्रीणातु। क्रीणीत। क्रीणीयात्। क्रेष्यते (ति)। अक्रेष्ट। अक्रैषीत्। चिक्रिये। चिक्राय। चिक्रियतुः। चिक्रयिथ, चिक्रेथ। चिक्रियिव। क्रेषीष्ट। क्रीयात्। वि + क्री = विक्रये (आत्मनेपदी)। **प्रीञ् = तर्पणे। श्रीञ् = पाके। षिञ् = बन्धने। पूञ् = पवने।** लवि पूनीते इत्यत्र –

प्वादीनां ह्रस्वः ॥७।३।८०॥ (शिति)

इति धातोरूकारस्य ह्रस्वे पुनीते। पुनाति। पविष्यते। अपविष्ट। अपावीत्। पुपुवे। पुपाव। पुपुवतुः। पविषीष्ट। पूयात्। **लूञ् = छेदने। धूञ् = कम्पने। वृञ् = वरणे।** **'वृतो वा'** (७।२।३८) इति वैकल्पिके इड्दीर्घे वरीष्यते वरिष्यते। **'लिङ्सिचोरात्मनेपदेषु'** (७।२।४२) इति वैकल्पिके इटि **'वृतो वा'** (७।२।३८) इति वैकल्पिके दीर्घे च अवरीष्ट, अवरिष्ट, इडभावपक्षे –

[४]उदोष्ठ्य [१]पूर्वस्य ॥७।१।१०२॥ ([२]ऋतः [३]धातोः)

इति रपरे उकारे **'हलि च'** (८।२।७७) इति दीर्घे अडागमे अवूर्ष्ट। अवारीत्। **'सिचि च परस्मैपदेषु'** (७।२।४०) इति इटो दीर्घाभावे अवारिष्टाम्। **'ऋच्छत्यृताम्'** (७।४।११) इति गुणे ववरे, ववरतुः। **'लिङ्सिचोरात्मनेपदेषु'** (७।२।४२) इति वैकल्पिके इटि **'न लिङि'** (७।२।३९) इति इटो दीर्घाभावे वरिषीष्ट। इडभावपक्षे **'उदोष्ठ्यपूर्वस्य'** (७।१।१०२) इति रपरे उत्वे दीर्घे वूर्षीष्ट, वूर्य्यात्। **ग्रह = उपादाने। 'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे गृह्णीते। गृह्णाति। अगृह्णीत। अगृह्णात्। गृह्णीताम्। गृह्णातु।

हलः श्नः शानज्झौ ॥३।१।८३॥

इति श्नः शानचि अनुबन्धनिवृत्तौ हेर्लुकि णत्वे गृहाण। गृह्णीत। गृह्णीयात् –

[१]ग्रहोऽलिटि[४] दीर्घः[३] ॥७।२।३७॥ ([२]इटः)

इति इटो दीर्घे ग्रहीष्यते (ति)। अग्रहीष्ट, **'ह्मन्तक्षण०'** (७।२।५) इति वृद्धिनिषेधे अग्रहीत्। इटो दीर्घे अग्रहीष्टाम्। लिटि आत्मनेपदे पूर्वं **'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे ततो द्वित्वादिकार्ये जगृहे। णलि द्वित्वादिकार्ये **'लिट्यभ्यासस्योभयेषाम्'** (६।१।१७) इति सम्प्रसारणे उरति रपरे हलादिशेषे चुल्वे तत्र **'अत उपधायाः'** (७।२।११६) इति वृद्धौ जग्राह। किति पूर्वं **'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे द्वित्वादिकार्ये जगृहतुः। जग्रहिथ। जगृहिव। ग्रहीषीष्ट, गृह्यात्। प्र + ग्रह = रश्मिग्रहणे। सम् + ग्रह = संग्रहे। अनु + ग्रह = दयायाम्। अव + ग्रह = शोषणे। वि + ग्रह = युद्धे। परि + ग्रह = स्वीकारे। आ + ग्रह = हठे। दुर् + आ + ग्रह = हठेनासत्यपक्षस्थापने।

॥ इत्युभयपदिनः॥

अथ परस्मैपदिनः

ज्ञा = अवबोधने। 'ज्ञाजनोर्जा' (७।३।७९) इति जादेशे दीर्घनिर्देशाद् **'क्ष्वादीनाम्०'** (७।३।८०) इति ह्रस्वाभावे जानाति। ज्ञास्यति। अज्ञासीत्। जज्ञौ। ज्ञेयात्। ज्ञायात्। **बन्ध = बन्धने।** बध्नाति, भन्त्स्यति। बन्धा। अभान्त्सीत्, अबान्धाम्, अभान्त्सुः। बध्यात्। नि, प्र + बन्ध = वाक्य-विस्तारे। उद् + बन्ध = गलरज्ज्वा मारणे। निर् + बन्ध = आग्रहे। प्रति + बन्ध = निरोधे। **पुष = पुष्टौ।** पुष्णाति। पोषिष्यति। **मन्थ = विलोडने।** मथ्नाति। मन्थिष्यति। **ग्रन्थ = सन्दर्भे।** ग्रथ्नाति, ग्रन्थिष्यति। **मृद = क्षोदे।** सम् + मृद = संघर्षे। **अश = भोजने। मुष = स्तेये।** मुष्णाति। **कुष = निष्कर्षे।** कुष्णाति।

निरः कुषः ॥७।२।४६॥ (वलादेरार्द्धधातुकस्येड् वा)

निष्कोषिष्यति निष्कोक्ष्यति। निरकोषीत्, अनिट्पक्षे **'शल इगुपधादनिटः क्सः'** (३।१।४५) इति क्से निरकुक्षत्। **क्षुभ = सञ्चलने।**

क्षुभ्नादिषु च ॥८।४।३९॥ (षाभ्यां नो णः न)

इति णत्वनिषेधे क्षुभ्नाति। क्षोभिष्यति। क्षुभाण। संयोगाभावान्न णत्वनिषेधः।

॥ इति परस्मैपदिनः॥

अथात्मनेपदम्

वृङ् = संभक्तौ। वृणीते। वरीष्यते, वरिष्यते। **'लिङ सिचोरात्मनेपदेषु'** (७।२।४२) इति वैकल्पिके इटि अवरीष्ट, अवरिष्ट, अवृत। **'न लिङि'** (७।२।३९) इति दीर्घाभावे वरिषीष्ट, वृषीष्ट। वि + वृ = प्रकाशे। सम् + वृ = आवरणे। प्र + वृ = स्वीकृतौ।

॥ इत्यात्मनेपदम्, क्र्यादयश्च समाप्ताः॥

अथ चुरादयः। तत्रोभयपदिनः

चुर = स्तेये। इति चुर =धातोः–

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ ३।१।२५॥ (स्वार्थे)

इति णिचि अनुबन्धनिवृत्तौ गुणे चोरि इत्यस्य –

सनाद्यन्ता धातवः ॥३।१।३२॥

इति धातुत्वाल्लटि तत्स्थाने – उभयपदप्राप्तौ –

णिचश्च ॥१।३।७४॥ (कर्त्रभिप्राये क्रियाफले आत्मनेपदम्)

इत्यात्मनेपदे तप्रत्यये टेरेत्वे शपि गुणे अयादेशे चोरयते। परगामिनि फले चोरयति। लुङि – **'णिश्रिद्रुस्रुभ्यः०'** (३।१।४८) इति च्लेः चङि अनुबन्धनिवृत्तौ –

णेरनिटि ॥६।४।५१॥ (आर्द्धधातुके लोपः)

इति णिलोपे **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (१।१।६२) इत्यतिदेशात् –

णौ चङ्युपधाया ह्रस्वः ॥७।४।१॥

इति ह्रस्वतया ओकारस्य उकारे चुरइत्यस्य **'चङि'** (६।१।११) इति द्वित्वे अभ्यासादिकार्य्ये चुचुर् + अत = इत्यत्र –

[३]दीर्घो लघोः[१] ॥७।४।९४॥ ([२]अभ्यासस्य [४]लघुनि [५]णौ [६]चङ्परेऽनग्लोपे[७])

इति दीर्घे अडागमे अचूचुरत (त्) चोरयाञ्चक्रे (ञ्चकार) (म्बभूव) (मास) चोरयिषीष्ट, चोर्य्यात्। प्रायः सर्व एव चुरादिधातव उपयपदिनः सेटश्च। रूपाण्यपि तेषाम् प्रायः समानान्येव भवन्ति। लुङि विशेषः। तथाहि – **भक्ष = अदने**। अबभक्षत (त्)। **अर्च = पूजायाम्**। लुङि **'चङि'** (६।१।११) इति द्वित्वे कर्तव्ये **'अजादेर्द्वितीयस्य'** (६।१।२) इति रेफविशिष्टस्य **'र्चि'** इत्यस्य द्वित्वे प्राप्ते –

न न्द्राः संयोगादयः ॥६।१।३॥ (द्विः)

इति रेफस्य द्वित्व-निषेधेन **'चि'** मात्रस्य द्वित्वे **'णेरनिटि'** (६।४।५१) इति द्वितीयस्य णिचो लोपे * हलः स्वरयोगे **'आडजादीनाम्'** (६।४।७२) इत्याटि **'आटश्च'** (६।१।९०) इति वृद्धौ आर्चिचत (तृ)। **कुत्स = निन्दायाम्। कृत = संशब्दने।** णिचि –

[२]उपधायाश्च ॥७।१।१०१॥ ([३]ऋतः [४]इत् धातोः[१])

इति रपरे इकारे – किर्त् + इ इत्यत्र –

[२]उपधायाञ्च ॥८।२।७८॥ ([७]हलि उपधाया[४] धातोः[१] इकः[५] दीर्घः[६] वोः[३])

इति इकारस्य दीर्घे कीर्ति इत्यतः शबादिकार्ये कीर्तयते (ति)। लुङि –

[२]उर्ऋत्[३] ॥७।४।७॥ ([१]उपधायाः वा[४] चङ्परे[५] णौ[६])

इति वैकल्पिके ऋदादेशे चङादि कार्ये कृत् इत्यस्य द्वित्वादिकार्य्ये –

[६]सन्वल्लघु[५]निचङ्परेऽनग्लोपे[७] ॥७।४।९३॥ ([२]णौ [३]अङ्गस्य [४]अभ्यासस्य [८]णौ)

इति सन्वद्भावे दीर्घे च अचीकृतत (तृ)। पक्षे कीर्त इत्यस्य द्वित्वे दीर्घाभावे अचिकीर्तत (तृ)। **क्षल = शोधने।** क्षालयते (ति)। लुङि द्वित्वादिकार्य्ये सन्वद्भावे –

[४]सन्यतः[२] ॥७।४।७९॥ ([१]अभ्यासस्य इत्[३])

इति अभ्यासाकारस्य इकारे दीर्घाभावे अचिक्षलत (तृ)। **खडि = भेदने। गुप = गोपने। धट्ट = चलने। घुषिर् = विशब्दने। चट = भेदने।** उत् + चट = उच्चाटने। **चर्ब = चर्वणे। चिति = स्मृत्याम्। चूर्ण = पेषणे। छन्द = प्रलोभने।** उप + छन्द = प्रार्थनायाम्। **तड = आघाते। तर्ज = भर्त्सने। तर्क = वितर्के। तिज = निशाने। पट = विदारणे।** उत् + पट = उन्मूलने। **पाल = रक्षणे। पुष = पोषणे। पूज = पूजायाम्। पूरी = आप्यायने। भर्त्स = तर्जने।** आधृषाद्वा (णिच्) **भू = प्राप्तौ** – आत्मनेपदी। भाविनि लुङि **(णिचि अच आदेशो न स्याद् द्वित्वे कर्तव्ये)** इति वृद्ध्यभावे **'भू = इ'** इत्यस्य धातुत्वात् लुङि तत्स्थाने त-प्रत्यये च्लेश्चङि **'चङि'** (६।१।११) इत्यनेन **'भू'** इत्यस्य द्वित्वे अभ्यासकार्ये वृद्ध्यावादेशयोः कृतयोरुपधाह्रस्वत्वे **'णेरनिटि'** (६।४।५१) इति णिलोपे बु भव + अत इति स्थितौ सन्वद्भावे च –

---

* **पूर्वं णिलोपे तु स्थानिवद्भावाद्द्वित्वम्। द्वित्वे आदेशनिषेध एव श्रेयान्।**

[४]ओः [७]पुयण्ज्यपरे[६] ॥७।४।८०॥ ([१]सनि [३]अङ्गस्याभ्यासस्य[३] इत्[५])

इति अभ्यासोकारस्य इत्वे दीर्घे अडागमे च अबीभवत्। **तप = दाहे। धूञ् = कम्पने।** णावित्यधिकृत्य **'धूञ्प्रीञोर्नुग्वक्तव्यः'** (वा.) इति धातोर्नुगागमे धूनयति। णिचो विकल्पे शपि यथायथम्प्रयोगो ज्ञेयः। धवते, धवति। इत्यादि। कविरहस्ये धूञो रूपनिर्देशो यथा–

धूनोति चम्पकवनानि धुनोत्यशोकं, चूतं धुनाति धुवति स्फुटितातिमुक्तम्।

वायुर्विधूनयति चम्पकपुष्परेणून्, यत्कानने धवति चन्दनमञ्जरीश्च।

एवम् **प्रीञ्= तर्पणे** नुकि प्रीणयति (ते)। **मान=पूजायाम्। वच=परिभाषणे। वृजी=वर्जने। भूष= अलङ्कारे। मडि=भूषायाम्। मार्ग=अन्वेषणे। मृजू = शौचालङ्करणयोः।** णिचि–

[१]मृजेर्वृद्धिः[४] ॥७।२।११४॥ ([२]अङ्गस्य [३]इको धातुप्रत्यये[५])

इति वृद्धौ मार्जि इत्यस्य धातुत्वाल्लडादौ मार्जयते (ति) * अमीमृजत्, अममार्जत्। एवमात्मनेपदेऽपि। **मृष=तितिक्षायाम्। अर्ज=अर्जने। अर्ह=पूजायाम्। ईर = गतौ कम्पने च।** उद्+ईर=उच्चारणे। प्र+ईर= प्रेरणायाम्। सम्+ईर=कम्पने। **गर्ह= कुत्सायाम्।** † धृष=प्रहसने इत्याधृषीयाः। **मन्त्रि= गुप्तभाषणे। मोक्ष= मोक्षणे। घत= ताडने। यन्त्रि=बन्धने। लक्ष = दर्शने। लघि= लङ्घने। लड, लल= उपसेवायाम् विलासे च। लोचृ=भाषार्थः। लुडि–**

[६]नाग्लो[१]पिशास्वृदिताम् ॥७।४।२॥ ([४]णौ चङ् परे[३] उपधायाः[२] ह्रस्वः[५])

इति ह्रस्वाभावे अलुलोकत्–अलुलोचत्। **वञ्चु=विप्रलम्भे। षान्त्व = सामप्रयोगे–** सान्त्वयति (ते)।

---

* **मृजेः क्वाचित्का वृद्धिः इति पक्षे। आधृषाद्वेति वैकल्पिके णौ अमार्जीत् अमार्क्षीत्। ऊदित्वाद्वेट्।**

† **टिप्पणी–अत्र धृष धातुं यावत् कियन्त एव धातवो गृहीताः। भू–इत्यारभ्य।**

अथादन्ताः। गर्वान्ताः—

कथ = वाक्यप्रबन्धे। णिचि—

अतो लोपः ॥६।४।४८॥ (आर्द्धधातुके)

इति अलोपे तस्य स्थानिवद्भावादुपधावृद्धेरभावे कथि इत्यस्य धातुत्वाल्लटि कथयते (ति)। अग्लोपित्वात्सन्वद्भावाभावाद् अचकथत (त्)। **रह = त्यागे।** अररहत् (त)। **कर्ण = श्रवणे।** **कल = संख्याने।** परि + आ + कल = बोधे। सम् + कल = योजने। वि + अव + कल = गुणने। **क्षप = अतिवाहने। गण = संख्याने।**

[5]ई च [3]गणः ॥७।४।९७॥ ([4]अभ्यासस्य [1]चङ्परे णौ[2])

अजीगणत (त्) अजगणत (त्)। **गवेष = मार्गणे। दण्ड = ताडने। पार = शक्तौ। मह = पूजायाम्। मिश्र = संयोजने। गुण = अभ्यासे। चित्र = चित्रीकारे। मूत्र = प्रस्रवे। रच = निर्माणे। रस = आस्वादे। नि, निर्, + रूप = विवरणे। वर = ज्ञीप्सायाम्। वर्ण = रञ्जने। निर् + वर्ण = दर्शने। वास = सुरभीकारे। विडम्ब = अनुकारे। बीज = कम्पने व्यजनकरणे च। व्यय = धनव्यये। शील = अनुशीलने। श्लथ, श्रथ = दौर्बल्ये शिथिलीकारे च। सभाज = सत्कारे। सूच = व्यक्तीकारे। स्तेन = चौर्ये। स्पृह = इच्छायाम्।**

इतोऽदन्ताः केवलमात्मनेपदिनः

अर्थ = याचने। अग्लोपित्वात् सन्वद्भावाभावेन इत्वाद्यभावेन आर्तथत। अनु, अभि, प्र + अर्थ = प्रार्थनायाम्। सम् + अर्थ = दृढीकारे। वि, निर्, अप + अर्थ = व्यर्थीकारे। **मृग = अन्वेषणे। गर्व = माने।**

॥ इत्यात्मनेपदिनश्चुरादयश्चादन्ताः समाप्ताः ॥

अथ ण्यन्तप्रक्रिया

अत्र सनादिणिङन्ता द्वादश प्रत्ययाः सन्ति। तदन्तानां सर्वेषां **'सनाद्यन्ता धातवः'** (३।१।३२) इति धातुसंज्ञायां लडादिकार्य्यं विधीयते। तत्र प्रेरणार्थे सर्वेभ्योऽपि पूर्वगणपठितेभ्यो मूल-धातुभ्यो णिच् प्रत्ययो भवितुमर्हति। इह हि णिजन्तप्रत्ययेन प्रयोजकव्यापार एवोक्तो भवति। यतो हि **'हेतुमति च'** (३।१।२६) इति सूत्रेण प्रयोजकव्यापारे एव णिच् विधीयते। ततश्च णिजुत्तरतिङा प्रयोजककर्तुरुक्तत्वात् तत्र प्रथमा विभक्तिर्भवति। तदनुसारमेव णिजन्तक्रियायां पुरुषवचनानि च भवन्ति। पूर्व-(मूल) धातोः कर्ता तु इह प्रयोज्यकर्तेत्युच्यते स चेह कर्तृवाच्येऽपि णिजन्तप्रयोगे णिचा तिङा वाऽनभिधीयमानत्वादनुक्तो गण्यते। अतस्तत्र तस्यानुक्तत्वादेव अनुक्ते कर्तरि तृतीया विभक्तिर्जायते। कियतां परिगणितानां धातूनां प्रयोगे सूत्रबलात् तस्य कर्तुः कर्मत्वं भवति। ततश्च तत्रानुक्ते कर्मणि द्वितीया विभक्तिर्जायते। **'गतिबुद्धिप्रत्यवसानार्थ०'** (१।४।५२) इत्यादि सूत्रमपि यथावसरमग्रे समागच्छति। अयमत्र संग्रहः–

गमनाहारबोधार्थशब्दाकर्मकधातुषु ।
अणिजन्तेषु यः कर्ता स्याण्णिजन्तेषु कर्म सः॥ (इति)

णिजन्तप्रयोग-सिद्धिप्रकारो यथा– देवभाषाभ्युदयो भवति तम् उपाध्यायः प्रेरयति। इत्यर्थे उपाध्यायो देवभाषाभ्युदयं भावयते भावयति वा। इह भवनक्रियायां स्वतन्त्रकर्तुरभ्युदयस्य–

[२]स्वतन्त्रः [३]कर्ता ॥१।४।५४॥ ([१]क्रियायाम्)

इति कर्तृसंज्ञायाम्, तत्प्रयोजकस्य उपाध्यायस्य तु–

*** [१]तत्प्रयोजको [२]हेतुश्च[४] ॥१।४।५५॥ ([३]कर्ता)**

इति हेतु-संज्ञायाम्–

[१]हेतुमति च ॥३।१।२६॥ ([२]धातोः [३]णिच्)

इति प्रयोजकव्यापारे प्रेरणात्मके णिचि अनुबन्धनिवृत्तौ वृद्धौ च भावि इत्यस्य धातुत्वाल्लटि तत्स्थाने **'णिचश्च'** (१।३।७४) इत्यात्मनेपदे वैकल्पे ततश्च तप्रत्यये टेरेत्वे

*** तस्य पूर्वकर्तुः प्रयोजकः तत्प्रयोजकः हेतुसंज्ञः चात् कर्तृसंज्ञः स्यादित्यर्थः।**

शबादौ भावयते। परस्मैपदे भावयति। अत्र प्रयोजककर्तृव्यापारे णिज्विधानात्तत्कर्तुरुपाध्यायस्य तदुत्तरतिङा उक्ततया तत्र प्रथमा, भवनक्रियाकर्तुर्देवभाषाभ्युदयस्य त्वनुक्तत्वात्तत्र तृतीयाप्राप्तौ –

गतिबुद्धिप्रत्ययवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥१।४।५२॥ (कर्म)

इति कर्मसंज्ञायाम् तस्यानुक्तत्वात् **'कर्मणि द्वितीया'** (२।३।२) इति द्वितीया विभक्तिर्जायते। इत्थमन्यत्रापि ज्ञेयम्। अभावयत (त्) भावयताम् (तु) भावयेत (त्) भावयिष्यते (ति) अभावयिष्यत (त्) भावयिता। अबीभवत (त्) चुरादिवत् सिद्धिः। भावयाञ्चक्रे (ञ्चकार) (म्बभूव) (मास)। भावयिषीष्ट, भाव्यात्। काशीपण्डितसभाध्यक्षो **'दर्शनकेशरी'** भारतपारिजातकाव्यं शृणोति, शृण्वन्तं तं स्वामीभगवदाचार्यः प्रेरयते, प्रेरयति वा इत्यर्थे स तं तत् श्रावयते (ति)। इह पूर्वकर्तुः **'गतिबुद्धि०'** (१।४।५२) इति कर्मतया तमिति द्वितीया। श्रुधातोर्णिचि अनुबन्धनिवृत्तौ वृद्धौ च आवादेशे श्रावि इत्यस्य धातुत्वात् लडादिकार्य्ये श्रावयते (ति)। लुङि – **(णिच्यच आदेशो न स्याद् द्वित्वे कर्तव्ये)** इति नियमाद् श्रु इ + अत इत्यत्र श्रुमात्रस्य द्वित्वे अभ्यासकार्य्ये वृद्ध्यावादेशयोः, णिलोपे उपधाह्रस्वत्वे अडागमे अशुश्रवत इति जाते –

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥७।४।८१॥ (अभ्यासोकारस्य इत् अपरे यणि सनि परे)

इति वैकल्पिके इकारे अशिश्रवत (त्) अंशुश्रवत (त्)। एवम् द्रावयति अदिद्रवत् अदुद्रवत् इत्यादि। शास्त्री भाष्यमधीते तं जिज्ञासुः प्रेरयति। इत्यर्थे जिज्ञासुः शास्त्रिणं भाष्यमध्यापयति, अत्र अधिपूर्वकाद् इङ्धातोर्णिचि वृद्धौ अधि ऐ + इ इत्यत्र –

क्रीङ्जीनां णौ ॥६।१।४८॥ (एचः आत्)

इति आत्वे –

[1]अर्तिह्वीक्ष्लीरीक्नूयीक्ष्माय्यातां [3]पुङ्णौ[4] ॥७।३।३६॥ ([2]अङ्गानाम्)

इति पुगागमे आपि इत्यस्य धातुत्वाल्लडादिकार्य्ये –

बुधयुधनशजनेङ्भ्रुद्रुस्रुभ्यो णेः ॥१।३।८६॥ (परस्मैपदम्)

इति परस्मैपदे – अधि + आपयति = अध्यापयति। लुङि णिजन्तादिङः तिप्रत्यये च्लेश्चङि –

णौ च संश्चङोः ॥२।४।५१॥ (इङः गाङ् विभाषा)

इति गाङादेशे पुकि **'णौ चङ्युपधायाः०'** (७।४।१) इति ह्रस्वे णिलोपे गप् इत्यस्य द्वित्वे अभ्यासकार्य्ये सन्वद्भावे दीर्घे अडागमे यणि अध्यजीगपत् पक्षे **'क्रीङ्जीनां णौ'** (६।१।४८) इत्यात्वे पुकि अधि आपि इत्यत्र **'अजादेर्द्वितीयस्य'** (६।१।२) इति **'पि'** मात्रस्य द्वित्वे अन्त्यणिलोपे आदि वृद्धौ उपसर्गस्य यणि अध्यापिपत्। एवं क्रापयते (ति) अचिक्रपत (त्) जापयते (ति) अजीजपत (त्) ह्रपयते (ति) अजिह्रिपत (त्)। छात्रो गवेषणां करोति तं शिक्षकः प्रेरयते (ति) इत्यर्थे **'छात्रेण'** शिक्षको गवेषणां कारयते (ति)। अचीकरत (त्) हारयते (ति) अजीहरत (त्) लेखयते (ति) नोदयते (ति) दर्शयते (ति) पाचयते (ति)। अन्तेवासी तिष्ठति तिष्ठन्तं तम् आचार्यः प्रेरयति। इत्यर्थे आचार्यस्तं स्थापयते (ति)। लुङि स्थापि + अत इत्यत्र **'णौ चङ्युपधायाः०'** (७।४।१) इति ह्रस्वे णिलोपे च **'चङि'** (६।१।११) इति स्थप् इत्यस्य द्वित्वे **'शपूर्वाः खयः'** (७।४।६१) इति तकारशेषे तस्थप् + अ + त इति जाते –

[1]तिष्ठतेरित्[3] ॥७।४।५॥ ([2]उपधायाः चङ् [4]परे णौ[5])

इति उपधाकारस्येकारे अतस्थिप् अ + त इति स्थितौ सन्वद्भावादभ्यासस्य इत्वे **'आदेशप्रत्यययोः'** (८।३।५९) इति षत्वे ष्टुत्वे अडागमे अतिष्ठिपत (त्)। गर्मेर्णौ उपधावृद्धौ –

[1]मितां ह्रस्वः[3] ॥६।४।९२॥ ([2]उपधाया णौ[4])

इति. ह्रस्वे गमीत्यस्य धातुत्वाल्लडादौ गमयते (ति)। लुङि अजीगमत (त्)। ज्ञपयते (ति) अजिज्ञपत (त्)। घटयते (ति) अजीघटत (त्)।

॥ इति ण्यन्तप्रक्रिया ॥

अथ सन्नन्तप्रक्रिया

पठितुमिच्छति । इति विग्रहे **पठ्** धातोः–

[४]धातोः [३]कर्मणः [२]समानकर्तृकादिच्छायां[१] वा[६] ॥३।१।७॥ ([५]सन्)

इति सनि अनुबन्धनिवृत्तौ **'आर्धधातुकस्येड्वलादेः'** (७।२।३५) इति इटि षत्वे **'पठिष'** इति जाते –

[८]सन्यङोः ॥६।१।९॥ ([४]एकाचो [७]द्वे [३]प्रथमस्य [५]अजादेर्द्वि[६]-तीयस्य [१]अनभ्यासस्य धातोः[२])

इति **'पठ्'** इत्यस्य द्वित्वे अभ्यासकार्ये **'सन्यतः'** (७।४।७९) इति अभ्यासस्य अकारस्य इत्वे पिपठिष इत्यस्य धातुत्वाल्लटि तत्स्थाने तिपि शपि अनुबन्धनिवृत्तौ **'अतो गुणे'** (६।१।९७) इति पररूपे पिपठिषति । अपिपठिषत् । पिपठिषतु । पिपठिषेत् । **'अतो लोपः'** (६।४।४८) इति सनोऽकारस्य लोपे पिपठिषिष्यति । अपिपठिषीत् । पिपठिषाञ्चकार । पिपठिष्यात् । अत्तुमिच्छति इति विग्रहे **अदेः** सनि **'लुङ् सनोर्घस्लृ'** (२।४।३७) इति घस्लादेशे अनुबन्धनिवृत्तौ धातोर्द्वित्वे अभ्यासकार्ये **'सः स्यार्द्धधातुके'** (७।४।४९) इति सस्य तकारे जिघत्स इत्यस्य धातुत्वाल्लडादौ जिघत्सति । कर्तुमिच्छति इति विग्रहे कृधातोः सनि –

इको झल् ॥१।२।९॥ (सन् कित्)

इति सनः **'कित्त्वेन'** गुणाभावे –

[१]अज्झनगमां [४]सनि ॥६।४।१६॥ ([२]दीर्घो झलि[३])

इति ऋकारस्य दीर्घे **'ऋत इद्धातोः'** (७।१।१००) इति इरि **'हलि च'** (८।२।७७) इति उपधादीर्घे द्वित्वेऽभ्यासकार्ये च चिकीर्ष इत्यस्य धातुत्वाल्लडादौ चिकीर्षति । भवितुमिच्छति इति विग्रहे भूधातोः सनि –

[१]सनिग्रहगुहोश्च[३] ॥७।२।१२॥ ([२]उकः नेट्[४])

इति इण्निषेधे कित्त्वे गुणाभावे भू इत्यस्य द्वित्वादिकार्ये षत्वे बुभूष इत्यस्य धातुत्वाल्लडादौ बुभूषति । एवं ग्रहीतुमिच्छति इति विग्रहे ग्रहधातोः सनि इटोऽभावे –

[1]रुदविदमुषग्रहिस्वपिप्रच्छः [3]संश्च[4] ॥१।२।८॥ ([2]क्त्वा कित्[5])

इति सनः कित्त्वात् **'ग्रहिज्या०'** (६।१।१६) इति सम्प्रसारणे द्वित्वादिकार्य्ये जिगृह+स इति जाते हस्य ढत्वे भष्भावे **'षढोः कः सि'** (८।२।४१) इति ढस्य कत्वे ततः सस्य षत्वे कूषोः क्षकारोच्चारणे जिघृक्षेत्यस्य धातुत्वाल्लटि जिघृक्षति। स्वपेः सुषुप्सति। भिदे :–

हलन्ताच्च ॥१।२।१०॥ (इकः झल् सन् कित्)

इति सनः कित्त्वात् गुणाभावे द्वित्वादिकार्य्ये बिभित्सेत्यस्य धातुत्वाल्लटि बिभित्सति। भुजेः बुभुक्षति। रुधेः रुरुत्सति। मृङः दीर्घे **'उदोष्ठ्यपूर्वस्य'** (७।१।१०२) इति उत्वे **'हलि च'** (८।२।७७) इति दीर्घे ततो द्वित्वादौ मुमूर्षेत्यस्य धातुत्वात् लटि शपि मुमूर्षति। लिखेस्तु–

[3]रलोव्यु[1]पधाद्धलादेः[2] संश्च[6] ॥१।२।२६॥ ([5]क्त्वा सेट्[4] वा[7] कित्[8])

इति वैकल्पिके किन्निषेधे लिलिखिषति, लिलेखिषति। द्युतेः दिद्युतिषते, दिद्योतिषते।

॥ इति सन्नन्तप्रक्रिया ॥

●

अथ यङन्तप्रक्रिया

अतिशयेन पुनः पुनः भवति इति विग्रहे भूधातोः–

[3]धातोरेकाचो[1] हलादेः[2] [4]क्रियासमभिहारे [5]यङ् ॥३।१।२२॥

इति यङ् प्रत्यये **'सन्यङोः'** (६।१।९) इति धातोर्द्वित्वे अभ्यासकार्ये–

गुणो[3] [4]यङ्लुकोः ॥७।४।८२॥ ([1]इकः [2]अभ्यासस्य)

इति अभ्यासगुणे **'बोभूय'** इत्यस्य धातुत्वाल्लडादौ ङिदन्ततया आत्मनेपदे शपि पररूपे बोभूयते। अबोभूयत। बोभूयताम्। बोभूयेत। अतो लोपे बोभूयिष्यते। अबोभूयिष्ट। बोभूयाञ्चक्रे। बोभूयिषीष्ट। दोद्रूयते। नेनीयते। लेलिख्यते। शोशुच्यते।

[2]यस्य हलः[1] ॥६।४।४९॥ (लोप[3] [4]आर्धधातुके)

इति यलोपे शोशुचिष्यते। मोमुद्यते। चोक्रुश्यते। बोबुध्यते। लोलुप्यते। देद्विष्यते। चेच्छिद्यते। सेषिच्यते। सेषीव्यते। देदीप्यते। लेलिप्यते। बेभिद्यते। लप् धातोर्यङि द्वित्वादौ ललप्य इति स्थिते–

[3]दीर्घोऽकितः[1] ॥७।४।८३॥ (यङ्लुकोः[4] [2]अभ्यासस्य)

इति अभ्यासदीर्घे **'लालप्य'** इत्यस्य धातुत्वाल्लडादौ लालप्यते। बाभज्यते। कुटिलं व्रजति। इति विग्रहे व्रज धातोः।

[3]नित्यं कौटि[3]ल्ये [1]गतौ ॥३।१।२३॥ ([4]यङ्)

इति कौटिल्यार्थे यङि द्वित्वादौ अभ्यासदीर्घे **'वाव्रज्य'** इत्यस्य धातुत्वाल्लडादौ वाव्रज्यते। चाचल्यते। वृत् धातोः यङि द्वित्वादिकार्ये–

[4]रीगृदुप[1]धस्य च ॥७।४।९०॥ ([3]अभ्यासस्य [2]धातोः [5]यङ्लुकोः)

इति कित्त्वादभ्यासान्ते रीगागमे **'वरीवृत्य'** इत्यस्य धातुत्वाल्लडादौ वरीवृत्यते। एवम् चरीकृष्यते, जरीहृष्यते। नरीनृत्यते। वरीवृष्यते। दरीदृश्यते। जरीगृह्यते।

रीङ्[३] [१]ऋतः ॥७।४।२७॥ (अङ्गस्य[२] अकृत्सा[४]र्वधातुकयोः यि[५] च्वौ च)

इति ऋकारस्य रीङि जेह्रीयत । चेक्रीयते । दाधातोस्तु **'घुमास्था०'** (६।४।६६) इति ईत्वे द्वित्वादिकार्य्ये देदीयते । पेपीयते । मेमीयते । तेष्ठीयते । जेगीयते । जेहीयते । इत्यादि ।

॥ इति यङन्तप्रक्रिया ॥

अथ यङ्लुगन्तप्रक्रिया

अतिशयेन पुनः पुनः भवति। इति विग्रहे भूधातोः यङि द्वित्वापेक्षया प्रथमं –

[1]यङोऽचि[4] च ॥२।४।७४॥ (बहु[2]लम् [3]लुक्)

इति यङो लुकि ततः प्रत्ययलक्षणेन यङन्तत्वाद् द्वित्वे **'गुणो यङ्लुकोः'** (७।४।८२) इति गुणे **'अभ्यासे चर्च'** (८।४।५४) इति जश्त्वे **'बोभू'** इत्यस्य धातुत्वाल्लटि प्रत्ययलक्षणेनात्मनेपदे प्राप्ते – **'चर्करीतं परस्मैपदमदादिवच्च द्रष्टव्यम्'** इत्यभियुक्तोक्तेः तथा –

दाधर्ति० - बोभूतु तेतिक्ते० ॥७।४।६५॥ (निपात्यन्ते)

इति **'तेतिक्ते'** पदे आत्मनेपदनिपातनस्य नियमार्थत्वाद् यङ्लुकि प्रत्ययलक्षणेनात्मनेपदं न भवति। ततः **'शेषात्कर्तरि परस्मैदम्'** (१।३।७८) इति परस्मैपदे तिपि शपि यङ्लुङन्तस्यादादौ पाठात् **'अदिप्रभृतिभ्यः शपः'** (२।४।७२) इति शपो लुकि –

यङो वा ॥७।३।९४॥ (पिति हलि सार्वधातुके ईट्)

इति तिपः पाक्षिके ईडागमे **'बोभूतु तेतिक्ते'** इति छन्दसि गुणाभावस्य निपातनात् **'भूसुवोस्तिङि'** (७।३।८८) इति गुणनिषेधस्य भाषायां यङ्लुकि अप्रवृत्त्या **'सार्वधातुकार्द्धधातुकयोः'** (७।३।८४) इति गुणे अवादेशे बोभवीति। बोभूतः। **'अदभ्यस्तात्'** (७।१।४) इति झस्याति **'अचि श्नु०'** (६।४।७७) इति उवङि बोभुवति। अबोभवीत्, अबोभोत्, अबोभवुः। बोभवीतु, बोभोतु। बोभूयात्। बोभविष्यति। लुङि च्लौ तस्य सिचि **'गातिस्था०'** (२।४।७७) इति सिचो लुकि **'यङो वा'** (७।३।९४) इति पाक्षिके ईटि गुणं बाधित्वा नित्यत्वात् वुगागमे अबोभूवीत्, अबोभोत्। अबोभूवुः। बोभवाञ्चकार –

इन्धिभवतिभ्याञ्च ॥१।२।६॥

इति ज्ञापनादामोऽनित्यत्वात् बोभाव, बोभूवतुः, बोभूवुः। बोभविथ, बोभूवथुः, बोभूव, बोभाव, बोभव, बोभूविव (म)। बोभूयात्। शुच् धातोर्यङ्लुकि द्वित्वादिकार्य्ये पाक्षिके ईटि –

नाभ्यस्तस्याचि पिति सार्वधातुके ॥७।३।८७॥ (अङ्गस्य लघूपधस्य गुणः)

इति गुणनिषेधे शोशुचीति, शोशोक्ति। शोशुक्त इत्यादि। लेलिखीति, लेलेक्ति। लेलिक्तः। लेलिख्रति। लेलिखीषि। लेलेक्षि। इत्यादि। लालपीति, लालप्ति। लालपिष्यति। अलालपीत्। वृत् धातोः यङ्लुकि –

[५]रुग्रिकौ च [७]लुकि ॥७।४।९१॥ ([६]यङः [१]ऋद्वपधस्य [२]अङ्गस्य अभ्यासस्य[३] रीक्[४])

इति पाक्षिके अभ्यासस्य रीकि कृते **'वरीवृत'** इत्यस्य धातुत्वाल्लडादिकार्य्ये वरीवृतीति, वरिवृतीति, वर्वृतीति। ईडभावपक्षे वरीवर्त्ति, वरिवर्त्ति, वर्वर्त्ति इत्यादि। नृतेस्तु, नरीनृतीति, नरिनृतीति, नर्नृतीति। नरीनर्त्ति, नरिनर्त्ति, नर्नर्त्ति इत्यादि। कृधातोः यङ्लुकि –

ऋतश्च ॥७।४।९२॥ (अङ्गस्य अभ्यासस्य रीक् रुग्रिकौ च यङः लुकि)

इति पाक्षिके अभ्यासस्य रीकि चरीकृ इत्यस्य धातुत्वाल्लडादिकार्य्ये चरीकरीति, चरिकरीति, चर्करीति। चरीकर्ति, चरिकर्ति, चर्कर्त्ति। दादेति, दादाति, दात्तः, दादति। जाहेति, जाहाति। जाहीतः, जाहति।

॥ इति यङ्लुगन्तप्रक्रिया ॥

●

अथ नामधातुप्रक्रिया

आत्मनः पुत्रमिच्छति । इति विग्रहे –

[5]सुपः [1]आत्मनः क्यच्[7] ॥३।१।८॥ ([2]इच्छायाम् [3]समानकर्तृकात् [4]कर्मणः वा[6])

इति पुत्रमिति सुबन्तात् क्यचि अनुबन्धनिवृत्तौ **'सनाद्यन्ता धातवः'** (३।१।३२) इति धातुसंज्ञायाम् **'सुपो धातुप्रातिपदिकयोः'** (२।४।७१) इति सुपो लुकि –

क्यचि च ॥७।४।३३॥ (अस्य अङ्गस्य ई)

इति पुत्राकारस्य ईकारे पुत्रीय इत्यस्य धातुत्वाल्लडादौ पुत्रीयति । पुत्रीयिष्यति ।

[7]काम्यच्च ॥३।१।९॥ ([1]आत्मनः समानकर्तृकात्[3] सुपः[5] कर्मणः[4] इच्छायां[2] वा[6])

इति काम्यचि अनुबन्धनिवृत्तौ धातुसंज्ञायाम् सुपो लुकि च पुत्रंकाम्य इत्यस्य धातुत्वाल्लडादौ पुत्रकाम्यति । पुत्रकाम्यिष्यति *। पुत्रमिवाचरति छात्रम्, इति विग्रहे –

[1]उपमानादाचारे[4] ॥३।१।१०॥ ([2]कर्मणः [3]सुपः क्यच्[5])

इति पुत्रमिति सुबन्तात् क्यचि पूर्ववत्कार्ये पुत्रीयति छात्रम् । विष्णूयति द्विजम् । गर्दभीयति वृषम् । वृषभीयति गर्दभम् । प्रावारीयति कम्बलम् । प्रासादे इवाचरति इति विग्रहे **(अधिकरणाच्चेति वक्तव्यम्)** इति वार्तिकबलात् अधिकरणसुबन्तात् क्यचि पूर्ववत्कार्य्ये प्रासादीयति कुट्यां कौटिल्यः । कृष्ण इवाचरति इति विग्रहे कृष्ण इति कर्तृसुबन्तात् –

[2]कर्तुः [3]क्यङ् सलोपश्च[4] ॥३।१।११॥ ([1]उपमानात्)

इति क्यङि अनुबन्धनिवृत्तौ धातुसंज्ञायाम् सुपो लुकि **'अकृत्सार्वधातुकयोर्दीर्घः'** (७।४।२५) इति दीर्घे कृष्णाय इत्यस्य धातुत्वाल्लडादौ कृष्णायते । कृष्णायिष्यते ।

---

* **अनर्थकत्वात् 'यस्य हलः' (६।४।४९) इति न प्रवर्तते ।**

एवम् विष्णूयते। मूर्खायते। पण्डितायते। (**ओजसोऽप्सरसोर्नित्यमितरेषां विभाषया**) इति नियमात् ओजायते, अप्सरायते इत्यत्र नित्यं सलोपः। विद्वायते विद्वस्यते। इत्यत्र विकल्पेन। शब्दं करोति इति विग्रहे शब्दमिति सुबन्तात्–

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ॥३।१।१७॥ (क्यङ्)

इति क्यङि पूर्ववत्कार्य्ये शब्दायते। कलहायते। वैरायते। सुखमनुभवति इति विग्रहे–

सुखादिभ्यः कर्तृवेदनायाम् ॥३।१।१८॥

इति सुखमिति कर्मसुबन्तात् क्यङि पूर्ववत्कार्य्ये सुखायते। कृच्छ्रायते इत्यादि। कृष्ण इवाचरति इति विग्रहे कृष्णेति प्रातिपदिकात् (**सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः**) इति क्विपि तस्य सर्वापहारिलोपे कृष्ण इत्यस्य धातुत्वाल्लडादिकार्य्ये कृष्णति। एवम् सुजनति। शूरति। पिकति। मूकति। रंकति। राजति। गर्दभति। इत्यादि। पृथुं करोति = प्रथयति। इति विग्रहे पृथु-शब्दात् (**प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च**) (**तत्करोति तदाचष्टे वा णिच्**) उभयवार्तिकबलात् णिचि। इष्ठवद्भावेन च '**र ऋतो हलादेर्लघोः**' (६।४।१६१) इति ऋकारस्य रेफादेशे प्रथि इत्यस्य धातुत्वाल्लडादिकार्य्ये प्रथयति। म्रदयति। द्रढ़यति। स्थूलादीनाम्-स्थवयति। दंवयति। स्थापयति। द्राघयति इत्यादिः।

॥ इति नामधातुप्रक्रिया ॥

अथ कण्ड्वादिः

कण्ड्ञ् = गात्रविघर्षणे । इत्यस्माद्–

कण्ड्वादिभ्यो यक् ॥३।१।२७॥ (नित्यं स्वार्थे)

इति यकि अनुबन्धलोपे **'सनाद्यन्ता धातवः'** (३।१।३२) इति धातुत्वात् ञित्त्वेन कर्त्रभिप्राये क्रियाफले आत्मनेपदमन्यत्र परस्मैपदम् ज्ञेयम् । कण्डूयते (ति) कण्डूयिष्यते (ति)। अकण्डूयिष्ट (यीत्) । कण्डूयाञ्चके (च्चकार)। कण्डूयिषीष्ट । कण्डूय्यात् । एवम् यथानुबन्धं पदव्यवस्था । **मन्तु = अपराधे ।** मन्तूयति । **ह्णीङ् = लज्जायाम् ।** ह्णीयते । **महीङ् = पूजायाम् । तिरस् = अन्तर्धौ ।** तिरस्यति । **उपस् प्रभातीभावे । संभूयस् = प्रभूतभावे । भिषज् = चिकित्सायाम् ।** भिषज्यति । इत्यादिः ।

॥ इति कण्ड्वादिः ॥

अथात्मनेपदप्रक्रिया

निपूर्वकाद् विश्धातोः–

नेर्विशः ॥१।३।१७॥ (आत्मनेपदम्)

इत्यात्मनेपदे तुदादित्वात् शविकरणे निविशते। निवेक्ष्यते। परिपूर्वकात् क्रीधातोः–

परिव्यवेभ्यः क्रियः ॥१।३।१८॥ (आत्मनेपदम्)

इत्यात्मनेपदे परिक्रीणीते। विक्रीणीते। विपूर्वकाद् जिधातोः–

विपराभ्यां जेः ॥१।३।१९॥ (आत्मनेपदम्)

इत्यात्मनेपदे विजयते। पराजयते। सम्पूर्वकात् स्थाधातोः–

समवप्रविभ्यः स्थः ॥१।३।२२॥ (आत्मनेपदम्)

इत्यात्मनेपदे संतिष्ठते। लुङि **'स्थाघ्वोरिच्च'** (१।२।१७) इति इत्वे **'हस्वादङ्गात्'** (८।२।२७) इति सिचो लोपे अडागमे समस्थित। अवतिष्ठते, प्रतिष्ठते समाजे समाजसेवी।

अथ परस्मैपदप्रक्रिया

विपूर्वकाद् रम् धातोः– **'व्याङ्परिभ्यो रमः'** (१।३।८३) इति परस्मैपदे विरमति। व्यरंसीत्। **'उपाच्च'** (१।३।८४) इति परस्मैपदे देवदत्तो यज्ञदत्तम् उपरमति। उपरमयतीत्यर्थः। अन्तर्भावितण्यर्थोऽत्र रमिः सकर्मको ज्ञेयः। इत्यादि–

विभाषाऽकर्मकात् ॥१।३।८५॥ (परस्मैपदम् उपादित्येव)

इति पाक्षिके परस्मैपदे उपरमति, उपरमते वा कार्यात् स्वयं देवदत्तः।

॥ इति परस्मैपदप्रक्रिया ॥

अथ भावकर्मप्रक्रिया

भ्वाद्यादिगणेषु उक्तानां सर्वेषामेव कर्तृवाच्यगतानां विविध-धातूनां मध्यतोऽकर्मकधातुभ्यो भावे सकर्मकेभ्यश्च तेभ्यः कर्मणि प्रत्यया जायन्ते। तैश्च भावकर्मवाच्यक्रियारूपाणि निष्पाद्यन्ते। भावकर्मवाच्ये सर्वत्रैवात्मनेपद-प्रत्यया भवन्ति। चतुर्षु सार्वधातुकेषु लकारेषु धातुप्रत्ययययोर्मध्ये यक् विकरणं जायते। कर्तृवाच्ये तु कर्तरि जायमानेन लडादिना कर्तुरुक्तत्वात् कर्मणश्चानुक्तत्वात् कर्तरि प्रथमा कर्मणि द्वितीया कर्तुरनुरूपश्च क्रियारूपे पुरुषवचनादिकं प्रयुज्यते। इह हि भाववाच्ये भावे जायमानेन लडादिना भावस्योक्तत्वात् **(भावो भावना उत्पादना क्रिया)** इत्यभियुक्तोक्तेः क्रियैव सकलाकर्मकधातुवाच्या असत्त्वरूपा भावार्थकलकारेणानूद्यते। ततश्च, तस्या असत्त्वरूपायाः सत्त्वार्थकयुष्मदस्मदादिशब्दैः द्विवचनबहुवचनादिकैश्च सत्त्वधर्मैः सह सर्वथैव सामानाधिकरण्यासम्भवात् प्रथम-पुरुषस्य तत्राप्येकत्वस्यैव हि संख्यानपेक्षस्य औत्सर्गिकतया समुपस्थितौ सर्वत्र क्रियारूपे प्रथम-पुरुषैक-वचनमेव भवति। यद्यपि तत्र कर्तृवाच्य-कर्त्ता द्विवचनबहुवचनयुष्मदादिमध्यमोत्तमपुरुषस्थोऽपि स्यात्। इत्यलम्। कर्मवाच्ये तु कर्मणि जायमानेन लडादिना तस्योक्तत्वाद् तत्र प्रथमा, कर्मानुसारमेव च क्रियारूपे पुरुषवचनानि जायन्ते। कर्तुश्चानुक्तत्वात् उभयत्रापि भाववाच्ये कर्मवाच्ये च कर्तरि तृतीयैव भवति। लिङ्गवचनानि तु सर्वत्र पूर्वाण्येव यथावस्थितानि तिष्ठन्ति। संग्रहश्च –

"कर्तरि प्रथमा ज्ञेया कर्तृवाच्ये तिङादिके।
द्वितीया कर्मणि ज्ञेया कर्त्रधीनं क्रियापदम्॥१॥
कर्मवाच्ये तृतीया स्यात्कर्तरीत्येव निश्चितम्।
प्रथमा कर्मणि ज्ञेया कर्माधीनं क्रियापदम्॥२॥
गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया॥३॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।
कालादिकर्मकाकर्मकाणां भावे च कर्मणि॥४॥
भाववाच्ये च भावोक्त्या क्रियाद्यैकैव जायते।
कर्तर्य्यनुक्ते तत्रापि तृतीया कर्मवाच्यवत्॥५॥

यथा च – स बालकं पश्यति = तेन बालको दृश्यते । त्वं बालकौ पश्यसि = त्वया बालकौ दृश्येते । अहं बालकान् पश्यामि = मया बालका दृश्यन्ते । वयं त्वां पश्यामः = अस्माभिः त्वं दृष्यसे । तौ युवां पश्यतः = ताभ्यां युवां दृश्येथे । आवां युष्मान् पश्यावः = आवाभ्यां यूयं दृश्यध्वे । युवां मां पश्यथः = युवाभ्याम् अहं दृश्ये । यूयम् आवां पश्यथ = युष्माभिः आवां दृश्यावहे । तेऽस्मान् पश्यन्ति = तैः वयं दृश्यामहे । अहं तम् अपश्यम् = मया सः अदृश्यत । स चन्द्रं पश्यतु = तेन चन्द्रो दृश्यताम् । कः सूर्यं पश्येत् = केन सूर्यो दृश्येत । अहं त्वां द्रक्ष्यामि = मया त्वं दर्शिष्यसे द्रक्ष्यसे वा । इत्यादि प्रयोगसिद्धिः । यथा – स भवतीति वक्तव्ये भाववाच्ये तेन भूयते इति प्रयोगो भवति । तत्र भूधातोः अकर्मकत्वात् **'लः कर्मणि च भावे चाकर्मकेभ्यः'** (३।४।६९) इति भावे लकारोपस्थितौ **'वर्तमाने लट्'** (३।२।१२३) इति लटि –

भावकर्मणोः ॥१।३।१३॥ (आत्मनेपदम्)

इति लस्य स्थाने आत्मनेपदे तङि, तप्रत्यये – तस्य **'तिङ् शित्सार्वधातुकम्'** (३।४।११३) इति सार्वधातुकत्वे –

⁴सार्वधातुके ²यक् ॥३।१।६७॥ (¹धातोः भावक³र्मणोः)

इति यकि कित्त्वाद् गुणनिषेधे भूयते । अभूयत । भूयताम् । भूयेत । इत्येवम् चतुर्षु लकारेषु प्रायः समानं कार्यं जायते । लृटि तु –

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥६।४।६२॥

इति वैकल्पिके चिण्वद्भावे तस्मिन्नेव पक्षे स्य-विकरणस्य इडागमे चिण्वद्भावाद् धातोर्वृद्धौ आवादेशे सस्य षत्वे भाविष्यते, पक्षे **'आर्धधातुकस्येड्वलादेः'** (७।२।३५) इतीटि गुणादिकार्ये भविष्यते । अभाविष्यत, अभविष्यत । भाविता, भविता । लुङि च्लौ तस्य –

²चिण् ³भावकर्मणोः ॥३।१।६६॥ (च्लेः¹ ⁴तशब्दे)

इति चिणि अनुबन्धनिवृत्तौ धातोर्वृद्धौ आवादेशे **'चिणो लुक्'** (६।४।१०४) इति तस्य लुकि अडागमे अभावि । लिटि वुगागमे द्वित्वादौ बभूवे । लिङि भाविषीष्ट भविषीष्ट । अकर्मकधातूनां भाववाच्ये भावोक्त्या क्रियारूपे प्रथमपुरुषैकवचनम्, कर्तुश्चानुक्तत्वात् तत्र तृतीया । यथा – त्वं भवसीति वक्तव्ये त्वया भूयते । अहं

भवामीति वक्तव्ये मया भूयते। ते भवन्तीति वक्तव्ये तैर्भूयते। इत्येवं सर्वत्रैव लकारेषु रूपाणि ज्ञेयानि। यथा ते अभवन् इति वक्तव्ये तैरभूयत। ते भूयासुः इति वक्तव्ये तैर्भाविषीष्ट, भविषीष्ट वा। इत्यादि। अकर्मकधातोरपि उपसर्गवशात् सकर्मकत्वे शिशुरानन्दमनु-भवति इति आनन्दोऽनुभूयते शिशुना, इत्यादि प्रयोगो भवति। अत्र हि अनुपूर्वकाद् भूधातोः सकर्मकत्वात् कर्मणि लकारोपस्थितौ लटि तत्स्थाने तङि, तप्रत्यये यकि पूर्ववद्रूपसिद्धिः। एवम् आनन्दावनुभवतः तौ, ताभ्याम् आनन्दौ अनुभूयेते। ते आनन्दाननुभवन्ति। तैः आनन्दा अनुभूयन्ते। इत्यादि सर्वाण्येव रूपाणि ज्ञेयानि। हन्-धातोः– स शत्रुं हन्ति। इति तेन शत्रुः हन्यते। अहन्यत। हन्यताम्। हन्येत। इत्यादि रूपाणि। आर्द्धधातुकलकारेषु तु घानिष्यते हनिष्यते। इत्यादि रूपद्वैविध्यम्। लुङि अघानि, अघानिषाताम्, अहसाताम्। वधादेशे **'जनिवध्योश्च'** (७।३।३५) इति वृद्धि-निषेधे अवधि अवधिषाताम्। जघ्ने वधिषीष्ट। ग्रह-धातोः सम्प्रसारणे गृह्यतेऽर्घ्यः सूर्य्येण। अगृह्यत। गृह्यताम्। गृह्येत। लृडादौ चिण्वन्द्भावे इटि उपधावृद्धौ **'ग्रहोऽलिटि०'** (७।२।३७) इत्यत्र वलादिलक्षणस्यैवेटो ग्रहणाद् दीर्घाभावे ग्राहिष्यते पक्षे ग्रहीष्यते। अग्राहि, अग्राहिषाताम्, अग्रहीषाताम्। जगृहे। ग्राहिषीष्ट, ग्रहीषीष्ट। दृश-धातोः दृश्यते चन्द्रः शिशुना। लृडादौ चिण्वद्भावादिकार्य्ये दर्शिष्यते, द्रक्ष्यते। अदर्शि। अदर्शिषाताम्। पक्षे **'लिङ् सिचावात्मनेपदेषु'** (१।२।११) इति कित्त्वादम्गुणाभावे अदृक्षाताम्। अदर्शिषत, अदृक्षत। ददृशे। दर्शिषीष्ट, दृक्षीष्ट कित्त्वादम्गुणौ न। प्रच्छ-धातोः यकि सम्प्रसारणे पृच्छ्यते छात्रो मया। प्रक्ष्यते। अप्रच्छि, अप्रक्षाताम्। एवम् उच्यते वाक्यम् बटुना। इज्यते विष्णुर्याज्ञिकैः। अध्युष्यते काशी मुमुक्षुणा। उप्यते बीजं कृषकेण। सुप्यते शिशुना। गम्यते ग्रामो मया। अगामि अगमि, अगंसाताम्। त्यज्यते दोषः छात्रेण। पठ्यते ग्रन्थः पाठकेन। भ्रश्यते नहुषेणेन्द्रासनात्। दश्यते स्म नलः सर्पेण। रज्यते रजकेन पटः। जीयते रामेण। क्षीयते शशिना। जनमेजयेन राज्ञा महाभारतम् श्रूयतेस्म। द्रूयते घृतेन। कृ-धातोर्यकि रिङि रिङ्विधानसामर्थ्यात् दीर्घाभावे क्रियते घटः कुम्भकारेण। कारिष्यते, करिष्यते। अकारि, अकारिषाताम् इडभावे **'उश्च'** (१।२।१२) इति कित्त्वात् अकृषाताम्। एवं व्रियते वरः कन्याभ्रात्रा। ध्रियते धरा शेषेण। भ्रियते घटो भृत्येन्। आद्रियते विद्वान् जनैः। स्मृ-धातोस्तङि यकि **'गुणोऽर्तिसंयोगाद्योः'** (७।४।२९) इति गुणे स्मर्य्यते माता श्रीकृष्णेन। स्मारिष्यते, स्मरिष्यते। अस्मारि, अस्मारिषाताम्, अस्मृषाताम्। एवम् अर्य्यते आर्य्यो वैदेशिकैः। कृ-धातोस्तङि यकि **'ऋत इद्धातोः'** (७।१।१००) इति इरि **'हलि च'** (८।३।७७) इति दीर्घे कीर्य्यते पुष्पम् वायुना। एवम् गीर्य्यते औषधं रोगिणा। दीर्य्यते काष्ठं तक्षणा। तीर्य्यते गङ्गा नाविकैः। शीर्य्यते शरीरेण। **'उदोष्ठ्यपूर्वस्य'**

(७।१।१०२) इति उत्वे दीर्घे पूर्य्यते जलबिन्दुनिपातेन घटः। पाधातोस्तङि यकि **'घुमास्था०'** (६।४।६६) इति आत इत्वे दीर्घे पीयते पिपासुना जलम्। अपायि अपायिषाताम्, अपासाताम्। एवम् दीयते दानं दात्रा। धीयते चन्द्रः शिवेन। स्थीयते गवा दोहनकाले। अदायि, अदायिषाताम् इडभावे अदिषाताम् **'स्थाघ्वोरिच्च'** (१।२।१७) **इतीत्वम्**। एवम् धाञोऽपि। स्थस्तु अस्थायी-त्येकमेव रूपम्। हीयते दोषो विद्यार्थिभिः। अवसीयते सन्ध्यया। दुह्यादिषु गौर्दुग्धं दुह्यते। बलिः वसुधां याच्यते। अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते। माणवकं धर्म उच्यते, माणवको, धर्मम् वा। अहं तं भावयामि मया स भाव्यते। लृटि चिण्वद्भावे इटि तस्य आभीयत्वेनासिद्धत्वात् **'णेरनिटि'** (६।४।५१) इति णिलोपे भाविष्यते पक्षे भावयिष्यते। अभावि, अभाविषाताम्, अभावयिषाताम्। अहं त्वां ग्रन्थं पाठयमि। मया त्वं ग्रन्थं पाठ्यसे। अपाठि, अपाठिषाताम्, अपाठयिषाताम्। एवम् स्थाप्यते ग्रन्थः। कार्य्यते स्वामिना भृत्यैः कार्य्यम्। हार्य्यते चोर्य्यते वा धनं ग्रामादिकैः चौरैः। दाप्यते धनं राज्ञा धर्माधिकारिणा। तेन मासं मासो वा आस्यते। कालादिकर्मक-णिजन्तानां प्रयोज्ये एव प्रत्ययः। णिलोपे मासमास्यते माणवकः। मासमास्यसे त्वम् इत्यादि। त्वां मासमासयति। इति पूर्वरूपम्।

अथ लकारार्थप्रक्रिया

अष्टाध्यायीसूत्रपाठे **'वर्तमाने लट्'** (३।२।१२३) इत्यारभ्य **'उणादयो बहुलम्'** (३।३।१) इति सूत्रं यावत् ये प्रत्यया येनोपाधिना विहितास्ते तथैव वर्तमानसामीप्ये भूते भविष्यति, च काले ज्ञेयाः। यथा – कदा आगतोऽसि ? इति प्रश्ने अयमागच्छामि, एषं आगनम् वा। इत्युत्तरे –

वर्तमानसामीप्ये वर्तमानवद्वा ॥३।३।१३१॥

इत्यनेन वर्तमानसामीप्ये भूतेऽर्थे वैकल्पिको लट्। एवम् कदा गमिष्यसि ? इति प्रश्ने एष गच्छामि अयम् गमिष्यामि वा इत्युत्तरे वर्तमानसामीप्ये भविष्यत्यर्थे वैकल्पिको लट्। कृष्णं नमेच्चेत् सुखं यायात्। इत्यत्र –

हेतुहेतुमतोर्लिङ् ॥३।३।१५६॥ (भविष्यति च काले)

इति लिङ्। युधिष्ठिर इयाज इत्यर्थे युधिष्ठिरो यजति स्म। इत्यत्र स्म योगे –

लट् स्मे ॥३।२।११८॥ (परोक्षे भूतार्थे)

इति लट्। एवं स्म पिता ब्रवीति अब्रवीद् वा। गच्छति स्म, अगच्छद् वा। करोति स्म, अकरोद् वा इत्यादिषु सर्वत्रैव –

अपरोक्षे च ॥३।२।११९॥ (भूते अनद्यतने स्मे लट्)

इति लट् –

धातुसम्बन्धे प्रत्ययाः ॥३।४।१॥ (यत्र काले उक्तास्ततोऽन्यत्रापि स्युः)

यथा – वसन् ददर्श। अत्र परोक्षे भूते लट्। भुञ्जानाः पिबन्तश्च गमिष्यामः। अत्र भविष्यति लट्। सारथ्यं कुर्वन्नीश्वरोऽर्जुनमरक्षदत्रानद्यतने भूते लट् इति।

●

अथ कृदन्ते कृत्यप्रकरणम्

कृदन्तं विना किङ्कविस्तद्धितेन
विना शाब्दिकः शाब्दिकः स्यात् कथं सः।
गिरां देवतां प्राञ्जलिः सम्प्रणम्याऽ –
रभेऽतोऽधुनाहं कृदन्तं समासात्॥

धातुभ्यः प्रत्ययोगेन क्रियापदानि शब्दाश्च निर्मीयन्ते। तत्र तिङ्प्रत्ययोगेन क्रियापदानि **(आख्यातानि)** निष्पाद्यन्ते। कृत्प्रत्ययोगेन च शब्दा व्युत्पाद्यन्ते। अनुपदमिह **भवति पचतीत्यादीनि** तिङ्प्रत्ययोयुक्तानि क्रियापदानि तिङ्प्रकरणे विस्तरेण निर्दिष्टानि। **अत्र कृदन्त**प्रकरणे **कृत्प्रत्ययोगेन** जायमानानां शब्दानां साधुत्वप्रकारमुपक्रमामहे। **सम्प्रति धातुभ्यः कृत्प्रत्ययोगेन स्वमनोऽनुरूपान्** शब्दान्निर्माय **'कृत्तद्धितसमासाश्च'** (१।२।४६) इति प्रातिपदिकसंज्ञया तान् सुब्विभक्तियुक्तान् विदधतः पदधनिनः स्युरन्तेवासिनः। इत्यत्र न सन्देहलेशः। अस्तु – **कृत्प्रत्ययोगेन (१) संज्ञाशब्दाः (२) विशेषणशब्दाः (३) अव्ययशब्दाश्चेति। तत्रोणादिप्रत्ययानां संज्ञानिर्माणे** प्रायः -प्राधान्यम्। गच्छतीति गौरिति विग्रहेण गम् – धातोः डोप्रत्यये गोशब्दसिद्धिः। इत्येवम् संज्ञाशब्दधातुत्वप्रकारो ज्ञेयः। **उणादिभिन्नानामन्येषां कृत्प्रत्ययानां विशेषणाव्ययोभय-शब्दनिर्माणे** प्रायः प्राधान्यम्। **अव्यय-शब्दास्तु** स्वल्पा मान्तक्त्वान्तैजन्तप्रभृतयः कियन्त' एव, किन्तु **विशेषणशब्दा** भूयांसः प्रादुर्भवन्ति। कृत्प्रत्ययाः स्वावान्तरभेदतोऽपि त्रिधैव विभक्ताः सन्ति। कियन्तः **कृत्यसंज्ञकाः।** कियन्त**श्चोणादिसंज्ञकाः**। सर्व एवेमे **प्रातिपदिककार्य्यार्थं** कृत्संज्ञका एवोच्यन्ते। इति। **तत्रोणादिसंज्ञकास्तत्रैव** प्रकरणे वक्ष्यन्ते। **तदन्ये कृत्संज्ञका** अपि विस्तीर्णा इति पश्चादेव निरूपयिष्यन्ते। इह **(सूचीकटाहन्यायेन)** प्रथमं **कृत्यप्रत्यया** उच्यन्ते – ते च १ तव्यत्, २ तव्य, ३ अनीयर, ४ केलिमर्, ५ यत्, ६ क्यप्, ७ ण्यत इति सप्तैव सन्ति। इमे सप्त तथान्ये **क्त-खलर्थाश्च** प्रत्यया **अकर्मकधातुभ्यो भावे सकर्मकेभ्यस्तु कर्मणि जायन्ते।** यदा सकर्मकेभ्यस्ते प्रत्यया जायन्ते तदा ते **विशेषणशब्दान्** निर्मान्ति। यथा – **'कर्तव्यं कर्म'** इति। कुत्रचन कर्मवाच्यक्रिया-मात्रबोधका अपि भवन्ति। यथा – त्वयेदं कर्तव्यम्। त्वया-गन्तव्यम्। भावे तु ते सर्वथा क्रियाकृत्यमेव निर्वहन्ति। यथा – त्वया भवितव्यम्। भाव्यम् वा। **कृत्यप्रत्य-यान्तशब्दानां** सिद्धिप्रकारो यथा –

अर्हे कृत्यतृचश्च॥३।३।१६९॥ शकि लिङ् च॥३।३।१७२॥

इति सूत्रद्वयबलाद् अर्हार्थे शक्यार्थे वा त्वम् एधितुमर्हः शक्यो वा इति विग्रहे एध् धातोः–

कृत्याः ॥३।१।९५॥ (प्राङ्ण्वुलः)

इति कृत्याधिकारे–

तयोरेव कृत्यक्तखलर्थाः ॥३।४।७०॥ (भावकर्मणोः)

इत्यनेनोभयोरर्थयोः प्राप्तौ अकर्मकतया भावेऽर्थे–

तव्यत्त[२]व्यानीयरः ॥३।१।९६॥ ([१]धातोः प्रत्ययाः[३])

इति तव्यति तव्ये वा प्रत्यये अनुबन्धलोपे **'आर्धधातुकस्येड्वलादेः'** (७।२।३५) इतीटि एधितव्य इत्यस्य **'कृत्तद्धितसमासाश्च'** (१।२।४६) इति प्रातिपदिकसंज्ञायां **'ङ्याप्प्रातिपदिकात्'** (४।१।१) इत्यधिकारे **'स्वौजसमौट्०'** (४।१।२) इति सुपः प्राप्तौ **(भावे औत्सर्गिकं क्लीबत्वमेकत्वञ्च)** इति एकत्वे क्लीबत्वे च सौ तस्यामि पूर्वरूपत्वे एधितव्यम् त्वयेति भावार्थकप्रत्ययेन कर्तुरनुक्तत्वात् तत्र तृतीया। एवम् एधनीयम् त्वयेत्यादि। पठितुं योग्यम् = पठितव्यम्, पठनीयम् वा पुस्तकं छात्रैः। इह सकर्मकतया कर्मणि तव्यादिषु कृतेषु कर्तुरनुक्तत्वात् तत्र तृतीया कर्मणश्चोक्तत्वात् तत्र प्रथमा ज्ञेया। कर्तुमर्हा कर्तव्या करणीया वा देशसेवा जनैः। चेतुमर्हश्चेतव्यश्चयनीयो वा ग्रन्थराशिः गवेषकैः। भेत्तुं शक्या भिदेलिमाः सरला वन्यगजेनेति विग्रहे, भिद् धातोः सकर्मकतया कर्मणि **(केलिमर उपसंख्यानम्)** इति वार्तिकबलात् केलिमर्प्रत्यये कित्त्वाद् गुणनिषेधे स्वादौ जसि रूपसिद्धिः। एवम् पचेलिमो माषः। पचेलिमम्मालूरफलम्। पचेलिमा शष्कुलीत्यादि **(कर्मकर्तर्येवेदमिति केचित्)**।

कृत्यल्युटो बहुलम् ॥३।३।११३॥

"क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥"

इति। बाहुल्येन कृत्यप्रत्यये स्नाति अनेनेति स्नानीयम् त्रिफलाचूर्णम्। दीयतेऽस्मै दानीयो विप्रः। इत्यादि कारकान्तरेऽपि प्रयोगसिद्धिः। चेतुमर्हः शक्यो वा इति विग्रहे चिधातोः–

अचो[१] यत्[३] ॥३।१।९७॥ (धातोः[२])

इति यति गुणे चेय इत्यस्य प्रातिपदिकतया सौ चेयः। एवम् चेया, चेयम्। जेयः, जेया, जेयम्। नेयः, नेया, नेयमित्यादि। दातुं योग्यः शक्यो वेति विग्रहे दा धातोः यति–

[३]ईद्यति[४] ॥६।४।६५॥ (आतः[१] अङ्गस्य[२])

इति धातोराकारस्येत्वे गुणे देय इति प्रातिपदिकात् स्वादौ देयः, देया, देयम्। एतुमर्हः शक्यो वेति विग्रहे इधातोः –

एतिस्तुशास्वृदृजुषः[१] क्यप्[४] ॥३।१।१०९॥ (धातोः[२] परः[३] प्रत्ययः[५])

इति क्यपि कित्त्वाद्गुणाभावे इ + य इति जाते –

ह्रस्वस्य पिति कृति तुक् ॥६।१।७१॥

इति तुकि प्रातिपदिकादिकार्य्ये इत्यः, इत्या, इत्यम्। एवम्, स्तुत्यः, स्तुत्या, स्तुत्यम्। शास्तुमर्हः, शक्यो वा इत्यत्र शास्धातोः क्यपि **'शास इदङ्हलोः'** (६।४।३४) इति उपधाया इत्वे **'शासिवसि०'** (८।३।६०) इति षत्वे प्रातिपदिककार्य्ये शिष्यः, शिष्या, शिष्यम्। कर्तुं योग्यः शक्यो वेति विग्रहे कृधातो :–

विभाषा कृवृषोः ॥३।१।१२०॥ (धात्वोः परः क्यप् प्रत्ययः)

इति क्यपि अनुबन्धलोपे तुकि कृत्यः, कृत्या, कृत्यम् – इत्यादि। पक्षे –

[१]ऋहलोर्ण्यत्[४] ॥३।१।१२४॥ (धात्वोः[२] परः[३] प्रत्ययः[५])

इति ण्यति धातोः वृद्धौ प्रातिपदिकादिकार्ये कार्यः परोपकारः। कार्य्या राष्ट्रधर्मसेवा। कार्य्यं कर्तव्यम् कर्म। एवम् हार्य्यः, हार्य्या, हार्य्यम्। वाह्यः, वाह्या, वाह्यम् इत्यादि।

[४]वाऽस[१]रूपोऽस्त्रियाम्[५] ॥३।१।९४॥ (अपवादः[२] प्रत्ययः[३])

इति नियमात् प्रायः एकस्मादेव धातोस्तव्यदादयः सर्वेऽपि यथायोग्यम् प्रत्यया भवन्ति। यथा – भूधातोः, भवितव्यम्, भवनीयम्, भुवेलिमम्, भव्यम्। भू धातोः – आवश्यकेऽर्थे –

ओरावश्यके ॥३।१।१२५॥ (धातोः परः ण्यत् प्रत्ययः)

इति ण्यति भाव्यम्। एतव्यम्, अयनीयम्, इयेलिमम्, इत्यम्। कर्तव्यम्, करणीयम्, क्रेलिमम्, कृत्यम्, कार्य्यम्।

॥ इति कृदन्तान्तर्गतं कृत्यप्रकरणम् ॥

अथ पूर्वकृदन्तप्रकरणम्

करोतीति विग्रहे कृ - धातोः–

धातोः ॥३।१।९१॥ [1]इत्यधिकारे [6]कृदतिङ्[4] ॥३।१।९३॥ ([2]धातोः [3]विहितः प्रत्ययः[5])

इति धातुविहितानां तिङ् – भिन्नप्रत्ययानां कृत्संज्ञायाम् –

कर्तरि[3] कृत्[1] ॥३।४।६७॥ (प्रत्ययः[2])

इति कर्त्रर्थे –

[2]ण्वुल्तृचौ ॥३।१।१३३॥ (धातोः[1] [3]प्रत्ययौ परौ[4])

इति ण्वुल्प्रत्यये कृ+ वु इत्यत्र –

युवोरनाकौ ॥७।१।१॥ (अङ्गात्)

इति वोः अकादेशे णित्त्वाद् **'अचोञ्णिति'** (७।२।११५) इति ऋकारस्य वृद्धौ कारक इत्यस्य प्रातिपदिकादिकार्य्ये कारकः, स्त्रीलिङ्गे **'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः'** (७।३।४४) इति इत्वे कारिका। नपुंसके कारकम्। तृचि तु कर्ता, स्त्रियाम् **'ऋन्नेभ्यो ङीप्'** (४।१।५) इति ङीपि यणि कर्त्री क्लीबे कर्तृ। एवम् भावकः, भाविका, भावकम्। भविता, भवित्री, भवितृ। पाचकः, पाचिका, पाचकम्। दाधातोः ण्वुलि अनुबन्धनिवृत्तौ वोरकादेशे।

आतो युक् चिण्कृतोः ॥७।३।३३॥ (अङ्गस्य ञ्णिति)

इति युगागमे प्रातिपदिकादिकार्य्ये दायक', दायिका, दायकम्। नन्दयतीति विग्रहे नन्दधातोः – ण्वुल्तृचावपोद्य –

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥३।१।१३४॥

इति ल्युप्रत्यये योरनादेशे प्रातिपदिकादिकार्य्ये नन्दनः, नन्दना, नन्दनम्। ग्रह्धातोः णिनि प्रत्यये ग्राही, ग्राहिणी, ग्राहि। पचतीति विग्रहे पचादित्वादचि सुपि। पचः, नदः, देवः टित्त्वनिपातनाद्, **'टिड्ढाणञ्०'** (४।१।१५) इति ङीपि नदी। देवी। इत्यादयो विशेष्यनिघ्नाः शब्दा ज्ञेयाः। अभिधेय - प्राधान्यात् संज्ञाशब्दा अपीमे स्युः। लिखतीति विग्रहे लिख् - धातोः –

इगुपधज्ञाप्रीकिरः कः ॥३।१।१३५॥ (धातोः)

इति कप्रत्यये कित्त्वात् गुणाभावे प्रातिपदिकादिकार्य्ये लिखः। एवम्-क्षिपः, बुधः, कृषः, ज्ञः, प्रियः, किरः।

[1]आतश्चोपसर्गे[3] ॥३।१।१३६॥ (धातोः[2] कः[4])

सुज्ञः, प्रज्ञः, सुस्थः। कुम्भं करोतीति विग्रहे कृधातोः –

[1]कर्मण्यण्[5] ॥३।२।१॥ (उपपदे[2] धातोः[3] परः[4] प्रत्ययः[6])

इति अणि वृद्धौ कार इति जाते ततः **'कर्तृकर्मणोः कृति'** (२।३।६५) इति कृद्योगेन कर्मणि षष्ठ्याम् कुम्भ ङस् कार इत्यलौकिक विग्रहे **'गतिकारकोपपदानां कृद्भिः सह समासवचनम् प्राक् सुबुत्पत्तेः'** (परि०) इति परिभाषया सुबुत्पत्तेः पूर्वम् **'उपपदमतिङ्'** (२।२।१९) इति समासे सुपो निवृत्तौ **''एकदेशविकृतमनन्यवद्''** (परि०) इति न्यायात् कुम्भकार शब्दात् सौ कुम्भकारः, भाष्यकारः, सूत्रकारः, सृष्टिकारः, मालाकारः, नीतिकार इत्यादि। गां ददातीति विग्रहे गाम् इति कर्मोपपदस्य दा-धातो :–

[3]आतोऽनुपसर्गे[1] कः[6] ॥३।२।३॥ (धातोः[4] परः[5] प्रत्ययः[7] [2]कर्मणि उपपदे)

इति कप्रत्यये **'आतो लोप इटि च'** (६।४।६४) इति आलोपेन प्रत्ययययोगे कृद्योगेन कर्मणि षष्ठ्याम् गो ङस् द इत्यत्र समासादिकार्ये गोदः, कम्बलदः, जलदः। जनान् एजयतीति विग्रहे एजि इति ण्यन्ताद् –

[2]एजेः खश्[5] ॥३।२।२८॥ ([1]कर्मणि धातोः[3] परः[4] प्रत्ययः[6])

इति खशि शपि धातोर्गुणे अयादेशे स्वरसंयोगे उपपदसमासे सुपो निवृत्तौ जन + एजय इति जाते –

[2]अरुर्द्विषदजन्तस्य मुम्[3] ॥६।३।६७॥ (खिति[4] अनव्ययस्य[1])

इति मुमागमे सुपि जनमेजयः। प्रियं वदतीति प्रियंवदः, इत्यत्र –

प्रियवशे वदः खच् ॥३।२।३८॥

इति खचि उपपदसमासे सुपो लुकि मुमागमे **'नश्चापदान्तस्य झलि'** (८।३।२४) इत्यनुस्वारे प्रियंवदः, वशंवदः। सुश्रृणातीति विग्रहे शृ + धातोः –

आतो मनिन्क्वनिब्वनिपश्च ॥३।२।७४॥

इत्यधिकारे –

अन्येभ्योऽपि दृश्यन्ते ॥ ३।२।७५॥ (मनिन्-क्वनिब्वनिब्विचः)

इति मनिन् प्रत्यये –

नेड्वशि कृति ॥७।२।८॥

इति वलादीटो निषेधे गुणे सुशर्मन् इत्यतः प्रातिपदिकादिकार्य्ये सुशर्मा। प्रातरेतीति विग्रहे इण्धातोः क्वनिपि अनुबन्धलोपे इ+वन् इति जाते तुकि इत्वन् इत्यस्य प्रातिपदिकादिकार्य्ये प्रातरित्वा। विचि रेट्, रोट्, सुगण्। भुवं बिभर्तीति विग्रहे भृ-धातोः –

क्विप् च ॥३।२।७६॥ (सोपपदेभ्यः सर्वधातुभ्यः)

इति क्विपि तस्य सर्वथा निवृत्तौ **'हस्वस्य पिति कृति तुक्'** (६।१।७१) इति तुगागमे भूभृत्, कर्मकृत्। वेदवित्। उष्णं भोक्तुं शीलमस्यास्तीति विग्रहे भुज्-धातोः–

[२]सुप्यजातौ[१] [४]णिनिस्ताच्छील्ये[३] ॥३।२।७८॥

इति णिनिप्रत्यये उपपदसमासे सुपो लुकि उष्णभोजी। सरसि जातम् इति विग्रहे जन्धातोः –

भूते ॥३।२।८४॥

इत्यधिकारे –

सप्तम्यां जनेर्डः ॥३।२।९७॥ (भूते)

इति डप्रत्यये डित्त्वाट्टिलोपे उपपदसमासे –

तत्पुरुषे कृति बहुलम्॥६।३।१४॥ (सप्तम्या अलुक्)

इति सप्तम्या अलुकि सरसिजेत्यस्य प्रातिपदिकादिकार्य्ये सरसिजम्। बाहुलकात् सुपो लुकि सरोजम्। न जातः इति विग्रहे जन्धातोः–

अन्येष्वपि दृश्यते ॥३।२।१०१॥ (जनेर्डः)

इति डप्रत्यये डित्त्वाट्टिलोपे नञ्समासे **'नलोपो नञः'** (६।३।७३) इति नलोपे अज इत्यतः प्रातिपदिकादिकार्य्ये अजः, स्त्रियाम्, अजा, क्लीबे अजम्। पचतीति विग्रहे पच्धातोः **'वर्तमाने लट्'** (३।२।१२३) इति लटि तस्य –

लटः शतृशानचावप्रथमासमानाधिकरणे ॥३।२।१२४॥

इति शत्रादेशे शित्त्वात्सार्वधातुकसंज्ञायां कर्तरि शबागमे अनुबन्धनिवृत्तौ पच+अत् इति जाते पररूपैकादेशे पचत् इत्यतः प्रातिपदिकतया स्वाद्युत्पत्तौ पचन् **'उगितश्च'** (४।१।६) इति ङीपि **'शप्श्यनोर्नित्यम्'** (७।१।८१) इति नुमि पचन्ती, पचत्। इत्यादि पदम्। एवं भवन्, भवन्ती, भवत्। घ्नन्, घ्नती, घ्नत्। सन्, सती, सत्। ब्रुवन्, ब्रुवती, ब्रुवत्। जुह्वत्, जुह्वती, जुह्वत्। जिह्रियत्, जिह्रियती, जिह्रियत्। ददत्, ददती, ददत्। दीव्यन्, दीव्यन्ती, दीव्यत्। सुन्वन्, सुन्वती, सुन्वत्। तुदन् **'आच्छीनद्योः०'** (७।१।८०) इति पाक्षिके नुमि तुदन्ती, तुदती, तुदत्। रुन्धन्, रुन्धती, रुन्धत्। कुर्व्वन्, कुर्वती, कुर्वत्। क्रीणन्, क्रीणती, क्रीणत्। चोरयन्, चोरयन्ती, चोरयत्। इत्यादि। आत्मनेपदे तु भाषते इति विग्रहे भाष्धातोः लटः शानजादेशे तस्य शित्त्वात्सार्वधातुकतया शपि भाष+आन इति जाते--

आने मुक् ॥७।२।८२॥ (अदन्तस्य)

इति कित्त्वात् भाषस्यान्त्यावयवे मुकि अनुबन्धनिवृत्तौ णत्वे भाषमाण इत्यतः प्रातिपदिकतया स्वादौ 'भाषमाणः, भाषमाणा, भाषमाणम् इत्यादि। एवम् नयमानः। ईशानः। शयानः। ब्रुवाणः। ददानः। पद्यमानः। चिन्वानः। म्रियमाणः। रुन्धानः। कुर्वाणः। पुनानः। चोरयमाणः। बोभूयमानः। इत्यादिकं पुंसि, स्त्रीलिङ्गे विद्यावत्, क्लीबे ज्ञानवज्ज्ञेयम्। वेत्तीति विग्रहे लटः शत्रादेशे तस्य च--

विदेः शतुर्वसुः ॥७।१।३६॥ (वा)

इति शतुवैकल्पिके वस्वादेशे विद्वस् इत्यस्य प्रातिपदिकतया सुपि विद्वान्, विदुषी, विद्वत्। पक्षे विदन्, विदती, विदत्। इत्यादि। भविष्यतीति विग्रहे भूधातोः लृटि--

तौ सत् ॥३।२।१२७॥

इति शतृशानचोः सत्संज्ञकतया--

लृटः सद्वा ॥३।३।१४॥

इति परस्मैपदे शतरि **'स्यतासी लृलुटोः'** (३।१।३३) इति शपोऽपवादे स्यप्रत्यये आर्द्धधातुककृत्ये च भविष्यदित्यस्य प्रातिपदिकतया सुपि भविष्यन्। स्त्रीलिंगे **'आच्छीनद्योः०'** (७।१।८०) इति वैकल्पिके नुमि भविष्यन्ती (ती) भविष्यत्। आत्मनेपदे--यक्ष्यमाणः। यक्ष्यमाणा। यक्ष्यमाणम्। इत्यादि। अहम् अस्नासिषम् इति विग्रहे अकर्मकात स्नाधातोः--

क्तक्तवतू निष्ठा ॥ १।१।२६॥

इति क्तक्तवत्वोः निष्ठासंज्ञकतया –

निष्ठा[३] ॥३।२।१०२॥ ([२]भूते [१]धातोः [४]प्रत्ययः)

इति सूत्रेण **'तयोरेव कृत्यक्तखलर्थाः'** (३।४।७०) इति नियमात् भावे क्तप्रत्यये। स्नात इत्यस्मात् **(भावे औत्सर्गिकमेकवचनं क्लीबत्वञ्च)** इति नियमात् प्रातिपदिकतया क्लीबे सौ स्नातम् मयेत्यत्र कर्तर्यनभिहिते तृतीया। वक्ष्यमाणेन **'गत्यर्थाकर्मक०'** (३।४।७२) इति कर्तर्य्यपि क्ते प्रत्यये स्नातः स। स्नाता सेत्यादि प्रयोगाः भवन्ति। स ग्रन्थमपाठीत् इति विग्रहे सकर्मकात् पठ्धातोः कर्मणि क्तप्रत्यये आर्द्धधातुककृत्ये पठित इत्यतः सुपि पठितः ग्रन्थस्तेन। अत्र क्तप्रत्ययेन कर्मण उक्ततया तत्र प्रथमा कर्तुश्चानुक्तत्वात्तत्र तृतीया। कर्मणा क्तप्रत्ययान्तस्य सामानाधिकरण्येन पठितौ ग्रन्थौ। पठिता स्मृतिः। पठिते स्मृती। पठिताः स्मृतयः। पठितं पुस्तकम्। पठिते पुस्तके। पठितानि पुस्तकानि। एवम् लिखितः लिखिता लिखितम्। उक्तः शब्दः। उक्ता वाक्। उक्तम् वचः। कृतः कृता कृतम्। नीतः नीता नीतम्। धृतः धृता धृतम्। ऊढः ऊढा ऊढम्। स धर्ममभ्यधात् इति विग्रहे। अभिपूर्वकात् भाषणार्थात् धाधातोः कर्मणि क्तप्रत्यये –

दधातेर्हिः ॥७।४।४२॥ (तादौ किति)

इति ह्यादेशे सुपि अभिहितः (धर्मः) अभिहिता (स्मृतिः) अभिहितम् (पुस्तकम्) तेन। स ग्रन्थमदात् इति विग्रहे दाधातोः क्तप्रत्यये –

दो[२] दद्[३] घोः[१] ॥७।४।४६॥ (तादौ[४] किति[५])

इति ददादेशे चर्त्वे दत्त इत्यतः सुपि, दत्तः ग्रन्थः। दत्ता गौः। दत्तम् पुस्तकम् तेन इति। प्रोपसर्गयोगे तु –

अच[३] [४]उपसर्गात्तः[५] ॥७।४।४७॥ (दो[२] घोः[१])

इति अजन्तादुपसर्गात् तु तादेशे प्रत्तः प्रत्ताः प्रत्तम् तेनेत्यादि। कियद्भ्यो धातुभ्यः कर्तर्य्यपि क्तप्रत्ययो जायते। यथा – स गङ्गामगमत् इति विग्रहे गम्धातोः –

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च ॥३।४।७२॥ (क्तः कर्तरि चाद् यथायथं भावकर्म्मणोः)

इति कर्तरि क्ते **'अनुदात्तोपदेश०'** (६।४।३७) इति मलोपे गत इत्यतः सुपि स गतः गङ्गाम्। सा गता गङ्गाम्। अत्र कर्तुरुक्ततया तत्र प्रथमा कर्मणोऽनुक्तत्वात् तत्र द्वितीया। कर्मणि तेन तया वा गता गङ्गा। भावे - तेन तया वा गतम्। एवम् स उपस्थितः गङ्गाम्। उपस्थिता सा गङ्गाम्। कर्मणि - तेन तया वा उपस्थिता गङ्गा। भावे तेन तया वा उपस्थितम्। इत्यादि। अहम् अस्नासिषम् इति विग्रहे स्नाधातोः **'कर्तरि कृत्'** (३।४।६७) इति कर्त्रर्थे **'निष्ठा'** (३।२।१०२) इत्यनेन क्तवतुप्रत्यये अनुबन्धनिवृत्तौ स्नातवत् इत्यस्मात्सुपि स्नातवान् अहम्। इह प्रत्ययेन कर्तुरुक्तत्वादहमिति कर्तरि प्रथमा तेन सह क्तवत्वन्तस्य सामानाधिकरण्येन आवां स्नातवन्तौ। वयं स्नातवन्तः। सा स्नातवती। ते स्नातवत्यौ। ताः स्नातवत्यः। क्त प्रत्यये **'गत्यर्था०'** (३।४।७२) इति कर्तरि स स्नातः सा स्नाता तत् स्नातम्। भावे तु तेन तया स्नातम्। इत्यादि उक्तमेव। स ग्रन्थमपठत् इति विग्रहे पठ्धातोः कर्तरि क्तवतौ इटि पठितवत् इत्यस्मात्सुपि पठितवान् ग्रन्थं सः। इत्यादि। अत्र कर्मणोऽनुक्तत्वाद् ग्रन्थमिति द्वितीया कर्त्रा सह प्रत्ययस्य सामानाधिकरण्यात् स इति प्रथमान्तम्। सा ग्रन्थं पठितवतीत्यादि। एवम् उक्तवान् उक्तवती। ऊढवान् ऊढवती। लिखितवान् लिखितवती। नीतवान् नीतवती। कृतवान् कृतवती। धृतवान् धृतवती। अभिहितवान् (तवती)। दत्तवान् (वती) रूपं ज्ञेयम्। भूधातोः **'श्युकः किति'** (७।२।११) इति इण्निषेधे भूतः भूतवान्।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥८।२।४२॥

शॄ धातोः शीर्णः। शीर्णवान्। भिद् धातोः भिन्नः। भिन्नवान्।

संयोगादेरातो धातोर्यण्वतः ॥८।२।४३॥ (निष्ठातो नः)

द्रा धातोः द्राणः, द्राणवान्। ग्लै धातोः ग्लानः, ग्लानवान्।

ल्वादिभ्यः ॥८।२।४४॥ (निष्ठातो नः)

लूञ् = छेदने लूनः, लूनवान् (लूनवती)।

ओदितश्च ॥८।२।४५॥ (निष्ठातो नः)

भुजो = कौटिल्ये भुग्नः, भुग्नवान् (वती)। शुष् धातोः-

शुषः कः ॥८।२।५१॥ (निष्ठातः)

शुष्कः शुष्कवान् (वती)। डुपचष् = पाके।

पचो वः ॥८।२।५२॥ (निष्ठातः)

पक्वः, पक्ववान् (वती)। क्षै = हर्षक्षये।

क्षायो मः ॥८।२।५३॥ (निष्ठातः)

क्षामः, क्षामवान् (वती)। पूङ्धातोस्तु –

पूङश्च ॥७।२।५१॥ (क्त्वानिष्ठयोः वेट्)

इति वेटि –

[1]पूङः [4]क्त्वा च ॥१।२।२२॥ ([3]निष्ठा [2]सेट् [5]न [6]कित्)

इति कित्त्वनिषेधात् गुणे अवादेशे पवितः पवितवान्। इडभावपक्षे पूतः पूतवान्। शमादीनां तु –

अनुनासिकस्य[1] क्विझलोः[5] क्ङिति[6] ॥६।४।१५॥ (अङ्गस्य[2] उपधायाः[3] दीर्घः[4])

इति दीर्घे शान्तः, शान्तवान्, क्षान्तः, क्षान्तवान्, दान्तः, दान्तवान्। इत्यादि। जन् सन्-खन् धातूनां तु –

[1]जनसनखनां [3]सञ्झलोः ॥६।४।४२॥ ([2]आत् [5]ङिति)

इत्यात्वे जातः, जातवान्, (जातवती)। सातः, सातवान्, (सातवती)। खातः, खातवान्, (खातवती)। इत्यादि। स तम् अबीभवत्। इति विग्रहे भावीति ण्यन्तात् क्ते क्तवतौ वा कृते इटि –

निष्ठायां सेटि ॥६।४।५२॥ (णेर्लोपः)

इति णिलोपे भावित भावितवत् इत्येताभ्यां सुपि भावितः स तेन, भावितवान् स तम्। स्त्रीलिङ्गे भाविता सा तेन, भावितवती सा तम् इति। एवम् कारितः (ता) कारितवान् (तवती)। पाठितः (ता) पाठितवान् (तवती)। कटान् कर्तुं शीलम् अस्य स इति विग्रहे कृधातोः –

आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥३।२।१३४॥ (धातोः परे प्रत्ययाः)

इत्यर्थविधाने कृते – कृधातोः –

[3]तृन् ॥३।२।१३५॥ ([1]धातोः [2]परः [4]प्रत्ययः)

इति तृन् प्रत्यये गुणे कर्तृ इति प्रातिपदिकात् स्वादौ कर्ता कटान् इत्यत्र **'न लोकाव्ययनिष्ठाखलर्थतृनाम्'** (२।३।६९) इति षष्ठीनिषेधे द्वितीया विभक्तिर्ज्ञेया। चिकीर्षितुं शीलमस्य स इति विग्रहे चिकीर्षेति सन्नन्तात्–

सनाशंसभिक्ष उः ॥३।२।१६८॥

इति उप्रत्यये **'अतो लोपः'** (६।४।४८) इति अलोपे स्वरयोगे चिकीर्षुशब्दात् सुपि चिकीर्षुः स्त्री पुमान् वा। एवम् पिपठिषुः, जिगमिषुः। इत्यादि। विभ्राजितुं शीलमस्य स इति विग्रहे विपूर्वकात् भ्राजधातोः–

भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् ॥३।२।१७७॥ (तच्छीलादिषु अर्थेषु)

इति क्विपि तत्सर्वापहारिलोपे विभ्राज् इत्यस्य प्रातिपदिकतया स्वादौ विभ्राट्। एवम् भाः धूः पूः इत्यादि। छेत्तुं शीलमस्य स इति विग्रहे छिद्धातोः–

अन्येभ्योऽपि दृश्यते ॥३।२।१७८॥ (क्विप् तच्छीलादिषु अर्थेषु)

इति क्विपि सर्वापहारिलोपे सुपि छित् (द्) छिदौ छिदः। एवं भित् (द्) भिदौ भिदः। दृशिग्रहणं बह्वर्थम्– तथा हि–**'क्विब्वचिप्रच्छयायतस्तुकट्प्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च'** (वा०) इति वचि – वाक्, पृच्छि - प्राट्, आयतस्तूः, कटप्रूः, जूः, श्रीः इत्यादि।

॥ इति पूर्वकृदन्तप्रकरणम् ॥

अथोणादिप्रकरणम्

कृदन्त - शब्दा एव संस्कृतवाङ्मये बाहुल्येनोपलभ्यन्त इति कृत्प्रत्ययानां प्राधान्यम्। तत्राप्युणादिप्रत्ययानाम् अतिविस्तारो विद्यते। उणादिप्रत्ययैरेव सर्वेषाम् संस्कृतशब्दानां सिद्धिं पाणिनिर्महर्षिः प्रतिज्ञातवान्। इति किंवदन्तीह वैयाकरणेषु प्रसृताऽस्ति। तदनुरूपमेव मोहम्मदीयशासने कुत्रचित्कदाचित् कश्चित् **'मलक मियाँ मौलाना'** इत्यभिधानो मोहम्मदीयः कश्चन वैयाकरणमभ्यधात्। भवन्तो वैयाकरणाः सन्ति मन्नामसिद्धिं ब्रुवन्तु। स च वैयाकरणः प्रौढ़पण्डित आसीत्। इति अनुपदमेवाभ्यधात्। अहो तव नाम्नस्साधने तु नास्ति कोऽपि प्रयासः केवलात् माधातुत एव **'डलक डियाँ डौलाना'** इत्युणादिप्रत्ययेषु कृतेषु अनुबन्धनिवृत्तौ डित्त्वात् धातोः आकारस्य लोपे मकारस्य स्वरयोगे **'मलक मियाँ मौलाना'** इति सर्वशब्दसिद्धिर्भवति। इत्येवं सर्वविदितोऽस्ति महिमोणादिप्रत्ययानाम् शब्दसाधने। तत्प्रकारश्चेत्थम् –

''संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्य्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिषु'' ॥ इति॥

कस्मिंश्चिदपि संज्ञाशब्दे प्रथमं धातुरूपमूहनीयम्। ततः प्रत्ययः ऊह्यः। गुणवृद्धियण्टिलोपादिकार्य्यदृष्ट्या प्रत्ययेषु अनुबन्धा ऊहनीयाः। इतीमान्येवो–णादिप्रकरणकृत्यानि सन्ति। यथा कारुः, इति शिल्पिनः संज्ञा। तत्र 'कृ'– धातुर्ज्ञायते। 'उ'– प्रत्ययः प्रतीयते। वृद्धिकार्य्यवशात् प्रत्यये णित्वमनुमीयते। इत्यतश्च कृ + उण् = कारु प्रातिपदिकात् सुपि कारुः। इति साधनप्रकारः। साम्प्रतिकानि उणादिसूत्राणि शाकटायनमुनिप्रणीतानि न पाणिनीयानि। पाणिनीयन्तु सूत्रम् –

उणादयो बहुलम् ॥३।३।१॥ (प्रत्ययाः)

अत्र बहुलग्रहणात् उणादिप्रत्ययानां लक्ष्यानुसारतो व्यवस्था ज्ञेया। तथाहि उपर्य्युक्तकारुशब्दे करोतीति विग्रहे कृधातोः **''कृवापाजिमिस्वदिसाध्यशूभ्य उण्''** (उणा०१) इति उण् ज्ञेयः। एवम् वायुः पायुः जायुः मायुः (पित्तम्) स्वादुः। साध्नोति परकार्य्यमिति साधुः। आशु (इत्यव्ययम्) इदं तूपलक्षणम् अन्येभ्योऽपि धातुभ्य उण् प्रत्ययो जायते। यथा दृधातोः दारु। रहधातोः राहुः। वस्धातोः वासुः। इत्यादिसंज्ञाशब्दा उणादिप्रकरणात् साध्याः।

॥ इत्युणादिः॥

अथोत्तरकृदन्तम्

भवनम् = भावः । इत्यत्र भूधातोः –

भावे ॥३।३।१८॥ (धातोर्घञ्)

(सिद्धावस्थापन्नो धात्वर्थो भावः) इति अनुवर्तमाने –

श्रिणीभुवोऽनुपसर्गे ॥३।३।२४॥ (घञ् अजपोरपवादः)

इति घञि अनुबन्धनिवृत्तौ **'अचो ञ्णिति'** (७।२।११५) इति वृद्धौ आवादेशे भाव इत्यस्मात्सौ भावः । श्रायः, नायः । एवम् पचनम् पाकः । हरणम् हारः । भरणम् भारः । इत्यादि । चयनम् = चयः । इत्यत्र चिधातोः –

एरच् ॥३।३।५६॥ (धातोः)

इत्यचि गुणे अयादेशे चयः । एवम् जयनम् जयः । बाहुलकात् नयनम् नयः । क्षयणम् क्षयः । इत्यादिः । बलिहस्तां शवः कराः । इत्यत्र कृधातोः –

ऋदोरप् ॥३।३।५७॥ (धातोः)

इत्यपि गुणेन रपरे अकारे करः । एवम् गरणम् गरः । शरणम् शरः । भवनम् भवः । लवनम् लवः । स्तवनम् स्तवः । धवनम् धवः । इत्यादिः । दुवेपृ = कम्पने इति वेप् धातोः –

ट्वितोऽथुच् ॥३।३।८९॥

इत्यथुचि वेपथुः (वेपनम्) । एवं श्वयनम् श्वयथुः । वमनम् वमथुः । दवनम् दवथुः । भ्राजनम् भ्राजथुः । इत्यादिः । प्रधिः इत्यत्र प्रपूर्वकात् धाधातोः –

उपसर्गे घोः किः ॥३।३।९२॥

इति किप्रत्यये **'आतो लोप इटि च'** (६।४।६४) इत्यालोपे प्रधिः । एवम् निधिः । विधिः । उपाधिः । आधिः । व्याधिः । इत्यादि हरिवद्रूपम् । संशयः = संशीतिः । इत्यत्र शीङ्धातोः भावेऽर्थे –

स्त्रियां क्तिन् ॥३।३।९४॥ अधिकारोऽयम्। आक्रोशे नञ्यनिः ॥३।३।११२॥ इति यवात्।

इति क्तिनि कित्त्वाद् गुणनिषेधे–

तितुत्रतथसिसुसरकसेषु च ॥७।२।९॥ (इण् न)

इति इण्निषेधे संशीतिः। एवम् गमनम् गतिः, करणम् कृतिः, धरणम् धृतिः, शान्तिः, क्षान्तिः, भ्रान्तिः, क्रान्तिः, जातिः, सातिः, खातिः। इत्यादीनां मतिवद्रूपम्। भेदनं = भिदा इत्यत्र भिद् धातोः–

षिद्भिदादिभ्योऽङ् ॥३।३।१०४॥ (स्त्रियाम्)

इत्यङि टापि दीर्घे भिदा। एवम् त्रपणम् त्रपा। क्रपणम् कृपा **'क्रपेः सम्प्रसारणञ्च'** (ग०) इत्यङि सम्प्रसारणे च कृते टापि रूपम्। **'मृजूष् शुद्धौ'** इति परस्मैपदी धातुरदादौ ज्ञेयः मार्जनम् मृजेत्यादिः। पच् धातोः (इक्श्तिपौ धातुनिर्देशे) इति इकि श्तिपि च अनुबन्धलोपे गणकार्ये च कृते प्रातिपंदिकत्वात्सुपि पचिः पचतिः। इत्यादि मतिवद्रूपम्। **"वर्णात् कारः'** (वा०) अकारः। ककारः। **"रादिफः"** (वा०) रेफः।

नपुंसके भावे क्तः ॥३।३।११४॥ ल्युट् च ॥३।३।११५॥

इत्यादिसूत्रैः भावेऽर्थे क्ते ल्युटि च हसितम्। हसनम्। गतम्। गमनम् इत्यादिप्रयोगसिद्धिः। रमन्ते योगिनोऽस्मिन्निति विग्रहे रम्धातोः–

ह्लश्च ॥३।३।१२१॥ (करणाधिकरणयोः पुंसि संज्ञायां घञ्)

इति घञि उपधावृद्धौ रामः रामावित्यादि रूपम्। प्रायः धातुभ्यस्त्रिधाप्रत्ययैर्लिङ्ग-भेदेन शब्दा निर्मेयाः। घञजप्प्रत्ययैः पुंलिङ्गैः, क्तिना स्त्रीलिङ्गे, ल्युटा नपुंसके, यथा– भावः, प्रभवः, भूतिः भवनम्। नायः प्रणयः नीतिः नयनम्। द्रवः द्रुतिः द्रवणम्। पाकः पक्तिः पचनम् इत्यादि। द्रष्टुम् इत्यत्र भविष्यतः तुमुन्प्रत्ययस्य मान्तकृत्त्वात् **'कृन्मेजन्तः'** (१।१।३९) इति अव्ययतया **'अव्ययकृतो भावे'** इति वचनात् भावेऽर्थे दृश्धातोः–

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ॥३।३।१०॥ (भविष्यति काले)

इति तुमुनि अनुबन्ध-निवृत्तौ **'सृजिदृशोर्झल्यमकिति'** (६।१।५८) इति मित्त्वाद् ऋकारस्यान्त्यावयवे अमि यणि शस्य षत्वे ष्टुत्वे द्रष्टुम् देवं याति। एवम् कर्तुम्। पठितुम्। सोढुम् इत्यादि। ण्वुलि तु दर्शकः देवस्य। कारकः कटस्य इत्यादि पूर्ववद्रूपम्।

धातूनां लुट्लकारीयप्रथमपुरुषैकवचनरूपाण्येवेह अन्त्यम् आकारं निःसार्य्य उमन्तानि कृत्वा पाठ्यानि। तथाहि – द्रष्टा द्रष्टुम्। गन्ता गन्तुम्। कर्ता कर्तुम्। पठिता पठितुम् इत्यादि। पूर्वम् भोजनम् पश्चाद् यानम् इत्यर्थे भुक्त्वा याति। इत्यादिप्रयोगो भवति। अत्र भुज्धातोः

समानकर्तृकयोः पूर्वकाले ॥३।४।२१॥ (धातोः क्त्वा)

इति क्त्वा प्रत्यये कित्त्वाद् गुणनिषेधे कुत्वे भुक्त्वा। इत्यत्र समागतस्य सुपः **'क्त्वातोसुन्कसुनः'** (१।१।४०) इत्यव्ययत्वाल्लुकि भुक्त्वा शतपदं यायात्। शयित्वा पोषयेद्वपुः। अत्र शीधातोः क्त्वा प्रत्यये इटि च कृते –

न क्त्वा सेट् ॥१।२।१८॥ (कित्)

इति कित्त्वनिषेधे गुणे अयादेशे सुपो लुकि शयित्वेत्यव्ययम्। पूधातोः क्त्वाप्रत्यये पाक्षिके इटि गुणे अवादेशे पवित्वा पक्षे पूत्वा। पूर्वम् प्रकर्षेण करणम् पश्चाद् गमनम् इत्यर्थे प्रपूर्वकात् कृधातोः क्त्वा प्रत्यये प्रकृत्वा इति स्थितौ **'कुगतिप्रादयः'** (२।२।१८) इति समासे –

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥७।१।३७॥

इति क्त्वो ल्यबादेशे अनुबन्धनिवृत्तौ **'ह्रस्वस्य पिति कृति तुक्'** (६।१।७१) इति तुकि प्रकृत्य गच्छति। पूर्वं भूयो भूयः स्मरन्ति पश्चात् हृष्यन्ति। इत्यर्थे स्मृधातोः –

आभीक्ष्ण्ये णमुल् ॥३।४।२२॥ (चात् क्त्वा)

इति णमुलि धातोः वृद्धौ स्मारमित्यस्याव्ययत्वात् सुपो लुकि **'नित्यवीप्सयोः'** (८।१।४) इति द्वित्वे स्मारं स्मारं शिवं हृष्यन्ति भक्ताः। पक्षे स्मृत्वा वा। चोरम् उच्चार्य्य आक्रोशति इत्यर्थे -चोरमिति कर्मणि उपपदे कृधातो –

कर्मण्याक्रोशे कृञः खमुञ् ॥३।४।२५॥

इति खमुञि अनुबन्धनिवृत्तौ वृद्धौ कारमित्यनेन सह चौरमित्यस्य **'उपपदमतिङ्'** (२।२।१९) इति समासे सुपो लुकि चौरकारमित्यत्र **'अरुर्द्विषदजन्तस्य मुम्'** (६।३।६७) इति मुमागमे चौरङ्कारम् आक्रोशति। एवम् दस्युङ्कारम् । व्याधङ्कारमाक्रोशतीत्यादि। घृतमिव निदधाति इति घृतम् इति उपमाने उपपदे निपूर्वकात् धा-धातोः –

[१]उपमाने [२]कर्मणि [४]च ॥३।४।४५॥ ([५]धातोर्णमुल्[६] कर्त्तरि[३])

इति णमुलि अनुबन्धनिवृत्तौ **'आतो युक् चिण्कृतोः'** (७।३।३३) इति युगागमे निधायमिति सिद्धौ घृतम् इत्यनेन सह **'उपपदमतिङ्'** (२।२।१९) इति समासे सुपो लुकि घृतनिधायमिति जाते –

कषादिषु यथाविध्यनुप्रयोगः ॥३।४।४६॥

इति निदधातीत्यस्यानुप्रयोगे घृतनिधायं निदधाति पयो दक्षादेवी। एवम * विद्युत्प्रणाशं प्रणश्यति। गर्दभताडं ताडयति। भारवाहिवाहं वहति भारम्। अश्वचालं चलति। गजगामं गच्छति (संस्कृतादेवी)। मृगसारं सरति (प्रतिभा)। कोकिलरावं रौति (बालकृष्णः)। इत्यादयः प्रयोगा ज्ञेयाः।

॥ इति कृदन्तप्रकरणम् ॥

---

* विद्युदिव इति कर्त्तर्युपमाने उपपदेऽत्र णमुल्।

ऋजावुपेते किल पाणिनीयके 'प्रबोधचन्द्रे' सुरगीर्नभस्तले।
विभीषिका व्याकृतिजा लयं व्रजेत् समाजतः संस्कृतसेविनां द्रुतम्॥
शिवं ध्यायमानाः पठन्तु प्रवीणाः कुमार्य्यः कुमाराः प्रयोगेष्वदीनाः।
भवेत्सर्वविद्यासु तेषाम्प्रवेशः प्रलुप्तोऽद्य कौ व्याकृतेर्भीतिलेशः॥
मया मालवीयाज्ञया वर्षवृन्दैः प्रयत्नान्निबद्धोऽधुना ग्रन्थ एषः।
प्रतिज्ञायते मासषट्केन बालाः पठन्तो भवेयुर्ध्रुवं संस्कृतज्ञाः॥

॥ इति श्रीक्षैमधरिणा कौशल्याजेन शाण्डिल्येन महामहाध्यापकेन
व्याख्यानवागीशेन पण्डितराजेन श्री गोपालशास्त्रिणा
दर्शनकेशरिणा निर्मिते पाणिनीयप्रबोधे
उत्तरार्द्धः समाप्तः। सम्पूर्णश्चायं ग्रन्थः॥

॥ शुभं भूयात्॥

अथ पाणिनीयप्रबोधपरिशिष्टानि

परिशिष्टम् (१)

अथ पाणिनीयशिक्षा (भाष्यसहिता)

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।
शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः॥१॥

पातु वो निकषग्रावा मतिहेम्नः सरस्वती।
प्राज्ञेतरपरिच्छेदं वचसैव करोति या॥१॥
छन्दःकल्पनिरुक्तानि विवृतानीह सूरिभिः।
शिक्षा न विवृता यस्मात्तस्मात्तां विवृणोम्यहम्॥२॥

अथ शिक्षां प्रवक्ष्यामीति। अथेत्ययमानन्तर्ये, वेदाध्ययनानन्तरमङ्गपाठः । किं कारणम् ? 'षडङ्गो वेदोऽध्येतव्यः' इति स्मरणात्। तत्र च शिक्षा प्रथमा, अथ शब्दानुषङ्गात्। सा च वक्तव्येत्यथशब्दस्यार्थः। एतेनैव सिद्धे वेदस्याङ्गानन्तर्येण व्याकरणादिष्वथशब्दोऽत एव नाधीयते। केषुचित् कल्पेषु अधीयते इति चेत्– 'अथातोऽधिकारः' 'अथैतस्य समाम्नायस्य' इत्येवमादिषु ? नैष दोषः। नियमार्थः सः, शिक्षानन्तरं कल्प एवाध्येतव्यो नान्यानीति। मङ्गलार्थो वा। **आदौ सम्बन्धाभिधेयप्रयोजनानि** वक्तव्यानि। तत्र चायमेव **सम्बन्धो** यदुक्तोऽङ्गाङ्गिभावः। नित्यसम्बन्धानि ह्यङ्गान्यङ्गिनः। **अभिधेयं** तु स्वयमेव वक्ष्यति – 'वाच उच्चारणे विधिम्' इति। **प्रयोजनं** सम्यग्वर्णोच्चारणम्। प्रयोजनमपि श्रूयत एव– 'एकोऽपि वर्णः सम्यक् प्रत्युक्तः स्वर्गे लोके कामधुग्भवति' इति। शिक्ष्यतेऽनया वर्णोच्चारणमिति **शिक्षा,** तां प्रकर्षेण **वक्ष्यामि=** कथयिष्यामि। **पाणिनीयं मतं यथेति।** पाणिनीयमिति 'वृद्धाच्छः' (४।२।११४) इति छप्रत्ययः। 'तस्येदम्' (४।३।१२०) इत्यर्थनिर्देशः। **मतमिति।** 'मन ज्ञाने' पाणिनीयं मतं ज्ञानं यथा तथा प्रवक्ष्यामि तैरेव प्रत्याहारैस्तयैव परिभाषया 'अचोऽस्पृष्टा यणस्त्वीषत्' इत्यादि, 'अणुदित्सवर्णस्य चाप्रत्ययः' (१।१।६९) इति, 'कण्ठ्यावहाविचुयशाः' इति च। तथाऽन्यदप्यनुक्तमत्र प्रयोजनं यत्तद् व्याकरणादेव ग्रहीतव्यं 'मोऽनुस्वारः' (८।३।२३) इति। ननु व्याकरणे शब्दचिन्ता, अत्रापि सेति। ततश्च व्याकरणेनैव सिद्धत्वादिदमनारभ्यम्। सत्यम्, उभयोः शब्दचिन्ता, किन्तु व्याकरणे एतच्चिन्त्यते-गोशब्दः

सास्नादिमत्यर्थे साधुः, इह तु गोशब्दो जिह्वामूलेनोच्चारयितव्य इति भेदः। **शास्त्रानुपूर्व्यं तद्विद्यादिति। शास्त्रमिति** शासेः करणे ष्ट्रन् प्रत्ययः। **आनुपूर्व्यमिति** गुरुपूर्वक्रमः। **तदिति** पाणिनिमतपरामर्शः। तत् पाणिनिमतमेवास्यापि शिक्षाख्यशास्त्र-स्याप्यानुपूर्व्यं विद्यावंश-परम्परां जानीयात्। पाणिनिमतस्य यदानुपूर्व्यं यो गुरुपूर्वक्रमः स एवास्येत्यर्थः। तथा च वक्ष्यति – 'शङ्करः शाङ्करीं प्रादात्' इत्यादि। **यथोक्तं लोकवेदयोरिति।** समानार्थमित्यर्थः। तथा च भाष्यकारः 'य एव लौकिकाः शब्दास्त एव वैदिकास्त एव तेषामर्थाः'' इति ॥१॥

नन्वकारादयो वर्णाः स्वस्थानेनैवोच्चार्यन्ते, परस्थाननिराकाङ्क्षत्वात्। किमर्थः शास्त्रारम्भः ? इत्याशङ्क्याह –

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥२॥

प्रसिद्धमिति। अबुद्धिभिर्बुद्धिहीनै : प्रसिद्धमपि शब्दार्थमविज्ञातं सम्मतं, पुनः पश्चाद् व्यक्तीकरिष्यामि स्फुटीकरिष्यामि। किम् ? **वाच उच्चारणे विधिम्,** वाचो गिरस्त-दुच्चारणे उद्गिरणे विधिं विधानम्। ननु 'विधिरत्यन्तमप्राप्तौ' इति स्मर्यते, न चात्रात्यन्तमप्राप्तिः। उक्तं च अधस्तात् – 'अकारादयो वर्णाः स्वस्थानेनैवोच्चार्यन्ते' इति। उच्यते – यद्यपि स्वस्थानस्थिता उच्चार्यन्ते तथाऽप्यप्राप्तोंऽशः कथनीयोऽनुप्रदानादिः,. एतदर्थो विधिशब्द : ॥२॥

वागुच्चारणं च वर्णैः क्रियते, कति संख्यास्ते ? इत्यत आह –

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते (सम्भवतो) मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥३॥

त्रिषष्टिश्चतुःषष्टिर्वेति। सम्भवत इति सम्भूतेः। सकाशान्मताः ज्ञाताः। वर्णो वृणोतेः। अत्र 'यथोक्तं लोकवेदयोः' इत्युक्तम्। तत्र किं लोके संस्कृतविषया एव वर्णा उत सर्वभाषाविषयाः ? इत्याह – **प्राकृते संस्कृते चापीति।** अपिशब्दादपभ्रंशादिष्वपि ये वर्णाः सम्भूतेर्जाताः सन्तः तेऽपि। **स्वयं प्रोक्ताः स्वयम्भुवेति।** ब्रह्मणा स्वयमेव हरेण प्रकर्षेणोच्चारिताः ॥३॥

कथं ते त्रिषष्टिः कंथं वा चतुःषष्टिरित्याशङ्क्याह –

स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥४॥

स्वरा विंशतिरेकश्चेति। स्वरा इति 'स्वृ शब्दोपतापयोः' स्वर्यते शब्द्यतेऽनेन व्यञ्जनमिति करणेऽच् प्रत्ययः। कथं ते एकविंशतिः ? ततश्चतुरो यथास्मृति विवृणोमि –

अ इ उ ऋ एते चत्वारो ह्रस्वदीर्घप्लुतभेदेन द्वादश। ऌकारस्य दीर्घादयो न सन्तीति स्मरणात् ह्रस्व एवोपदिश्यते, अत एते त्रयोदश। ए ऐ ओ औ सन्ध्यक्षराणि, सन्ध्यक्षराणामपि ह्रस्वा न सन्तीति स्मरणात् दीर्घप्लुता एव गृह्यन्ते, ते एतेऽष्टौ पूर्वैस्त्रयोदशभिः सहैकविंशति : । **स्पर्शानां पञ्चविंशतिः ?** कादयो मावसानाः स्पर्शाः। जिह्वामूलतालुमूर्धदन्तोष्ठादिभिः परस्परं स्पर्शैरभिनिष्पत्त्य आविर्भवन्तीति स्पर्शाः। पूर्वयैकविंशत्या सह षट्चत्वारिंशत्। **यादश्च स्मृता ह्यष्टाविति।** यकारादयश्च अष्टौ – य र ल व श ष स हाः – इति। अत्राद्याश्चत्वारोऽन्तःस्थसंज्ञाः, उपरितनाः ऊष्माणः। पूर्वया षट्चत्वारिंशता सह चतुःपञ्चाशत्। **चत्वारश्च यमाः स्मृता इति।** यच्छन्तीति यमाः, स्वयमेवोपरमेरन्। के ते यमाः ? लोके – कुं खुं गुं घुं – इति। "अनन्त्यान्त्य-संयोगे मध्ये यमः पूर्वगुणः" इत्यौदव्रजिः । तथा च –

ह्रस्वादिभेदैश्चत्वारः प्रथमा द्वादश स्मृताः।
ऌकारो ह्रस्व एवैचोऽष्टौ स्वरा एकविंशतिः॥
पञ्चविंशतिरष्टाब्धिः स्पर्शाः स्युर्यादयो यमाः।
अनुस्वारो विसर्गश्च ≍ क ≍ पौ प्लुतलृकारैकः॥
त्रिषष्टिरेवं वर्णाः स्युर्ह्रस्वदीर्घादिभेदतः।
अनुस्वारद्वयाद्वर्णाश्चतुःषष्टिरितीरिताः॥

तथा च नारदः –

अनन्त्यश्च भवेत्पूर्वो ह्यन्त्यश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः॥
वर्गान्त्यान् शषसैः सार्धमन्तःस्थैर्वाऽपि संयुतान्।
दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाध्वगाः॥

इति नारदौदव्रज्योर्मतेन यमो वर्णागम इति विधीयते। अस्मात् शास्त्रात् 'चत्वारश्च यमाः स्मृताः' इति वर्णान्तरत्वेनोपदेशः संयोगशास्त्रात्। अथ चतुरक्षराणामुदाहरणमिति प्रकृत्य अग्निरिति यमो गकारौ द्वौ नकार इकारश्चेति। अन्ये तु यमं वर्णापत्तिं मन्यन्ते। तथा च शौनकः– "स्पर्शा यमाननुनासिकान् स्वान् परेषु स्पर्शेष्वनुनासिकेषु" इति। पूर्वया चतुःपञ्चाशता सहाष्टपञ्चाशत्॥४॥

अनुस्वारो विसर्गश्च ≍ क ≍ पौ चापि पराश्रितौ (पराश्रयौ)।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च॥५॥ (१)

अनुस्वारो विसर्गश्चेति। स्वरमनुभवतीत्यनुस्वारः, अनु अकारानुगमेनानुस्वारः।

वक्ष्यति च – 'दन्त्यमूल्यः स्वरानुगः' इति। **विसर्ग इति।** विविधं सृज्यते क्षिप्यते इति विसर्गः। **≍क≍पौ चापि पराश्रयाविति।** पराश्रयाविति परौ ककारपकारौ आश्रयः स्थानं ययोस्तौ पराश्रयौ। तथा च वक्ष्यति–

"अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" इति ।

अपरः पाठः –**'≍क≍पावपि परौ स्मृतौ'** अनुस्वारविसर्गयोः परावित्यर्थः। अपरोऽपि पाठः –**'≍क≍ पौ चापि कपाश्रयौ'** ककारपकारौ आश्रयः स्थानं ययोस्तौ कपाश्रयौ। च शब्दादनुस्वारविसर्जनीयावपि पराश्रयौ। **दुःस्पृष्टश्चेतीति।** ईषत्स्पृष्टो वर्णधर्मो न वर्णान्तरम्। वक्ष्यति च – 'अचोऽस्पृष्टां यणस्त्वीषत्' इति। तथा चौदव्रजिः –'तत्र स्पृष्टं प्रयतनं करणं स्पर्शानाम् "दुःस्पृष्टमन्तःस्थानाम्' इति। यणभक्तिश्च लृकारो विद्यते । अतो लृकारो दुःस्पृष्टधर्मा, च शब्दात् ऋकारः । इति शब्दः पादपूरणार्थः। **लृकार इति।** लृवर्णात् कारप्रत्ययः । **प्लुत एव चेति।** लृकारस्य दीर्घादयो न सन्तीत्यधस्तात् परमतमुपन्यस्तम्। स्वमतं **चाह – लृकारः प्लुत एव चेति।** त्रिमात्रः, च शब्दाद् ह्रस्वश्च। ननु वर्णानां प्रयत्नमुपरिष्टाद्वक्षत्येव, किमर्थमप्रस्तुतः प्रयत्नः कथ्यते ? उच्यते, प्लुतविधानार्थं तावल्लृकार उच्चारयितव्यः, उच्चारिते च लृकारे लाघवार्थमप्रस्तुतोऽपि प्रयत्नः उच्चारितः – **दुःस्पृष्टश्चेति।** अनुस्वारादयः प्लुतान्ताः पञ्च। पूर्वैरष्टपञ्चाशद्भिः सह त्रिषष्टिः। चतुःषष्टिः कथम् ? 'अनुस्वारौ विसर्गश्च' इति पाठान्तरात्। कथं पुनरनुस्वारद्वयम् ? ह्रस्वदीर्घभेदेनेति ब्रूमः। तथा चौदव्रजिः "अनुस्वारावं आं इत्यनुस्वारौ ह्रस्वदीर्घौ दीर्घह्रस्वौ वर्णौ' इति। अत एव चतुःषष्टिः॥५॥

अथ वर्णसंख्यापरिज्ञानोत्तरकालं चिन्त्यते, क एषामुच्चारयिता, कथं चोच्चारयति, केन क्रमेण चेत्याह–

आत्मा बुद्ध्या समेत्यार्थान् (समर्थ्यार्थान्) मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६॥

आत्मेति। आत्मा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तः। कथं पुनरेतदवगम्यते ? यथा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आत्मा उच्यते, द्रष्टृत्वात्। द्रष्टा हि दृश्यादिव्यतिरिक्तो भवति, प्रयोजकत्वात् 'बुद्ध्यादीनि कर्तृप्रयोज्यानि, करणत्वात् कुठारवत्' इति न्यायात् श्रुतेश्च। न्यायस्तावत्– 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति स्वर्गादिफल-साधनानि कर्माणि श्रूयन्ते। स्वर्गश्च वायुशरीरोपभोग्यः, तद्व्यतिरिक्त आत्मा शरीरादेः। श्रुतेश्च– "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः" इति। शरीरापक्रमणाय शरीरादिव्यतिरिक्त आत्मा।

छान्दोग्यश्रुतेश्च – "एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतीरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति। क एषामुच्चारयितेति पृष्टे तस्योत्तरं दत्तम् - आत्मेति। कथमुच्चारयति केन क्रमेणेति प्रश्नद्वयस्योत्तरं दीयते – स आत्मा बुद्ध्या सहार्थान् बाह्यान् समर्थ्य सम्यगवगम्यार्थप्रत्यायनाय यदि शब्दा उच्चार्यन्ते तदा मनो युङ्क्ते विवक्षया वक्तुमिच्छा विवक्षा तया। तच्च मनो नियुङ्क्ते आत्मा। **मनः कायाग्निमाहन्तीति।** तच्च मनो नियुक्तं सत् कायाग्निमाहन्ति कायाग्निं शरीराग्निम् आभिमुख्ये – नाहन्ति। **स प्रेरयति मारुतमिति।** सोऽग्निरभिहतः सन्मारुतं वायुं प्रेरयति ॥६॥

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥७॥

मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरमिति। मारुतो वायुरुरसि चरन्मन्द्रं स्वरमुत्पादयति मन्द्रमिति मन्दे रक् प्रत्ययः। **प्रातस्सवनयोगमिति।** प्रातः सवनेन सह योगोऽस्येति प्रातः सवनयोगस्तम्। तथा चैतरेयब्राह्मणे – 'अथ मन्द्रं तपति तस्मात् मन्द्रया वाचा प्रातःसवने शंसेत्' इति। गायत्रं छन्दोऽस्याश्रयः। गायत्रं गायतेः स्तुतिकर्मणः। आच्छादयति छन्दः ॥७॥

कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥८॥

कण्ठ इति। मारुत इति वर्तते, सवनं छन्दः स्वरं चरन्निति च। वर्णान् जनयतीति यावत्। कण्ठे चरन्वायुर्मध्यमं स्वरं जनयति। **कण्ठे इति –** 'कणेष्ठः' (उ० सू० १०३) इति ठप्रत्ययः। मध्यं दिनं युनक्तीति माध्यन्दिनं सवनभाजं त्रिष्टुप्छन्दोऽनुगामिनम्। **तारमिति।** तार्तीयसवनमिति तृतीयसवनभाजं तारं स्वरं शीर्षण्यमिति मूर्धनि चरन् वायुं जनयत्युत्पादयति जागतछन्दोऽनुगामिनम्। जागतं छन्दोऽनुगच्छतीति जागतानुगः। शीर्षण्यमिति 'शीर्षश्छन्दसि' (६।१।६०) इति शिरःशब्दस्य शीर्षभावः। तत्र भवं शीर्षण्यम् ॥८॥

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥९॥

सोदीर्ण इति। स वायुरुदीर्ण उर्ध्वगतो मूर्धानं यावदुपरितनां गतिमलभमानः शिरः कपालेनावष्टब्धत्वात्पुनः प्रत्यावृत्य वक्त्रमेवापद्य वर्णाञ्जनयते उत्पादयति। पुनर्मारुतग्रहणं विस्पष्टार्थम्। **तेषां विभागः पञ्चधा स्मृत इति।** तेषां वर्णानां जन्यमानानां विभागो विवेकः पञ्चधा पञ्चप्रकारः। 'संख्याया विधार्थे धा' (५।३।४२)

इति धा। स्मृतोऽनुमतः॥९॥

कैर्हेतुभिस्तेषां वर्णानां पञ्चधा विवेक इत्याह–

स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत॥१०॥ (२)

स्वरत इति। स्वरस्थानहेतून् व्याख्यास्यामः। वर्णानां ज्ञातार एवमाहुः – 'पञ्चधा विवेको वर्णानाम्' इति। स्वरत : – उदात्तादिभेदेन। कालतः – ह्रस्वादि। स्थानम् - कण्ठादि। प्रयत्नो द्विधा । अनुप्रदानं स्वस्थानादिकं घोषादि। अनु प्रकर्षेण दीयते इत्यनुप्रदानम्। 'द्वौ नादानुप्रदानौ' इत्यौदव्रजिः। पञ्चधा विवेकं वर्णानां निपुणमुच्यमानं हे श्रोतारः। निबोधत शृणुत॥१०॥

अत्र किञ्चिदुच्यते बालव्युत्पत्त्यर्थम्– ननु सर्वमेवैतदनुपपन्नम्। कथम् ? आत्मा बुद्ध्या सहार्थान् समर्थ्य मनो युङ्क्त इति व्याख्यातम्। आत्मनश्च नियोजकभावो नोपपद्यते अकर्तृरूपत्वात् तस्य। तथा च श्रुतिः– "असङ्गो ह्ययं पुरुषः" इति, "अस्थूलमनण्वह्र– स्वम्" इत्यादिका च। भवता चैवमात्मस्वरूपं व्याख्यातम्। आत्मनश्च नियोजकभावे शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त इति शरीरादिव्यतिरिक्त आत्मा मनो युङ्क्ते इत्यनुपपन्नम्। उच्यते, अयमात्मा समर्थ्यार्थान्मनो युङ्क्त इत्येतत् क्षेत्रज्ञाभिप्रायम्। क्षेत्रज्ञस्य तदेव स्वरूपं यन्नियोजकत्वम्। तथा च मनुः–

"योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते।
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः॥
जीवसंज्ञोऽन्तरात्माऽन्यः सहजः सर्वदेहिनाम्।
येन वेदयते सर्वं सुखं दुःखं च कर्मसु॥
तावुभौ भूतसंपृक्तौ महाक्षेत्रज्ञ एव च।
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठति"॥ इति॥

तं व्याप्येति परमात्मानमाहुः। तथा च व्यासः –

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः"॥

ननु यद्यात्मा बुद्ध्या समर्थ्यार्थानित्युदाहृतो यो नित्यः क्षेत्रज्ञ एवात्रात्माऽभिप्रेतो भवेत् ततः क्षेत्रज्ञ एवात्मशब्दस्य चरितार्थत्वात् शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तत्वं कतरस्माच्छब्दात् त्वया वर्णितम्, किमर्थं च ? उच्यते, आत्मा बुद्ध्येत्यत्र द्वावप्यात्मानौ तौ क्षेत्रज्ञपरमात्माभिधेयरूपावभिप्रेतौ तन्त्रेणोच्चारितौ । तन्त्रेणोच्चारणं सूत्राणामलङ्कारः । एवं चेत् किमर्थं परमात्मनो वर्णनिमित्तत्वं यदुक्तं, तत्रोच्यते – अपवर्गसाधनोपकारत्वाच्छिक्षायाः । अपवर्गस्य चायमेवोपायः शरीरादिव्यतिरिक्तस्य परमात्ममो बोधः । बुद्धे च बुद्ध्यादिभिरैक्यं भवति । किं तदपवर्गसाधनं यस्य शिक्षोपकारे वर्तते ? उच्यते, वेदा यज्ञाश्च । तथा च श्रुतिः – "तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन च" इति । वेदानुवचनं यज्ञगतमन्त्राङ्गत्वात्सम्यग्वर्णोच्चारणेन यस्मान्मोक्षमाप्नोति । वक्ष्यति च – 'अतुलं च सुखं समश्नुते' इति । अतुलं सुखं मोक्ष एव भवति । अलमतिप्रसङ्गेन ।

प्रकृतमनुसरामः–

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥११॥
उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥१२॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥१३॥
ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥१४॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः ॥१५॥ (३)
हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् ।
औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥१६॥

उदात्तश्चानुदात्तश्चेति । स्वरतः कालत इत्येतौ द्वौ हेतू श्लोके विवृणोति । स्वर उदात्तादिः । कालो मात्राप्रभृतित्रिमात्रपर्यन्तः । उदात्त इत्युपरिष्टात् परिगृहीतः । अनुदात्तस्तद्विपरीतः, अधस्ताद् गृहीत इत्यर्थः । स्वरित इति स्वरान्तरम् । स्वरतीति स्वरितः– आक्षेपनिष्पाद्यः, य उदात्तानुदात्तविकारः । तथा च नारदः –

"उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा।
त्रैस्वर्ये स्वरसंज्ञायां किंस्थानं स्वर उच्यते॥
उच्चनीचस्थयोर्मध्ये साधारण इति श्रुतिः।
तं स्वरं स्वरसंज्ञायां प्रतिजानन्ति शैक्षिकाः"॥

स्वरास्त्रय इति। त्रय एव। ऋग्यजुर्विषयाः पञ्च षट्, सप्त च सामसु। ह्रस्व एकमात्रो दीर्घो द्विमात्रः प्लुतस्त्रिमात्रः। "निमेषकाला मात्रा स्यात्" इत्यौदव्रजिः। तथा च नारदः–

"निमेषकाला मात्रा स्याद्विद्युत्कालेति चापरे" इति।

इति शब्दः प्रकारार्थः। अनेन प्रकारेण कालतः हेतोः स्वरतश्च विषमभागनियमः। तथा च नारदः –

"स्वर उच्चस्वरो नीचस्वरः स्वरित एव च।
व्यञ्जनान्यत्र वर्तन्ते यत्र तिष्ठति स स्वरः"॥ इति॥ ११–१६॥ स्थानत इति यदुक्तं तदाह –

कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।
स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥१७॥

कण्ठ्यावहाविति। कण्ठ्यावहौ –अकारहकारौ कण्ठतो जातौ। **इचुयशास्तालव्याः –** इकारश्च चवर्गश्च यकारशकारौ च एते तालव्याः – तालुस्थाने भवाः। 'चु' इत्युकाराऽनुबन्धो वर्गं ज्ञापयति। वर्गादावन्यत्रापि 'कु चु टु तु पु' इत्येवमादिषु उकारः पञ्चवर्णपरिग्रहणार्थः। तथा च पाणिनिः – "अणुदित् सवर्णस्य चाप्रत्ययः" (१।१।६९) इति। औदव्रजिरपि – "स्पर्शवर्गस्य स्पर्शग्रहणे च ज्ञेयम्। वर्गस्य ग्रहणं स्थानेष्वित्याकरः" इति॥ **ओष्ठजावुपू।** उकारः पवर्गश्च ओष्ठ्यौजातौ। **स्युर्मूर्धन्या ऋटुरषा इति।** ऋकारः टवर्गश्च रेफषकारौ च मूर्धन्या भवेयुः। **दन्त्या लृतुलसा इति।** लृकारस्तवर्गश्च लकारसकारौ च दन्तेषु भवाः॥१७॥

जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः।
एऐ तु कण्ठतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ॥१८॥

जिह्वामूले इति। कवर्गस्तु जिह्वामूले कथितः। **दन्तयोष्ठ्यो वः स्मृतो बुधैरिति।** वकारो दन्तोष्ठयोर्भवतीति पण्डितैः स्मर्यते। **एऐ तु कण्ठतालव्या इति।** एकार

ऐकारश्च कण्ठतालुतो जातौ। **ओ औ कण्ठोष्ठजौ स्मृताविति।** ओकारश्चौकारश्च कण्ठोष्ठयोर्जातौ ॥१८॥

अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्।
ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥१९॥
संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥२०॥ (४)
स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्।
तेभ्योऽपि विवृतावेडौ ताभ्यामैचौ तथैव च ॥२१॥
अनुस्वारयमानां च नासिकास्थानमुच्यते।
आयोगवाहा विज्ञेया आश्रयस्थानभागिनः (भाजिनः) ॥२२॥

अर्धमात्रा इति। अर्धमात्रा तु कण्ठस्य भवति। कयोः? एकारस्यौकारस्य च। सवर्णग्राहकत्वादैकारश्च औकारश्च द्वावपि गृह्येते। अतश्चतुर्णामपि सन्ध्यक्षराणामर्धमात्रा कण्ठसम्बन्धिनी भवेत्। अध्यर्धास्तालव्योष्ठस्थानाः। **अयोगेति।** अयोगवाहा इत्यनुस्वारादयश्चत्वार उच्यन्ते। अनुस्वारो विसर्गश्च ≍क≍पौ च कण्ठ्यौ। तथा चौदव्रजिः– "अयोगवाहाः अः इति विसर्जनीयः, ≍क≍ख इति जिह्वामूलीयः, ≍प≍फ इत्युपध्मानीयः, अं इत्यनुस्वारः– नासिक्यः, इत्ययोगवाहाः'। न विद्यते योगः संयोगो वर्णान्तरेण येषां ते अयोगवाहाः। **आश्रयस्थानभाजिनः इति।** आश्रयस्य ककारादेः स्थानं भाजितुं शीलं येषां ते आश्रयस्थानभाजिनः। अन्ये तु - यमानप्ययोगवाहान् मन्यन्ते। तेषां मतेनायोगवाहशब्दः प्रत्यस्तमितावयवो रूढिशब्दोऽश्वकर्णवद्वेदितव्यः। अनुस्वारस्य स्वरूपमाह–अनुस्वारस्य प्रकृतिः पाणिनिनैव कथिता "मोऽनुस्वारः" (८।३।२३) इति ॥१९-२२॥

अलाबुवीणानिर्घोषो दन्त्यमूल्यः स्वराननु।
अनुस्वारस्तु कर्तव्यो नित्यं होः शषसेषु च ॥२३॥
अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये।
द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्रौकारवकारयोः ॥२४॥
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥२५॥ (५)

यथा सौराष्ट्रिका नारी तक्रं इत्यभिभाषते।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया॥२६॥
रङ्गवर्णं प्रयुञ्जीरन् नो ग्रसेत् पूर्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत्॥२७॥
हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि।
नासिकायां तथाऽर्धं च रङ्गस्यैवं द्विमात्रता॥२८॥
हृद्रयादुत्करे तिष्ठन् कांस्येन समनुस्वरन्।
मार्दवं च द्विमात्रं च जघन्याँ २ इति निदर्शनम्॥२९॥
मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत्।
स रङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम्॥३०॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥३१॥ (६)
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥३२॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥३३॥
शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसिगतं तथा स्थानविवर्जितम्॥३४॥
उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम्॥३५॥
प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन॥३६॥
तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन॥३७॥ (७)

अलाब्विति। अलाबुस्तुम्बी, तस्या वीणाया निर्घोष इव शब्दो यस्य सोऽलाबुवीणा-निर्घोषः। स्थानं दन्तमूलं तत्र भवो दन्तमूल्यः। स्वरानकारादीन् अनुभवतीति शेषः। हकाररेफयोः शषसेषु च सदा भवति। तथा च नारदः –

"आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्।
यवलेषु परसवर्णं स्पर्शेषु चोत्तमापत्तिम्"। इति।
"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च"॥

इति-इमं श्लोकमनुवादरूपं केचित् पठन्ति ॥२३-३७॥

स्वरतः कालतः स्थानतो वर्णानां भेदः कथितः। अधुना प्रयलतो भेदः कथ्यते – प्रकर्षेण यलो वर्णोच्चारणं प्रत्यस्पृष्टादिभिः स प्रयलः।

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरस्तथा।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः॥३८॥

अजिति। अजिति प्रत्याहारग्रहणम्। 'अ इ उ ऋ ऌ ए ओ ए औ' एते अस्पृष्टाः। यणः – यवरलाः, एते ईषत्स्पृष्टाः। शरिति प्रत्याहारग्रहणम् – शषसाः, एते नेमस्पृष्टाः। अर्धस्पृष्टा इत्यर्थः। तथेति पादपूरणार्थः। **शेषाः स्पृष्टा हलः प्रोक्ता इति।** हल इति प्रत्याहारग्रहणं हकारादारभ्याऽऽलकारात्। शेष इति – उपर्युक्तादन्यः शेषः। यणः शरश्च ईषत्स्पृष्टाः, तद्वर्जिता हलः स्पृष्टाः स्वस्थानैः कथिताः। **निबोधानुप्रदानत इति।** अनुप्रदानमिति स्वस्थानादिकं घोषादि अनुप्रकर्षेण दीयते इति अनुप्रदानम्। "द्वौ नादानुप्रदानौ" इत्यौदव्रजिः। अनुप्रदानतो हेतोर्वर्णानां भेदं शृणु॥३८॥

ञमोऽनुनासिकानहो नादिनो हझषः स्मृताः।
ईषन्नादा यणं जश्च (यण्जशः) श्वासिनस्तु खफादयः॥३९॥

ञमिति – प्रत्याहारग्रहणम् – 'ञ म ङ ण न म्'। **अनुनासिका इति।** स्वस्थानैरधिका अनुपाठाः, नासिकामनुभवन्तीति अनुनासिकाः – ञमङणनमोऽनुनासिकानिमान् जानीयात्। तथा च पाणिनिः – 'मुखनासिकावचनोऽनुनासिकः' (१।१।८) इति। **अह इति** – अकारो रेफश्च हकारो झषश्च। प्रत्याहारग्रहणम् – **झ इति,** 'झभघढधष्' एते अह्रादयो नादिनः स्मर्यन्ते। नाद एषामस्तीति **नादिनः**। अपरः पाठः – **अमोनुनासिका न हौ।** अम इति प्रत्याहारग्रहणम् – 'अ इ उ ऋ ऌ ए ओ ए औ ह य व र ल ञ म ङ ण न म्' एते अनुनासिकाः। न हौ – न तु रेफहकारौ अमावपि सन्तौ। **नादिनो हझषः स्मृताः।** हकारो झषश्च नादिनः, झषः-झभघढधषः, अस्यार्थे पाठद्वयात् अमां हकाररेफवर्जितानां विकल्पेनानुनासिकत्वम् ञमां तु नित्यम्। तथा च शौनकः –

"सचादयो या विहिता विवृत्तयः प्लुतोपधान्ता अनुनासिकोपधाः" इति।

तथा उकारश्चेति करणे युक्तो रक्तः पृक्तो द्राघितः शाकलेनेति । अकाररेफयोः प्रथमे पाठे नादित्वम्, द्वितीयपाठे हकाररेफयोर्नासिकत्वप्रतिषेधः । **ईषन्नादा यण्जशस्त्विति ।** यणः कथिताः । जशस्तु जकाराद्याः शकारेण प्रत्याहारः 'ज ब ग ड द श्' एते यण् जशश्च ईषन्मनाक् नादाः । **श्वासिनस्तु खफादय इति ।** 'ख फ छ ठ था :' एते श्वासिनः श्वास एषामस्तीति श्वासिनः "श्वासो घोषाणां तृतीयात् प्रथमानामुभावघोषश्चतुर्थानां युग्माः सोष्माणम्" इति चौदव्रजि : ॥३९॥

ईषच्छ्वासांश्चरो विद्याद्गोर्धमैतत्प्रचक्षते ।
दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि ॥४०॥
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥४१॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥४२॥ (८)
उदात्तमाख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा ।
उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥४३॥
उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम् ।
निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥४४॥
अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥४५॥
अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती ।
अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तम् ।
प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥४६॥
हविषां मध्योदात्तं स्वरिति स्वरितम् ।
बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥४७॥
अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥४८॥ (९)
चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्द्धमात्रकम् ॥४९॥

कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात्॥५०॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते॥५१॥

ईषच्छ्वासांश्चरो विद्यादिति। चर इति प्रत्याहारग्रहणम् 'च ट त क प श ष स र्' एतन्नामकान् ईषच्छ्वासान् जानीयात्। **गोर्धामैतत्प्रचक्षत इति।** गोर्वाचः, धाम स्थानम्, एतच्छास्त्रमाचक्षते वर्णविदः शास्त्रानुपूर्व्यमिति य उक्ताः ॥४०-५१॥

अथ मन्त्रव्यत्यासलक्षणमाह –

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥५२॥
अवक्षरमनायुष्यं विस्वरं व्याधिपीडितम्।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके॥५३॥
हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥५४॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम्।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥५५॥ (१०)

मन्त्रः – मननान्मन्त्रः, **स्वरतः**– उदात्तादिभेदतः, **वर्णतः** – त्रिषष्टिरित्यादिभेदतः,

मिथ्याप्रयुक्तः – यः स्वरो यो वर्णस्तमज्ञात्वैव प्रयुक्तः, **न तमर्थमाह** – तस्यार्थं न वेद। स ईदृशो मन्त्रो वाग्रूपो वज्रसमो यजमानं हिनस्ति। तत्र दृष्टान्तमाह – यथा स्वरतोऽपराधाद् इन्द्र एव शत्रुहन्ताऽभूदिति ॥५२-५५॥

इदानीं गुरुपूर्वक्रममाह –

शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः॥५६॥

शङ्कर इति। शङ्करः शं सुखं करोतीति शङ्करः सुखकरः शाङ्करीं विद्यां दाक्षीपुत्राय ऋषये दाक्षीनाम्नी ऋषिकन्या तत्पुत्राय धीमते बुद्धिमते प्रादात्-दत्तवान् ॥५६॥

सम्प्रति पाणिनिस्तुतिपरं श्लोकमाह –

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥५७॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥५८॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः॥५९॥

येनेति। नन्वप्रकृतं स्तुतिपूर्वकं पाणिनेर्नमस्कारकरणं किमर्थम्? उच्यते, अचोऽस्पृष्टा यणस्त्वीषदिति प्रत्याहारैः शिक्षा ग्रथिता प्रत्याहाराश्च पाणिनिना शङ्करादधिगम्य कृत्स्नं समग्रं व्याकरणं प्रोक्तं शिष्योपकाराय स्वप्रत्याहारा लोके प्रवर्तिताः, तदर्था स्तुतिः। **अक्षरसमाम्नायमिति** – प्रत्याहारानाहुः। ऋज्वन्यत् ॥५७-५९॥

भगवतः शिक्षायाश्च साक्षात्स्तुतिपरं श्लोकमाह –

त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत् प्रयतश्च सदा द्विजः।
स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति॥६०॥

अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा।
गीत्यचोऽस्पृष्टोदात्तं चाषस्तु शङ्कर एकादश॥

॥इति पाणिनीयशिक्षा समाप्ता॥

त्रिनयनेति। वैतालीयं छन्दोऽस्य, अन्येषामनुष्टुप् छन्दोऽस्ति। त्रिनयनः शिवस्तस्य मुखान्निःसृता यथा गुहायाः सिंहो निष्क्रामति तथा निःसृता, एतावता त्रिनयनेनापि न कृतेत्यर्थः। तां यः – द्विजः पठेदधीयीत स धनादिभिर्युज्यते सुखमतुलं परमानन्दलक्षणमुक्तिमुक्तप्रकारेणाश्नुते प्राप्नोति। अन्यत्रामुष्मिन् लोके धनधान्यपशु-कीर्तिभाग् भवत्यन्ते मुक्तिभाक्, अन्यदवान्तरफलानि स्वर्गादीनि परिमितकालत्वात् तोलयितुं शक्यन्ते, मोक्षाख्यं तु अपरिमितकालावच्छिन्नं सुखरूपमित्यर्थः ॥६०॥

॥इति पाणिनीयशिक्षापञ्जिकाख्यं भाष्यं सम्पूर्णम्॥

परिशिष्टम् (२)

अथ गणपाठः

सर्वादीनि सर्वनामानि ॥१।१।२७॥ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥**इति सर्वादिः**॥१॥

स्वरादिनिपातमव्ययम् ॥१।१।३७॥ स्वर अन्तर् प्रातर्, **अन्तोदात्ताः**। पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् (अन्तिकात्) पृथक्, **आद्युदात्ताः**। ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् (शश्वत्) जोषम् तूष्णीम् बहिस् (अधस्) अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ (हे है) इद्धा अद्धा सामि, **अन्तोदात्ताः**। वत् (५।१।११५) ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस्, **आद्युदात्ताः**। अन्तरा। **अन्तोदात्तः**। अन्तरेण (मक्) ज्योक् (योक् नक्) कम् शम् सना सहसा (श्रद्धा) अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या। क्त्वातोसुन्कसुनः। कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च। पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् (सत्रम् समम्) नमस् हिरुक्। तसिलादयस्तद्धिता एधाच्च पर्यन्ताः (५।३।७–४६) शस्तसी कृत्वसुच् सुच् आस्थालौ। च्व्यर्थाश्च। (अथ) अम् आम् प्रताम् प्रतान् प्रशान्। **आकृतिगणोऽयम्**। तेनान्येऽपि। तथाहि–माङ् श्रम् कामम् (प्रकामम्) भूयस् परम् साक्षात् साचि (सावि) सत्यम् मंक्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजम् सन्ततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अ मिथु (अमिथु) विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् (अम्भस्) अम्नर् (अम्भर्) स्थाने वरम् दुष्ठु वलात् शु अर्वाक् सुदि वदि **इत्यादि**। तसिलादयः प्राक्पाशपः (५।३।७ - ४७) शस्प्रभृतयः प्राक्समासान्तेभ्यः (५।४।४२–६७) मान्तः कृत्वोर्थः। तसिवती। नानाञाविति ॥**इति स्वरादिः**॥२॥

चादयोऽसत्त्वे ॥१।४।५७॥ च वा ह अह एव एवम् नूनम् शश्वत् यूपत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा त्वै द्वै न्वै रै (रे)

श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ ऌ ए ऐ ओ औ आदह उञ् उकञ् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा (वध्वा) धिक् हाहा हेहै (हहे) पाट् प्याट् आहो उताहो हो अहो नो (नौ) अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन बत (सम् वशम् शिकम् दिकम्) सनुकं शंवट् (छंबट्) शङ्के शुकम् खम् सनात् सनुतर् नहिकम् सत्यम् ऋतम् अद्धा इद्धा नोचेत् नचेत् नहि जातु कथम् कुतः कुत्र अव अनु हा हे (है) आहोस्वित् शम् कम् खम् दिष्ट्या पशु वट् सह (अनुषट्) आनुषक् अङ्ग फट् ताजक् भाजक् अये अरे वाट् (चाटु) कुम् खुम् घुम् अम् ईम् सीम् सिम् सि वै । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः ॥ **आकृतिगणोऽयम् ॥ इति चादयः ॥ ३ ॥**

प्रादयः ॥ १ । ४ । ५८ ॥ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप ॥ **इति प्रादयः ॥ ४ ॥**

ऊर्यादिच्विडाचश्च ॥ १ । ४ । ६१ ॥ ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला शंसकला ध्वंसकला भ्रंसकला गुलगुधा सजूस् सजुष् फल फली विक्ली आक्ली आलोष्ठी केवाली केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वश्मसा मसमसा मस्मसा औषट् श्रौषट् वौषट् वषट् स्वाहा स्वधा (बन्धा) पापी प्रादुस् श्रत् आविस् ॥ **इत्यूर्यादयः ॥ ५ ॥**

साक्षात्प्रभृतीनि च ॥ १ । ४ । ७४ ॥ साक्षात् मिथ्या चिन्ता भद्रा रोचना आस्था अमा अद्धा प्राजर्या प्राजरुहा बीजर्या बीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने प्रसहने प्रतपने प्रादुस् नमस् ॥ **आकृतिगणोऽयम् ॥ इति साक्षात्प्रभृतयः ॥ ६ ॥**

तिष्ठद्गुप्रभृतीनि च ॥ २ । १ । १७ ॥ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् (प्रोढम्) पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् (अपरदक्षिणम्) संप्रति असंप्रति । इच्च्त्ययः समासान्तः । (५ । ४ । १२७-१२८) ॥ **इति तिष्ठद्गुप्रभृतयः ॥ ७ ॥**

सप्तमी शौण्डैः ॥ २ । १ । ४० ॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण ॥ **इति शौण्डादयः ॥ ८ ॥**

पात्रे समितादयश्च ॥ २ । १ । ४८ ॥ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानमण्डूकः

नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्ष्वेडी गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भेतृप्तः आखनिकवकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरुचुरा ॥ **आकृतिगणोऽयम् ॥ इति पात्रेसमितादयः ॥ ९॥**

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ २।१।५६॥ व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव ॥ **इति व्याघ्रादयः ॥ १०॥ आकृतिगणोऽयम् ॥** तेन – मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः, इत्यादि ।

श्रेण्यादयः कृतादिभिः ॥ २।१।५९॥ श्रेणि एक पूग मुकुन्द राशि निचय विषय निधन पर इन्द्र देव मुण्ड भूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय (विशिष्ट) पटु पण्डित कुशल चपल निपुण कृपण ॥ **इत्येते श्रेण्यादयः ॥ ११॥** कृत मित मत भूत उक्त (युक्त) समाज्ञात समाम्नात समाख्यात संभावित (संसेवित) अवधारित अवकल्पित निराकृत उपकृत उपाकृत (दृष्ट कलित दलित उदाहृत विश्रुत उदित) ॥ **आकृतिगणोऽयम् ॥ इति कृतादयः ॥ १२॥**

शाकपार्थिवादीनामुपसंख्यानम् (वा० २।१।६०) शाकपार्थिव कुतुपसौश्रुत अजातौल्वलि ॥ **आकृतिगणोऽयम् ॥** कृतापकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका ॥ **इति शाकपार्थिवादयः ॥ १३॥**

कुमारः श्रमणादिभिः ॥ २।१।७०॥ श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ **इति श्रमणादयः ॥ १४॥**

मयूरव्यंसकादयश्च ॥ २।१।७२॥ मयूरव्यंसक छात्रव्यंसक कम्बोजमुण्ड यवनमुण्ड । छन्दसि । हस्तेगृह्य (हस्तगृह्य) पादेगृह्य (पादगृह्य) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय ॥ **एहीडादयोऽन्यपदार्थे ॥** एहीडं एहियवं एहिवाणिजा-क्रिया अपेहिवाणिजा प्रेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया प्रेहिद्वितीया एहिकटा अपेहिकटा प्रेहिकटा आहरकटा प्रेहिकर्दमा प्रोहकर्दमा विधमचूडा उद्धमचूडा (उद्धरचूडा) आहरचेला आहरवसना (आहरसेना) आहरवनिता (आहरविनता) कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् (नखप्रचम्) निश्चप्रचम् अकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी

निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया॥ **जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति॥** जहिजोडः। जहिजोडम्। जहिस्तम्बः। जहिस्तम्बम् (उज्जहिस्तम्बम्)॥ **आख्यातमाख्यातेन क्रिया सातत्ये॥** अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता। खादताचमता। आहरनिवपा। आहरनिष्किरा। आवपनिष्किरा। उत्पचविपचा भिन्धिलवणा कृन्धिविचक्षणा पचलवणा प्रचप्रकूटा॥ **आकृतिगणोऽयम्॥** तेन – अकुतोभयः। कान्दिशीकः। कान्देशीकः। आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् आवश्यकार्यम्॥ **इति मयूरव्यंसकादयः॥१५॥**

याजकादिभिश्च॥२।२।९॥ याजक पूजक परिचारक परिवेषक परिषेचक स्नापक अध्यापक उत्साह उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक **॥इति याजकादयः॥१६॥**

राजदन्तादिषु परम्॥२।२।३१॥ राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोप्तम् (अर्पितोतम्) उप्तगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दृषदुपलम् आरड्वायनि। आरग्वायनबन्धकी। चित्ररथ-बाह्लीकम्। अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वकसेनार्जुनौ अक्षिध्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् गोजवाजम् गोपालिधानपूलासम् गोपालधानीपूलासम् पूलासकारण्डम् पूलासककुरण्डम् स्थूलासम् स्थूलपूलासम् उशीरबीजम् (जिज्ञास्थि) सिञ्जास्थम् (सिञ्जाश्वत्थम्) चित्रास्वाती (चित्रस्वाती) भार्यापती दंपती जंपती जायापती पुत्रपती पुत्रपशू केशश्मश्रू शिरोविजु शिरोबीजम् शिरोजानु सर्पिर्मधुनी मधुसर्पिषी (आद्यन्तौ) अन्तादी गुणवृद्धी वृद्धिगुणौ॥ **इति राजदन्तादयः॥१६॥**

वाहिताग्न्यादिषु॥२।२।३७॥ आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत (मद्यपीत) ऊढभार्य गतार्थ **॥ आकृतिगणोऽयम्॥** तेन – गडुकण्ठ अस्युद्यत (अरमुद्यत) दण्डपाणिप्रभृतयोऽपि॥ **इत्याहिताग्न्यादयः॥१८॥**

कडाराः कर्मधारये॥२।२।३८॥ कडार गडुल खञ्ज खोड काण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गुल (पिङ्गल) तड तनु (जठर) बधिर मठर कञ्ज बर्बर॥ **इति कडारादयः॥१९॥**

नौकाकान्नशुकशृगालवर्जेषु (वा.२।३।१७) नौ काक अन्न शुक शृगाल॥ **इति नावादयः॥२०॥**

प्रकृत्यादिभ्य उपसंख्यानम् (वा०२।३।१८) प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र॥ **इति प्रकृत्यादयः॥२१॥**

गवाश्वप्रभृतीनि च ॥२।४।११॥ गवाश्वम् गवाविकम् गवैडकम् अजाविकम् अजैडकम् कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमाणवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिकम् उष्ट्रखरम् उष्ट्रशशम् मूत्रशकृत मूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम् (तृणोलपम्) दासीदासम् कुटीकुटम् भागवतीभागवतम् **॥इति गवाश्वप्रभृतीनि॥२२॥**

न दधिपय आदीनि ॥२।४।१४॥ दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ (परिवाट्कौशिकौ) प्रवर्ग्योपसदौ शुक्लकृष्णौ इध्माबर्हिषी दीक्षातपसी (श्रद्धातपसी मेधातपसी) अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्सामे वाङ्मनसे **॥इति दधिपय आदीनि॥२३॥**

अर्धर्चाः पुंसि च ॥२।४।३१॥ अर्धर्च गोमय कषाय कार्षापण कुपत कुसप (कुणप) कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारबाण (वारवारण) प्रोथ कपित्थ (शुष्क) शाल शील शुक्ल (शुल्क) शीधु कवच रेणु (ऋण) कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त बुस्त क्ष्वेडित शृङ्ग निगड (खल) मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख प्रग्रीव शूल वज्र कटक कण्टक (कर्पट) शिखर कल्क (वल्कल) नटमस्तक (नाटमस्तक) वलय कुसुम तृण पङ्क कुण्डल किरीट (कुमुद) अर्बुद अङ्कुश तिमिर आश्रय भूषण इक्कस (इष्वास) मुकुल वसन्त तटाक (तडाग) पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास (विशाल) चषाल (चखाल) खण्ड दर विटप (रण बल मक) मृणाल हस्त आर्द्र हल (सूत्र) ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल (छल) पुर (पुरा) राष्ट्र अम्बर बिम्ब कुट्टिम मण्डल (कुक्कुट) कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य (बाल) छाल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन (स्तन स्वर) संगम निष्क क्षेम शूक क्षत्रपवित्र (यौवन कलह) मालक (पालक) मूषिक (मण्डल वल्कल) कुज (कुञ्ज) विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन (लोमश) तमाल लोह दण्डक शपथ प्रतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल **॥इत्यर्धर्चादिः॥२४॥**

पैलादिभ्यश्च॥२।४।५९॥ पैल शालङ्कि सात्यकि सात्यंकामि राहवि रावणि औदञ्चि औदव्रजि औदमेधि औदव्यञ्जि (औदमज्जि औदभृज्जि) दैवस्थानि पैङ्गलौदायनि राहक्षति भौलिङ्गि राणि औदन्यि औद्गाहमानि औज्जिहानि औदशुद्धि तद्राजाच्चाणः

(तद्राज) ॥ **आकृतिगणोऽयम् ॥ इति पैलादिः ॥ २५॥**

न तौल्वलिभ्यः ॥ २।४।६१॥ तौल्वलि धारणि पारणि रावणि दैलीपि दैवति वार्कलि नैवति (नैवकि) दैवमित्रि (दैवमति) दैवयज्ञि चाफट्टकि बैल्वकि वैकि (वैङ्कि) आनुहारति (आनुराहति) पौष्करसादि आनुरोहति आनुति प्रादोहनि नैमिश्रि प्राडाहति बान्धकि वैशीति आसिनासि आहिंसि आसुरी नैमिषि आसिबन्धकि पौष्पि कारेणुपालि वैकर्णि वैरकि वैहति ॥ **इति तौल्वल्यादिः ॥ २६॥**

यस्कादिभ्यो गोत्रे ॥ २।४।६३॥ यस्क लह्य द्रुह्य अयस्थूण (अयःस्थूण) तृणकर्ण सदामत्त कम्बलहार बहिर्योग पर्णाढक कर्णाढक पिण्डीजङ्घ वकसस्थ (वकसक्थ) विश्रि कुद्रि अजवस्ति मित्रयु रक्षोमुख जङ्घारथ उत्कास कटुक मथक (मन्थक) पुष्करट् (पुष्करसद्) विषपुट उपरिमेखल क्रोष्टुकमान (क्रोष्टुमान) क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्षुक भलन्दन भडिल भण्डिल भडित ॥ **एते यस्कादयः ॥ २७॥**

न गोपवनादिभ्यः ॥ २।४।६७॥ गोपवन शेयु (शिग्रु) विन्दु भाजन अश्वावतान श्यामाक (श्योनाक) श्यामक श्यापर्ण ॥ **बिदाद्यन्तर्गणोऽयम् ॥ ४।१।१०४॥ गोपवनादिः ॥ २८॥**

तिककितवादिभ्यो द्वन्द्वे ॥ २।४।६८॥ तिककितवाः वङ्खरभण्डीरथाः उपकलमकाः पफकनरकाः बकनखगुदपरिणद्धाः उब्जककुभाः लङ्घशान्तमुखाः उत्तरशलङ्कटाः कृष्णाजिनकृष्णसुन्दराः भ्रष्टककपिष्ठलाः अग्निवेशदशेरुकाः ॥ **एतं तिककितवादयः ॥ २९॥**

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ॥ २।४।६९॥ उपक लमक भ्राष्ट्रक कपिष्ठल कृष्णाजिन कृष्णसुन्दर चूडारक आडारक गडुक उदङ्क सुधायुक अबन्धक पिङ्गलक पिष्टक सुपिष्ट (सुपिष्ठ) मयूरकर्ण खरीजङ्घ शलाथल पतञ्जल पदञ्जल कठेरणि कुषीतक कशकृत्स्न (काशकृत्स्न) निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्णक जटिरक बधिरक जन्तुक अनुलोम अनुपद प्रतिलोम अपजग्ध प्रतान अनभिहित कमक वराटक लेखाभ्र कमन्दक पिञ्जूलक वर्णक मसूरकर्ण मदाघ कवन्तक कमन्तक कदामत्त दामकण्ठ ॥ **एते उपकादयः ॥ ३०॥**

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥ ३।१।१२॥ भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् संश्चत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस् ॥ **एते भृशादयः ॥ ३१॥**

लोहितादिडाज्भ्यः क्यष्॥३।१।१३॥ लोहित चरित नील फेन मद्र हरित दास मन्द ॥**लोहितादिराकृतिगणः॥३२॥**

सुखादिभ्यः कर्तृवेदनायाम्॥३।१।१८॥ सुख दुःख तृप्त कृच्छ्र अस्र आस्र अलीक प्रतीप करुण कृपण सोढ ॥**इत्येतानि सुखादीनि॥३३॥**

कण्ड्वादिभ्यो यक्॥३।१।२७॥ कण्डूञ् मन्तु ह्रणीङ् वल्गु असु (मनस्) महीङ् लाट् लेट् इरस् इरज् इरञ् दुवस् उषस् वेट् मेधा कुषुभ (नमस्) मगध तन्तस पम्पस् (पपस्) सुख दुःख (मिक्ष चरण चरम अवर) सपर अरर (अरर्) भिषज् भिष्णज् (अपर आर) इषुध वरण चुरण तुरण भुरण गद्गद एला केला खेला (बेला शेला) लिट् लोट् (लेखा लेख) रेखा द्रवस् तिरस् अगद उरस् तरण (तरिण) पयस् संभूयस् सम्बर॥**आकृतिगणोऽयम्॥ इति कण्ड्वादिः॥३४॥**

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः॥३।१।१३४॥ नन्दिवाशिमदिदूषिसाधि-वर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्। नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः। सहितपिदमः संज्ञायाम्। सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः संकर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुलदमनः (शत्रुदमनः)॥**इति नन्द्यादिः॥३५॥** ग्राही उत्साही उद्दासी उद्भासी स्थायी मन्त्री संमर्दी। रक्षश्रुवपशां नौ। निरक्षी निश्रावी निवापी निशायी। याचृव्याहृसंव्याहृ-व्रजवदवसां प्रतिषिद्धानाम्। अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी। अचामचित्तकर्तृकाणाम् अकारी अहारी अविनायी (विशायी विषायी) विशयी विषयी देशे। विशयी विषयी देशः। अभिभावी भूते। अपराधी उपरोधी परिभवी परिभावी॥**इति ग्राह्यादिः॥३६॥** पच वच वप वद चल पत नदट् भषट् प्लवट् चरट् गरट् तरट् चोरट् गाहट् सरट् देवट् (दोषट्) जर (रज) मर (मद) क्षम (क्षप) सेव मेष कोप (कोष) मेघ नर्त व्रण दर्श सर्प (दम्भ दर्प) जारभार श्वपच ॥**पचादिराकृतिगणः॥३७॥**

कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् (वा. ३।२।५) मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्र गिध्र ॥**आकृतिगणोऽयम्॥इति मूलविभुजादयः॥३८॥**

पार्श्वादिषूपसंख्यानम् (वा. ३।२।१५) पार्श्व उदर पृष्ठ उत्तान अवमूर्धन॥**इति पार्श्वादिः॥३९॥**

भविष्यति गम्यादयः॥३।३।३॥ गमी आगमी भावी प्रस्थायी प्रतिरोधी प्रतियोधी प्रतिबोधी प्रतियायी प्रतियोगी॥**एते गम्यादयः॥४०॥**

संपदादिभ्यः क्विप् (वा. ३।३।९४) संपद् विपद् आपद् प्रतिपद् परिषद् ॥**एते संपदादयः॥४१॥**

षिद्भिदादिभ्योऽङ् ॥३।३।१०४॥ भिदा विदारणे। छिदा द्वैधीकरणे । विदा । क्षिपा। गुहा गिर्योषध्योः। श्रद्धा मेधा गोधा। आरा शस्त्र्याम्। हारा। कारा बन्धने। क्षिया। तारा ज्योतिषि । धारा प्रपातने। रेखा चूडा पीडा वपा वसा मृजा। क्रपेः संप्रसारणं च। कृपा ॥**इति भिदादिः**॥४२॥

भीमादयोऽपादाने॥३।४।७४॥ भीम भीष्म भयानक वह चर (वह चरु) प्रस्कन्दन प्रतपन (प्रपतन) समुद्र सुव सुक वृष्टि (दृष्टि) रक्षः संकसुक (शङ्कु सुक) मूर्ख खलति॥ **आकृतिगणोऽयम्**॥ **इति भीमादिः**॥४३॥

अजाद्यतष्टाप् ॥४।१।४॥ अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापिहाणा (पूर्वापहाणा) अपरापहाणा। संभस्राजिनशणपिण्डेभ्यः फलात्। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्। शूद्रा चामहत्पूर्वा जातिः। क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा। मध्यमा पुंयोगेऽपि। मूलान्नजः। द्रंष्ट्रा॥ **एतेऽजादयः**॥४४॥

न षट्स्वस्रादिभ्यः॥४।१।१०॥ स्वसृ दुहितृ ननान्दृ यातृ मातृ तिसृ चतसृ ॥**इति स्वस्रादिः**॥४५॥

नित्यं सपत्न्यादिषु॥४।१।३५॥ समान एक वीर पिण्ड श्व (शिरी) भ्रातृ भद्र पुत्र। दासाच्छन्दसि॥**इति समानादिः**॥४६॥

षिद्गौरादिभ्यश्च॥४।१।४१॥ गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य (पुट् तूण) द्रुण द्रोण हरिण कोकण (काकण) पटर उणक (आमल) आमलक कुबल बिम्ब बदर फर्करक (कर्करक) तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल षाण्डश आढक आनन्द आश्वत्थ सृपाट आखक (आपच्चिक) शष्कुल सूर्य (सूर्म) शूर्प सूप यूष (पूष) यूथ सूप मेथ वल्लक घातक सल्लक माल्लक मालत साल्वक वेतस वृक्ष (वृस) अतस (उभय) भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनडुही अनड्वाही।-एषणः करणे। देह देहल काकादन गवादन तेजन रजन लवण औद्गाहमानि आद्गाहमानि गौतम (गोतम) (पारक) अयस्थूण (अयःस्थूण) भौरिकि भौलिकि भौलिङ्गि मान मेघ आलम्बि आलजि आलब्धि आलक्षि केवाल आपक आरट नट टोट नोट मूलाट शातन (पोतन) पातन पाठन (पानठ) आस्तरण अधिकरण अधिकार अग्रहायणी (आग्रहायणी) प्रत्यवरोहिणी (सेचन)। सुमङ्गला-त्संज्ञायाम्। अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड (षण्ड) उर्द गुर्द शम सूद औड (आर्द्र) ह्रद (ह्रद) पाण्ड (भाण्डल) भाण्ड (लोहाण्ड) कदर कन्दर कदल तरुण तलुन कल्माष बृहत् महत् (सोम) सौधर्म। रोहिणी नक्षत्रे। रेवती नक्षत्रे। विकल निष्कल पुष्कल।

कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली हरितकी (हरीतकी) कोशातकी शमी वरी शरी पृथिवी क्रोष्टु मातामह पितामह ॥**इति गौरादिः॥४७॥**

बह्वादिभ्यश्च ॥४।१।४५॥ बहु पद्धति अञ्चति अङ्कति अंहति शकटि (शकति)। शक्ति : शस्त्रे । शारि वारि राति राधि (शाधि) अहि कपि यष्टि मुनि । इतः प्राण्यङ्गात् । कृदिकारादक्तिनः । सर्वतोऽक्तिन्नर्थादित्येके । चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज । चन्द्रभागान्नद्याम् (चन्द्रभागा नद्याम्) । कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद ॥**आकृतिगणोऽयम्** ॥ तेन – भग गल राग इत्यादि ॥ **इति बह्वादयः॥४८॥**

शार्ङ्गरवाद्यञो ङीन्॥४।१।७३॥ शार्ङ्गरव कापटव गौग्गुलव ब्राह्मण बैद गौतम कामण्डलेय ब्राह्मणकृतेय (आनिचेय) आनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकस काप्य (काव्य) शैब्य एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वतण्ड। भोगवद्गौरिमतोः संज्ञायां घादिषु (६।३।४३) नित्यं ह्रस्वार्थम् । नृनरयोर्वृद्धिश्च **॥इति शार्ङ्गरवादिः॥४९॥**

क्रौड्यादिभ्यश्च॥४।१।८०॥ क्रौडि लाडि व्याडि आपिशलि आपक्षिति चौपयत चैटयत (वैटयत) सैकयत बैल्वयत सौधातकि । सूत युवत्याम् । भोज क्षत्रिये । यौतकि कौटि भौरिकि भौलिकि (शाल्मलि) शालास्थलि कपिष्ठलि गौकक्ष्य ॥**इति क्रौड्यादिः॥५०॥**

अश्वपत्यादिभ्यश्च॥४।१।८४॥ अश्वपति (ज्ञानपति) शतपति धनपति गणपति (स्थानपति यज्ञपति) राष्ट्रपति कुलपति गृहपति (पशुपति) धान्यपति धन्वपति (बन्धुपति धर्मपति) सभापति प्राणपति क्षेत्रपति ॥**इत्यश्वपत्यादिः॥५१॥**

उत्सादिभ्योऽञ्॥४।१।८६॥ उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुन । वष्कयासे । पृथिवी (धेनु) पङ्क्ति जगति त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण । उदस्थान देशे । पृषदंश भल्लकीय रथंतर मध्यंदिन बृहत् महत् सत्त्वत् कुरु पञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव । ग्रीष्मादच्छन्दसि ॥**इत्युत्सादिः॥५२॥**

बाह्वादिभ्यश्च॥४।१।९६॥ बाहु उपबाहु उपवाकु निवाकु शिवाकु वटाकु उपनिन्दु (उपविन्दु) वृषली वृकला चूडा बलाका मूषिका कुशला भगला (छगला) ध्रुवका (ध्रुवका) सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् (भद्रशर्मन्) सुशर्मन् कुनामन् (सुनामन्) पञ्चन् सप्तन् अष्टन् । अमितौजसः सलोपश्च । मुधावत् उदञ्चु शिरस् माष शराविन् मरीचि क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्रकारमर्दिन् लोमन्

अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम रक्तम् (उदङ्क) उदकः संज्ञायाम्। संभूयोम्भसो सलोपश्च ॥**आकृतिगणोऽयम्**॥ तेन– सात्त्वकिः सात्यकिः जाङ्घ्रिः ऐन्दशर्भिः आजधेनविः इत्यादि ॥**इति बाह्वादयः**॥५३॥

गोत्रे कुञ्जादिभ्यश्चफञ्॥४।१।९८॥ कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् शठ शाक शुण्डा शुभ विपाश् स्कन्द स्कम्भ ॥**इति कुञ्जादिः**॥५४॥

नडादिभ्यः फक्॥४।१।९९॥ नड चर (वर) बक मुञ्ज इतिक इतिश उपक (एक) लमक शलङ्कु शलङ्कं च। सप्तल वा जप्य तिक। अग्निशर्मन्वृषगणे। प्राण नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल (कातर) कातल काश्यप (कुश्यप) काश्य काल्य (काव्य) अज अमुष्य (अमुष्म) कृष्णरणौ ब्राह्मणवासिष्ठे। अमित्र लिगु चित्र कुमार क्रोष्टु क्रोष्टं च। लोह दुर्ग स्तम्भ शिंशपा अग्र तृण शकट सुमनस् सुमत मिमत ऋच् जलन्धर अध्वर युगन्धर हंसक दण्डिन् हस्तिन् (पिण्ड) पञ्चाल चमसिन् सुकृत्य स्थिरक ब्राह्मण चटक बदर अश्वल खरप लङ्क इन्ध अस्त्र कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्डप ॥**इति नडादिः**॥५५॥

अनृष्यानन्तर्ये बिदादिभ्योऽञ् ॥४।१।१०४॥ बिद उर्व (उर्ब) कश्यप कुशिक भरद्वाज उपमन्यु किलात कन्दर्प (किंदर्भ) विश्वानर ऋषिषेण (ऋष्टषेण) ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत् शुनक (शुनक्) धेनु गोपवन शिग्रु बिन्दु (भोगक) भाजन (शमिक) अश्वावतान श्यामाक श्यामक (श्यावलि) श्यापर्ण हरित किंदास बह्यस्क अर्कजूष (अर्कलूष) बध्योग विष्णुवृद्ध प्रतिबोध रचित (रथीतर) रथन्तर गविष्ठिर निषाद (शबर अलस) मठर (मृडाकु) सूपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्दृ। परस्त्री परशुं च ॥**इति बिदादिः**॥५६॥

गर्गादिभ्यो यञ्॥४।१।१०५॥ गर्ग वत्स। वाजासे। संस्कृति अज व्याघ्रपात् विदभृत् प्राचीनयोग (अगस्ति) पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक एक धूम अवट मनस् धनञ्जय वृक्ष विश्वावसु जरमाण लोहित शंसित बभ्रु वल्गु मण्डु गण्डु शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष तृक्ष (वृक्ष) (तनु) तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत (कपि कत) कुरुकत अनुडुह कण्व शकल गोकक्ष अगस्त्य कण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शाण्डिल वर्णक (चणक) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण (जातूकर्ण) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अदरक (अररक) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज (भिषज्) (भिष्णज) भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलु पिप्पलू बृहदग्नि (सुलोहिन्) सुलाभिन् उक्थ कुटीगु ॥**इति गर्गादिः**॥५७॥

अश्वादिभ्यः फञ् ॥४।१।११०॥ अश्व अश्मन् शङ्ख शूद्रक विद पुट रोहिण खर्जूर (खजूर) (खञ्जार वस्त) पिजूल भडिल भण्डिल भडित भण्डित (प्रकृत रामोद) क्षान्त (काश तीक्ष्ण गोलाङ्ग अर्क स्वर स्फुट चक्र श्रविष्ठ) पविन्द पवित्र गोमिन् श्याम धूम धूम्र वाग्मिम् विश्वानर कुट । शप आत्रेये । जन जड खड ग्रीष्म अर्ह कित विशंप विशाल गिरि चपल चुप दासक बैल्य (बैल्व) प्राच्य (धर्म्य) आनडुह्य । पुंसि जाते । अर्जुन (प्रहृत) सुमनस् दुर्मनस् मन (मनन) (प्रान्त) ध्वन । आत्रेय भरद्वाजे । भरद्वाज आत्रेये । उत्स आतव कितव (वद धन्य पाद) शिव खदिर ॥**इत्यश्वादिः ॥५८॥**

शिवादिभ्योऽण् ॥४।१।११२॥ शिव प्रोष्ठ प्रोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ (ककुभा) अनभिम्लान कोहित सुख संधि मुनि ककुत्स्थ कहोड कोहड कहूय कहय रोद कपिञ्जल (कुपिञ्जल) खञ्जन वतण्ड तृणकर्ण क्षीरह्रद जलह्रद परिल (पथिक) पिष्ट हैहय (पार्षिका) गोपिका कपिलिका जटिलिका बधिरिका मञ्जीरक मजिरक वृष्णिक खञ्जास खञ्जाद खञ्जार खञ्जाल (कर्मार) रेख लेख आलेखन विश्रवण रवण वर्तनाक्ष ग्रीवाक्ष (पिटक विटप) पिटाक तृक्षाक नभक उर्णनाभ जरत्कारु (पृथा उत्क्षेप) पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत (अर्यश्वेत) सुपिष्ट मसुरकर्ण मयूरकर्ण (खर्जूरकर्ण) कदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश यस्क लह्य द्रुह्य अयस्थूण तृणकर्ण (तृण कर्ण) पर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी (इलासपत्नी)। द्वयचो नद्याः। त्रिवेणी त्रिवणं च **॥इति शिवादिः॥ आकृतिगणः॥५९॥**

शुभ्रादिभ्यश्च ॥४।१।१२३॥ शुभ्र विष्ट पुर (विष्टपुर) ब्रह्मकृत शतद्वार शलाथल शलाकाभ्रू लेखाभ्रू (लेखाभ्र) विकंसा (विकास) रोहिणी रुक्मिणी धर्मिणी दिश् शालूक अजबस्ति शकंधि विमातृ विधवा शुक विश देवतर शकुनि शुक्र उग्र ज्ञातल (शातल) (शतल) बन्धकी सृकण्डु विस्नि अतिथि गोदन्त कुशाम्ब मकष्टु शाताहर पवष्टुरिक सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा कृकलास अणीव प्रवाहण भरत (भारत) भरम भृकण्डु कर्पूर इतर अन्यतर आलीढ सुदन्त सुदक्ष सुवक्षस् सुदामन् कद्रु तुद अकशाय कुमारिका कुठारिका किशोरिका अम्बिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खडूर कुबेरिका अशोका गन्धपिङ्गला खडोन्मत्ता अनुदृष्टिन् (अनुदृष्टि) जरतिन् बलीवर्दिन् विप्र बीज जीव श्वन् अश्मन् अश्व अजिर **॥इति शुभ्रादिः॥ आकृतिगणः॥६०॥**

कल्याण्यादीनामिनङ् च ॥४।१।१२६॥ कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृति (अनुसृष्टि) जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री **॥इति कल्याण्यादिः॥६१॥**

गृष्ट्यादिभ्यश्च ॥४।१।१३६॥ गृष्टि हृष्टि बलि हलि विश्रि कुदि अजबस्ति मित्रयु ॥**इति गृष्ट्यादिः ॥६२॥**

रेवत्यादिभ्यष्ठक् ॥४।१।१४६॥ रेवती अश्वपाली मणिपाली द्वारपाली वृकवञ्चिन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह कुक्कुटाक्ष (ककुदाक्ष) चामरग्राह ॥**इति रेवत्यादिः ॥६३॥**

कुर्वादिभ्यो ण्यः ॥४।१।१५१॥ कुरु गर्गर मङ्गुष अजमार रथकार वावदूक । सम्राजः क्षत्रिये । कवि मति (विमति) कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रजाली एजि वातकि दामौष्णीषि गणकारि कैशोरि कुट शालाका (शलाका) मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी । वेनाच्छन्दसि । शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यकार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाक शालिन् शालीन कर्तृ हर्तृ इन पिण्डी तक्षन् । वामरथस्य कण्वादिवत्स्वरवर्जम् ॥**इति कुर्वादिः ॥६४॥**

तिकादिभ्यः फिञ् ॥४।१।१५४॥ तिक कितव संज्ञाबालशिख (संज्ञा बाला शिखा) उरस् शाठ्य सैन्धव यमुन्द रूप्य ग्राम्य नील अमित्र गोकक्ष गोकक्ष्य (गौकक्ष्य) कुरु देवरथ तैतिल औरस् कौरव्य भौरिकि भौलिकि चौपयत चैटयत शीकयत क्षैतयत वाजवत चन्द्रमस् शुभ गङ्गा वरेण्य सुपामन् आरब्ध वाह्यक स्वल्पक वृष लोमक वादन्य उदन्य यज्ञ ॥**इति तिकादिः ॥६५॥**

वाकिनादीनां कुक्च ॥४।१।१५८॥ वाकिन गौधेर कार्कश काक लङ्का । चर्मिवर्मिणोर्नलोपश्च ॥**इति वाकिनादिः ॥६६॥**

कम्बोजाल्लुक् ॥ ४।१।१७५ ॥ कम्बोज चोल केरल शक यवन ॥**इति कम्बोजादिः ॥६७॥**

न प्राच्यभर्गादियौधेयादिभ्यः ॥४।१।१७८॥ भर्ग करूश केकय कश्मीर शाल्व सुस्थाल उरस् कौरव्य (१) ॥**इति भर्गादिः ॥६८॥** यौधेय शौक्रेय शौभ्रेय ज्यावाणेय धौर्तेय धार्तेय त्रिगर्त भरत उशीनर (२) ॥**इति यौधेयादिः ॥६९॥**

भिक्षादिभ्योऽण् ॥४।२।३८॥ भिक्षागर्भिणी (भिक्षा गर्भिणी) क्षेत्र करीष अङ्गार (अङ्गार) चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा (भूत) भरत विषय श्रोत्र ॥**इति भिक्षादिः ॥७०॥**

खण्डिकादिभ्यश्च ॥४।२।४५॥ खण्डिका वडवा । क्षुद्रकमालवात् सेनासंज्ञायाम् । भिक्षुक शुक उलूक श्वन् अहन् युगवरत्रा (युगवरत्र) हलबन्धा (हलबन्ध) ॥**इति खण्डिकादिः ॥७१॥**

पाशादिभ्यो यः ॥४।२।४९॥ पाश तृण धूम वात अङ्गार पाटल पोत गल पिटक पिटाक शकट हल नट वन **॥इति पाशादिः॥७२॥**

खलादिभ्य इनिर्वक्तव्यः (वा. ४।२।५१) खल डाक कुटुम्ब शाक कुण्डलिनी **॥इति खलादिराकृतिगणः॥७३॥**

राजन्यादिभ्यो वुञ् ॥४।२।५३॥ राजन्य आनृत बाभ्रव्य शालङ्कायन दैवयातव (दैवयात्) (अव्रीड वरत्रा) जालंधरायण (राजायन) तेलु आत्मकामेय अम्बरीषपुत्र वसाति बैल्ववन शैलूष उदुम्बर तीव्र बैल्वल आर्जुनायन संप्रिय दाक्षि उर्णनाभ **॥इति राजन्यादिराकृतिगणः॥७४॥**

भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥४।२।५४॥ भौरिकी भौलिकी चौपयत चौटयत (चैटयत) काणेय वाणिजक वाणिकाज्य (वालिकाज्य) सैकयत वैकयत (१) **॥ इति भौरिक्यादिः॥७५॥** ऐषुकारि सारस्यायन (सारसायन) चान्द्रायण द्व्याक्षायण त्र्याक्षायण औडायन जौलायन खाडायन दासमित्र (दासमित्रि) दासमित्रायण शौद्रायण दाक्षायण शापण्डायन (शायण्डायन) तार्क्ष्यायण शौभ्रायण सौवीर (सौवीरायण) शपण्ड (शयण्ड) शौण्ड शयाण्डि (शयाण्ड) वैश्वमानव वैश्वध्येनव (वैश्वधेनव) नड तुण्डदेव विश्वदेव (सापिण्डि) (२) **॥इत्यैषुकार्यादिः॥७६॥**

क्रतूक्थादिसूत्रान्ताट्ठक् ॥४।२।६०॥ उक्थ लोकायत न्यास न्याय पुनरुक्त निरुक्त निमित्त द्विपदा ज्योतिष अनुपद अनुकल्प यज्ञ धर्म चर्चा क्रमेतर श्लक्ष (श्लक्ष्ण) (श्लक्षण) संहिता पदक्रम संघट (संघट्ट) वृत्ति परिषद् संग्रह गण (गुण) आयुर्देव (आयुर्वेद) **॥इत्युक्थादिः॥७७॥**

क्रमादिभ्यो वुन् ॥४।२।६१॥ क्रम पद शिक्षा मीमांसा सामन् **॥इति क्रमादिः॥७८॥**

वसन्तादिभ्यष्ठक् ॥४।२।६३॥ वसन्त ग्रीष्म वर्षा शरद् शरत् हेमन्त शिशिर प्रथम गुण (चरम्) चरम अनुगुण अथर्वन् अथर्वण **॥इति वसन्तादिः॥७९॥**

संकलादिभ्यश्च ॥४।२।७५॥ संकल पुष्कल उत्तम उडुप उद्वेप उत्पुट कुम्भ निधान सुदक्ष सुदत्त सूभूत सूपूत सुनेत्र सुमङ्गल सुपिङ्गल सूत सिकत पूतिका (पूतिक) पूलास कूलास पलाश निवेश (गवेश) (गवेष) गम्भीर इतर आन् अहन् लोमन् वेमन् चरण (वरुण) बहुल सद्योज अभिषिक्त गोभृत् राजभृत् भल्ल मल्ल माल **॥इति संकलादिः॥८०॥**

सुवास्त्वादिभ्योऽण् ॥४।२।७७॥ सुवास्तु (सुवस्तु) वर्णू भण्डु खण्डु (सेवानिन्) सेवालिन् कर्पूरिन् शिखण्डिन् गर्त कर्कश शकटीकर्ण (शकटी कर्ण) कृष्णकर्ण (कर्क) कर्कन्धुमती गोह अहिसक्थ **॥इति सुवास्त्वादिः॥८१॥**

वुञ्छण्कठजिलसेनिरढञ्ण्ययूफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ॥४।२।८०॥ अरीहण (अहीरण) द्रुघण द्रुहण भलग (भंगल) उलन्द किरण सांपरायण क्रौष्ट्रायन (क्राष्ट्रायण) औष्ट्रायण त्रैगर्तायन मैत्रायण भास्त्रायण वैमतायण (वैमतायन) गौमतायन सौमतायन (सौमनायन) सौसायन धौमतायन सौमायन ऐन्द्रायण कौद्रायण (कौन्द्रायण) खाडायन शाण्डिल्यायन रायस्पोष विपथ विपाश उद्दण्ड उदञ्चन खाण्डवीरण वीरण काशकृत्स्न (कशकृत्स्न) जाम्बवत शिंशपा रैवत (रेवत) बिल्व सुयज्ञ शिरीष बधिर जम्बु खदिर सुशर्मन् (सशर्मन्) (भलतृ) दलतृ भलन्दन खण्डु कलन (कनल) (वालन) यज्ञदत्त (१) **॥इत्यरीहणादिः ॥८२॥** कृशाश्व अरिष्ट अरिश्म वेश्मन् विशाल लोमश रोमश लोमक रोमक शबल कूट वर्चल सुवर्चल सुकर सूकर प्रातर (प्रतर) सदृश पुरग पुराग सुख (मुख) धूम अजिन विनत अवनत कुविद्यास (कुविट्यास) पराशर अरुस् अयस् मौद्गल्याकर (मौद्गल्युकर) (२) **॥ इति कृशाश्वादिः ॥८३॥** ऋश्य (ऋष्य) हृश्य न्यग्रोध शर निलीन (निवास निवात) निधान निबन्धन (निबन्ध) (विबद्ध) परिगूढ (उपगूढ) असनि सित मत् वेश्मन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुह (अनडुह्) अरडु परिवंश वेणु वीरण (वरिण) खण्ड दण्ड परिवृत्त कर्दम अंशु (३) **॥ इत्यृश्यादिः ॥८४॥** कुमुद शर्करा न्यग्रोध इक्कट संकट कंकट गर्त बीज परिवाप निर्यास शकर कच मधु शिरीष अश्व अश्वत्थ बल्वज यवास कूप विकङ्कत दशग्राम (४)॥ **इति कुमुदादिः ॥८५॥** काश पाश अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुह बिस तृण कर्पूर बर्बर मधुर ग्रह कपित्थ जतु सीपाल (५) **॥इति काशादिः ॥८६॥** तृण नड मूल वन पर्ण वर्ण वराण बिल (विल) पुल फल अर्जुन अर्ण सुवर्ण बल चरण बुस (६)**॥इति तृणादिः ॥८७॥** प्रेक्षा फलका (हलका) बन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट संकट कट कूप बुक पुक पुट मह परिवाप यवाष धुवका गर्त कूपक हिरण्य (६) **॥ इति प्रेक्षादिः ॥८८॥** अश्मन् (अश्मन) यूथ ऊष मीन मद (नद) दर्भ वृन्द गुद खण्ड नग शिखा कोट पाम कन्द कान्द कुल गह्व गुड (गुण) कुण्डल पीन गुह (८) **॥ इत्यश्मादिः ॥८९॥** सखि अग्निदत्त वायुदत्त सखिदत्त (गोपिल) भल्लपाल (भल्ल पाल) चक्र चक्रवाक छगल अशोक करवीर वासव वीर पूर वज्र कुशीरक शीहर (सीहर) सरक सरस समर समल सुरस रोह तमाल कदल सप्तल (९) **॥इति सख्यादिः ॥९०॥** संकाश कपिल कश्मीर (समीर) सूरसेन सरक सूर । सुपन्थिन्पन्थ च । यूप (यूथ) अंश अङ्ग नासा पलित अनु नाश (कनुनाश) अश्मन् कूट मलिन दश कुम्भ शीर्ष चिरन्त (विरत) समल सीर पञ्जर मन्थ नल रोमन् लोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका (१०) **॥ इति संकाशादिः ॥९१॥** बल चुल नल दल वट लकुल उरल पुख (पुल) मूल उलडुल (उल डुल) वन कुल (वनकुल)

(११) ॥**इति बलादिः** ॥ ९२॥ पक्ष तुक्ष तुष कुण्ड अण्ड कम्बलिका वलिक (बलिक) चित्र अस्ति। पथः पन्थ च। कुम्भ सीरक सरक सकल सरस समल अतिश्वन् रोमन् लोमन् हास्तिन् मकर लोमक शीर्ष निवात पाक सहक (सिंहक) अङ्कुश सुवर्णक हंसक हिंसक कुत्स बिल (विल) खिल यमल हस्त कला सकर्णक (१२) ॥ **इति पक्षादिः** ॥ ९३॥ कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिग (स्फिज्) कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवत् (आण्डीवत) जव जैत्र आकन (आनक) (१३) ॥**इति कर्णादिः** ॥ ९४॥ सुतंगम मुनिचित विप्रचित्त महाचित्त महापुत्र स्वन श्वेत गडिक (खडिक) शुक्र विग्र (विप्र) बीजावापिन् (बीजवापिन्) (बीज वापिन्) अर्जुन श्वन् अजिर जीवं (खण्डित) खण्डिन कर्ण विग्रह (१४) ॥**इति सुतंगमादिः** ॥ ९५॥ प्रगदिन् मगदिन् मददिन् कविल खण्डित गदित चूडार मडार मन्दार कोविदार (१५) ॥**इति प्रगद्यादिः** ॥ ९६॥ वराह पलाशा (पलाश) शेरिष (शेरीष) (शिरीष) पिनद्ध निबद्ध बलाह स्थूल विदग्ध (विजग्ध) विभग्न (निमग्न) बाहु खदिर शर्करा (१६) ॥ **इति वराहादिः** ॥ ९७॥ कुमुद गोमथ रथकार दशग्राम अश्वत्थ शाल्मलि (शिरीष) मुनिस्थल कुण्डल (कुट) कूट मधुकर्ण घासकुन्द शुचिकर्ण (१७) ॥**इति कुमुदादिः** ॥ ९८॥

वरणादिभ्यश्च ॥ ४।२।८२॥ वरणा शृङ्गी शाल्मलि शुण्डि (शुण्डी) शयाण्डी पर्णी ताम्रपर्णी गोद आलिङ्ग्यायन जालपदी (जानपदी) जम्बू पुष्कर चम्पा पम्पा वल्गु उज्जयिनी गया मथुरा तक्षशिला उरसा गोमती वलभी ॥ **इति वरणादिः** ॥ ९९॥

मध्वादिभ्यश्च ॥ ४।२।८६॥ मधु बिस स्थाणु वेणु कर्कन्धु शमी करीर हिम किशरा शर्याण मरुत् वार्दली शर इष्टका आसुति शक्ति आसन्दी शकल शलाका आमिषी इक्षु रोमन् रुष्टि रुष्य तक्षशिला कड (खड) वट वेट ॥**इति मध्वादिः** ॥ १००॥

उत्करादिभ्यश्छः ॥ ४।२।९०॥ उत्कर संफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण खलाजिन तिक कितव अणक त्रैवण पिचुक अश्वत्थ काश क्षुद्र भस्त्रा शाल जन्या अजिर चर्मन् उल्क्रोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवाकव तृण वृक्ष शाक पलाश विजिगीषा अनेक आतप फल संपर अर्क गर्त अग्नि वैराणक इडा अरण्य निशान्त पर्ण (पण) नीचायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागार मन्त्रणार्ह इन्द्रवृक्ष नितान्तवृक्ष (नितान्तावृक्ष) आर्द्रवृक्ष ॥ **इत्युत्करादिः** ॥ १०१॥

नडादीनां कुक्च ॥ ४।२।९१॥ नड प्लक्ष बिल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण। क्रुञ्चा ह्रस्वत्वं च। तक्षन्नलोपश्च ॥**इति नडादिः** ॥ १०२॥

कत्र्यादिभ्यो ढकञ् ॥ ४।२।९५॥ कत्रि उम्भि पुष्कर पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उख्या ग्राम। कुड्याया यलोपश्च ॥**इति कत्र्यादिः** ॥ १०३॥

नद्यादिभ्यो ढक्॥४।२।९७॥ नदी मही वाराणसी श्रावस्ती कौशाम्बी वनकौशाम्बी (वनकोशाम्बी) काशपरी काशफारी (काशफरी) खादिरी पूर्वनगरी पाठा माया शाल्वा दार्वा (शाल्वदार्वा) सेतकी । वडवाया वृषे॥**इति नद्यादिः॥१०४॥**

प्रस्थोत्तरपदपलद्यादिकोपधादण्॥४।२।११०॥ पलदी परीषद् रोमक वाहीक कलकीट बहुकीट जालकीट (जालकटि) कमलकीट कमलकीकर कमलभिदा गौष्ठी नैकती परिखा शूरसेन गोमती पटच्चर उदपान यकृल्लोम **॥इति पलद्यादिः॥१०५॥**

काश्यादिभ्यष्ठञ्ञिटौ॥४।२।११६॥ काशि चेदि (वेदि) सांयाति संवाह अच्युत मोदमान शकुलाद हस्तिकर्षू कुनामन् (हिरण्या) हिरण्य करण गोवासन भारद्वी अरिंदम अरित्र देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दासमित्र सुधामित्र सोममित्र छागमित्र साधमित्र (सधमित्र)। आपदादिपूर्वपदात्कालान्तात् । आपद् ऊर्ध्व तत् **॥इति काश्यादिः॥१०६॥**

धूमादिभ्यश्च॥४।२।१२७॥ धूम षण्ड (षडण्ड) शशादन अर्जुनाव माहकस्थली आनकस्थली माहिषस्थली मानस्थली अट्टस्थली मद्रकस्थली समुद्रस्थली दाण्डायनस्थली राजस्थली विदेह राजगृह सात्रासाह शष्प मित्रवर्ध्र (मित्रवर्ध) (मज्जाली) भक्षाली मद्रकूल आजीकूल द्वाहव द्व्याहव (द्व्याहाव) त्र्यहव (त्र्याहव) (त्र्याहाव) संस्फाय बर्बर वर्ज्य गर्त आनर्त माठर पाथेय घोष पल्ली आराज्ञी धार्तराज्ञी आवय तीर्थ । कूलात्सौवीरेषु । समुद्रान्नावि मनुष्ये च । (सनुद्रान्नावि मनुष्ये च) । कुक्षि अन्तरीप द्वीप अरुण (अरण) उज्जयनी पट्टार दक्षिणापथ साकेत॥**इति धूमादिः॥१०७॥**

कच्छादिभ्यश्च॥४।२।१३३॥ कच्छ सिन्धु वर्ण वर्णु गन्धार मधुमत् कमबोज कश्मीर शाल्व कुरु अनुशण्ड (अनुषण्ड) द्वीप अनूप अजवाह विजापक कलूतर रङ्कु॥ **इति व.च्छादिः॥१०८॥**

गहादिभ्यश्च॥४।२।१३८॥ गह अन्तस्थ सम विषम मध्य 'मध्यंदिन चरणे' उत्तम अङ्ग वङ्ग मगध पूर्वपक्ष अपरपक्ष अधमशाख उत्तमशाख एकशाख समानशाख समानग्राम एकग्राम एकवृक्ष एकपलाश इष्वग्र इष्वनीक अवस्यन्दन कामप्रस्थ शाडिकाडायनि (खाडायन) काठेरणि लावेरणि सौमित्रि शैशिरि (शौशिरि) आसुत (आसुत्) दैवशर्मि श्रौति आहिंसि आमित्रि व्याडि वैजि आध्यश्वि आनृशसि (आनृशंसि) शौङ्गि आग्निशर्मि भौजि वाराटकि (वराटकी) वाल्मिकि (वाल्मीकि) क्षैमवृद्धि आश्वत्थि औद्गाहमानि ऐकविन्दवि दन्ताग्र हंस त्वग्र (तन्त्वग्र) उत्तर अन्तर (अनन्तर)। मुखपार्श्वतसोर्लोपः। जनपरयोः कुक्व देवस्य च। वेणुकादिभ्यश्छण्॥**इति गहादिः॥आकृतिगणः॥१०९॥**

संधिवेलाद्यृतुनक्षत्रेभ्योऽण्॥४।३।१६॥ संधिवेला संध्या अमावास्या त्रयोदशी चतुर्दशी पञ्चदशी पौर्णमासी प्रतिपत्। संवत्सरात्फलपर्वणो : ॥**इति संधिवेलादिः॥११०॥**

दिगादिभ्यो यत्॥४।३।५४॥ दिश् वर्ग पूग (पूगा) गण पक्ष धाय्य मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन मेघ यूथ। उदकात्संज्ञायाम्। ज्ञाय (न्याय) वंश वेश काल आकाश ॥**इति दिगादिः॥१११॥**

परिमुखादिभ्यश्च (वा. ४।३।५९) परिमुख परिहनु पर्योष्ठ पर्युलूखल परिसीर उपसीर उपस्थूण उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुसीत अनुसाय अनुसीर अनुमाष अनुयव अनुयूप अनुवंश प्रतिशाख ॥**इति परिमुखादिः॥११२॥**

अध्यात्मादिभ्यश्च (वा० ४।३।६०) अध्यात्म अधिदेव अधिभूत इहलोक परलोक ॥**इत्यध्यात्मादिः॥आकृतिगणः॥११३॥**

अणृगयनादिभ्यः॥४।३।७३॥ ऋगयन पदव्याख्यान छन्दोमान छन्दोविचिति न्याय पुनरुक्त निरुक्त व्याकरण निगम वास्तुविद्या क्षत्रविद्या अङ्गविद्या विद्या उत्पाद उत्पात उद्याव संवत्सर मुहूर्त उपनिषद् निमित्त शिक्षा भिक्षा॥**इत्यृगयनादिः॥११४॥**

शुण्डिकादिभ्योऽण्॥४।३।७६॥ शुण्डिक कृकण कृपण स्थण्डिल उदयान उपल तीर्थ भूमि तृण पर्ण॥**इति शुण्डिकादिः॥११५॥**

शण्डिकादिभ्यो ञ्यः॥४।३।९२॥ शण्डिक सर्वसेन सर्वकेश शक शट रक शङ्ख बोध॥**इति शण्डिकादिः॥११६॥**

सिन्धुतक्षशिलादिभ्योऽणञौ॥४।३।९३॥ सिन्धु वर्णु मधुमत् कम्बोज साल्व कश्मीर गन्धार किष्किन्धा उरसा दरद (दरद्) गन्दिका (१)॥**इति सिन्ध्वादिः॥११७॥** तक्षशिला वत्सोद्धरण कैर्मेदुर ग्रामणी छगल क्रोष्टुकर्ण सिंहकर्ण संकुचित किंनर काण्डधार पर्वत अवसान बर्बर कंस (२) ॥ **इति तक्षशिलादिः॥११८॥**

शौनकादिभ्यश्छन्दसि॥४।३।१०६॥ शौनक वाजसनेय शार्ङ्गरव शापेय शाष्पेय खाडायन स्तम्भ स्कन्ध (स्तम्भस्कन्ध) देवदर्शन रज्जभार रज्जुकण्ठ कठशाठ कषाय तल दण्ड पुरुषांसक अश्वपेज ॥**इति शौनकादिः॥११९॥**

कुलालादिभ्यो वुञ्॥४।३।११८॥ कुलाल वरुड चाण्डाल निषाद कर्मार सेना सिरिन्ध्र (सिरिन्धि) सिरिघ्रि सैरिन्ध्र देवराज पर्षत् (परिषत्) वधू मधु रुहू रुरु रुद्र अनुडुह् ब्रह्मन् कुम्भकार श्वपाक वैजवापि ॥**इति कुलालादिः॥१२०॥**

रैवतिकादिभ्यश्छः॥४।३।१३१॥ रैवतिक स्वापिशि क्षैमवृद्धि गौरग्रीव (गौरग्रीवि) औदमेघि औदवापि बैजवापि॥**इति रैवतिकादिः॥१२१॥**

बिल्वादिभ्योऽण् ॥४।३।१३५॥ बिल्व व्रीहि काण्ड मुद्ग मसूर गोधूम इक्षु वेणु गवेधुका कर्पासी पाटली (ककन्धु) कर्कन्धू कुटीर ॥**इति बिल्वादिः** ॥१२२॥

पलाशादिभ्यो वा ॥४।३।१४०॥ पलाश खदिर शिंशपा स्पन्दन पूलाक करीर शिरीष यवास बिकङ्कत ॥**इति पलाशादिः**॥१२३॥

नित्यं वृद्धशरादिभ्यः ॥४।३।१४३॥ शर दर्भ मृद् (मृत्) कुटी तृण सोम बल्वज ॥**इति शरादिः**॥१२४॥

तालादिभ्योऽण् ॥४।३।१५१॥ तालाद्धनुषि। बार्हिण इन्द्रालिश इन्द्रादृश इन्द्राशिष इन्द्रायुध चय श्यामाक पीयूक्षा ॥**इति तालादिः**॥१२५॥

प्राणिरजतादिभ्योऽञ् ॥४।३।१५३॥ रजत सीस लोह उदुम्बर नीप दारु रोहितक (रौहितक) बिभीतक पीतदारु तीव्रदारु त्रिकण्टक कण्टकार॥**इति रजतादिः**॥१२६॥

प्लक्षादिभ्योऽण् ॥४।३।१६३॥ प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कक्षतु बृहती ॥**इति प्लक्षादिः**॥१२७॥

हरीतक्यादिभ्यश्च॥४।३।१६६॥ हरीतकी कोशातकी नखरञ्जनी शष्कण्डी दाडी दोडी श्वेतपाकी अर्जुनपाकी द्राक्षा काला ध्वाक्षा गभीका कष्टकारिका पिप्पली चिम्पा (चिञ्चा) शेफालिका॥**इति हरीतक्यादिः**॥१२९॥

माशब्दादिभ्य उपसंख्यानम् (**वा.** ४।४।१) माशब्दः नित्यशब्दः कार्यशब्दः॥**इति माशब्दादिः**॥१२९॥

आहौ प्रभूतादिभ्यः (वा० ४।४।१) प्रभूत पर्याप्त ॥**इति प्रभूतादिः** ॥१३०॥

पृच्छतौ सुस्नातादिभ्यः (वा०४।४।१) सुस्नात सुखरात्रि सुखरात्रि सुखशयन ॥**इति सुस्नातादिः**॥१३१॥

गच्छतौ परदारादिभ्यः (वा० ४।४।१) परदार गुरुतल्प ॥**इति परदारादिः**॥१३२॥

पर्पादिभ्यष्ठन्॥४।४।१०॥ पर्प अश्व अश्वत्थ रथ जाल न्यास व्याल। पादः पच्च॥**इति पर्पादिः**॥१३३॥

वेतनादिभ्यो जीवति॥४।४।१२॥ वेतन वाहन अर्धवाहन (अर्धवाह) धनुर्दण्ड जाल वेश उपवेश प्रेषण उपवस्ति सुख शय्या शक्ति उपनिषद् उपदेश स्फिज् (स्फिज) पाद उपस्थ उपस्थान उपहस्त ॥**इति वेतनादिः** ॥१३४॥

हरत्युत्सङ्गादिभ्यः ॥४।४।१५॥ उत्सङ्ग उडुप उत्पूत (उत्पुत) उत्पन्न उत्पुट पिटक पिटाक॥**इत्युत्सङ्गादिः**॥१३५॥

भस्त्रादिभ्यः ष्ठन् ॥४।४।१६॥ भस्त्रा भरट भरण शीर्षभार शीर्षेभार अंसभार अंसेभार ॥**इति भस्त्रादिः**॥१३६॥

निर्वृत्तेऽक्षद्यूतादिभ्यः॥४।४।१९॥ अक्षद्यूत (जानुप्रहृत) (जानूपहत) जङ्घाप्रहृत जङ्घाप्रहत पादस्वेदन कण्टकमर्दन गतानुगत गतागत यातोपयात अनुगत ॥**इत्यक्षद्यूतादिः**॥१३७॥

अण्महिष्यादिभ्यः॥४।४।४८॥ महिषी प्रजापति प्रजावती प्रलेपिका विलेपिका अनुलेपिका पुरोहिता (पुरोहित) मणिपाली अनुवारक (अनुचारक) होतृ यजमान ॥**इति महिष्यादिः**॥१३८॥

किसरादिभ्यः ष्ठन्॥४।४।५३॥ किसर नरद नलद स्थागल तगर गुग्गुल उशीर हरिद्रा हरिद्रु पर्गी (पर्णी) ॥**इति किसरादिः**॥१३९॥

छत्रादिभ्यो णः ॥४।४।६२॥ छत्र शिक्षा प्ररोहस्था बुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विशिखा (विशिका) विशिक्रा भक्षा उदस्थान पुरोडा विक्षा चुक्षा मन्द्र ॥**इति छत्रादिः**॥१४०॥

प्रतिजनादिभ्यः खञ्॥४।४।९९॥ प्रतिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन महाजन पञ्चजन ॥**इति प्रतिजनादिः**॥१४१॥

कथादिभ्यष्ठक् ॥४।४।१०२॥ कथा विकथा विश्वकथा संकथा वितण्डा कुष्टविद् (कुष्ठविद्) जनवाद जनेवाद जनोवाद वृत्ति संग्रह गुणगण आयुर्वेद ॥**इति कथादिः**॥१४२॥

गुडादिभ्यष्ठञ् ॥४।४।१०३॥ गुड कुल्माष सक्तु अपूप मांसौदन इक्षु वेणु सङ्ग्राम सङ्घात संक्राम संवाह प्रवास निवास उपवास ॥**इति गुडादिः**॥१४३॥

उगवादिभ्यो यत्॥५।१।२॥ गो हविस् अक्षर विष बर्हिस् अष्टका स्वदा (स्वदा) युग मेधा (स्नुच) स्रुच्। नाभि नभं च। शुनः संप्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वम्। ऊधसोऽनङ् च। कूप खद दर खर असुर अध्वन (अध्वन) क्षर वेद बीज दीस दास (दीप्त) ॥**इति गवादिः**॥१४४॥

विभाषा हविरपूपादिभ्यः॥५।१।४॥ अपूप तण्डुल अभ्युष (अभ्यूष) अभ्योष अवोष अभ्येष पृथुक ओदन सूप पूप किण्व प्रदीप मुसल कटक कर्णवेष्टक इर्गल (ईर्गल) अर्गल। अन्नविकारेभ्यश्च। यूप स्थूणा दीप अश्व पत्र ॥**इत्यपूपादिः**॥१४५॥

असमासे निष्कादिभ्यः॥५।१।२०॥ निष्क पण पाद माष वाह द्रोण षष्टि ॥**इति निष्कादिः**॥१४६॥

गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्॥५।१।३९॥ अश्व अश्मन् गण ऊर्णा (उर्म) उमा भङ्गा क्षण (गङ्गा) वर्षा वसु॥ **इत्यश्वादिः**॥१४७॥

तद्धरति वहत्यावहति भारादंशादिभ्यः॥५।१।५०॥ वंश कुटज बल्वज (वल्वज) मूल स्थूणा (स्थूण) अक्ष अश्मन् अश्व श्लक्ष्ण इक्षु खट्वा॥**इति वंशादिः॥१४८॥**

छेदादिभ्यो नित्यम्॥५।१।६४॥ छेद भेद द्रोह दोह नर्ति (नर्त) कर्ष तीर्थ सम्प्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण सम्प्रश्न विप्रश्न विकर्ष प्रकर्ष। विराग विरङ्गं च **॥इति छेदादिः॥१४९॥**

दण्डादिभ्यो यत्॥५।१।६६॥ दण्ड मुसल मधुपर्क कशा अर्ध मेघ मेधा सुवर्ण उदक वध युग गुहा भाग इभ भङ्ग **॥इति दण्डादिः॥१५०॥**

महानाम्न्यादिभ्यः षष्ट्यन्तेभ्य उपसंख्यानम् (वा० ५।१।९४) महानाम्री आदित्यव्रत गोदान **॥इति महानाम्न्यादिः॥१५१॥**

अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः (वा०५।१।९४) अवान्तरदीक्षा तिलव्रत देवव्रत **॥इत्यवान्तरदीक्षादिः॥१५२॥**

व्युष्टादिभ्योऽण्॥५।१।९७॥ व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण तीर्थ आस्तरण सङ्ग्राम सङ्घात **॥इति व्युष्टादिः॥१५३॥**

अग्निपदादिभ्य उपसंख्यानम् (वा० ५।१।९७) अग्निपंद पीलुपद (पीलुमूल) प्रवास उपवास **॥इत्यग्निपदादिराकृतिगणः॥१५४॥**

तस्मै प्रभवति संतापादिभ्यः॥५।१।१०१॥ संताप संनाह संग्राम संयोग संपराय संवेशन संपेष निष्पेष सर्ग निसर्ग विसर्ग उपसर्ग प्रवास उपवास संघास संवेष संवास संमोदन सक्तु। मांसौदनाद्विगृहीतादपि **॥इति संतापादिः॥१५५॥**

तदप्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् (वा० ५।१।१०५) उपवस्तृ (उपवस्त्र) प्राशितृ चूडा श्रद्धा **॥इत्युपवस्त्रादिः॥१५६॥**

अनुप्रवचनादिभ्यश्छः॥५।१।१११॥ अनुप्रवचन उत्थापन उपस्थापन संवेशन प्रवेशन अनुप्रवेशन अनुवासन अनुवचन अनुवाचन अन्वारोहण प्रारम्भण आरम्भण आरोहण **॥इत्यनुप्रवचनादिः॥१५७॥**

स्वर्गादिभ्यो यद्वक्तव्यः (वा०५।१।१११) स्वर्ग यशस् आयुस् काम धन **॥इति स्वर्गादिः॥१५८॥**

पुण्याहवाचनादिभ्यो लुग्वक्तव्यः (वा० ५।१।१११) पुण्याहवाचन स्वस्तिवाचन शान्तिवाचन **॥इति पुण्याहवाचनादिः॥१५९॥**

पृथ्वादिभ्य इमनिज्वा॥५।१।१२२॥ पृथु मृदु महत् पटु तनु लघु बहु साधु आशु

उरु गुरु बहुल खण्ड दण्ड चण्ड अकिंचन बाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु ॥**इति पृथ्वादिः॥१६०॥**

वर्णदृढादिभ्यः ष्यञ्च॥५।१।१२३॥ दृढ वृढ परिवृढ भृश कृश वक्र शुक्र चुक्र आम्र कृष्ट लवण ताम्र शीत उष्ण जड बधिर पण्डित मधुर मूर्ख मूक स्थिर। वेर्यातलातमतिर्मनः शारदानाम्। समो मतिमनसोः। जवन ॥ **इति दृढादिः॥१६१॥**

गुणवचनब्राह्मणादिभ्यः कर्मणि च॥५।१।१२४॥ ब्राह्मण वाडव माणव । अर्हतो नुम् च। चोर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् बहुभाषिन् शीर्षघातिन् विघातिन समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निश्न बालिश अलस दु:पुरुष (दुष्पुरुष) कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात। सर्ववेदादिभ्यः स्वार्थे। चतुर्वेदस्योभयपदवृद्धिश्च। शौटीर॥ **आकृतिगणोऽयम्॥ इति ब्राह्मणादिः॥१६२॥**

चतुर्वेदादिभ्य उभयपदवृद्धिश्च (वा०५।१।१२४) चतुर्वेद चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर संनिधि समीप उपमा सुख तदर्थ इतिह मणिक॥ **इति चतुर्वेदादिः॥१६३॥**

पत्यन्तपुरोहितादिभ्यो यक्॥५।१।१२८॥ पुरोहित राजासे ग्रामिक (पिण्डित) पिण्डिक सुहित वालमन्द बालमद (बाल मन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शितिक (शीलिक) सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) रूपिक ऋषिक पुंत्रिक अविक छत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्थिक (आस्तिक) सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अजानिक शाक्वर नागर चूडिक ॥**इति पुरोहितादिः॥१६४॥**

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्॥५।१।१२९॥ उद्गातृ उन्नेतृ प्रतिहर्तृ प्रशास्तृ होतृ पोतृ हर्तृ रथगणक पत्तिगणक सुष्ठु दुष्ठु अध्वर्यु वधू सुभग मन्त्र ॥**इत्युद्गात्रादिः॥१६५॥**

हायनान्तयुवादिभ्योऽण्॥५।१।१३०॥ युवन् स्थविर होतृ यजमान। पुरुषासे। भ्रातृ कुतुक श्रमण (श्रवण) कटुक कमण्डलु कुस्त्री सुस्त्री दुःस्त्री सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल परिव्राजक सुब्रह्मचारिन् अनृशंस। हृदयासे। कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ। श्रोत्रियस्य यलोपश्च॥ **इति युवादिः॥१६६॥**

द्वन्द्वमनोज्ञादिभ्यश्च॥५।१।१३३॥ मनोज्ञ प्रियरूप अभिरूप कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त विश्वदेव युवन् कुपुत्र ग्रामपुत्र ग्रामकुलाल

ग्रामड (ग्रामषण्ड) ग्रामकुमार सुकुमार बहुल अवश्यपुत्र अमुष्यपुत्र अमुष्यकुल (आमुष्यकुल) सारपुत्र शतपुत्र ॥**इति मनोज्ञादिः**॥१६७॥

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥५।२।२४॥ पीलु कर्कन्धू (कर्कन्धु) शमी करीर बल (कुवल) बदर अश्वत्थ खदिर (१) ॥**इति पील्वादिः**॥१६८॥ कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ (२) ॥ **इति कर्णादिः** ॥१६९॥

तदस्य संजातं तारकादिभ्य इतच्॥५।२।३६॥ तारका पुष्प कर्णक मञ्जरी ऋजीष क्षण सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तबक (स्तवक) किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक वर्णक द्रोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कुवलय गर्ध क्षुध्र सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थपुट फल कञ्चुक शृङ्गार अङ्कुर शैवल बकुल श्वभ्र आराल (अराल) कलङ्क कर्दम कन्दल मूर्च्छा अङ्गार हस्तक प्रतिबिम्ब विघ्नतन्त्र प्रत्यय दीक्षा गर्ज। गर्भादप्राणिनि ॥**इति तारकादिराकृतिगणः**॥१७०॥

विमुक्तादिभ्योऽण् ॥५।२।६१॥ विमुक्त देवासुर रक्षोसुर उपसद् सुवर्ण परिसारक सदसत् वसु मरुत् पत्नीवत् वसुमत् महीयत्त्व सत्वत् बर्हवत् दशार्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अस्यहत्य सोमापूषन् इडा अग्नाविष्णू उर्वशी वृत्रहन् ॥**इति विमुक्तादिः**॥१७१॥

गोषदादिभ्यो वुन्॥५।२।६२॥ गोषद (गोषद्) इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः। कृष्णोऽस्याखरेष्ठः। देवींधिया (देवींधियम्) रक्षोहण युञ्जान अञ्जन प्रसूत प्रतूर्त कृशानु (कृशाकु) ॥**इति गोषदादिः**॥१७२॥

आकर्षादिभ्यः कन् ॥५।२।६४॥ आकर्ष (आकष) त्सरु पिशाच पिचण्ड अशनि अश्मन् निचय चय विजय जय आचय नय पाद दीप ह्रद ह्राद ह्लाद गद्गद शकुनि ॥**इत्याकर्षादिः**॥१७३॥

इष्टादिभ्यश्च॥५।२।८८॥ इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित ॥**इतीष्टादिः**॥१७४॥

रसादिभ्यश्च॥५।२।९२॥ रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह भाव। गुणात् एकाचः **॥इति रसादिः॥१७५॥**

सिध्मादिभ्यश्च॥५।२।९७॥ सिध्म गडु मणि नाभि बीज वीणा कृष्ण निष्पाव पांसु पार्श्व पर्शु हनु सक्तु (हनुसक्तु) मास (मांस) पार्ष्णिधमन्योर्दीर्घश्च। वातदन्तबलल-लाटानामूङ् च। जटाघटाकटाकालाः क्षेपे। पर्ण उदक प्रज्ञा सक्थि कर्ण स्नेह शीत श्याम पिङ्ग पित्त पुष्क पृथु मृदु मञ्जु मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुश धारा वर्ष्मन् पक्ष्मन् श्लेष्मन् पेश निष्पाद् कुण्ड। क्षुद्रजन्तूपतापयोश्च **॥इति सिध्मादिः॥१७६॥**

लोमादिपामादिपिच्छादिभ्यः शनेलचः॥५॥२।१००॥ लोमन् रोमन् बभ्रु हरि गिरि कर्क कपि मुनि तरु (१) **॥इति लोमादिः॥१७७॥** पामन् वामन् वेमन् हेमन् श्लेष्मन् कद्रु (कद्रू) बलि (वलि) सामन् ऊष्मन् कृमि। अङ्गात्कल्याणे। शाकीपलालीदद्रूणां ह्रस्वत्वं च। विष्वगित्युत्तरपदलोपश्चाकृतसंधेः। लक्ष्म्या अच्च (२) **॥इति पामादिः॥ १७८॥** पिच्छा उरस् ध्रुवक ध्रुवक। जटाघटाकालाः क्षेपे। वर्ण उदक पङ्क प्रज्ञा (३) **॥इति पिच्छादिः ॥१७९॥**

ज्योत्स्नादिभ्य उपसंख्यानम् (वा. ५।२।१०३) ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका **॥इति ज्योत्स्नादिः॥१८०॥**

व्रीह्यादिभ्यश्च॥५।२।११६॥ व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखदनौ कुमारी। शीर्षान्नञः **॥इति व्रीह्यादिः॥१८१॥**

तुन्दादिभ्य इलच्च॥५।२।११७॥ तुन्द उदर पिचण्ड यव व्रीहि। स्वाङ्गाद्विवृद्धौ **॥इति तुन्दादिः॥१८२॥**

अर्श आदिभ्योऽच् ॥५।२।१२७॥ अर्शस् उरस् तुन्द चतुर कलित (पलित) जटा घटा घाटा अभ्र अघ कर्दम अम्ल लवण। स्वाङ्गाद्धीनात्। वर्णात् **॥इत्यर्श आदिराकृतिगणः॥१८३॥**

सुखादिभ्यश्च॥५।२।१३१॥ सुख दुःख तृप्त (तृप्र) कृच्छ अस्र (आश्र) आस्र अलीक कठिण सोढ प्रतीप शील हल। माला क्षेपे। कृपण प्रणाय (प्रणय) दल कक्ष **॥इति सुखादिः॥१८४॥**

पुष्करादिभ्यो देशे॥५।२।१३५॥ पुष्कर पद्म उत्पल तमाल कुमुद नड कपित्थ बिस मृडाल कर्दम शालूक विगर्ह करीष शिरीष यवास (प्रवास) प्रवाह हिरण्य कैरव कल्लोल तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल पयस् **॥इति पुष्करादिः॥१८५॥**

बलादिभ्यो मतुबन्यतरस्याम्॥ ५।२।१३६॥ बल उत्साह उद्भास उद्वास उद्दास शिखा कुल चूडा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध॥ **इति बलादिः॥१८६॥**

दृशिग्रहणाद्भवदादियोग एव (वा० ५।३।१४) भवान् दीर्घायुः देवानांप्रियः आयुष्मान्॥ **इति भवदादिः॥१८७॥**

देवपथादिभ्यश्च॥ ५।३।१००॥ देवपथ (हंसपथ वारिपथ रथपथ) स्थलपथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धगति उष्ट्रगीव वामरज्जु हस्त इन्द्र दण्ड पुष्प मत्स्य॥ **इति देवपथादिराकृतिगणः॥१८८॥**

शाखादिभ्यो यः॥ ५।३।१०३॥ शाखा मुख जघन शृङ्ग मेघ अभ्र चरण स्कन्ध स्कद (स्कन्द) उरस् शिरस् अग्र (शाण) शरण॥ **इति शाखादिः॥१८९॥**

शर्करादिभ्योऽण्॥ ५।३।१०७॥ शर्करा कपालिका कपाटिका कपिष्ठिका (कनिष्ठिका) पुण्डरीक शतपत्र गोलोमन् लोमन् गोपुच्छ नराची (गोपुच्छनराची) नकुल सिकता॥ **इति शर्करादिः॥१९०॥**

अङ्गुल्यादिभ्यष्ठक्॥ ५।३।१०८॥ अङ्गुली भरुज बभ्रु वल्गु मण्डर मण्डल शष्कुली हरि कपि मुनि रुह खल उदश्वित् गोणी उरस् कुलिश॥ **इत्यङ्गुल्यादिः॥१९१॥**

दामन्यादित्रिगर्तषष्ठाच्छः॥ ५।३।११६॥ दामनी औलपि बैजवापि औदकि औदञ्चि अच्युतन्ति (आच्युतन्ति) अच्युतदन्ति (आच्युतदन्ति) शाकुन्तकि आकिदन्ति (आक्तिदन्ति) औडवि काकदन्तकि शात्रुंतपि सार्वसेनि बिन्दु बैन्दवि तुलभ मौञ्जायन मौञ्जायनि काकन्दि सावित्रीपुत्र॥ **इति दामन्यादिः॥१९२॥**

पर्श्वादियौधेयादिभ्योऽणञौ॥ ५।३।११७॥ पर्शु असुर रक्षस् बाह्लीक वयस् वसु मरुत् सत्त्वत् दशार्ह पिशाच अशनि कार्षापण कर्षापण (१)॥ **इति पर्श्वादिः॥१९३॥** यौधेय कौशेय शौक्रेय शौभ्रेय धार्तेय धार्तेय घार्तेय ज्यावाणेय त्रिगर्त भरत उशीनर (२)॥ **इति यौधेयादिः॥१९४॥**

स्थूलादिभ्यः प्रकारवचने कन्॥ ५।४।३॥ स्थूल अणु माषेषु (माष इषु) कृष्ण तिलेषु। यव व्रीहिषु। इक्षु तिल। पाद्य कालावदात सुरायाम्। गोमूत्र आच्छादने। सुराया अहौ (सुरा अहौ)। जीर्ण शालिषु। पत्रमूल समस्तौ व्यस्तश्च। कुमारीपुत्र कुमारीश्वशुर मणि॥ **इति स्थूलादिः॥१९५॥**

यावादिभ्यः कन्॥ ५।४।२९॥ याव मणि अस्थि तालु जानु सान्द्र पीत स्तम्ब। ऋतावुष्णशीते। पशौ लूनविपाते। अणु निपुणे। पुत्र कृत्रिमे। स्नात वेदसमाप्तौ। शून्य रिक्ते। दान कुत्सिते। तनु सूत्रे। ईयसश्च। ज्ञात अज्ञात। कुमारीक्रीडनकानि च (कुमारक्रीडनकानि च)॥ **इति यावादिः॥१९६॥**

विनयादिभ्यष्ठक् ॥५।४।३४॥ विनय समय। उपायो ह्रस्वत्वं च। संप्रति संगति कथंचित् अकस्मात् समाचार उपचार समाय (समयाचार) व्यवहार संप्रदान समुत्कर्ष समूह विशेष अत्यय ॥**इति विनयादिः॥१९७॥**

प्रज्ञादिभ्यश्च ॥५।४।३८॥ प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यक्ष विद्वस् विदन् वेदन् षोडन् विद्या मनस्। श्रोत्र शरीरे । जुह्वत्। कृष्ण मृगे। चिकीर्षत्। चोर शत्रु योध चक्षुस् वसु एनस् मरत् क्रुञ्च सत्वत् दशार्ह वयस् व्याकृत असुर रक्षस् पिशाच अशनि कार्षापणा देवता बन्धु ॥**इति प्रज्ञादिः॥१९८॥**

आद्यादिभ्य उपसंख्यानम् (वा०५।४।४४) आदि मध्य अन्त पृष्ठ पार्श्व ॥**इत्याद्यादिराकृतिगणः॥१९९॥**

अव्ययीभावे शरत्प्रभृतिभ्यः॥५।४।१०७॥ शरद् विपाश् अनस् मनस् उपानह् अनुडुह् दिव् हिमवत् हिरुक् विद् सद् दिश् दृश् विश् चतुर् त्यद् तद् यद् एतद् कियत्। जराया जरस् च। प्रतिपरसमनुभ्योऽक्षणः। पथिन् ॥ **इति शरदादिः॥२००॥**

द्विदण्ड्यादिभ्यश्च॥५।४।१२८॥ द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति उभाहस्ति उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदी प्रोष्ठपदी आच्यपदी (आढ्यपदी) सपदि (निकुच्यकर्णि) निकुच्यकरणि संहतपुच्छि अन्तेवासी अन्तवासी ॥**इति द्विदण्ड्यादिः॥२०१॥**

पादस्य लोपोऽहस्त्यादिभ्यः॥५।४।१३८॥ हस्तिन् कुद्दाल अश्व कशिक कुरुत कटोल कटोलक गण्डोल गण्डोलक कण्डोल कण्डोलक अज कपोत जाल गण्ड महिला दासी गणिका कुसूल ॥**इति हस्त्यादिः॥२०२॥**

कुम्भपदीषु च ॥५।४।१३९॥ कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितिपदी (शितपदी) विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रोणीपदी (द्रोणपदी) द्रुपदी सूकरपदी शकृत्पदी अष्टापदी स्थूणापदी अपदी सूचीपदी **॥इति कुम्भपद्यादिः॥२०३॥**

उरःप्रभृतिभ्यः कप् ॥५।४।१५१॥ उरस् सर्पिस् उपानह् पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शाली शालिः। अर्थान्नजः॥**इत्युरःप्रभृतयः॥२०४॥**

शकन्ध्वादिषु पररूपं वाच्यम् (वा०६।१।९४) शकन्धुः कर्कन्धुः कुलटा। सीमन्तः केशवेशे। हलीषा मनीषा लाङ्गलीषा पतञ्जलिः। सारङ्गः पशुपक्षिणोः ॥**इति शकन्ध्वादिः॥२०५॥**

पारस्करप्रभृतीनि च संज्ञायाम् ॥ ६।१।१५७॥ पारस्करो देशः । कारस्करो वृक्षः । रथस्था (रयस्था) नदी । किष्कुः प्रमाणम् । किष्किन्धा गुहा । तद्बृहतोः करपत्योश्चोर-देवतयोः सुट् तलोपश्च । प्रात्तुम्पतौ गवि कर्तरि ॥ **इति पारस्करादिः ॥ २०६॥**

उञ्छादीनां च ॥ ६।१।१६०॥ उञ्छ म्लेच्छ जञ्ज नल्प तल्प (जल्प) जप वध । युग कालविशेषे रथाद्युपकरणे च । गरो दूष्ये । अवन्तः । वेदवेगवेष्टबन्धाः करणे । स्तुथुद्रुवश्छन्दसि । वर्तनि स्तोत्रे । श्वभ्रे दरः । साम्बतापौ भावगर्हायाम् । उत्तमशश्वत्तमौ सर्वत्र । भक्षमन्थभोगमन्थाः (देहाः) ॥ **इत्युञ्छादिः ॥ २०७॥**

वृषादीनां च ॥ ६।१।२०३॥ वृषः जनः ज्वरः ग्रहः हयः मयः गयः तायः तयः चयः अमः (श्रमः) वेदः सूदः अंशः गुहा । शमरणौ संज्ञायां संमतौ भावकर्मणोः । मन्त्रः शान्तिः कामः यामः आरा धारा कारा वहः कल्पः पादः ॥ **इति वृषादिराकृतिगणः ॥** अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥ २०८॥

विस्पष्टादीनि गुणवचनेषु ॥ ६।२।२४॥ विस्पष्ट विचित्र विचित्त व्यक्त संपन्न पटु पण्डित कुशल चपल निपुण ॥ **इति विस्पष्टादिः ॥ २०९॥**

कार्तकौजपादयश्च ॥ ६।२।३७॥ कार्तकौजपौ सावर्णिमाण्डकेयौ (सावर्णिमाण्डूकेयौ) अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवाधूलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौद्गपैप्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये ॥ **इति कार्तकौजपादिः ॥ २१०॥**

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ॥ ६।२।४२॥ दासीभारः देवहूतिः देवभीतिः देवलातिः वसुनीतिः (वसूनितिः) औषधिः चन्द्रमाः ॥ **इति दासीभारादिराकृतिगणः ॥ २११॥**

युक्तारोह्यादयश्च ॥ ६।२।८१॥ युक्तारोही आनतरोही (आगतरोही) आगतयोधी आगतवञ्ची आगतनन्दी आगतप्रहारी आगतमत्स्यः क्षीरहोता भगिनीभर्ता ग्रामगोधुक् अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टित्रिरात्रः गणपादः एकशितिपाद् । पात्रे समितादयश्च **॥ इति युक्तारोह्यादिराकृतिगणः ॥ २१२॥**

घोषादिषु च ॥ ६।२।८५॥ घोष घट (कट) वल्लभ ह्रद बदरी पिङ्गल (पिङ्गली) पिशङ्ग माला रक्षा शाला (वृट्) कूट शाल्मली अश्वत्थ तृण शिल्पी मुनि (प्रेक्षाकू) प्रेक्षाक (प्रेक्षा) **॥ इति घोषादिः ॥ २१३॥**

छात्र्यादयः शालायाम् ॥ ६।२।८६॥ छात्रि पेलि भाण्डि व्याडि आखण्डि आटि (आघाटि) गोमी (गोमि) **॥ इति छात्र्यादिः ॥ २१४॥**

प्रस्थेऽवृद्धमकर्क्यादीनाम् ॥६।२।८७॥ कर्कि (कर्की) मद्गी मकरी कर्कन्धु शमी करीरि (करीर) कन्दुक कुवल (कवल) बदरी **॥इति कर्क्यादिः॥२१५॥**

मालादीनां च ॥६।२।८८॥ माला शाला शोणा (शोण) द्राक्षा स्राक्षा क्षामा काञ्ची एक काम दिवोदास वध्र्यश्व **॥इति मालादिराकृतिगणः॥२१६॥**

क्रत्वादयश्च ॥६।२।११८॥ क्रतु दृशीक प्रतीक प्रतूर्ति हव्य भव्य भग **॥इति क्रत्वादिः॥२१७॥**

आदिश्चिहणादीनाम् ॥६।२।१२५॥ चिहण मदुर मद्गुर वैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चिल्कण **॥इति चिहणादिः॥२१८॥**

वर्ग्यादयश्च ॥६।२।१३१॥ दिगादिषु वर्गादयस्त एव कृतयदन्ता वर्ग्यादयः **॥इति वर्ग्यादयः॥२१९॥**

चूर्णादीन्यप्राणिषष्ट्याः ॥६।२।१३४॥ चूर्ण करिष करीष शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल **॥इति चूर्णादिः॥२२०॥**

षट् च काण्डादीनि ॥६।२।१३५॥ काण्ड चीर पलल सूष शाक कूल **॥इति काण्डादिः॥२२१॥**

उभे वनस्पत्यादिषु युगपत् ॥६।२।१४०॥ वनस्पतिः बृहस्पतिः शचीपतिः तनूनपात नराशंसः शुनःशेपः शण्डामर्कौ तृष्णावरूत्री लम्बाविश्ववयसौ मर्मृत्युः **॥इति वनस्पत्यादिः॥२२२॥**

संज्ञायामनाचितादीनाम् ॥६।२।१४६॥ आचित पर्याचित आस्थापित परिगृहीत निरुक्त प्रतिपन्न अपश्लिष्ट प्रश्लिष्ट उपहित उपस्थित संहितागवि **॥इत्याचितादिः॥२२३॥**

प्रवृद्धादीनां च ॥६।२।१४७॥ प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुता सूष्णवः । आकर्षे अवहितः । अवहितो भोगेषु । खट्वारूढः । कविशस्तः **॥आकृतिगणोऽयम् ॥** तेन-प्रवृद्धं यानम् । अप्रवृद्धो वृषकृतो रथ इत्यादि **॥इति प्रवृद्धादिः॥२२४॥**

कृत्योकेष्णुच्चार्वादयश्च ॥६।२।१६०॥ चारु साधु यौधिक (यौधकि) अनङ्गमेजय वदान्य अकस्मात् । वर्तमानवर्धमानत्वरमाणध्रियमाण-क्रियमाणरोचमानशोभमानाः संज्ञायाम् । विकारसदृशे व्यस्तसमस्ते । गृहपति गृहपतिक । राजाह्नोश्छन्दसि **॥इति चार्वादिः॥२२५॥**

न गुणादयोऽवयवाः ॥६।२।१७६॥ गुण अक्षर अध्याय सूक्त छन्दोमान **॥इति गुणादिराकृतिगणः॥२२६॥**

निरुदकादीनि च ॥६।२।१८४॥ निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीप निस्तरीक निरजिन उदजिन उपाजिन । परेर्हस्तपादकेशकर्षाः **॥ इति निरुदकादिराकृतिगणः॥२२७॥**

प्रतेरंश्वादयस्तत्पुरुषे ॥६।२।१९३॥ अंशु जन (राजन्) उष्ट्र खेटक अजिर आर्द्रा श्रवण कृत्तिका अर्धपुर ॥**इत्यंश्वादिः**॥२२८॥

उपाद्यजजिनमगौरादयः॥६।२।१९४॥ गौर तैष तैल लेट लोट जिह्वा कृष्ण कन्या गुध कल्प पाद ॥**इति गौरादिः**॥२२९॥

त्रिचक्रादीनां छन्दस्युपसंख्यानम् (वा० ६।२।१९९) त्रिचक्र त्रिवृत् त्रिवङ्कर ॥**इति त्रिचक्रादिराकृतिगणः**॥२३०॥

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु॥६।३।३४॥ प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा (स्वा) कान्ता (क्षान्ता) समा चपला दुहिता वामा अबला तनया ॥**इति प्रियादिः**॥२३१॥

तसिलादिष्वाकृत्वसुचः॥६।३।३५॥ तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर् रूपप् पाशप् थल् थाल् दार्हिल् तिल् थ्यन् ॥**इति तसिलादयः**॥२३२॥

कुक्कुट्यादीनामण्डादिषु (वा० ६।३।४२) कुक्कुटी मृगी काकी। अण्ड पद शाव भ्रकुंस (भृकुंस) भ्रकुटी (भृकुटी) ॥**इति कुक्कुट्यादि-रण्डादिश्च**॥२३३।२३४॥

पृषोदरादीनि यथोपदिष्टम्॥६।३।१०९॥ पृषोदर पृषोत्थान बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर ॥**इति पृषोदरादिराकृतिगणः**॥२३५॥

वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्॥६।३।११७॥ कोटर मिश्रक सिध्रक पुरग सारिक (शारिक) (१)॥ **इति कोटरादिः**॥२३६॥ किंशुलुक शाल्व नड अञ्जन भञ्जन लोहित कुक्कुट (२) ॥**इति किंशुलुकादिः**॥२३७॥

मतौ बह्वचोऽनजिरादीनाम्॥६।३।११९॥ अजिर खदिर पुलिन हंसक (हंस) कारण्ड (कारण्डव) चक्रवाक ॥**इत्यजिरादिः**॥२३८॥

शरादीनां च॥६।३।१२०॥ शर वंश धूम अहि कपि मणि मुनि शुचि हनु ॥**इति शरादिः**॥२३९॥

अपील्वादीनामिति वक्तव्यम् (वा० ६।३।१२१) पीलु दारु रुचि चारु गम् कम्॥ **इति पील्वादिः**॥२४०॥

बिल्वकादिभ्यश्छस्य लुक्॥६।४।१५३॥ बिल्वक वेणु वेत्र वेतस तृण इक्षु काष्ठ कपोत क्रुञ्चा तक्षन्॥ **नडाद्यन्तर्गणो बिल्वादिः**॥छविधानार्थं ये नडादयस्ते यदा छसंनियोगे कृतकुगागमास्ते **बिल्वकादयः**॥२४१॥

स्नात्व्यादयश्च ॥७।१।४९॥ स्नात्वी पीत्वी ॥**इति स्नात्व्यादिराकृतिगणः**॥२४२॥

द्वारादीनां च॥७।३।४॥ द्वार स्वर स्वग्राम स्वाध्याय व्यल्कश स्वस्ति स्वर् (स्वर) स्यकृत् स्वादु मृदु श्वस् श्वन् स्व ॥**इति द्वारादिः**॥२४३॥

स्वागतादीनां च ॥७।३।७॥ स्वागत स्वध्वर स्वङ्ग व्यङ्ग व्यड व्यवहार स्वपति स्वपिति ॥ **इति स्वागतादिः** ॥२४४॥

अनुशतिकादीनां च ॥७।३।२०॥ अनुशतिक अनुहोड अनुसंवरण (अनुसंचरण) अनुसंवत्सर अङ्गारवेणु असिहत्य (अस्यहत्य) अस्यहेति वध्योग पुष्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि प्रयोग परस्त्री। राजपुरुषात्ष्यञि। सूत्रनड ॥ **इत्यनुशतिकादिराकृतिगणोऽयम्** ॥२४५॥ तेन अभिगम अधिभूत अधिदेव चतुर्विद्या इत्यादयोऽप्यन्ये विज्ञेयाः॥

क्षिपकादीनां चोपसंख्यानम् (वा० ७।३।४५) क्षिपका ध्रुवका चरका सेवका करका चटका अवका (हलका) लहका अलका कन्यका ध्रुवका एडका ॥ **इति क्षिपकादिराकृतिगणः** ॥२४६॥

न्यङ्क्वादीनां च ॥७।३।५३॥ न्यङ्कु मद्गु भृगु दूरेपाक (फलेपाक) बलेपाक क्षणपाक दूरेपाका फलेपाका दूरेपाकु फलेपाकु तक्र (तत्र) वक्र (चक्र) व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग श्वपाक मांसपाक (मासपाक) मूलपाक कपोतपाक उलूकपाक। संज्ञायां मेघनिदाघावदाघार्घाः। न्यग्रोध बीरुत्॥ **इति न्यङ्क्वादिः** ॥२४७॥

काण्यादीनां वेति वक्तव्यम् (वा० ७।४।३) कण रण भण श्रण लुप हेठ ह्रायि वाणि (चाणि) लोटि (लोठि) लोपि (ण्यन्ताः कणरणभणश्रणलुपहेठाः काण्यादयः षड्भाष्ये उक्ताः। ह्रायिवाणिलोटिलोपयश्चत्वारोऽधिका न्यासे। चाणिलोठीत्यप्यन्यत्र। इत्थं द्वादश) ॥ **इति काण्यादिः** ॥२४८॥

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥८।१।२७॥ गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्ययन प्रपञ्च प्राय न्याय प्रचक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ (भूयिष्ट) वानाम ॥ **इति गोत्रादिः** ॥ २४९॥

पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ॥८।१।६७॥ काष्ठ दारुण अज्ञात पुत्र अमातापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अद्भुत अनुक्त भृश घोर सुख परम सु अति॥ **इति काष्ठादिः** ॥२५०॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥८।२।९॥ यव दल्मि ऊर्मि (उर्मि) भूमि कृमि कुञ्चा वशा द्राक्षा ध्राक्षा घ्रजि व्रजि ध्वजि निजि सिजि सञ्जि हरित् कुकुद् मरुत् गरुत् (इक्षु द्रु) इक्षुद्रु मधु ॥ **इति यवादिराकृतिगणः** ॥२५१॥

कपिलकादीनां संज्ञाच्छन्दसोर्वेति वाच्यम् (वा०८।२।१८) कपिलक निर्विलीक लोमानि पांसुल कल्प शुक्ल कपिलिका तर्पिलिका तर्पिलि ॥ **आकृतिगणोऽयम्** ॥ **इति कपिलकादिः** ॥२५२॥

अहरादीनां पत्यादिषु वा रेफः (वा० ८।२।७०) अहर् गीर् धुर् (१) ॥ **इत्यहरादिः** ॥२५३॥ पति गण पुत्र (२) ॥ **इति पत्यादिः** ॥२५४॥

कस्कादिषु च॥८।३।४८॥ कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः सद्यस्क्रीः सद्यस्क्रः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालम् बहिष्पलम् (बर्हिष्पलम्) यजुष्पात्रम् अयस्कान्तः तमस्काण्डः अयस्काण्डः भेदस्पिण्डः भास्करः अहस्करः ॥**इति कस्कादिराकृतिगणः ॥२५५॥**

सुषामादिषु च॥८।३।९८॥ सुषामा निःषामा दुःषामा सुषेधः निषेधः (निःषेधः) दुःषेधः सुषंधिः निःषंधिः दुःषंधिः सुष्ठु दुष्ठु। गौरिषक्थः संज्ञायाम्। प्रतिष्णिका जलाषाहम्(जलाषाडम्) नौषेचनम् दुन्दुभिषेवणम् (दुन्दुभिषेचनम्)। एति संज्ञायामगात्। नक्षत्राद्वा। हरिषेणः रोहिणीषेणः॥ **इति सुषामादिराकृतिगणः॥२५६॥**

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्॥८।३।११०॥ सवने सवने। सूते सूते। सोमे सोमे। सवनमुखे सवनमुखे। किंसं किंसम् (किंसः किंसः) अनुसवनमनुसवनम्। गोसनिं गोसनिम्। अश्वसनिमश्वसनिम्। पाठान्तरम्– सवने सवने। सवनमुखे सवनमुखे। अनुसवनमनुसवनम्। संज्ञायां बृहस्पतिसवः। शकुनिसवनम्। सोमे सोमे (सुमे सुमे)। सुते सुते। संवत्सरे संवत्सरे। बिसं बिसम्। किसं किसम्। मुसलं मुसलम्। गोसनिम् अश्वसनिम् ॥**इति सवनादिः॥२५७॥**

इरिकादिभ्यः प्रतिषेधो वक्तव्यः (वा० ८।४।६) इरिका मिरिका तिमिरा **॥इतीरिकादिराकृतिगणः॥२५८॥**

वाप्रकरणे गिरिनद्यादीनां वोपसंख्यानम् (वा० ८।४।१०) गिरिनदी गिरिनख गिरिनद्ध गिरिनितम्ब चक्रनदी चक्रनितम्ब तूर्यमान माषोन आर्गयन **॥ इति गिरिनद्यादिराकृतिगणः॥२५९॥**

युवादेर्न (वा० ८।४।११) युवन् पक्व अहन्॥**इति युवादिः॥२६०॥** (आर्ययूना क्षत्रिययूना प्रपक्वानि परिपक्वानि दीर्घाह्नी)॥**आकृतिगणोऽयम्॥**

क्षुभ्नादिषु च॥८।४।३९॥ क्षुभ्न नृगमन (नृनमन) नन्दिन् नन्दन नगर। एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति। हरिनन्दी हरिनन्दनः गिरिनगरम्। नृतिर्यङि प्रयोजयन्ति। नरीनृत्यते। नर्तन गहन नन्दन निवेश निवास अग्नि अनूप। एतान्युत्तरपदानि प्रयोजयन्ति। परिनर्तनम् परिगहनम् परिनन्दनम् शरनिवेशः शरनिवासःशराग्निःदर्भानूपः। आचार्यदणत्वं च। आचार्यभोगीनः ॥**आकृतिगणोऽयम्॥ पाठान्तरम्॥** क्षुभ्ना तृप्नु नृनमन नरनगर नन्दन। यङ्नृती। गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन। इरिकादीनि वनोत्तरपदानि संज्ञायाम्। इरिका तिमिर समीर कुबेर हरि कर्मार॥ **इति क्षुभ्नादिः॥२६१॥**

॥ इति श्रीपाणिनिमुनिप्रणीतो गणपाठः समाप्तः॥

परिशिष्टम् (३)

अथ परिभाषापाठः

१. व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ।
२. यथोद्देशं संज्ञापरिभाषम् ।
३. कार्यकालं संज्ञापरिभाषम् ।
४. अनेकान्ता अनुबन्धाः ।
५. एकान्ताः ।
६. नानुबन्धकृतमनेकाल्त्वम् ।
७. नानुबन्धकृतमनेजन्तत्वम् ।
८. नानुबन्धकृतमसारूप्यम् ।
९. उभयगतिरिह भवति ।
१०. कार्यभनुभवन् हि कार्यी निमित्ततया नाश्रीयते ।
११. यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ।
१२. निर्दिश्यमानस्यादेशा भवन्ति ।
१३. यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।
१४. अर्थवद्ग्रहणे नानर्थकस्य ।
१५. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ।
१६. अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ।
१७. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ।
१८. एकयोगनिर्दिष्टिानामेकदेशोऽप्यनुवर्तते ।
१९. भाव्यमानेन सवर्णानां ग्रहणं न ।
२०. भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति ।
२१. वर्णाश्रये नास्ति प्रत्ययलक्षणम् ।
२२. उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।
२३. प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तन्तस्य ग्रहणम् ।
२४. प्रत्ययग्रहणे चापञ्चम्याः ।

२५. उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ।
२६. स्त्रीप्रत्यये चानुपसर्जने न ।
२७. संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।
२८. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ।
२९. पदाङ्गाधिकारे तस्य तदन्तस्य च ।
३०. व्यपदेशिवदेकस्मिन् ।
३१. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ।
३२. व्यपदेशिवद्भावोऽप्रातिपदिकेन ।
३३. यस्मिन्विधिस्तदादावल्ग्रहणे ।
३४. सर्वो द्वन्द्वो विभाषयैकवद् भवति ।
३५. सर्वे विधयश्छन्दसि विकल्प्यन्ते ।
३६. प्रकृतिवदनुकरणं भवति ।
३७. एकदेशविकृतमनन्यवत् ।
३८. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।
३९. पुनःप्रसङ्गविज्ञानात्सिद्धम् ।
४०. सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ।
४१. विकरणेभ्यो नियमो बलीयान् ।
४२. परान्नित्यं बलवत् ।
४३. कृताकृतप्रसङ्गि नित्यम्, तद् विपरीतमनित्यम् ।
४४. शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ।
४५. शब्दान्तराप्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ।
४६. लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ।
४७. क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता ।
४८. यस्य लक्षणान्तेरण निमित्तं विहन्यते न तदनित्यम् ।
४९. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम् ।
५०. स्वरभिन्नस्य प्राप्नुवन्विधिरनित्यो भवति ।
५१. असिद्धं बहिरङ्गमन्तरङ्गे ।
५२. नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ।

५३. अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते।
५४. पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न।
५५. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते।
५६. वार्णादाङ्गं बलीयो भवति।
५७. अकृतव्यूहाः पाणिनीयाः।
५८. अन्तरङ्गादप्यपवादो बलीयान्।
५९. येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति।
६०. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति।
६१. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्।
६२. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्।
६३. अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति।
६४. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः।
६५. प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते।
६६. उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधत इति।
६७. अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते।
६८. अभ्यासविकारेषु बाध्यबाधकभावो नास्ति।
६९. ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति।
७०. क्त्वल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति।
७१. लादेशेषु वाऽसरूपविधिर्नास्ति।
७२. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।
७३. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्।
७४. विभक्तौ लिङ्गविशिष्टाग्रहणम्।
७५. सूत्रे लिङ्गवचनमतन्त्रम्।
७६. नञिवयुक्तमन्यसदृशाधिकरणे।
७७. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः।
७८. साम्प्रतिकाभावे भूतपूर्वगतिः।
७९. बहुव्रीहौ तद्गुणसंविज्ञानमपि।
८०. चानुकृष्टं नोत्तरत्र।

८१. स्वरविधौ व्यञ्जनमविद्यमानवत् ।

८२. हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ।

८३. निरनुबन्धकग्रहणे न सानुबन्धकस्य ।

८४. तदनुबन्धकग्रहणे नातदनुबन्धकस्य ।

८५. क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ।

८६. समासान्तविधिरनित्यः ।

८७. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।

८८. सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ।

८९. ताच्छीलिके णेऽण्कृतानि भवन्ति ।

९०. धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ।

९१. तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ।

९२. लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ।

९३. प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ।

९४. अङ्गवृत्ते पुनर्वृत्ताववविधिः ।

९५. संज्ञापूर्वकविधेरनित्यत्वम् ।

९६. आगमशास्त्रमनित्यम् ।

९७. गणकार्यमनित्यम् ।

९८. अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ।

९९. नञ्घटितमनित्यम् ।

१००. आतिदेशिकमनित्यम् ।

१०१. सर्वविधिभ्यो लोपविधिरिङ्विधिश्च बलवान् ।

१०२. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ।

१०३. विधौ परिभाषोपतिष्ठते नानुवादे ।

१०४. उपपदविभक्तेः कारकविभक्तिर्बलीयसी ।

१०५. अनन्त्यविकारेऽन्त्यसदेशस्य ।

१०६. नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ।

१०७. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः ।

१०८. अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ।

१०९. व्यवस्थितविभाषयापि कार्याणि क्रियन्ते।
११०. विधिनियमसम्भवे विधिरेव ज्यायान्।
१११. सामान्यातिदेशे विशेषानतिदेशः।
११२. प्रत्ययाप्रत्ययोः प्रत्ययस्य ग्रहणम्।
११३. सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्।
११४. श्रुतानुमितयोः श्रुतसम्बन्धो बलवान्।
११५. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्।
११६. गामादाग्रहणेष्वविशेषः।
११७. प्रत्येकं वाक्यपरिसमाप्तिः।
११८. क्वचित्समुदायेऽपि।
११९. अभेदका गुणाः।
१२०. बाधकान्येव निपातनानि।
१२१. पर्जन्यवल्लक्षणप्रवृत्तिः।
१२२. निषेधाश्च बलीयांसः।
१२३. अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे।
१२४. योगविभागादिष्टसिद्धिः।
१२५. पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते।
१२६. ज्ञापकसिद्धं न सर्वत्र।
१२७. पूर्वत्रासिद्धीयमद्वित्वे।
१२८. एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति।
१२९. सम्प्रसारणं तदाश्रयं च कार्यं बलवत्।
१३०. क्वचिद् विकृतिः प्रकृतिं गृह्णाति।
१३१. औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्।
१३२. शितपा शपानुबन्धेन निर्दिष्टं यद् गणेन च।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि॥
१३३. पदगौरवाद्योगविभागो गरीयान्।
१३४. अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।

॥ इति परिभाषापाठः॥

परिशिष्टम् (४)

पाणिनीयप्रबोधस्य धातुपाठः

तत्रादौ भ्वादयः

भू	सत्तायाम्	णम	प्रह्वत्वे शब्दे च
द्रु	गतौ	यभ	मैथुने
स्रु	क्षरणे (गतौ)	दह	भस्मीकरणे
श्रु	श्रवणे	त्यज	हानौ
क्षि	क्षये	तप	सन्तापे
जि	जये (अकर्मकः)	क्रमु	पादविक्षेपे
इ, ऋ, सृ	गतौ	भ्रमु	सञ्चलने
स्मृ	चिन्तायाम्	चमु	अदने
हृ	कौटिल्ये	ष्ठिवु	निरसने
तॄ	प्लवनतरणयोः	चिती	संज्ञाने
पा	पाने	षिधु	गत्याम्
घ्रा	गन्धोपादाने	शुच	शोके
ध्मा	शब्दाग्निसंयोगयोः	वृषु	वर्षणे
म्ना	अभ्यासे	हृषु	अलीके
दाण	दाने	घृषु	घर्षणे
ष्ठा	गतिनिवृत्तौ	च्युतिर्	आसेचने
धेट्	पाने	घुषिर्	अविशब्दने, शब्दे च
ध्यै	चिन्तायाम्	मुर्छा	मोहसमुच्छाययोः
ग्लै, म्लै	हर्षक्षये	कूज	अव्यक्ते शब्दे
गै, कै, रै	शब्दे	फुल्ल	विकसने
गम्लृ	गतौ	तुष	तुष्टौ
यम	उपरमे	पुष	वृद्धौ

जीव	प्राणधारणे	चर्ब	अदने
शील	समाधौ	दंश	दंशने
कील	बन्धने	लुञ्च	अपनयने
पीव	स्थौल्ये	अञ्चु	गतिपूजनयोः
रक्ष	पालने	दृशिर्	प्रेक्षणे (अनिट्)
गद, पठ	व्यक्तायां वाचि	ज्वर	रोगे
भष	वुक्कने	ज्वल	दीप्तौ
टुणदि	समृद्धौ	रस, स्वन, ध्वन	शब्दे
णिदि	निन्दायाम्	लगे	सङ्गे
मडि	भूषायाम्	णद	अव्यक्ते शब्दे
रहि	गतौ	लस	श्लेषणक्रीडनयोः
खजि	गतिवैकल्ये	फल	निष्पत्तौ
मुडि	खण्डने	दल	विशरणे
कदि, क्रदि	आह्वानरोदनयोः	चर	गतौ
चुबि	वक्त्रसंयोगे	रण, भण, क्वण	शब्दे
गुजि	अव्यक्ते शब्दे	लप, जप, जल्प, गल्प	व्यक्तायां वाचि
कुडि	वैकल्ये	मह	पूजायाम्
लुठि	स्तेये	रह	त्यागे
वृहि	वृद्धौ	पत्लृ	पतने
वाछि	इच्छायाम्	अत	सातत्यगमने
लाछि	लक्षणे	वस	निवासे (अनिट्)
अहि	गतौ	वद	व्यक्तायां वाचि
अर्ह	पूजायाम्	खनु	अवदारणे
अर्च	गतिपूजनयोः	एध	वृद्धौ
अर्द	गतौ याचने च	ईह	चेष्टायाम्
अर्ज	अर्जने	ईक्ष	दर्शने
गर्ज	शब्दे	ऊह	वितर्के
तर्ज	भर्त्सने	गर्ह	कुत्सायाम्

कपि	चलने	द्युत	दीप्तौ
स्पदि	किञ्चिच्चलने	रुच	दीप्तावभिप्रीतौ च
क्लिदि	परिदेवने	स्रंसु, ध्वंसु, भ्रंसु	अवस्रंसने (अधःपतने)
वदि	अभिवादनस्तुत्योः	श्विता	वर्णे
लघि	गतौ	ञिष्विदा	स्नेहनमोचनयोः
शकि	शङ्कायाम्	ञिमिदा	स्नेहने
शसि	आशंसायाम्	घुट	परिवर्तने
मुडि	मार्जने	रुट, लुट, लुठ	प्रतिघाते
चडि	कोपे	शुभ	दीप्तौ
जृभि	गात्रविनामे	स्रम्भु	विश्वासे
टुवेपृ	कम्पने	क्षुभ	सञ्चलने
काशृ	दीप्तौ	वृतु	वर्तने
स्पर्ध	संघर्षे	वृधु	वृद्धौ
स्वाद	आस्वादने	शृधु	शब्दकुत्सायाम्
पर्द	कुत्सिते शब्दे	मुद	हर्षे
यती	प्रयत्ने ।	रमु	क्रीडायाम्
भ्राजृ, भासृ	दीप्तौ	रभ	राभस्ये (आरम्भे)
रासृ	शब्दे	डुलभष्	प्राप्तौ
भाष	कथने	भिक्ष	याचने
लोकृ, लोचृ	दर्शने	शिक्ष	विद्योपादाने
बाधृ	प्रतिघाते	षेवृ	सेवायाम्
घट	चेष्टायाम्	त्रैङ्	पालने
ञित्वरा	सम्भ्रमे	ष्यैङ्	वृद्धौ
कत्थ	श्लाघायाम्	अय	गतौ
च्युङ्, प्लुङ्	गतौ	दय	दानगतिरक्षणहिंसादानेषु
डीङ्	विहायसा गतौ	रय	गतौ
पूङ्	पवने	कल	शब्दसंख्यानयोः
ष्मिङ्	ईषद्धासे	देवृ	देवने

स्फायी	वृद्धौ	श्वस् , अन	प्राणने
व्यथ	भयसंचलनयोः	जक्ष	भक्षहसनयोः
प्रथ	प्रख्याने	यु	मिश्रणेऽमिश्रणे च
त्रपूष	लज्जायाम्	रु	शब्दे
णीञ्	प्रापणे	णु	स्तुतौ
श्रिञ्	सेवायाम्	टुक्षु	शब्दे
धृञ्	हरणे	या	प्रापणे
भृञ्	भरणे	वा	गतिगन्धनयोः
टुयाचृ	याचने	भा	दीप्तौ
शप	आक्रोशे	ष्णा	शौचे
लष्	स्पृहायाम्	पा	रक्षणे
डुपचष्	पाके	रा	दाने
भज	सेवायाम्	ला	आदाने
यज	देवपूजासंगतिकरण-	मा	माने
	दानेषु	ख्या	प्रकथने
टुवप	बीजसन्ताने	वच	परिभाषणे
वह	प्रापणे	वश	कान्तौ
ह्वेञ्	स्पर्द्धायाम्	शीङ्	स्वप्ने
		इङ्	अध्ययने
	अथादादयः	चक्षिङ्	व्यक्तायां वाचि
अद	भक्षणे	षूङ्	प्राणिप्रसवे
हन	हिंसागत्योः	आङःशासु	इच्छायाम्
शासु	अनुशिष्टौ	आस्	उपवेशने
विद	ज्ञाने	वस्	आच्छादने
इण्	गतौ	ईश्	ऐश्वर्ये
अस्	भुवि	ईड	स्तुतौ
रुदिर्	अश्रुविमोचने	ष्टुञ्	स्तुतौ
ञिष्वप	शये	ब्रूञ्	व्यक्तायां वाचि

दुह	प्रपूरणे
लिह	आस्वादने
द्विष	अप्रीतौ

अथ जुहोत्यादयः

हु	दानादनयोः
ञिभी	भये
ह्री	लज्जायाम्
ओहाक्	त्यागे
ओहाङ्	गतौ
माङ्	माने
डुभृञ्	धारणपोषणयोः
डुदाञ्	दाने
डुधाञ्	धारणपोषणयोः

अथ दिवादयः

दिवु	क्रीडाविजिगीषा-व्यवहारद्युतिस्तुति-मोदमदस्वप्नकान्ति-गतिषु ।
षिवु	तन्तुसन्ताने
ष्ठिवु	निरसने
ष्लुष	दाहे
पुष	पुष्टौ
शुष	शोषणे
तुष	प्रीतौ
दुष	वैकृत्ये
ष्विदा	गात्रप्रक्षरणे
क्षुध	बुभुक्षायाम्
शुध	शौचे
षिध	संसिद्धौ
श्लिष	आलिङ्गने
णश	अदर्शने
तृप	प्रीडने
दृप	हर्षमोहनयोः
द्रुह	जिघांसायाम्
मुह	वैचित्ये
ष्णुह	उद्गिरणे
ष्णिह	प्रीतौ
शमु	उपशमे
तमु	कांक्षायाम्
दमु	उपशमे
श्रमु	तपसि, खेदे च
भ्रमु	अनवधाने
क्षमू	सहने
क्लमु	कान्तौ
मदी	हर्षे
असु	क्षेपणे
यसु	प्रयत्ने
भ्रंसु	अधःपतने
कृश	तनूकरणे
ञितृषा	पिपासायाम्
हृष	तुष्टौ
कुप	क्रोधे
लुभ	गार्ध्ये
क्षुभ	सञ्चलने
गृधु	अभिकाङ्क्षायाम्
ऋधु	वृद्धौ

त्रसी	उद्वेगे
नृती	गात्रविक्षेपे
जृष्	वयोहानौ
शो	तनूकरणे
छो	छेदने
दो	अवखण्डने
व्यध	ताडने
जनी	प्रादुर्भावे
दीपी	दीप्तौ
पूरी	आप्यायने
क्लिश	उपतापे
पद	गतौ
बुध	अवगमने
युध	सम्प्रहारे
खिद	दैन्ये
विद	सत्तायाम्
मन	ज्ञाने
युज	समाधौ
सृज	विसर्गे
लिश	अल्पीभावे
णह	बन्धने
रञ्ज	रागे
मृष	तितिक्षायाम्

अथ स्वादयः

षुञ्	अभिषवे
धुञ्	कम्पने
चिञ्	चयने
वृञ्	वरणे
स्तृञ्	आच्छादने
शक्लृ	सामर्थ्ये
आप्लृ	व्याप्तौ
टुडु	उपतापे
हि	गतौ
अशूङ्	व्याप्तौ संघाते च

अथ तुदादयः

तुद	व्यथने
चुद्, गुद, क्षिप	प्रेरणे
दिश	अतिसर्जने
कृष	विलेखने
मुच्लृ	मोचने
विद्लृ	लाभे
लुप्लृ	छेदने
लिप	उपदेहे (उपदेहो वृद्धिः)
षिच	क्षरणे
खिद	परिघाते
पिश	अवयवे
कृती	छेदने
ओव्रश्चू	छेदने
उछि	उञ्छे
उज्झ	उत्सर्गे
ऋच्छ	गतीन्द्रियप्रलय-मूर्तिभावेषु
इषु	इच्छायाम्
लुभ	विमोहने

लिख	अक्षरविन्यासे	जुषी	प्रीतिसेवनयोः
मिल	सङ्गमे	दृङ्	आदरे (आङ्पूर्वः)
कुट	कौटिल्ये	धृङ्	अवस्थाने
कुच	सङ्कोचे		
स्फुट	विकसने		**अथ रुधादयः**
स्फुर, स्फुल	सञ्चलने	रुधिर्	आवरणे
घुट	परिवर्तने	भिदिर्	विदारणे
त्रुट	त्रोटने	छिदिर्	द्वैधीकरणे
पुट	संश्लेषणे	विचिर्	पृथग्भावे
णू	स्तवने	रिचिर्	विरेचने
धू	विधूनने	छुदिर्	सम्पेषणे
टुमस्जो	शुद्धौ	युजिर्	योगे
रुजो	भङ्गे	भञ्जो	आमर्दने
भुजो	कौटिल्ये	अञ्जू	व्यक्तिम्रक्षणकान्ति-
मृश	आमर्शने (आमर्शनं स्पर्शः)		गतिषु
स्पृश	संस्पर्शने	शिष्लृ	विशेषणे
विश	प्रवेशे	पिष्लृ	संचूर्णने
सृज	विसर्गे	भुज	पालनाभ्यवहारयोः
प्रच्छ	ज्ञीप्सायाम्	ञिइन्धी	दीप्तौ
कृ	विक्षेपे	विद	विचारणे
गृ	निगरणे		
षद्लृ	विशरणगत्यवसादनेषु		**अथ तनादयः**
शद्लृ	शातने	तनु	विस्तारे
घूर्ण	भ्रमणे	क्षिणु	हिंसायाम्
दृभी	ग्रन्थे	तृणु	अदने
पृङ्	व्यायामे	डुकृञ्	करणे
मृङ्	प्राणत्यागे	मनु	अवबोधने
ओविजी	भयचलनयोः	वनु	याचने

अथ क्र्यादयः

डुक्रीञ्	द्रव्यविनिमये
प्रीञ्	तर्पणे
श्रीञ्	पाके
षिञ्	बन्धने
पूञ्	पवने
लूञ्	छेदने
धूञ्	कम्पने
वृञ्	वरणे
ग्रह	उपादाने
ज्ञा	अवबोधने
बन्ध	बन्धने
पुष	पुष्टौ
मन्थ	विलोडने
ग्रन्थ	सन्दर्भे
मृद	क्षोदे
अश	भोजने
मुष	स्तेये
कुष	निष्कर्षे
क्षुभ	सञ्चलने
वृङ्	सम्भक्तौ

अथ चुरादयः

चुर	स्तेये
भक्ष	अदने
अर्च	पूजायाम्
कुत्स	निन्दायाम्
कृत	संशब्दने
क्षल	शोधने
खडि	भेदने
गुप	गोपने
घट्ट	चलने
घुषिर्	विशब्दने
चट	भेदने
चर्ब	चर्बणे
चिति	स्मृत्याम्
चूर्ण	पेषणे
छन्द	प्रलोभने
तड	आघाते
तर्ज	भर्त्सने
तर्क	वितर्के
तिज	निशाने
पट	विदारणे
पाल	रक्षणे
पुष	पोषणे
पूज	पूजायाम्
पूरी	आप्यायने
भर्त्स	तर्जने
भू	प्राप्तावात्मनेपदी
धूञ्	कम्पने
प्रीञ्	तर्पणे
मान	पूजायाम्
वच	परिभाषणे
वृजी	वर्जने
भूष	अलङ्कारे
मडि	भूषायाम्

मार्ग	अन्वेषणे
मृजू	शौचालङ्करणयोः
मृष	तितिक्षायाम्
अर्ज	अर्जने
अर्ह	पूजायाम्
ईर	गतौ कम्पने च
गर्ह	कुत्सायाम्
धृष	प्रहसने
मत्रि	गुप्तभाषणे
मोक्ष	मोक्षणे
घत	ताडने
यत्रि	बन्धने
लक्ष	दर्शने
लघि	लङ्घने
लड, लल	उपसेवायां विलासे च
लोचृ	भाषार्थः
वञ्चु	विप्रलम्भे
षान्त्व	सामप्रयोगे
कथ	वाक्यप्रबन्धे
रह	त्यागे
कर्ण	श्रवणे
कल	संख्याने
क्षप	अतिवाहने
गण	संख्याने
गवेष	मार्गणे
दण्ड	ताडने
पार	शक्तौ
मह	पूजायाम्
मिश्र	संयोजने
गुण	अभ्यासे
चित्र	चित्रीकारे
मूत्र	प्रस्रावे
रच	निर्माणे
रस	आस्वादे
वर	ज्ञीप्साज्ञाम्
वर्ण	रञ्जने
वास	सुरभीकारे
विडम्ब	अनुकारे
वीज	कम्पने व्यजनकरणे च
व्यय	धनव्यये
शील	अनुशीलने
श्लथ, श्रथ	दौर्बल्ये शिथिलीकारे च
सभाज	सत्कारे
सूच	व्यक्तीकारे
स्तेन	चौर्ये
स्पृह	इच्छायाम्
अर्थ	याचने
मृग	अन्वेषणे
गर्व	माने

अथ कण्ड्वादयः

कण्डूञ्	गात्रविघर्षणे
मन्तु	अपराधे
हृणीङ्	लज्जायाम्
महीङ्	पूजायाम्
तिरस्	अन्तर्धौ
उषस्	प्रभातीभावे
संभूयस्	प्रभूतभावे
भिषज्	चिकित्सायाम्

॥ इति धातुपाठः ॥

परिशिष्टम् (५)

अथ लिङ्गानुशासनसूत्रपाठः

अथ स्त्रीलिङ्गाधिकारः

१. लिङ्गम् ।
२. स्त्री ।
३. ऋकारान्ता मातृदुहितृस्वसृपोतृननान्दरः ।
४. अन्यूप्रत्ययान्तो धातुः ।
५. अशनिभरण्यरणयः पुंसि च ।
६. मिन्यन्तः ।
७. वह्निवृष्ण्यग्नयः पुंसि ।
८. श्रोणियोन्यूर्मयः पुंसि च ।
९. क्तिन्नन्तः ।
१०. ईकारान्तश्च ।
११. ऊङाबन्तश्च ।
१२. य्वन्तमेकाक्षरम् ।
१३. विंशत्यादिरानवतेः ।
१४. दुन्दुभिरक्षेषु ।
१५. नाभिरक्षत्रिये ।
१६. उभावप्यन्यत्र पुंसि ।
१७. तलन्तः ।
१८. भूमिविद्युत्सरिल्लतावनिताऽभिधानानि ।
१९. यादो नपुंसकम् ।
२०. भाः स्रुक्स्रग्दिगुष्णिगुपानहः ।
२१. स्थूणोर्णे नपुंसके च ।
२२. गृहशशाभ्यां क्लीबे ।
२३. प्रावृट् विप्रुट्रुट्तृट्विट्त्विषः ।
२४. दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्यौषधिकट्यङ्गुलयः ।

२५. तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविनीविराज्यादयः।
२६. शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः।
२७. प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत्समिधः।
२८. आशीर्धूःपूर्गीर्द्वारः।
२९. अप्सुमनस्समासिकतावर्षाणां बहुत्वं च।
३०. स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिचः।
३१. तृटिसीमासंबध्याः।
३२. चुल्लिवेणिखार्यश्च।
३३. ताराधाराज्योत्स्नादयश्च।
३४. शलाका स्त्रियां नित्यम्।

अथ पुंल्लिङ्गाधिकारः

१. पुमान्।
२. घञबन्तः।
३. घाजन्तश्च।
४. भयलिङ्गभगपदानि नपुंसके।
५. नङन्तः।
६. याच्ञा स्त्रियाम्।
७. क्यन्तो घुः।
८. इषुधिः स्त्री च।
९. देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्क्त्यभिधानानि।
१०. त्रिविष्टपत्रिभुवने नपुंसके।
११. द्यौः स्त्रियाम्।
१२. इषुबाहू स्त्रियां च।
१३. बाणकाण्डौ नपुंसके च।
१४. नान्तः।
१५. क्रतुपुरुषकपोलगुल्फमेधाभिधानानि।
१६. अभ्रं नपुंसकम्।
१७. उकारान्तः।
१८. धेनुरज्जुकुहुसरयुतनुकरेणुप्रियङ्गवः स्त्रियाम्।
१९. समासे रज्जुः पुंसि च।

२०. श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके च।
२१. वसु चार्थवाचि।
२२. मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च।
२३. रुत्वन्तः।
२४. दारुकसेरुजतुवस्तुमस्तूनि नपुंसके।
२५. सक्तुर्नपुंसके च।
२६. प्राग्रश्मेरकारान्तः।
२७. कोपधः।
२८. चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके।
२९. कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाक-भाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च।
३०. टोपधः।
३१. किरीटमुकुटललाटवटवीटशृङ्गाटकराटलोष्टानि नपुंसके।
३२. कुटकूटपटकपटकवाटकर्पटतटनिकटकीटकटानि नपुंसके च।
३३. णोपधः।
३४. ऋणलवणपर्णतोरणरणोष्णानि नपुंसके।
३५. कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च।
३६. थोपधः।
३७. काष्ठपृष्ठसिक्थोक्थानि नपुंसके।
३८. काष्ठा दिगर्थाः स्त्रियाम्।
३९. तीर्थप्रोथयूथगाथानि नपुंसके च।
४०. नोपधः।
४१. जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्लनि-म्रचिह्नानि नपुंसके।
४२. मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसम्मानभवनवसन-सम्भावनविभावनविमानानि नपुंसके च।
४३. पोपधः।
४४. पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके।
४५. शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च।
४६. भोपधः।
४७. तलभं नपुंसकम्।

४८. जृम्भं नपुंसके च।

४९. मोपधः।

५०. रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके।

५१. संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमदामानि नपुंसके च।

५२. योपधः।

५३. किशलयहृदयेन्द्रियोत्तरीयाणि नपुंसके।

५४. गोमयकषायमलयान्वयाव्ययानि नपुंसके च।

५५. रोपधः।

५६. द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्र-केयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वर-कुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्र-सूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके ।

५७. शुक्रमदेवतायाम्।

५८. चक्रवज्रान्धकारसारावारपारक्षीरतोमरश्रृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च।

५९. षोपधः।

६०. शिरीषऋजीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके।

६१. यूषकरीषामिषविषवर्षाणि नपुंसके च।

६२. सोपधः।

६३. पनसबिसबुससाहसानि नपुंसके।

६४. चमससरसनिर्यासोपवासकार्पासवासमासकासकंसमांसानि नपुंसके च।

६५. कंसं चाप्राणिनि।

६६. रश्मिदिवसाभिधानानि।

६७. दीधितिः स्त्रियाम्।

६८. दिनाहनी नपुंसके ।

६९. मानाभिधानानि।

७०. द्रोणाढकौ नपुंसके च।

७१. खारीमानिके स्त्रियाम्।

७२. दाराक्षतलाजासूनां बहुत्वं च।

७३. नाड्यपजनोपपदानि व्रणाङ्गपदानि।

७४. मरुद्गरुत्तरदृत्विजः।

७५. ऋषिराशिदृतिग्रन्थिकृमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः।
७६. ध्वजगजमुञ्जपुञ्जाः।
७७. हस्तकुन्तान्तवातव्रातदूतधूर्तसूतचूतमुहूर्त्ताः।
७८. षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाखण्डशिखण्डाः।
७९. वंशांशपुरोडाशाः।
८०. ह्रदकन्दकुन्दबद्बुदशब्दाः।
८१. अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः।
८२. पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणिततरङ्गतुरङ्गगन्धकमृदङ्गसङ्गसमुद्रपुङ्खाः।
८३. सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः।

अथ नपुंसकाधिकारः

१. नपुंसकम्।
२. भावे ल्युडन्तः।
३. निष्ठा च।
४. त्वष्यञौ तद्धितौ।
५. कर्मणि च ब्राह्मणादिगुणवचनेभ्यः।
६. यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि।
७. द्वन्द्वैकत्वम्।
८. अभाषायां हेमन्तशिशिरावहोरात्रे च।
९. अनञ्कर्मधारयस्तत्पुरुषः।
१०. अनल्पे छाया।
११. राजाऽमनुष्यपूर्वा सभा।
१२. सुरासेनाच्छायाशालानिशा स्त्रियां च।
१३. शिष्टः परवत्।
१४. अपथपुण्याहे नपुंसके।
१५. संख्यापूर्वा रात्रिः।
१६. द्विगुः स्त्रियां च।
१७. इसुसन्तः।
१८. अर्चिः स्त्रियां च।
१९. छदिः स्त्रियामेव।
२०. मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि।

२१. सीरार्थौदनाः पुंसि ।
२२. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च ।
२३. अटवी स्त्रियाम् ।
२४. लोपधः ।
२५. तुलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि ।
२६. शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालनिगलपलालबिडालखिल-शूलाः पुंसि च ।
२७. शतादिः संख्या ।
२८. शतायुतप्रयुताः पुंसि च ।
२९. लक्षाकोटिः स्त्रियाम् ।
३०. शङ्कुः पुंसि च ।
३१. सहस्रः क्वचित् ।
३२. मन्द्रयच्कोऽकर्तरि ।
३३. ब्रह्मन्पुंसि च ।
३४. नामरोमणी नपुंसके।
३५. असन्तो द्वयच्कः ।
३६. अप्सराः स्त्रियाम् ।
३७. त्रान्तः ।
३८. यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ।
३९. भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेद्रोष्ट्राः पुंसि ।
४०. पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ।
४१. बलकुसुमशुल्बपत्तनरणाभिधानानि ।
४२. पद्मकमलोत्पलानि पुंसि च ।
४३. आहवसंग्रामौ पुंसि ।
४४. आजिः स्त्रियामेव ।
४५. फलजातिः ।
४६. वृक्षजातिः स्त्रियामेव ।
४७. वियज्जगत्सकृत्शकनूपूषत्शकृदयकृदुदश्वितः ।
४८. नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि ।
४९. श्राद्धकुलिशदैवपीठकुण्डाङ्गाङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि ।
५०. दैवं पुंसि च ।

५१. धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्य-तूर्यसैन्यानि ।
५२. द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि ।
५३. अक्षमिन्द्रिये ।

अथ स्त्रीपुंसाधिकारः

१. स्त्रीपुंसयोः ।
२. गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः ।
३. मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः ।
४. गुणवचनमुकारान्तं नपुंसकं च ।
५. अपत्यार्थतद्धिते ।

अथ पुंनपुंसकाधिकारः

१. पुंनपुंसकयोः ।
२. घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः ।
३. शृङ्गार्धनिदाघोद्यमशल्यदृढाः ।
४. व्रजकुञ्जकुथकूर्चप्रस्थदर्पाभर्धर्चदर्भपुच्छाः ।
५. कबन्धौषधायुधान्ताः ।
६. दण्डमण्डखण्डशवसैन्धवपाश्वर्काशकुशकाशाङ्कुशकुलिशाः ।
७. गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च ।

अविशिष्टलिङ्गाधिकारः

१. अविशिष्टलिङ्गम् ।
२. अव्ययं कतियुष्मदस्मदः ।
३. ष्णान्ता संख्या ।
४. गुणवचनं च ।
५. कृत्याश्च ।
६. करणाधिकरणयोर्ल्युट् ।
७. सर्वादीनि सर्वनामानि।

॥ इति पाणिनिमुनिप्रणीतं लिङ्गानुशासनं समाप्तम् ॥

परिशिष्टम् (६)
पाणिनीयप्रबोधसूत्राणां सूची

सूत्रम्	पृ० सं०
अ	
अकः सवर्णे दीर्घः ६।१।१०१	६
अकथितं च १।४।५१	६३
अकृत्सार्वधातु० ७।४।२५	१२५
अच उपसर्गात्तः ७।४।४७	२१७
अचः ६।४।१३८.	३८
अचस्तास्वत्थल्य ७।२।६१	१२७
अचि र ऋतः ७।२।१००	५४
अचि विभाषा ८।२।२१	१८०
अचिश्नुधातु ६।४।७७	२३
अचो ञ्णिति ७।२।११५	२२
अचोऽन्त्यादि टि १।१।६४	२८
अचो यत् ३।१।९७	२११
अचो रहाभ्यां द्वे ८।४।४६	५५
अच्च घेः ७।३।११९	२१
अजादी गुणवचना ५।३।५८	१०३
अजादेर्द्वितीयस्य ६।१।२	१२२
अजाद्यतष्टाप् ४।१।४	३३/५९
अजाद्यदन्तम् २।२।३३	७९
अञ्झनगमां सनि ६।४।१६	१९५
अज्ञाते ५।३।७३	१०५
अञ्जेः सिचि ७।२।७१	१८२
अट्कुप्वाङ् ८।४।२	१८

सूत्रम्	पृ० सं०
अड्गार्ग्यगालवयोः ७।३।९९	१५८
अणुदित्सवर्णस्य १।३।९९	४
अत आदेः ७।४।७०	१३०
अत इञ् ४।१।९५	८३
अत इनिठनौ ५।२।११५	९८
अत उत्सार्वधातुके ६।४।११०	१५६/१८४
अत उपधायाः ७।२।११६	१३५
अत एकहल् ६।४।१२०	१३५
अतिशायने तमबि ५।३।५५	१०२
अतो गुणे ६।१।९७	४७/११६
अतो दीर्घो यञि ७।३।१०१	११६
अतो भिस ऐस् ७।१।९	१८
अतोऽम् ७।१।२४	४३
अतो येयः ७।२।८०	११९
अतो रोरप्लुतादप्लुते ६।१।११३	१३
अतो लोपः ६।४।४८	१९१
अतो ल्रान्तस्य ७।२।२	१४०
अतो हलादेर्लघोः ७।२।७	१३७
अतो हेः ६।४।१०५	११८
अत्रानुनासिकः ८।३।२	११
अत्वसन्तस्य ६।४।१४	२६
अदः सर्वेषाम् ७।३।१००	१५३

सूत्रम्	पृ० सं०	सूत्रम्	पृ० सं०
अदभ्यस्तात् ७।१।४	१५५	अन्येभ्योऽपि ३।२।७५	२१५
अदस औ सुलोपश्च ७।२।१०७	५२	अन्येष्वपि ३।२।१०१	२१५
अदसोऽसेर्दादु ८।२।८०	५२	अपरोक्षे च ३।२।११९	२०९
अदिप्रभृतिभ्यः २।४।७२	१५३	अपादाने चाहीय ५।४।४५	१०७
अदेङ् गुणः १।१।२	६	अपादाने पञ्चमी २।३।२८	६५
अधुना ५।३।१७	१०१	अपो भि ७।४।४८	४२
अन् ६।४।१६७	८४	अप्तृन्तृच्स्वसृ ६।४।११	२४
अनङ् सौ ७।१।९३	२२	अभ्यस्तस्य च ६।१।३३	१५२
अनद्यतने लङ् ३।२।१११	११७	अभ्यासस्यासवर्णे ६।४।७८	१२९
अनद्यतने लुट् ३।३।१५	१२०	अभ्यासाच्च ७।३।५५	१५५
अनद्यतने र्हिल् ५।३।२१	१०१	अभ्यासे चर्च ८।४।५४	१२२
अनश्च ५।४।१०८	६९	अमि पूर्वः ६।१।१०७	१७
अनाप्यकः ७।२।११२	५१	अम्बार्थनद्योर्ह्रस्वः ७।३।१०७	३४
अनितेः ८।४।१९	१५८	अम् सम्बुद्धौ ७।१।९९	४२
अनिदितां हल ६।४।२४	३८/१३९	अरुर्द्विषदजन्तस्य ६।३।६७	२१४
अनुदात्तङित १।३।१२	११४/१४२	अर्तिह्वीव्लीरीक्नू ७।३।३६	१९३
अनुदात्तस्य चर्दु० ६।१।५९	१७१	अर्थवदधातुरप्रत्य १।२।४५	१६
अनुदात्तोपदेश ६।४।३७	१५४	अर्वणस्त्रसाव ६।४।१२७	३०
अनुनासिकस्य क्वि ६।४।१५	२१९	अर्हे कृत्यतृचश्च ३।३।१६९	२१०
अनुपसर्जनात् ४।१।१४	६०	अलोऽन्त्यात्पूर्व १।१।६५	२२
अनुशतिकादीनां च ७।३।२०	९०	अल्पाच्तरम् २।२।३४	७९
अनुस्वारस्य ययि ८।४।५८	११	अल्लोपोऽनः ६।४।१३४	२८
अनेकमन्यपदार्थे २।२।२४	७६	अवक्षेपणे कन् ५।३।९५	१०६
अनेकाल्शित्सर्वस्य १।१।५५	१८	अव्यक्तानुकरणा ५।४।५७	१०८
अन्तादिवच्च ६।१।८५	१५७	अव्ययं विभक्ति २।१।६	६७
अन्तिकबाढयोर्नेद ५।३।६३	१०४	अव्ययसर्वनाम्नाम ५।३।७१	१०५
अन्येभ्योऽपि ३।२।१७८	२२०	अव्ययात्त्यप् ४।२।१०४	८८

सूत्रम्	पृ० सं०
अव्ययादाप्सुपः २।४।८२	५७
अव्ययीभावश्च १।१।४१	५८
अव्ययीभावश्च २।४।१८	६८
अव्ययीभावे शर ५।४।१०७	६८
अश्नोतेश्च ७।४।७२	१७७
अश्वपत्यादिभ्यश्च ४।१।८४	८२
अष्टन आ विभक्तौ ७।२।८४	५६
अष्टाभ्य औश् ७।१।२१	५६
असंयोगाल्लिट् कित् १।२।५	१२५
असिद्धवदत्राभात् ६।४।२२	१५४
अस्तिसिचोऽपृक्ते ७।३।९६	१२७
अस्तेर्भूः २।४।५२	१५७
अस्थिदधिसक्थ्य ७।१।७५	४४
अस्मद्युत्तमः १।४।१०७	११४
अस्मायामेधास्रज ५।२।१२१	९९
अस्य च्वौ ७।४।३२	१०८
अस्यतेस्थुक् ७।४।१७	१७२
अहन् ८।२।६८	४५
आ	
आक्रोशे नञ्यनिः ३।३।११२	२२३
आ क्वेस्तच्छील ३।२।१३४	२१९
आङि चापः ७।३।१०५	३३
आङो नास्त्रियाम् ७।३।१२०	२१
आ च त्वात् ५।१।११२०	९४
आ च हौ ६।४।११७	१६७
आच्छीनद्योर्नुम् ७।१।८०	५९
आटश्च ६।१।९०	३४/१२९

सूत्रम्	पृ० सं०
आडजादीनाम् ६।४।७२	१२८
आडुत्तमस्य पिच्च ३।४।९२	११८
आण्नद्याः ७।३।११२	३४
आत औ णलः ७।१।३४	१३२
आतः ३।४।११०	१३२
आतश्चोपसर्गे ३।१।१३६	२१४
आतो ङितः ७।२।८१	१४२
आतो धातोः ६।४।१४०	२०
आतोऽनुपसर्गे कः ३।२।३	२१४
आतो मनिन्क्वनि ३।२।७४	२१४
आतो युक् चिण् ७।३।३३	२१३
आतो लोप इटि च ६।४।६४	१३२
आत्मनेपदेष्वनतः ७।१।५	१४४/१६०
आत्मनेपदेष्वन्य ३।१।५४	१५२/१७८
आत्मन्विश्वजन ५।१।९	९३
आत्माध्वानौ खे ६।४।१६९	९३
आदिरन्त्येन १।१।७१	२
आदिर्ञिटुडवः १।३।५	१३८
आदेच उपदेशे ६।१।४५	१३४
आदेशप्रत्यययोः ८।३।५९	१९
आद्गुणः ६।१।८७	६
आद्यन्तवदेकस्मिन् १।१।२१	५१
आद्यन्तौ टकितौ १।१।४६	१०
आधारोऽधिकरणम् १।४।४५	६६
आनङृतो द्वन्द्वे ६।३।२५	७९
आने मुक् ७।२।८२	२१६
आन्महतः समाना ६।३।४६	७४

सूत्रम्	पृ० सं०
आभीक्ष्ण्ये णमुल्च ३।४।२२	२२४
आमः २।४।८१	१४५
आमि सर्वनाम्न ७।१।५२	४६
आमेतः ३।४।९०	१४३
आम्प्रत्ययवत् १।३।६३	१४५
आयनेयीनीयियः ७।१।२	८३
आर्धधातुकं शेषः ३।४।११४	११९
आर्धधातुकस्येड् ७।२।३५	११९
आशिषि लिङ्लोटौ ३।३।१७३	११७
आ सर्वनाम्नः ६।३।९१	४०/९६
आहस्थः ८।२।३५	१६३

इ

इकोऽचि विभक्तौ ७।१।७३	४४
इको झल् १।२।९	१९५
इको यणचि ६।१।७७	७
इगन्ताच्च लघु ५।१।१३१	९५
इगुपधज्ञाप्रीकिरः ३।१।१३५	२१३
इग्यणः संप्रसारणम् १।१।४५	२९
इजादेश्च गुरुमतो ३।१।३६	१४५
इट ईटि ८।२।२८	१३१
इटोऽत् ३।४।१०६	१४३
इडत्यर्तिव्ययतीनाम् ७।२।६६	१३०
इणः षीध्वंलुङ् ८।३।७८	१४४
इणो गा लुङि २।४।४५	१५६
इणो यण् ६।४।८१	१५६
इतश्च ३।४।१००	११७
इतोऽत्सर्वनाम ७।१।८६	२८

सूत्रम्	पृ० सं०
इतो मुनष्यजातेः ४।१।६५	६१
इदं किमोरीश्की ६।३।९०	९६
इदम इश् ५।३।३	१००
इदमस्थमुः ५।३।२४	१०२
इदमो मः ७।२।१०८	५१
इदमो र्हिल् ५।३।१६	१०१
इदमो हः ५।३।११	१००
इदितो नुम् धातोः ७।१।५८	१३९
इदुद्भ्याम् ७।३।११७	३४
इदोऽय् पुंसि ७।२।१११	५१
इन्द्रवरुणभवशर्व ४।१।४९	६१
इन्धिभवतिभ्याञ्च १।२।६	१९९
इन्हन्पूषार्यम्णां शौ ६।४।१२	२७
इरितो वा ३।१।५७	१३८
इवे प्रतिकृतौ ५।३।९६	१०५/१०६
इषुगमियमां छः ७।३।७७	१३४
इसुसुक्तान्तात्कः ७।३।५१	८८

ई

ई च गणः ७।४।९७	१९१
ईडजनोर्ध्वे च ७।२।७८	१६२
ईदूदेद् द्विवचनम् १।१।११	८
ईद्यति ६।४।६५	२१२
ईशः से ७।२।७७	१६२
ईषदसमाप्तौ कल्प ५।३।६७	१०५
ई हल्यघोः ६।४।११३	१६७

उ

उगितश्च ४।१।६	५९

सूत्रम्	पृ० सं०
उगिदचां सर्व० ७।१।७०	२६
उच्चैरुदात्तः १।२।२९	३
उणादयो बहुलम् ३।३।१	२२१
उतश्च प्रत्यया ६।४।१०६	१२६
उतो वृद्धिर्लुकि ७।३।८९	१५९
उद ईत् ६।४।१३९	३९
उदोष्ठ्यपूर्वस्य ७।१।१०२	१८६
उपदेशेऽजनुनासिक १।३।२	२/१०
उपदेशेऽत्वतः ७।२।६२	१३५
उपधायां च ८।२।७८	१८९
उपधायाश्च ७।१।१०१	१८९
उपमानादाचारे ३।१।१०	२०१
उपमानानि सामा २।१।५५	७२
उपमाने कर्मणि च ३।४।४५	२२५
उपमितं व्याघ्रा २।१।५६	७२
उपसर्गस्यायतौ ८।२।१९	१४९
उपसर्गाः क्रियायोगे १।४।५९	५८
उपसर्गादसमासे ८।४।१४	१७०
उपसर्गादृति धातौ ६।१।९१	७
उपसर्गे घोः किः ३।३।९२	२२२
उपसर्जनं पूर्वम् २।२।३०	६७
उभे अभ्यस्तम् ६।१।५	२६/१६६
उरण् रपरः १।१।५१	६
उरत् ७।४।६६	१३०
उर्ऋत् ७।४।७	१८९
उश्च १।२।१२	१५०
उषविदजागृ० ३।१।३८	१५६
उस्यपदान्तात् ६।१।९६	१२७

ऊ

ऊकालोऽज्झस्व० १।२।२७	३
ऊडुतः ४।१।६६	६२
ऊरूत्तरपदादौपम्ये ४।१।६९	६२

ऋ

ऋक्पूरब्धूः पथामानक्षे ५।४।७४	८१
ऋच्छत्यृताम् ७।४।११	१३०
ऋत उत् ६।१।१११	२४
ऋतश्च ७।४।९२	२००
ऋतश्च संयोगादेः ७।२।४३	१७६
ऋतश्च संयोगादेर्गुणः ७।४।१०	१३१
ऋतष्ठञ् ४।३।७८	९०
ऋतो ङिसर्वनाम० ७।३।११०	२४
ऋतो भारद्वाजस्य ७।२।६३	१२८
ऋत्विग्दधृक्स्रग्दि० ३।२।५९	३७
ऋदुशनस्पुरुदंसोऽने० ७।१।९४	२४
ऋदृशोऽङि गुणः ७।४।१६	१४०
ऋद्धनोः स्ये ७।२।७०	१२९
ऋन्नेभ्यो ङीप् ४।१।५	५९
ऋहलोर्ण्यत् ३।१।१२४	२१२

ॠ

ॠत इद्धातोः ७।१।१००	१३२
ॠदोरप् ३।३।५७	२२३

ए

एकवचनं संबुद्धिः २।३।४९	१९
एकवचनस्य च ७।१।३२	४९

सूत्रम्	पृ० सं०
एकविभक्ति चापूर्व० १।२।४४	७४
एकस्य सकृच्च ५।४।१९	१०६
एकाच उपदेशे ७।२।१०	१२४
एकाचो द्वे प्रथमस्य ६।१।१	१२२
एकाचो वशो भष० ८।२।३७	४०
एङः पदान्तादति ६।१।१०९	८
एङि पररूपम् ६।१।९४	७
एङ् ह्रस्वात् ६।१।६९	१९
एच इग्घ्रस्वादेशे १।१।४८	४४
एचोऽयवायावः ६।१।७८	८
एजेः खश् ३।२।२८	२१४
एत ईद् बहुवचने ८।२।८१	५२
एत ऐ ३।४।९३	१४३
एतत्तदोः सुलोपो० ६।१।१३२	१५
एतदोऽन् ५।३।५	१००
एतिस्तुशास्वृदृजु० ३।१।१०९	२१२
एतेतौ रथोः ५।३।४	१०१
एतेर्लिङि ७।४।२४	१२९/१५७
एत्येधत्यूठ्सु ६।१।८९	७
एरच् ३।३।५६	२२२
एरनेकाचोऽसंयोग० ६।४।८२	२३
एरुः ३।४।८६	११७
एर्लिङि ६।४।६७	१३२

ओ

ओः पुयण्ज्यपरे ७।४।८०	१९०
ओः सुपि ६।४।८३	२३
ओतः श्यनि ७।३।७१	१७३
ओदितश्च ८।२।४५	२१८
ओरावश्यके ३।१।१२५	२१२
ओर्गुणः ६।४।१४६	८२
ओसि च ७।३।१०४	१९

औ

औङ आपः ७।१।१८	३३
औत् ७।३।११८	२१
औतोऽम्शसोः ६।१।९३	३६

क

कण्ड्वादिभ्यो यक् ३।१।२७	२०३
कर्तरि कृत् ३।४।६७	२१३
कर्तरि शप् ३।१।६८	११५
कर्तुः क्यङ् सलोपश्च ३।१।११	२०१
कर्तुरीप्सिततमं कर्म १।४।४९	६३
कर्तृकरणयोस्तृतीया २।३।१८	६४
कर्तृकरणे कृता बहु० २।१।३२	७०
कर्तृकर्मणोः कृति २।३।६५	६६
कर्मणा यमभिप्रैति० १।४।३२	६४
कर्मणि द्वितीया २।३।२	६३
कर्मण्यण् ३।२।१	२१४
कर्मण्याक्रोशे० ३।४।२५	२२५
कषादिषु यथा ३।४।४६	२२५
काम्यच्च ३।१।९	२०१
कारके १।४।२३	६३
कालाट्ठञ् ४।३।११	८९
किंसर्वनामबहु० ५।३।२	९९
किति च ७।२।११८	८३
किदाशिषि ३।४।१०४	१२३
किमः संख्यापरि० ५।२।४१	९७

सूत्रम्	पृ० सं०
किमश्च ५।३।२५	१०२
किमिदंभ्यां वो घः ५।२।४०	९६
किमेत्तिङव्ययघा० ५।४।११	१०३
किमोऽत् ५।३।१२	१००
कुगतिप्रादयः २।२।१८	७३
कु तिहोः ७।२।१०४	९९
कुत्सिते ५।३।७४	१०५
कुप्वोः ≍ क ≍ पौ च ८।३।३७	१३
कुलात्खः ४।१।१३९	८४
कुहोश्चुः ७।४।६२	१२७
कृञ् चानुप्रयुज्य ३।१।४०	१४५
कृत्तद्धितसमासाश्च १।२।४६	१६
कृत्यल्युटो बहुलम् ३।३।११३	२११
कृत्याः ३।१।९५	२११
कृदतिङ् ३।१।९३	३७/२१३
कृन्मेजन्तः १।१।३९	५८
कृभ्वस्तियोगे सम्पद्य० ५।४।५०	१०८
कृसृभृवृस्तुद्रु० ७।२।१३	१२५
क्ङिति च १।१।५	१२३
क्तक्तवतू निष्ठा १।१।२६	२१७
क्त्वातोसुन्क० १।१।४०	५८
क्यचि च ७।४।३३	२०१
क्रतूक्थादिसूत्रान्ता० ४।२।६०	८६
क्रमः परस्मैपदेषु ७।३।७६	१३७
क्रमादिभ्यो वुन् ४।२।६१	८६
क्रीङ्जीनां णौ ६।१।४८	१९३
क्रुद्धद्रुहेर्ष्यासू० १।४।३७	६५
क्र्यादिभ्यः श्ना ३।१।८१	१८६
क्वाति ७।२।१०५	१००
क्विन्प्रत्ययस्य कुः ८।२।६२	३८
क्विप् च ३।२।७६	२१५
क्षत्राद्घः ४।१।१३८	८४
क्षायो मः ८।२।५३	२१९
क्षुभ्नादिषु च ८।४।३९	१८७
क्षसस्याचि ७।३।७२	१६४
ख	
खरवसानयोर्विस० ८।३।१५	११
खरि च ८।४।५५	९
ख्यत्यात्परस्य ६।१।११२	२१
ग	
गतिबुद्धिप्रत्यव० १।४।५२	१९३
गतिश्च १।४।६०	५८
गत्यर्थाकर्मक ० ३।४।७२	२१७
गमहनजनखन० ६।४।९८	१३५
गमेरिट् परस्मैपदेषु ७।२।५८	१३५
गाङ्कुटादिभ्योऽञ्णि०१।२।१	१६०/१७९
गाङ् लिटि २।४।४९	१६१
गातिस्थाघुपाभू० २।४।७७	१२१
गुणवचनब्राह्मणा० ५।१।१२४	९५
गुणो यङ्लुकोः ७।४।८२	१९७
गुणोर्तिसंयोगाद्योः ७।४।२९	१३०
गोतो णित् ७।१।९०	३६
गोपयसोर्यत् ४।३।१६०	९१
गोरतद्धितलुकि ५।४।९२	७३

सूत्रम्	पृ० सं०
गोश्च पुरीषे ४।३।१४५	९१
गोस्त्रियोरुपसर्जन० १।२।४८	७४
ग्रहोऽलिटि दीर्घः ७।२।३७	१८६
ग्रामजनबन्धुभ्यस्तल् ४।२।४३	८५
ग्रामाद्यखञौ ४।२।९४	८७
घ	
घेर्ङिति ७।३।१११	२१
घ्वसोरेद्धावभ्या० ६।४।११९	१५७
ङ	
ङमो ह्रस्वादचि० ८।३।३२	१०
ङसिङसोश्च ६।१।११०	२१
ङसिङ्योः स्मात्० ७।१।१५	४६
ङिच्च १।१।५३	२२
ङिति ह्रस्वश्च १।४।६	३४
ङे प्रथमयोरम् ७।१।२८	४७
ङेराम्नद्याम्नीभ्यः ७।३।११६	२३/३४
ङेर्यः ७।१।१३	१८
ङ्णोः कुक्टुक्शरि ८।३।२८	३९
च	
चक्षिङः ख्याञ् २।४।५४	१६१
चङि ६।१।११	१२५
चतुरनडुहोरामु० ७।१।९८	४१
चतुर्थी तदर्थार्थ० २।१।३६	७०
चतुर्थी सम्प्रदाने २।३।१३	६४
चरति ४।४।८	९१
चादयोऽसत्वे १।४।५७	५७
चार्थे द्वन्द्वः २।२।२९	७६/७८
चिणो लुक् ६।४।१०४	१७३
चिण्ते पदः ३।१।६०	१७४
चिण्भावकर्मणोः ३।१।६६	२०६
चुटू १।३।७	१७
चोः कुः ८।२।३०	३७
चौ ६।३।१३८	३८
च्लि लुङि ३।१।४३	१२१
च्लेः सिच् ३।१।४४	१२१
च्वौ च ७।४।२६	१०८
छ	
छे च ६।१।७३	१०
ज	
जश्शसोः शिः ७।१।२०	४३
जक्षित्यादयः षट् ६।१।६	१५५
जनसनखनां सञ्झलोः ६।४।४२	२१९
जनिकर्तुः प्रकृतिः १।४।३०	६५
जनिवध्योश्च ७।३।३५	१७३
जशः शी ७।१।१७	४६
जसि च ७।३।१०९	२०
जहातेश्च ६।४।११६	१६७
जातेरस्त्रीविषयाद० ४।१।६३	६१
जुसि च ७।३।८३	१६६
जुहोत्यादिभ्यः० २।४।७५	१६६
ज्ञाजनोर्जा ७।३।७९	१७३
ज्य च ५।३।६१	१०३
ज्यादादीयसः ६।४।१६०	१०३

सूत्रम्	पृ० सं०
झ	
झयः ५।४।१११	६९
झयः ८।२।१०	९८
झयो होऽन्यतर० ८।४।६२	१०
झरो झरि सवर्णे ८।४।६५	१८१
झलां जशोऽन्ते ८।२।३९	९
झलां जश्झशि ८।४।५३	१३६
झलो झलि ८।२।२६	१३६
झषस्तथोर्धोऽधः ८।२।४०	१३६
झस्य रन् ३।४।१०५	१४३
झेर्जुस् ३।४।१०८	११९
झोऽन्तः ७।१।३	११६
ट	
टाङसिङसामिना० ७।१।१२	१८
टिड्ढाणञ्द्वय० ४।१।१५	६०
टित आत्मनेपदा० ३।४।७९	१४२
टेः ६।४।१४३	९७
टेः ६।४।१५५	९५
ट्वितोऽथुच् ३।३।८९	२२२
ठ	
ठस्येकः ७।३।५०	८६
ड	
डति च १।१।२५	५४
ढ	
ढकि लोपः ४।१।१३३	८३
ढो ढे लोपः ८।३।१३	१५१
ढ्रलोपे पूर्वस्य० ६।३।१११	१४/१५२
ण	
णलुत्तमो वा ७।१।९१	१२५
णिचश्च १।३।७४	१८८
णिश्रिद्रुस्रु० ३।१।४८	१२५
णेरनिटि ६।४।५१	१८८
णो नः ६।१।६५	१३६
णौ चङ्युपधायाः० ७।४।१	१८८
णौ च संश्चङोः २।४।५१	१९४
ण्वुल्तृचौ ३।१।१३३	२१३
त	
तङानावात्मनेप० १।४।१००	११४
तत आगतः ४।३।७४	८७/९०
तत्पुरुषः २।१।२२	७०
तत्पुरुषः समाना० १।२।४२	७२
तत्पुरुषे कृति० ६।३।१४	२१५
तत्प्रकृतवचने ५।४।२१	१०६
तत्प्रयोजको हेतुश्च १।४।५५	६३/१९२
तत्र जातः ४।३।२५	८७
तत्र तस्येव ५।१।११६	९४
तत्र नियुक्तः ४।४।६९	९२
तत्र भवः ४।३।५३	८७/८९
तत्र साधुः ४।४।९८	९३
तदधीते तद्वेद ४।२।५९	८६
तदर्हति ५।१।६३	९४
तदस्य पण्यम् ४।४।५१	९१
तदस्य संजातं तार० ५।२।३६	९६
तदस्यास्त्यस्मिन्० ५।२।९४	९८

सूत्रम्	पृ० सं०
तदोः सः साव० ७।२।१०६	४७
तदो दा च ५।३।१९	१०१
तद्धितश्चासर्व० १।१।३८	५८
तद्धिताः ४।१।७६	६२
तद्धितार्थोत्तरपद०; २।१।५१	७३
तद्धितेष्वचामा० ७।२।११७	८२
तनादिकृञ्भ्यः० ३।१।७९	१५६/१८४
तनादिभ्यस्तथा० २।४।७९	१८४
तपरस्तत्कालस्य १।१।७०	४
तयोरेव कृत्यक्त० ३।४।७०	२११
तरति ४।४।५	९१
तरप्तमपौ घः १।१।२२	१०३
तवकममकावेक० ४।३।३	८९
तवममौ ङसि ७।२।९६	४९
तव्यत्तव्यानीयरः ३।१।९६	२११
तसौ मत्वर्थे १।४।१९	९८
तस्थस्थमिपां तान्त० ३।४।१०१	११७
तस्माच्छसो नः० ६।१।१०३	१७
तस्माद्ध्रुडचि० ६।३।७४	७५
तस्मान्नुड् द्विहलः ७।४।७१	१३९
तस्मिन्निणि च० ४।३।२	८८
तस्मै हितम् ५।१।५	९३
तस्य पूरणे डट् ५।२।४८	९७
तस्य भावस्त्वतलौ ५।१।११९	९४
तस्य लोपः १।३।९	१०
तस्य विकारः ४।३।१३४	९१
तस्य समूहः ४।२।३७	८५

सूत्रम्	पृ० सं०
तस्यापत्यम् ४।१।९२	८२
तस्येदम् ४।३।१२०	९१
तान्येकवचन० १।४।१०२	११५
तासस्त्योर्लोपः ७।४।५०	१२१
तिङश्च ५।३।५६	१०३
तिङस्त्रीणि त्रीणि० १।४।१०१	११५
तिङ्शित्सार्वधातुकम् ३।४।११३	११५
तितुत्रतथसिसुसर० ७।२।९	२२३
तिप्तस्झिसिप्थस्० ३।४।७८	११४
तिप्यनस्तेः ८।२।७३	१५५
तिरसस्तिर्यलोपे ६।३।९४	३९
तिविंशतेर्डिति ६।४।१४२	९८
तिष्ठतेरित् ७।४।५	१९४
तुदादिभ्यः शः ३।१।७७	१७८
तुभ्यमह्यौ ङयि ७।२।९५	४९
तुमुन्ण्वुलौ क्रिया० ३।३।१०	२२४
तुरुस्तुशम्यमः० ७।३।९५	१५९
तुल्यास्यप्रयत्नं सवर्णम् १।१।९	३
तुह्योस्तातङ्ङाशि० ७।१।३५	११७
तृतीया तत्कृता० २।१।३०	७०
तृतीयादिषु भाषित० ७।१।७४	४४
तृतीयासप्तम्योर्बहुलम् २।४।८४	६८
तृन् ३।२।१३५	२१९
तृफलभजत्रपश्च ६।४।१२२	१३१
तेन क्रीतम् ५।१।३७	९३/९४
तेन तुल्यं क्रिया० ५।१।११५	९३/९४

सूत्रम्	पृ० सं०
तेन दीव्यति खनति० ४।४।२	८२/९१
तेन प्रोक्तम् ४।३।१०१	८७/९०
तेन रक्तं रागात् ४।२।१	८५
तेन सहेति तुल्य० २।२।२८	७७
ते प्राग्धातोः १।४।८०	१२४
तेमयावेकवचनस्य ८।१।२२	५०
तोर्लि ८।४।६०	९
तौ सत् ३।२।१२७	२१६
त्यदादिषु दृशोऽना० ३।२।६०	३९
त्यदादीनामः ७।२।१०२	४७
त्यदादीनि च १।१।७४	८८
त्रिचतुरोः स्त्रियाम्० ७।२।९९	५४
त्रेः संप्रसारणं च ५।२।५५	९७
त्रेस्त्रयः ६।३।४८	८०
त्रेस्त्रयः ७।१।५३	५४
त्वमावेकवचने ७।२।९७	४८
त्वामौ द्वितीयायाः ८।१।२३	४९
त्वाहौ सौ ७।२।९४	४७
थ	
थलि च सेटि ६।४।१२१	१३६
थासः से ३।४।८०	१४२
थोन्थः ७।१।८७	२८
द	
दंशसञ्जस्वञ्जां शपि ६।४।२५	१३९
दक्षिणापश्चात्पुर० ४।२।९८	८७
दण्डादिभ्यो यत् ५।१।६६	९४
दधस्तथोश्च ८।२।३८	१६९
दधातेर्हिः ७।४।४२	२१७
दयायासश्च ३।१।३७	१४९
दश्च ७।२।१०९	५१
दश्च ८।२।७५	१५६
दादेर्धातोर्घः ८।२।३२	४०/१३६
दाधर्तिदर्धर्ति० ७।४।६५	१९९
दाधा घ्वदाप् १।१।२०	१३३
दानीं च ५।३।१८	१०१
दिक्शब्देभ्यः सप्त० ५।३।२७	९९
दिक्संख्ये संज्ञायाम् २।१।५०	७३
दित्यदित्यादित्य० ४।१।८५	८२
दिव उत् ६।१।१३१	३७
दिव औत् ७।१।८४	३७
दिवादिभ्यः श्यन् ३।१।६९	१७०
दीपजनबुधपूरि० ३।१।६१	१७३
दीर्घ इणः किति ७।४।६९	१५७
दीर्घाज्जसि च ६।१।१०५	२०
दीर्घोऽकितः ७।४।८३	१९७
दीर्घो लघोः ७।४।९४	१८८
दो दद्घोः ७।४।४६	२१७
द्युतिस्वाप्योः ७।४।६७	१४७
द्युद्भ्यो लुङि १।३।९१	१४७
द्युप्रागपागुदक्प्र० ४।२।१०१	८७
द्वन्द्वं रहस्यमर्या० ८।१।१५	१०९
द्वन्द्वश्च प्राणितूर्य० २।४।२	७८
द्वन्द्वाच्चुदषहा० ५।४।१०६	८१
द्वन्द्वे घि २।२।३२	७८

सूत्रम्	पृ० सं०
द्विगुरेकवचनम् २।४।१	७३
द्विगोः ४।१।२१	६०
द्वितीया टौस्वेनः २।४।३४	५१
द्वितीयायां च ७।२।८७	४८
द्वितीया श्रितातीत० २।१।२४	७०
द्वित्रिचतुर्भ्यः सुच् ५।४।१८	१०६
द्वित्रिभ्यां तयस्या० ५।२।४३	९७
द्विर्वचनेऽचि १।१।५९	१२५/१२९
द्विवचनविभज्यो० ५।३।५७	१०३
द्विषश्च ३।४।११२	१६५
द्वेस्तीयः ५।२।५४	९७
द्व्यन्तरुपसर्गेभ्यो० ६।३।९७	८१
द्व्यष्टनः संख्यायाम० ६।३।४७	८०
द्व्येकयोर्द्विवचनैक० १।४।२२	१६/११५

ध

धातुसंबन्धे प्रत्ययाः ३।४।१	२०९
धातोः ३।१।९१	२१३
धातोः कर्मणः० ३।१।७	१९५
धातोरेकाचो हला० ३।१।२२	१९७
धात्वादेः षः सः ६।१।६४	१३३
धान्यानां भवने क्षेत्रे ५।२।१	९६
धारेरुत्तमर्णः १।४।३५	६४
धि च ८।२।२५	१४४
ध्रुवमपायेऽपादा० १।४।२४	६५

न

न क्त्वा सेट् १।२।१८	२२४
न क्रोडादिबह्वचः ४।१।५६	६१
नक्षत्रेण युक्तः ४।२।३	८५
न ङिसम्बुद्ध्योः ८।२।८	२७
न चवाहाहैवयुक्ते ८।१।२४	५०
नञ् २।२।६	७५
न तिसृचतसृ ६।४।४	५४
न दृशः ३।१।४७	१४०
नद्यादिभ्यो ढक् ४।२।९७	८७
नन्दिग्रहिपचादि० ३।१।१३४	२१३
नन्द्राः संयोगादयः ६।१।३	१८८
न पदान्ताट्टोरनाम् ८।४।४२	४१
नपुंसकमनपुंसके० १।२।६९	७९
नपुंसकस्य झलचः ७।१।७२	४३
नपुंसकाच्च ७।१।१९	४३
नपुंसके भावे० ३।३।११४	२२३
न पूजनात् ५।४।६९	७४
न भकुर्छुराम् ८।२।७९	१८४
न भूसुधियोः ६।४।८५	२४
नमः स्वस्तिस्वा० २।३।१६	६५
नमुने ८।२।३	५२
न य्वाभ्यां पदा० ७।३।३	८६
न लिङि ७।२।३९	१७६
नलोपः प्रातिपदिकान्तस्य ८।२।७	२२
नलोपो नञः ६।३।७३	७५
न विभक्तौ तुस्माः १।३।४	१७
न वृद्भ्यश्चतुर्भ्यः ७।२।५९	१४८
नशेः षान्तस्य ८।४।३६	१७१
नश्चापदान्तस्य० ८।३।२४	११

सूत्रम्	पृ० सं०
नश्छव्यप्रशान् ८।३।७	११
न षट्स्वस्नादिभ्यः ४।१।१०	५९
न संयोगाद्वमन्तात् ६।४।१३७	२८
न सम्प्रसारणे सम्प्र० ६।१।३७	२९
नस्तद्धिते ६।४।१४४	६९
नहो धः ८।२।३४	४२
नाग्लोपिशास्वृ० ७।४।२	१९०
नाञ्चेः पूजायाम् ६।४।३०	३९
नादिचि ६।१।१०४	१७
नान्तादसंख्यादेर्मट् ५।२।४९	९७
नाभ्यस्तस्याचि० ७।३।८७	१९९
नाभ्यस्ताच्छतुः ७।१।७८	२६
नामि ६।४।३	१९
नाव्ययीभावादतो० २।४।८३	६८
नित्यं करोतेः ६।४।१०८	१८४
नित्यं कौटिल्ये० ३।१।२३	१९७
नित्यं ङितः ३।४।९९	११७
नित्यमाम्रेडिते० ६।१।१००	१०८
नित्यवीप्सयोः ८।१।४	१०९
निरः कुषः ७।२।४६	१८७
निष्ठा २।२।३६	७७
निष्ठा ३।२।१०२	२१७
निष्ठायां सेटि ६।४।५२	२१९
नीचैरुदात्तः १।२।३०	३
नुम्विसर्जनीय० ८।३।५८	३१
नृ च ६।४।६	२५
नेटि ७।२।४	१३७
नेड्वशि कृति ७।२।८	२१५
नेदमदसोरकोः ७।१।११	५१
नेयङुवङ्स्थाना० १।४।४	३६
नेर्विशः १।३।१७	२०४
नोपधायाः ६।४।७	५५
प	
पङ्क्तिविंशति० ५।१।५९	९४
पचो वः ८।२।५२	२१९
पञ्चमी भयेन २।१।३७	७०
पञ्चम्या अत् ७।१।३१	४९
पञ्चम्यास्तसिल् ५।३।७	९९
पतः पुम् ७।४।१९	१४०
पतिः समास एव १।४।८	२१
पत्यन्तपुरोहिता० ५।१।१२८	९६
पथिमथ्यृभुक्षामात् ७।१।८५	२७
पदान्तस्य ८।४।३७	१८
परवल्लिङ्गं द्वन्द्व० २।४।२६	७८
परस्मैपदानाम्० ३।४।८२	१२२
परिव्यवेभ्यः क्रियः १।३।१८	२०४
परोक्षे लिट् ३।२।११५	१२१
पर्यभिभ्यां च ५।३।९	१००
पाघ्राध्मास्था० ७।३।७८	१२९
पिता मात्रा १।२।७०	७९
पितुर्यच्च ४।३।७९	९०
पितृव्यमातुल० ४।२।३६	८५
पितृष्वसुश्छण् ४।१।१३२	८३
पुंयोगादाख्यायाम् ४।१।४८	६१
पुंवत्कर्मधारय० ६।३।४२	७२

सूत्रम्	पृ० सं०
पुंसोऽसुङ् ७।१।८९	३१
पुगन्तलघूपधस्य च ७।३।८६	१३८
पुमान्स्त्रिया १।२।६७	७९
पुषादिद्युता० ३।१।५५	१३५
पूङः क्त्वा च १।२।२२	२१९
पूङश्च ७।२।५१	२१९
पूर्वत्रासिद्धम् ८।२।१	८
पूर्वोऽभ्यासः ६।१।४	१२२
पृथ्वादिभ्यः० ५।१।१२२	९५
प्रकारवचने थाल् ५।३।२३	१०२
प्रकृत्यैकाच् ६।४।१६३	१०३
प्रज्ञादिभ्यश्च ५।४।३८	१०७
प्रतियोगे पञ्चम्याः ५।४।४४	१०७
प्रत्ययस्थात्कात्० ७।३।४४	६०
प्रत्ययोत्तरपदo ७।२।९८	८९
प्रथमयोः पूर्वसवर्णः ६।१।१०२	१७
प्रथमानिर्दिष्टं समा० १।२।४३	६७
प्रथमायाश्च० ७।२।८८	४८
प्रमाणे द्वयसज्० ५।२।३७	९६
प्रशंसायां रूपप् ५।३।६६	१०५
प्रशस्य श्रः ५।३।६०	१०३
प्रहरणम् ४।४।५७	९२
प्राक् कडारात्स० २।१।३	६७
प्राक् क्रीताच्छः ५।१।१	९३
प्रागिवात्कः ५।३।७०	१०५
प्राग्घिताद्यत् ४।४।७५	९३
प्राग्दिशो विभक्तिः ५।३।१	८२/९९
प्राग्दीव्यतोऽण् ४।१।८३	८२
प्राग्रीश्वरान्निपाताः १।४।५६	५७/१०८
प्राग्वतेष्ठञ् ५।१।१८	९३
प्राग्वतेष्ठक् ४।४।१	९१
प्रातिपदिकार्थलिङ्ग २।३।४६	६३
प्रादयः १।४।५८	५८
प्रिववशे वदः खच् ३।२।३८	२१४
प्रियस्थिरस्फिरोरु० ६।४।१५७	१०४
प्लुतप्रगृह्या अचि० ६।१।१२५	८
प्वादीनां ह्रस्वः ७।३।८०	१८६

ब

बभूथाततन्थजगृ० ७।२।६४	१७६
बहुगणवतुडति० १।१।२३	५४
बहुवचनस्य वस्न० ८।१।२१	५०
बहुवचने झल्येत् ६।३।१०३	१९
बहुव्रीहौ संख्येये० ५।४।७३	७७
बहुषु बहुवचनम् १।४।२१	१७/११६
बह्वल्पार्थाच्छ० ५।४।४२	१०७
बह्वादिभ्यश्च ४।१।४५	६१
बुधयुधनशजने० १।३।८६	१९४
ब्रह्मणस्त्वः ५।१।१३६	९४
ब्रुव ईट् ७।३।९३	१६३
ब्रुवः पञ्चानामा० ३।४।८४	१६३
ब्रुवो वचिः २।४।५३	१६३

भ

भवतष्ठक्छशौ ४।२।११५	८८
भवतेरः ७।४।७३	१२२
भस्य टेर्लोपः ७।१।८८	२८

सूत्रम्	पृ० सं०
भावकर्मणोः १।३।१३	२०६
भावे ३।३।१८	२२२
भियोऽन्यतरस्याम् ६।४।११५	१६६
भीत्रार्थानां भयहेतुः १।४।२५	६५
भीह्रीभृहुवां श्लुवच्च ३।१।३९	१६६
भुजोऽनवने १।३।६६	१८३
भुवो वुग्लुङ्लिटोः ६।४।८८	१२१
भूते ३।२।८४	२१५
भूवादयो धातवः १।३।१	१११/११३
भूसुवोस्तिङि ७।३।८८	१२१
भृञामित् ७।४।७६	१६८
भोभगोअघो० ८।३।१७	१४
भ्यसोऽभ्यम् ७।१।३०	४९
भ्राजभासधुर्वि० ३।२।१७७	२२०
भ्रातुर्व्यच्च ४।१।१४४	८४

म

मघवा बहुलम् ६।४।१२८	२९
मध्यान्मः ४।३।८	८९
मन्यकर्मण्यना० २।३।१७	६५
मयूरव्यंसकाद० २।१।७२	७५
मस्जिनशोर्झलि ७।१।६०	१७०
मातुरुत्संख्या० ४।१।११५	८३
मातृष्वसुश्च ४।१।१३४	८४
मादुपधायाश्च० ८।२।९	९८
मितां ह्रस्वः ६।४।९२	१९४
मिदचोऽन्त्या० १।१।४७	२६
मुखनासिका० १।१।८	३
मृजेर्वृद्धिः ७।२।११४	१९०
मेर्निः ३।४।८९	११८
मोऽनुस्वारः ८।३।२३	११
म्रियतेर्लुङ्लिङोः १।३।६१	१८०
म्वोश्च ८।२।६५	१७२

य

यः सौ ७।२।११०	५२
यङोऽचि च २।४।७४	१९९
यङो वा ७।३।९४	१९९
यचि भम् १।४।१८	२०
यत्तदेतेभ्यः परि० ५।२।३९	९६
यमरमनमाताम्० ७।२।७३	१३३
यरोऽनुनासिके० ८।४।४५	९
यस्मात्प्रत्ययवि० १।४।१३	१८
यस्य हलः ६।४।४९	१९७
याडापः ७।३।११३	३३
यासुट् परस्मै० ३।४।१०३	११८
युवाल्पयोः कनू० ५।३।६४	१०४
युवावौ द्विवचने ७।२।९२	४८
युवोरनाकौ ७।१।१	८६/२१३
युष्मदस्मदोः० ८।१।२०	५०
युष्मदस्मदोरना० ७।२।८६	४८
युष्मदस्मदोरन्य० ४।३।१	८८
युष्मदस्मद्भ्याम० ७।१।२७	४९
युष्मद्युपपदे समा० १।४।१०५	११४
यूनस्तिः ४।१।७७	६२
यूयवयौ जसि ७।२।९३	४८

सूत्रम्	पृ० सं०
यूस्त्राख्यौ नदी १।४।३	३५
ये च ६।४।१०९	१८४
ये चाभावकर्मणोः ६।४।१६८	८४
येन विधिस्तदन्तस्य १।१।७२	५
येनाङ्गविकारः २।३।२०	६४
ये विभाषा ६।४।४३	१४१
योऽचि ७।२।८९	४८
र	
र ऋतो हलादेः० ६।४।१६१	९५
रदाभ्यां निष्ठातो० ८।२।४२	२१८
रधादिभ्यश्च ७।२।४५	१७०
रलो व्युपधाद्धला० १।२।२६	१९६
राजश्वशुराद्यत् ४।१।१३७	८४
राजाहः सखिभ्यः ५।४।९१	७४
रात्सस्य ८।२।२४	२५
रायो हलि ७।२।८५	२५
राष्ट्रावारपारा० ४।२।९३	८७
रिङ् शयग्लिङ्क्षु ७।४।२८	१३०
रि च ७।४।५१	१२०
रीगृदुपधस्य च ७।४।९०	१९७
रीङृतः ७।४।२७	९०/१९८
रुग्रिकौ च लुकि ७।४।९१	२००
रुच्यर्थानां प्रीय० १।४।३३	६४
रुदविदमुषग्रहि० १।२।८	१९६
रुदश्च पञ्चभ्यः ७।३।९८	१५८
रुदादिभ्यः सार्व० ७।२।७६	१५८
रुधादिभ्यः श्नम् ३।१।७८	१८१
रोः सुपि ८।३।१६	३२/५५
रो रि ८।३।१४	१४
रोऽसुपि ८।२।६९	४५
र्वोरुपधायाः० ८।२।७६	३१
ल	
लः कर्मणि च० ३।४।६९	११३
लः परस्मैपदम् १।४।९९	११४
लङ्ः शाकटायन० ३।४।१११	१५९
लटः शतृशानचा० ३।२।१२४	२१५
लट् स्मे ३।२।११८	२०९
लशक्वतद्धिते १।३।८	१७
लस्य ३।४।७७	११४
लिङः सलोपोऽन० ७।२।७९	११९
लिङः सीयुट् ३।४।१०२	१४३
लिङाशिषि ३।४।११६	१२३
लिङ्निमित्ते० ३।३।१३९	१२०
लिङ्सिचावा० १।२।११	१६४
लिङ् सिचोरात्म० ७।२।४२	१७६
लिटस्तझयोरेशि० ३।४।८१	१४५
लिटि धातोरनभ्या० ६।१।८	१२२
लिट् च ३।४।११५	१२२
लिट्यन्यतरस्याम् २।४।४०	१५३
लिट्यभ्यासस्यो० ६।१।१७	१४०
लिपिसिचिह्नश्च ३।१।५३	१५२
लुग्वा दुहदिह० ७।३।७३	१६४
लुङ् ३।२।११०	१२१
लुङि च २।४।४३	१५४
लुङ्लङ्लृङ्० ६।४।७१	११७

सूत्रम्	पृ० सं०
लुङ्सनोर्घस्लृ २।४।३७	१५३
लुटः प्रथमस्य० २।४।८५	१२०
लृटः सद्वा ३।३।१४	२१६
लृट् शेषे च ३।३।१३	१११
लोटो लङ्वत् ३।४।८५	११८
लोट् च ३।३।१६२	११७
लोपः शाकल्यस्य ८।३।१९	८
लोपश्चास्यान्य० ६।४।१०७	१२६
लोपो यि ६।४।११८	१६७
लोपो व्योर्वलि ६।१।६६	१११
ल्वादिभ्यः ८।२।४४	२१८

व

वच उम् ७।४।२०	१५९
वचिस्वपियजादीनाम्० ६।१।१५	३७/१४१
वदव्रजहलन्तस्या० ७।२।३	१३६
वयसि प्रथमे ४।१।२०	६०
वर्णदृढादिभ्यः ष्यञ् च ५।१।१२३	९५
वर्तमानसामीप्ये० ३।३।१३१	२०९
वर्तमाने लट् ३।२।१२३	११३
वसुस्रंसुध्वंस्वन० ८।२।७२	३०
वसोः सम्प्रसार० ६।४।१३१	३०
वाक्यादेरामन्त्रि० ८।१।८	१०९
वाचो ग्मिनिः ५।२।१२४	९९
वाजृभ्रमुत्रसाम् ६।४।१२४	१३७
वा द्रुहमुहष्णुह० ८।२।३३	४१/१७१
वान्तो यि प्रत्यये ६।१।७९	९१
वान्यस्य संयोगा० ६।४।६८	१३३
वा पदान्तस्य ८।४।५९	११
वा भ्राशम्लाश० ३।१।७०	१३७
वाऽऽमि १।४।५	३६
वाऽम्शसोः ६।४।८०	३५
वारणार्थानामी १।४।२७	६५
वा लिटि २।४।५५	१६१
वाऽवसाने ८।४।५६	१९
वा शरि ८।३।३६	१३/३१
वाऽसरूपोऽस्त्रि० ३।१।९४	२१२
विंशत्यादिभ्यः० ५।२।५६	९७
विज इट १।२।२	१८०
विदांकुर्वन्त्वित्य० ३।१।४१	१५६
विदेः शतुर्वसुः ७।१।३६	२१६
विदो लटो वा ३।४।८३	१५६
विद्यायोनिसंब० ४।३।७७	९०
विधिनिमन्त्रणा० ३।३।१६१	११८
विन्मतोर्लुक् ५।३।६५	१०४
विपराभ्यां जेः १।३।१९	२०४
विप्रतिषेधे परं कार्यम् १।४।२	१४
विभक्तिश्च १।४।१०४	४,१७,११५
विभाषाऽकर्मकात् १।३।८५	२०४
विभाषा कृवृषोः ३।१।१२०	२१२
विभाषा घ्राधेट्० २।४।७८	१३२
विभाषा ङिश्योः ६।४।१३६	२९
विभाषा चेः ७।३।५८	१७५
विभाषा लुङ्लृङोः २।४।५०	१६०
विभाषा साति० ५।४।५२	१०८
विभाषा सृजिदृशोः ७।२।६५	१४०

सूत्रम्	पृ० सं०
विभाषेटः ८।३।७९	१४७
विशेषणं विशेष्ये २।१।५७	७२
विसर्जनीयस्य सः ८।३।३४	११
वृद्धस्य च ५।३।६२	१०३
वृद्धाच्छः ४।२।११४	८८
वृद्धिरादैच् १।१।१	६
वृद्धिरेचि ६।१।८८	६
वृद्धिर्यस्याचामा० १।१।७३	८८
वृद्भ्यः स्यसनोः १।३।९२	१४८
वृतो वा ७।२।३८	१३१
वेरपृक्तस्य ६।१।६७	३७
वोतो गुणवचनात् ४।१।४४	६०
वोपसर्जनस्य ६।३।८२	७७
व्यथो लिटि ७।४।६८	१४९
व्याङ्परिभ्यो रमः १।३।८३	१४८
व्रश्चभ्रस्जसृजमृज० ८।२।३६	३८

श

शदेः शितः १।३।६०	१८०
शप्श्यनोर्नित्यम् ७।१।८१	५९
शब्दवैरकलहा० ३।१।१७	२०२
शमामष्टानां दीर्घः ७।३।७४	१७१
शरीरावयवाद्यत् ५।१।६	९३
शर्पूर्वाः खयः ७।४।६१	१३३
शल इगुपधादनि०३।१।४५	१३९/१६४
शश्छोऽटि ८।४।६३	१०
शसो न ७।१।२९	४८
शात् ८।४।४४	१७७
शास इदङ्हलोः ६।४।३४	१५५
शासिवसिघसीनां च ८।३।६०	१४१
शा हौ ६।४।३५	१५५
शिल्पम् ४।४।५५	९२
शिवादिभ्योऽण् ४।१।११२	८३
शि सर्वनामस्थानम् १।१।४२	४३
शीङः सार्वधातुके० ७।४।२१	१६०
शीङो रुट् ७।१।६	१६०
शीलम् ४।४।६१	९२
शुषः कः ८।२।५१	२१८
शे मुचादीनाम् ७।१।५९	१७८
शेषात्कर्तरि पर० १।३।७८	११४
शेषाद्विभाषा ५।४।१५४	७६
शेषे ४।२।९२	८७
शेषे प्रथमः १।४।१०८	११५
शेषे लोपः ७।२।९०	४८
शेषो घ्यसखि १।४।७	२०
शेषो बहुव्रीहिः २।२।२३	७०/७६
श्नसोरल्लोपः ६।४।१११	१५७
श्नान्नलोपः ६।४।२३	१८२
श्नाभ्यस्तयोरातः ६।४।११२	१६७
श्रिणीभुवोऽनुपसर्गे ३।३।२४	२२२
श्रुवः शृच ३।१।७४	१२६
श्युकः किति ७।२।११	१७५
श्लिष आलिङ्गने ३।१।४६	१७०
श्लौ ६।१।१०	१६६
श्वयुवमघोनामत० ६।४।१३३	२९

सूत्रम्	पृ० सं०
ष	
षट्कतिकतिपय० ५।२।५१	९७
षट्चतुर्भ्यश्च ७।१।५५	५५
षड्भ्यो लुक् ७।१।२२	५४
षढोः कः सि ८।२।४१	१३९
षष्ठी २।२।८	७१
षष्ठी शेषे २।३।५०	६५
षिद्गौरादिभ्यश्च ४।१।४१	६०
षिद्भिदादिभ्योऽङ् ३।३।१०४	२२३
ष्टुना ष्टुः ८।४।४१	९
ष्ठिवुक्लमुचमां शिति ७।३।७५	१३८
ष्णान्ता षट् १।१।२४	५५
स	
सः स्यार्धधातुके ७।४।४९	१४०
संयोगादेरातो धातो० ८।२।४३	२१८
संस्कृतम् ४।४।३	९१
संहितशफलक्ष० ४।१।७०	६२
सख्युरसंबुद्धौ ७।१।९२	२२
सख्युर्यः ५।१।१२६	९६
संख्ययाऽव्ययासन्ना० २।२।२५	७७
संख्यापूर्वो द्विगुः २।१।५२	७३
संख्याया अवयवे० ५।२।४२	९७
संख्यायाः क्रिया० ५।४।१७	१०६
संख्याया विधार्थे० ५।३।४२	१०२
संख्यैकवचना० ५।४।४३	१०७
सत्यापपाशरूप० ३।१।२५	१८८
सद्यः परुत्परार्यैष० ५।३।२२	१०२

सूत्रम्	पृ० सं०
स नपुंसकम् २।४।१७	७३
सनाद्यन्ता धातवः ३।१।३२	१११/१८८
सनाशंसभिक्ष उः ३।२।१६८	२२०
सनि ग्रहगुहोश्च ७।२।१२	१९५
सन्यङोः ६।१।९	१९५
सन्यतः ७।४।७९	१८९
सन्लिटोर्जेः ७।३।५७	१२८
सन्वल्लघुनि चङ्० ७।४।९३	१८९
सप्तमीविशेषणे० २।२।३५	७६
सप्तमी शौण्डैः २।१।४०	७१
सप्तम्यधिकरणे च २।३।३६	६६
सप्तम्यां जनेर्डः ३।२।९७	२१५
सप्तम्यास्त्रल् ५।३।१०	१००
समः समि ६।३।९३	३९
समर्थः पदविधिः २।१।१	६७
समर्थानां प्रथमा० ४।१।८२	५९/८२
समवप्रविभ्यः स्थः १।३।२२	२०४
समवाये च ६।१।१३८	१८५
समानकर्तृकयोः० ३।४।२१	२२४
समासेऽनञ्पूर्वे० ७।१।३७	७४/२२४
समाहारः स्वरितः १।२।३१	३
संपर्युपेभ्यः करोतौ० ६।१।१३७	१८५
संप्रसारणाच्च ६।१।१०८	२९
संबुद्धौ च ७।३।१०६	३४
संबोधने च २।३।४७	६३
सरूपाणामेकशेष० १।२।६४	१७
सर्तिशास्त्यर्ति० ३।१।५६	१२९
सर्वनामस्थाने चासं० ६।४।८	२२

सूत्रम्	पृ० सं०
सर्वनाम्नः स्मै ७।१।१४	४६
सर्वनाम्नः स्याड्० ७।३।११४	४७
सर्वस्य द्वे ८।१।१	१०९
सर्वस्य सोऽन्यत० ५।३।६	१०१
सर्वैकान्यकिंयत्तदः० ५।३।१५	१००
सवाभ्यां वामौ ३।४।९१	१४३
ससजुषो रुः ८।२।६६	१३
सहयुक्तेऽप्रधाने २।३।१९	६४
सहस्य सध्रिः ६।३।९५	३९
सहिवहोरोदवर्णस्य ६।३।११२	१५२
सात्पदाद्योः ८।३।१११	१०८
साधकतमं करणम् १।४।४२	६४
सान्तमहतः संयोगस्य ६।४।१०	२६/३०
साम आकम् ७।१।३३	४९
सायंचिरंप्राह्णेप्रगे० ४।३।२३	८९
सार्वधातुकमपित् १।२।४	१२६
सार्वधातुकार्धधा० ७।३।८४	११५
सार्वधातुके यक् ३।१।६७	२०६
सावनडुहः ७।१।८२	४२
सास्मिन्पौर्णमासीति ४।२।२१	८५
सास्य देवता ४।२।२४	८५
सिचि च परस्मैपदेषु ७।२।४०	१३१/१७६
सिचि वृद्धिः परस्मै० ७।२।१	१२७
सिजभ्यस्तविदि० ३।४।१०९	१२७
सिति च १।४।१६	८८
सिपि धातो रुर्वा ८।२।७४	१५५
सुखादिभ्यः कर्तृवे० ३।१।१८	२०२

सूत्रम्	पृ० सं०
सुट् कात्पूर्वः ६।१।१३५	१८५
सुट् तिथोः ३।४।१०७	११८
सुडनपुंसकस्य १।१।४३	२०
सुप आत्मनः क्यच् ३।१।८	२०१
सुपि च ७।३।१०२	१८
सुपो धातुप्राति० २।४।७१	६७
सुप्तिङन्तं पदम् १।४।१४	४
सुप्यजातौ णिनिस्ता० ३।२।७८	२१५
सृजिदृशोर्झल्य० ६।१।५८	१३९
सेर्ह्यपिच्च ३।४।८७	११८
सेऽसिचि कृतचृत० ७।२।५७	१७२
सोऽस्य निवासः ४।३।८९	८७/९०
सौ च ६।४।१३	२७
स्कोः संयोगाद्योर० ८।२।२९	१२३
स्तुसुधूञ्भ्यः परस्मै० ७।२।७२	१६३
स्तोः श्चुना श्चुः ८।४।४०	९
स्त्रियाः ६।४।७९	३५
स्त्रियाः पुंवद्भाषित० ६।३।३४	७७
स्त्रियाम् ४।१।३	५९
स्त्रियां क्तिन् ३।३।९४	२२३
स्त्रीभ्यो ढक् ४।१।१२०	८३
स्थाघ्वोरिच्च १।२।१७	१६९
स्थानिवदादेशो० १।१।५६	१८
स्थानेऽन्तरतमः १।१।५०	६
स्थूलदूरयुवह्रस्व० ६।४।१५६	१०४
स्पृशोऽनुदके क्विन् ३।२।५८	४०
स्पृहेरीप्सितः १।४।३६	६४
स्यतासी लृलुटोः ३।१।३३	११९

सूत्रम्	पृ० सं०
स्यसिच्सीयुट्ता० ६।४।६२	२०६
स्रवतिश्रृणोतिद्रवति० ७।४।८१	१९३
स्वं रूपं शब्दस्या० १।१।६८	२
स्वतन्त्रः कर्ता १।४।५४	६३/१९२
स्वमोर्नपुंसकात् ७।१।२३	४३
स्वरतिसूतिसूयति० ७।२।४४	१४९
स्वरादिनिपातम० १।१।३७	५७
स्वरितञितः कर्त्र०१।३।७२	११४/१५०
स्वसुश्छः ४।१।१४३	८४
स्वाङ्गाच्चोपसर्ज० ४।१।५४	६१
स्वादिभ्यः श्नुः ३।१।७३	१७५
स्वादिष्वसर्वना० १।४।१७	२७
स्वौजसमौट्छष्टा० ४।१।२	१६
ह	
ह एति ७।४।५२	१४४
हनो वध लिङि २।४।४२	१५५
हन्तेर्जः ६।४।३६	१५४
हलः श्नः शानज्झौ ३।१।८३	१८६
हलदन्तात्सप्तम्याः० ६।३।९	७६
हलन्ताच्च १।२।१०	१९६
हलन्त्यम् १।३।३	२
हलश्च ३।३।१२१	२२३
हलस्तद्धितस्य ६।४।१५०	९५
हलादिः शेषः ७।४।६०	१२२
हलि च ८।२।७७	१३२
हलि लोपः ७।२।११३	५१
हलि सर्वेषाम् ८।३।२२	१४
हल्ङ्याब्भ्यो दीर्घात्० ६।१।६८	२२
हशि च ६।१।११४	१३
हुझल्भ्यो हेर्धिः ६।४।१०१	१५३
हुश्नुवोः सार्वधातुके ६।४।८७	१२६
हृदयस्य हृल्लेखयद० ६।३।५०	७१
हेतुमति च ३।१।२६	१९२
हेतुहेतुमतोर्लिङ् ३।१।१५६	२०९
हेरचङि ७।३।५६	१७७
हो ढः ८।२।३१	४१
होहन्तेर्ञ्णिन्नेषु ७।३।५४	२९/१५४
ह्म्यन्तक्षणश्वसजा० ७।२।५	१३७
ह्रस्वः ७।४।५९	१२२
ह्रस्वनद्यापो नुट् ७।१।५४	१९
ह्रस्वस्य गुणः ७।३।१०८	२१
ह्रस्वस्य पिति कृति०६।१।७१,७४/२१२	
ह्रस्वादङ्गात् ८।२।२७	१५०
ह्रस्वो नपुंसके० १।२।४७	४४/६८

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय:
श्रुतम् मे गोपाय